मतुरनुम इति विभक्तेरुदात्तत्वं। विभावः। विशिष्टा भा विभाः। आतो मनिन्निति विच्। तदस्यास्तीति मतुप्। मादुपधाया इति मतुपो वत्वं। मतुवसो रुरिति नकारस्य रुत्वं। मघवद्भिः। मघवा बहुलं। पा॰ ६. ४. १२८.। इति मघवन्शब्दस्य तृ आदेशः। स च नानुवंधकृतमनेकाल्त्वं। पा॰ १. १. ५५. १.। इति वचनात् अलोऽंत्यस्य। पा॰ १. १. ५२.। इत्यंत्यस्य भवति। मक्षू। ऋचि तुनुघमक्षुत्विति दीर्घः। धियावसुः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पूर्वपदस्य सावेकाच इति विभक्तिरुदात्ता। लुगभावश्छांदसः। जगम्यात्। गम्लृ सृप्लृ गतौ। लिङि बहुलं छंदसीति शपः श्लुः॥

॥ इति प्रथमस्य चतुर्थे चतुर्विंशो वर्गः॥

वया इदिति सप्तर्चं द्वितीयं सूक्तं नोधस आर्षं त्रैष्टुभं। वैश्वानरगुणकोऽग्निर्देवता। तथा चानुक्रांतं। वया इत्सप्त वैश्वानरीयमिति॥ सूक्तविनियोगो लिंगादवगंतव्यः॥

तत्र प्रथमामृचमाह॥

वया इदग्ने अग्नयस्ते अन्ये त्वे विश्वे अमृता मादयंते।
वैश्वानर नाभिरसि क्षितीनां स्थूणेव जनाँ उपमिद्ययंथ॥१॥

वयाः। इत्। अग्ने। अग्नयः। ते। अन्ये। त्वे इति।
विश्वे। अमृताः। मादयंते।
वैश्वानर। नाभिः। असि। क्षितीनां। स्थूणाऽइव।
जनान्। उपऽमित्। ययंथ॥ १॥

वयाः शाखा वेतेर्वातायना भवंतीति यास्कः। नि॰ १. ४.। हे अग्ने येऽन्येऽग्नयः संति ते सर्वेऽपि ते तव वया इत्। शाखा एव। ततस्त्वत्तोऽन्ये न संतीति भावः। किंच त्वे त्वयि

सति विश्वे सर्वेऽमृता अमरणधर्माणो देवा मादयंते । हृष्यंति । न हि त्वद्यतिरेकेण तैर्जीवितुं शक्यते । हे वैश्वानर विश्वेषां नराणां जठररूपेण संबंधिन्नग्ने चितीनां मनुष्याणां नाभिः संनद्धासि । अवस्थापको भवसि । अतस्त्वमुपमिदुपस्थापयिता सन् । यद्वा । उपमिदित्येतद्दृष्टांतविशेषणं । जनान्ययंथ । अधारयः । तत्र दृष्टांतः । उपमिदुपनिखाता स्थूणेव । वंशधारणार्थं निखातः स्तंभो यथा गृहोपरिस्थं वंशं धारयति तद्वत् ॥ वैश्वानर । विश्वे चेमे नरा विश्वानराः । नरे संज्ञायां । पा० ६. ३. १२९. । इति पूर्वपदस्य दीर्घः । तत्संबंधी वैश्वानरः । तस्येदमित्यण् । नाभिः । नह्यो भश्चेतीञ्प्रत्ययो भकारश्चांतादेशः । ञित्त्वादाद्युदात्तत्वं । असि । तासस्त्योर्लोप इति सलोपः । चितीनां । चि निवासगत्योः । अस्मात् क्तिच्क्तौ च संज्ञायामिति क्तिच् । अंतोदात्तात्चितिशब्दादुत्तरस्य नामो नामन्यतरस्यामित्युदात्तत्वं । उपमित् । डुमिञ् प्रक्षेपणे । अस्मादुपपूर्वाद्बाहुलवचनात्कर्मणि क्विप् । तुगागमः । ययंथ । यम उपरमे । लिटि थलि क्रादिनियमादिटि प्राप्त उपदेशेऽत्वतः । पा० ७. २. ६२. । इति प्रतिषेधः ॥

विषुवत्संज्ञेऽहन्याग्निमारुते मूर्द्धा दिवो नाभिरग्निः पृथिव्या इति वैकल्पिकोऽनुरूपस्तृचः । विषुवान्दिवा कीर्त्य इति खंडे सूत्रितं । मूर्द्धानं दिवो अरतिं पृथिव्या मूर्द्धा दिवो नाभिरग्निः पृथिव्या इति वा । आ० ८. ६. । इति ॥

तत्र प्रथमां सूक्ते द्वितीयामृचमाह ॥

मूर्द्धा दिवो नाभिरग्निः पृथिव्या अथाभवदरती रोदस्योः ।
तं त्वा देवासोऽजनयंत देवं वैश्वानर ज्योतिरिदार्याय ॥२॥

प्रभुं बहुविधया स्तुत्या स्तौति तद्वत्॥ मनुष्यः। मनोर्जाता-वञ्यतौ षुक् चेति जातौ गम्यमानायां मनुशब्दाद्यत् षुगागमश्च। तित्स्वरित इति स्वरितत्वं। यतोऽनाव इत्याद्युदात्तत्वं न भवति। तत्र हि द्व्यजित्यनुवर्तते। स्ववंते। सुपूर्वादवतेर्भावे क्विप्। ततो मतुप्। मादुपधाया इति वत्वं॥

पंचमीमृचमाह॥

दिवश्चित्ते बृहतो जातवेदो वैश्वानर प्र रिरिचे महित्वं।
राजा कृष्टीनामसि मानुषीणां युधा देवेभ्यो वरिवश्च-कर्थ॥ ५॥

दिवः। चित्। ते। बृहतः। जातऽवेदः। वैश्वानर। प्र। रिरिचे। महिऽत्वं।
राजा। कृष्टीनां। असि। मानुषीणां। युधा। देवेभ्यः। वरिवः। चकर्थ॥ ५॥

हे जातवेदो जातानां वेदितर्वैश्वानराग्ने ते तव महित्वं माहात्म्यं बृहतो महतो दिवश्चित् द्युलोकादपि प्ररिरिचे। प्रववृधे। किंच त्वं मानुषीणां मनोर्जातानां कृष्टीनां प्रजानां राजासि। अधिपतिर्भवसि। तथा वरिवोऽसुरैरपहृतं धनं युधा युद्धेन देवेभ्यश्चकर्थ। देवाधीनमकार्षीः॥ वैश्वानर। पादा-दित्वादाष्टमिकनिघाताभावः। रिरिचे। रिचिर् विरेचने। अत्रोपसर्गवशात्तद्विपरीत आधिक्ये वर्तते। कृष्टीनां। नामन्य-तरस्यामिति नाम उदात्तत्वं। मानुषीणां। मानुषशब्दो मनो-र्जातावित्यञ्प्रत्ययांतः। जातिलक्षणे ङीषि प्राप्ते तदपवाद-तया शार्ङ्गरवाद्यञ इति ङीन् नित्त्वादाद्युदात्तत्वं। ङ्याश्छंदसि बहुलं। पा॰ ६. १. १७८.। इति बहुलवचनान्नाम उदात्तत्वा-

भावः । युधा । युध संप्रहार इत्यस्मात्संपदादिलक्षणो भावे क्विप् । वरिव इति धननाम । नब्विषयस्येत्याद्युदात्तत्वं ॥

षष्ठीमृचमाह ॥

प्र नू महित्वं वृषभस्य वोचं यं पूरवो वृत्रहणं सचंते ।
वैश्वानरो दस्युमग्निर्जघन्वाँ अधूनोत्काष्ठा अव शंबरं भेत् ॥ ६ ॥

प्र । नु । महिऽत्वं । वृषभस्य । वोचं । यं । पूरवः । वृत्रऽहनं । सचंते ।
वैश्वानरः । दस्युं । अग्निः । जघन्वान् । अधूनोत् । काष्ठाः । अव । शंबरं । भेत् ॥ ६ ॥

अत्र वैश्वानरशब्देन मध्यमस्थानस्थो वैद्युतोऽग्निरभिधीयते । पूरव इति मनुष्यनाम । पूरवो मनुष्या वृत्रहणमावरकस्य मेघस्य हंतारं यं वैश्वानरं सचंते । वर्षार्थिनः सेवंते । तस्य वृषभस्यापां वर्षितुर्वैश्वानरस्य महित्वं माहात्म्यं नू क्षिप्रं प्रवोचं । प्रब्रवीमि । किं तदित्यत आह । अयं वैश्वानरोऽग्निर्दस्युं रसानां कर्मणां वोपक्षयितारं राक्षसादिकं जघन्वान् हतवान् । तथा काष्ठा अपो वृष्ट्युदकान्यधूनोत् । अधोमुखान्यपातयत् । शंबरं तं निरोधकारिणं मेघमवभेत् । अवाभिनत् ॥ वोचं । छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ्यस्यतिवक्तीत्यादिना च्लेरङादेशः । वच उमित्युमागमः । गुणः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । जघन्वान् । हंतेर्लिटः क्वसुः । अभ्यासाच्चेत्यभ्यासादुत्तरस्य हकारस्य घत्वं । विभाषा गमहनेति विकल्पनादिडभावः । भेत् । भिदिर् विदारणे । लङि बहुलं छंदसीति विकरणस्य लुक् । हल्ङ्याब्भ्य इति तकारस्य लोपः ।

पूर्ववद्डभावः ॥ अत्र निरुक्तं । प्र ब्रवीमि तन्महत्त्वं महाभाग्यं वृषभस्य वर्षितुरपां यं पूरवः पूरयितव्या मनुष्या वृत्रहणं मेघहनं सचंते सेवंते वर्षकामा दस्युर्दस्यतेः क्षयार्थादुपदस्यं- त्यस्मिन्नसा उपदासयति कर्माणि तमग्निर्वैश्वानरो घ्नन्नवा- धूनोदपः । काष्ठा अभिनच्छंबरं मेघं । नि० ७. २३. । इति ॥ अत्रेदं चिंतनीयं । कोऽसौ वैश्वानर इति । तत्र केचिदाहुः । मध्यमस्थानस्थो वायुरिंद्रो वा वैश्वानरः । तस्य हि वर्षकर्मणा संस्तव उपपद्यते । न त्वग्नेः पृथिवीस्थानत्वादिति । अन्ये त्वेवं मन्यंते । द्युस्थानः सूर्यो वैश्वानर इति । युक्तिं चाहुः । प्रातः- सवनादीनि त्रीणि सवनानि लोकत्रयात्मकानि । तत्र तृतीय- सवनं प्राप्तो यजमानः स्वर्गं प्राप्त इति पृथिव्याः प्रच्युतो भवेत् । तत्प्रच्युतिपरिहारायाग्निमारुतेऽतिमे शस्त्रे होता स्वर्गाद्भूमिं प्रत्यवरोहति । कथमिति तदुच्यते । इतरशस्त्रवत् । स्तोत्रिय- तृचेन प्रारंभमुक्त्वा द्युस्थानसंबंधिना वैश्वानरीयेण सूक्तेन शस्त्रं प्रारभते । ततो मध्यमस्थानसंबंधिनं रुद्रं मरुतश्च प्रति तद्देवत्य- सूक्तपाठेनावरोहति । तत्र पृथिवीस्थानमग्निं । यद्यत्र वैश्वानरः सूर्यो न स्यात् तदानीमवरोहो नोपपद्यते । तदेतन्मतद्वय- मप्यनुपपन्नं । अयमेवाग्निर्वैश्वानरः । कुतः । वैश्वानरशब्द- निर्वचनानुरोधात् । विश्वेषां नराणां लोकांतरं प्रति नेतृतया संबंधी वैश्वानरः । तथा चाम्नातं । वैश्वानर पुत्रः पित्रे लोक- कृज्जातवेदो वहेमं सुकृतां यत्र लोका इति । यद्वा विश्वे सर्वे नरा एनमग्निं यज्ञादौ प्रीणयंतीति तत्संबंधाद्वैश्वानरः । यद्वा सर्वान्प्राणिनः प्रत्यृतो गच्छत इति विश्वानरौ मध्यमोत्तमौ । ऋ गतावित्यस्मात्पचाद्यच् । लुगभावश्छांदसः । ताभ्यामुत्पन्न-

त्वादयमग्निर्वैश्वानरः । वैद्युतोऽग्निर्हि मध्यमसकाशाज्जायते । अशनिपतनानंतरमयमेव पार्थिवोऽग्निः संपद्यते । आदित्यसकाशादपि घर्मकाले सूर्यकांतादिमणिष्वग्नेरुत्पत्तिः प्रसिद्धा । तस्मान्नामनिर्वचनानुरोधेनायमेवाग्निर्वैश्वानर इत्येतदुपपन्नं । अस्यापि वर्षकर्मणा स्तुतिः संभवति । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति स्मरणात् । प्रत्यवरोहोऽपि न कर्तव्यः । तृतीयसवनस्य भक्तास्वर्गत्वात् । एतत्सर्वं यास्केन वैश्वानरः कस्मादित्यादिना बहुधा प्रपंचितं । नि० ७. २१. । अत्र यदनुक्तं तत्सर्वं तत्रैवानुसंधेयं ॥

सप्तमीमृचमाह ॥

वैश्वानरो महिम्ना विश्वकृष्टिर्भरद्वाजेषु यजतो विभावा ।
शातवनेये शतिनीभिरग्निः पुरुणीथे जरते सूनृतावान् ॥७॥

वैश्वानरः । महिम्ना । विश्वऽकृष्टिः । भरत्ऽवाजेषु ।
यजतः । विभाऽवा ।
शातऽवनेये । शतिनीभिः । अग्निः । पुरुऽनीथे । जरते ।
सूनृताऽवान् । ७ ॥

वैश्वानरोऽग्निर्महिम्ना महत्त्वेन विश्वकृष्टिः । कृष्टिरिति मनुष्यनाम । विश्वे सर्वे मनुष्या यस्य स्वभूताः स तथोक्तः । भरद्वाजेषु पुष्टिकरहविर्लक्षणान्नवत्सु यागेषु । यद्वा । एतत्संज्ञ ऋषिषु यजतो यष्टव्यः । विभावा विशेषेण प्रकाशयिता । सूनृतावान् । सूनृता प्रिया सत्या वाक् । तद्युक्तः । एवंभूतोऽग्निः शातवनेये । शतसंख्याकान् क्रतून्वनति संभजत इति शतवनिः । तस्य पुत्रः शातवनेयः । तस्मिन् पुरुणीथे बहूनां

नैतयैतत्संज्ञके राजनि च शतिनोभिर्बहुभिः स्तुतिभिर्जरते स्तूयते॥ भरद्वाजेषु। भरंति पोषयंति भोक्तृनिति भरंतः। तादृशा वाजा येषु। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वे प्राप्ते मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। यजतः। भृमृदृशियजिपर्विपच्यमितमिनमिहर्येभ्योऽतजिति यजतेरतच्प्रत्ययः। विभावा। भा दीप्तौ। आतो मनिन्निति वनिप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। शातवनेये। इन् सर्वधातुभ्य इतीन्प्रत्ययः शतवनिशब्दः। इतश्चानिञः। पा॰ ४. १. १२२.। इति ढक्। कित इत्यंतोदात्तत्वं। शतनीभिः। शतशब्दान्मत्वर्थीय इनिः। ऋन्नेभ्य इति ङीप्। पुरुणीथे। पूर्वपदात्संज्ञायामगः। पा॰ ८. ४. ३.। इति णत्वं। जरते। व्यत्ययेन कर्मणि कर्तृप्रत्ययः॥

॥ इति प्रथमस्य चतुर्थे पंचविंशो वर्गः॥

वह्निमिति पंचर्चं तृतीयं सूक्तं नोधस आर्षं त्रैष्टुभमाग्नेयं अनुक्रांतं च। वह्निं पंचेति॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदं सूक्तमाश्विने शस्त्रे च। तथा च सूत्रितं। वह्निं यशसमुप प्रजिन्वन्निति चोणि। आ॰ ४. १३.। इति॥

तत्र प्रथमामृचमाह॥

वह्निं यशसं विदथस्य केतुं सुप्राव्यं दूतं सद्योअर्थं।
द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वा॥१॥

वह्निं। यशसं। विदथस्य। केतुं। सुप्रऽअव्यं। दूतं।
सद्यःऽअर्थं।
द्विऽजन्मानं। रयिंऽइव। प्रऽशस्तं। रातिं। भरत्। भृगवे।
मातरिश्वा॥ १॥

ल वह्निं हविषां वोढारं यशसं यशस्विनं विदथस्य केतुं यज्ञस्य ज्ञापयितारं सुप्राव्यं सुष्ठु प्रकर्षेण रक्षितारं दूतं देवैर्हविर्वहन-कालये दूत्ये नियुक्तं । सद्योअर्थं । यदा हवींषि जुह्वति सद्यस्त-दानीमेव हविर्भिः सह देवान्गंतारं । यद्वा सद्योऽर्थमरणं गमनं यस्य तं । द्विजन्मानं । द्वयोर्द्यावापृथिव्योररण्योर्वा जायमानं । रयिमिव । धनमिव प्रशस्तं प्रख्यातं । एवंभूतमग्निं मातरिश्वा वायुर्भृगव एतत्संज्ञकाय महर्षये रातिं भरत् । मित्रमहरत् । अकरोदित्यर्थः । रातिना संभाष्येत्यत्र रातिर्मित्रमिति कपर्दि-नोक्तं । रातिः पुत्र इत्येके । एतदर्थप्रतिपादकं मंत्रांतरं च भवति । रातिं भृगूणामुशिजं कविक्रतुमिति ॥ वह्निं । वहि-श्रियुश्रुग्लाहात्वरिभ्यो निदिति वहतेर्निप्रत्ययः । निदत्त्वादाद्यु-दात्तत्वं । यशसं । यशस्शब्दादुत्तरस्य विनो लुक् । व्यत्ययेनां-तोदात्तत्वं । यद्वा । अर्शआदित्वादच् । स्वरः पूर्ववत् । सुप्राव्यं । सुष्ठु प्रकर्षेणावति रक्षतीति सुप्रावीः । उपसर्गद्वयो-पपदादवतेरवितृस्तृतंत्रिभ्य ईः । उ० ३. १५६. । इतीकार-प्रत्ययः । वा छंदसीत्यमि पूर्व इत्यस्य विकल्पे सति यणादेशः । उदात्तस्वरितयोर्यण इति स्वरितत्वं । सद्योअर्थं । उषिकुषि-गार्तिभ्यस्थन्नित्यर्तेः कर्तरि थन्प्रत्ययः । सद्य एवार्थो गंता सद्योअर्थः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । यदि त्वव्यये नञ्कु-निपातनामिति वक्तव्यं । पा० ६. २. २. १. । इत्यव्ययग्रहणेन वितयं गृह्येत । तर्हि बहुव्रीहिस्वरो भविष्यति । मातरिश्वा । सर्वनिर्माणहेतुत्वान्मातांतरिक्षं । श्वसितिरत्र गतिकर्मा । मा-तर्यंतरिक्षे श्वसिति गच्छतीति मातरिश्वा । श्वन्नुक्षन्नित्यादौ निपातनाद्रूपसिद्धिः । यद्वा मातर्यंतरिक्षे श्वाश्वसति गच्छतीति

मातरिश्वा । असु मतिदीप्त्यादानेष्वित्यस्मादौणादिको डन्प्रत्ययः । एतच्च यास्केनोक्तं । नि० ७. २६. ॥

द्वितीयामृचमाह ॥

अस्य शासुरुभयासः सचंते हविष्मंत उशिजो ये च मर्ताः ।
दिवश्चित्पूर्वो न्यसादि होतापृच्छ्यो विश्पतिर्विक्षु
वेधाः ॥ २ ॥

अस्य । शासुः । उभयासः । सचंते । हविष्मंतः । उशिजः ।
ये । च । मर्ताः ।
दिवः । चित् । पूर्वः । नि । असादि । होता । आऽपृच्छ्यः ।
विश्पतिः । विक्षु । वेधाः ॥ २ ॥

शासुः शासितुरस्याग्नेरुभयास उभयेऽपि देवा मनुष्याश्च । यद्वा । स्तुतिभिः स्तोतारो यज्ञैर्यजमानाश्चेममग्निं शासितारं सचंते । सेवंते । उशिजः कामयमाना देवा हविष्मंतो हविषा युक्ता ये च मर्ता मरणधर्माणो यजमानाः । यद्वा । उशिज इति मेधाविनाम । उशिजो मेधाविनः स्तोतारो हविष्मंतो हविर्युक्ता मर्ता यजमानाः । किंच । अयं होता होमनिष्पादकोऽग्निर्दिवश्चित् आदित्यादपि पूर्वं उषःसु वर्तमानो भूत्वाग्निहोत्रहोमार्थं विक्षु यजमानेषु न्यसादि । अध्वर्युणाग्न्यायतने न्यधायि । निस्थाप्यते । कीदृशो होता । आपृच्छ्यः । आप्रष्टव्यः पूज्य इत्यर्थः । विश्पतिः । विशां प्रजानां पालयिता । वेधाः । विधाताभिमतफलस्य कर्ता ॥ शासुः । शासु अनुशिष्टौ । तृन्तृचौ शंसिक्षदादिभ्यः संज्ञायां चानिटौ । उ० २. ९०. । इति तृन् । इडागमाभावश्च । षष्ठ्येकवचने तकारलोपश्छांदसः । नित्त्वादाद्युदात्तत्वं ।

उशिजः । वश कांताविति वष्टेरिजिप्रत्ययः । ग्रहिज्यादिना संप्रसारणं । मर्ताः । मृङ् प्राणत्यागे । असिहसिमृग्रिण्वामी-त्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । आपृच्छ्यः । प्रच्छ ज्ञीप्सायां । आङ्पूर्वादस्माच्छंदसि निष्टर्क्येत्यादौ क्यप्प्रत्ययो निपातितः । ग्रहिज्यादिना संप्रसारणं । क्यपः पित्त्वादनु-दात्तत्वे धातुस्वरः शिष्यते । विश्पतिः । पत्यावैश्वर्यं इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते परादिश्छंदसि बहुलमित्युत्तरपदांतो-दात्तत्वं ॥

तृतीयामृचमाह ॥

तं नव्यसी हृद आ जायमानमस्मत्सुकीर्तिर्मधुजिह्व-
मश्याः ।
यमृत्विजो वृजने मानुषासः प्रयस्वंत आयवो
जीजनंत ॥ ३ ॥

तं । नव्यसी । हृदः । आ । जायमानं । अस्मत् । सुऽकीर्तिः । मधुऽजिह्वं । अश्याः ।
यं । ऋत्विजः । वृजने । मानुषासः । प्रयस्वंतः । आयवः । जीजनंत ॥ ३ ॥

नव्यसी नवतरा सुकीर्तिः सुष्ठु कीर्तयित्र्यस्मत् अस्माकं स्तुतिर्हृदो हृदयवस्थितात्प्राणाज्जायमानमुत्पद्यमानं । अग्निर्हि वायोरुत्पद्यते वायुश्च प्राण एव । यः प्राणः स वायुरित्याम्ना-नात् । मधुजिह्वं मादयितृज्वालं । एवंभूतं तमग्निमाश्याः । आभिमुख्येन व्याप्नोतु । वृजने संग्रामे प्राप्ते सत्यायवो मनुष्या यमग्निं जीजनंत । यज्ञार्थमुदपादयन् । कीदृशा मनुष्याः । ऋत्विजः । ऋतौ काले यष्टारः । मानुषासः । मनोः पुत्राः ।

प्रयस्वंतः। हविर्लचणान्नोपेताः॥ नव्यसी। नवीयसीत्यत्वे-कारलोपश्छांदसः। हृदः। अत्र हृदयशब्देन तत्स्थः प्राणो लक्ष्यते। पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः। जायमानं॥ जनी प्रादुर्भावे। श्यनि ज्ञाजनोर्जेति जादेशः। अदुपदेशाल्ल-सार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं। अस्मत्॥ सुपां सुलुगिति विभक्तेर्लुक्। अश्याः। अशू व्याप्तौ। लिङि बहुलं छंदसीति विकरणस्य लुक्। व्यत्ययेन परस्मैपदमध्यमौ॥ जीजनंत। जनी प्रादुर्भावे। ण्यंतात्ल्लुङि च्लेश्चङादेशः॥ द्विर्भावहलादिशेषः। सन्वल्लघुनीत्वदीर्घाः। अदुपदेशाल्लसार्व-धातुकानुदात्तत्वे चङ एव स्वरे प्राप्ते व्यत्ययेनाभ्यस्ताद्यु-दात्तत्वं॥

चतुर्थीमृचमाह॥

उशिक्पावको वसुर्मानुषेषु वरेण्यो होताधायि विक्षु।
दमूना गृहपतिर्दम आँ अग्निर्भुवद्रयिपती रयीणां॥ ४॥

उशिक्। पावकः। वसुः। मानुषेषु। वरेण्यः। होता।
अधायि। विक्षु।
दमूनाः। गृहऽपतिः। दमे। आ। अग्निः। भुवत्।
रयिऽपतिः। रयीणां॥ ४॥

उशिक् कामयमानः पावकः शोधको वसुर्निवासयिता वरेण्यो वरणशीलः। एवंभूतो होताग्निर्विक्षु यज्ञगृहं प्रविष्टेषु मानुषेषु यजमानेष्वधायि। स्थाप्यते। स चाग्निर्दमूना रक्षसां दमनकरेण मनसा युक्तो गृहपतिर्गृहाणां पालयिता च सन्दमे यज्ञगृहे रयिपतिर्धनाधिपतिराभुवत्। आ समंताद्भवति। न केवलमेकस्य रायोऽपि तु सर्वेषामित्याह रयीणामिति। यद्वा।

रयीणां मध्य उत्कृष्टं यद्धनं तस्य पतिरित्यर्थः ॥ अधायि । छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लुङि चेरिणादेश आतो युक् चिण्कृतोरिति युगागमः । दमयति राक्षसादिकमिति दमूनाः । दम उपशमे । दमेरूनसिः । उ० ४. २३४. । इत्यौणादिक ऊनसिप्रत्ययः । यास्कस्त्वाह । दमूना दममना वा दानमना वा दांतमना वापि वा दम इति गृहनाम । तन्मना स्यात् । नि० ४. ४. । इति । दम आँ अग्निः । आङोऽनुनासिकश्छंदसीत्याकारस्य सानुनासिकत्वं । प्रकृतिभावश्च । भुवत् । लेट्यडागमः । इतश्च लोप इतीकारलोपः । रयिपतिः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । रयीणां । नामन्यतरस्यामिति नाम उदात्तत्वं ॥

पंचमीमृचमाह ॥

तं त्वा वयं पतिमग्ने रयीणां प्र शंसामो मतिभिर्गोतमासः ।
आशुं न वाजंभरं मर्जयंतः प्रातर्मक्षू धियावसुर्ज-
गम्यात् ॥ ५ ॥

तं । त्वा । वयं । पतिं । अग्ने । रयीणां । प्र । शंसामः ।
मतिऽभिः । गोतमासः ।
आशुं । न । वाजंऽभरं । मर्जयंतः । प्रातः । मक्षू ।
धियाऽवसुः । जगम्यात् ॥ ५ ॥

गोतमासो गोतमगोत्रोत्पन्ना वयं । नोधसः स्तोतुरेकत्वेऽप्यात्मनि पूजार्थं बहुवचनं । हे अग्ने रयीणां धनानां पतिं रक्षितारं तादृशं त्वां मतिभिर्मननीयैः स्तोत्रैः प्रशंसामः । प्रकर्षेण स्तुमः । किं कुर्वंतः । वाजंभरं वाजस्य हविर्लक्षणान्नस्य भर्तारं त्वां मर्जयंतो मार्जयंतः । तत्र दृष्टांतः । आशुं

नं । अश्वमिव । यथाश्वमारोहंतः पुरुषास्तस्य वहनप्रदेशं हस्तैर्निमृजंति । तद्वदयमप्यग्नेर्हविर्वहनप्रदेशं निमृजंत इत्यर्थः । तथा चाग्निसंमार्जनप्रकरणे वाजसनेयिभिराम्नातं । अथ मध्ये तूष्णीमिव त्रिः संमार्ष्टि । यथा युक्त्वा प्रेहि वहेति व्रजेदेवमेतदग्निं युक्त्वोपचिपति प्रेहि देवेभ्यो हव्यं वहेति । धियावसुः कर्मणा बुद्ध्या वा प्राप्तधनः सोऽग्निः प्रातः श्वाभूतस्य ह्नः प्रातःकाले मचू शीघ्रं जगम्यात् । आगच्छतु ॥ मतिभिः । मन ज्ञान इत्यस्मात्कर्मणि क्तिन् । मंत्रे वृषेषेत्यादिना तस्योदात्तत्वं । वाजंभरं । अग्नेरेषा वैदिकी संज्ञा । संज्ञायां भृतृवृजीति । पा० ३. २. ४६. । वाजशब्दे कर्मण्युपपदे खच्प्रत्ययः । अरुर्द्विषदजंतस्य मुम् । पा० ६. ३. ६७. । इति मुमागमः । चित इत्यंतोदात्तत्वं । मर्जयंतः । संज्ञापूर्वकस्य विधेरनित्यत्वात् मृजेर्वृद्धिः । पा० ७. २. ११४. । इति वृद्ध्यभावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते । जगम्यात् । लिङि बहुलं छंदसीति शपः श्लुः ॥

॥ इति प्रथमस्य चतुर्थे षड्विंशो वर्गः ॥

अस्मा इति षोड़शर्चं चतुर्थं सूक्तं । नोधस आर्षमैंद्रं त्रैष्टुभं । अनुक्रांतं च । अस्मा इदु षोड़शेति । अस्य सूक्तस्य नोधा द्रष्टेत्येतद्ब्राह्मणे समाम्नायते । अस्मा इदु प्र तवसे तुरायेति नोधास्त एते प्रातःसवन इति ॥ छलहस्तोत्रियावापवत्सु चतुर्विंशमहाव्रतादिष्वहःसु माध्यंदिने सवने ब्राह्मणाच्छंसि-शस्त्र ब्रह्मणा ते ब्रह्मयुजेत्यस्या आरंभणीयाया उर्ध्वमहीनसूक्त-संज्ञमेतच्छंसनीयं । तथा च सूत्रितं । अस्मा इदु प्र तवसे

आमदन्निरितीतरावहीनसूक्ते। आ० ७. ४.। इति। ब्राह्मणं च भवति। त एते प्रातःसवने षळहस्तोत्रियाञ्छस्त्वा माध्यंदिनेऽहीनसूक्तानि शंसंतीति॥

तत्र प्रथमामृचमाह॥

अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि स्तोमं माहिनाय।
ऋचीषमायाध्रिगव ओहमिंद्राय ब्रह्माणि राततमा॥ १॥

अस्मै। इत्। ऊं इति। प्र। तवसे। तुराय। प्रयः। न।
हर्मि। स्तोमं। माहिनाय।
ऋचीषमाय। अध्रिऽगवे। ओहं। इंद्राय। ब्रह्माणि।
रातऽतमा॥ १॥

इदु इति निपातद्वयं पादपूरणे। अथापि पादपूरणाः कमीमिद्विति यास्कः। यद्वा। अवधारणार्थं। तवसे प्रवृद्धाय तुराय त्वरमाणाय। यद्वा तुर्विंत्रे शत्रूणां हिंसित्रे माहिनाय गुणैर्महते ऋचीषमाय ऋचा समाय। यादृशी स्तुतिः क्रियते तत्समायेत्यर्थः। अध्रिगवे। अधृतगमनाय। अप्रतिहतगमनायेत्यर्थः। तथा च यास्कः। अधृतगमनकर्मवन्। इंद्रोऽप्यध्रिगुरुच्यते। नि० ५. ११.। इति। एवंभूतायास्मा इंद्राय स्तोमं स्तोत्रं प्रहर्मि। प्रहरामि। करोमीत्यर्थः। तत्र दृष्टांतः। प्रयो न। प्रय इत्यन्ननाम। यथा बुभुक्षिताय पुरुषाय कश्चिदन्नं प्रहरति। कीदृशं स्तोमं। ओहं। वहनीयं। प्रापणीयं वा। अत्यंतोत्कृष्टमित्यर्थः। न केवलं स्तोमं किंतर्हि ब्रह्माणि हविर्लक्षणान्यन्नानि। कीदृशानि। राततमा। पूर्वैर्यजमानैरतिशयेन दत्तानि। इंद्रं स्तुत्वा हविषा च परिचरेमेति भावः॥ तुराय। तुर त्वरणे। इगुपधलक्षणः कः। यद्वा। तुर्वी

हिंसार्थः। तुर्वतीति तुरः। पचाद्यचि छांदसो वलोपः। हर्मिं। हृञ् हरणे। बहुलं छंदसीति शपो लुक्। माहिनाय। मह पूजायामित्यस्मान्महेरिनण् चेतीनण्प्रत्ययः। उपधावृद्धिश्च। ऋचीषमाय। ऋचीषम ऋचा समः। नि॰ ६. २३.। इति यास्कः। तृतीया तत्कृतेति समासः। पा॰ २. १. ३०.। तृतीयापूर्वपदप्रकृतिस्वरत्वं। पृषोदरादित्वादीकारोपजनः। सुषामादित्वात् षत्वं। केचिदाहुः। ऋच स्तुतावित्यस्मादि-गुपधात्किदितीप्रत्ययः। कृदिकारादक्तिन इति ङीष्। ऋचीस्तुतिः। तया समः। पूर्ववत् षत्वं। अस्मिन्पक्षे तृतीयापूर्व-पदप्रकृतिस्वरत्वे सति ङीष उदात्तत्वेन भवितव्यं। तथा च न दृश्यते। तस्मात्स्वरश्चिंतनीयः। यद्वा दिवोदासादिर्द्रष्टव्यः। अध्रिगवे। अधृतोऽन्येनानिवारितो गौर्गमनं यस्य स तथोक्तः। गोस्त्रियोरुपसर्जनस्य। पा॰ १. २. ४८.। इति ह्रस्वत्वं। पृषोदरादित्वादधृतशब्दस्याध्रिभावः। ओहं। वहतेः कर्मणि घञि छांदसं संप्रसारणं। यद्वा तुहिर् दुहिर् उहिर् अर्दन इत्यस्मादोहतेः पूर्ववद्घञ्। राततमा। रा दान इत्यस्मान्निष्ठां-तादातिशायनिकस्तमप्। शेश्छंदसीति शेर्लोपः।

द्वितीयामृचमाह॥

अस्मा इदु प्रय इव प्र यंसि भराम्यांगूषं बाधे सुवृक्ति।
इंद्राय हृदा मनसा मनीषा प्रत्नाय पत्ये धियो
मर्जयंत॥ २॥

अस्मै। इत्। ऊं इति। प्रयःऽइव। प्र। यंसि। भरामि।
आंगूषं। बाधे। सुऽवृक्ति।

१०७

इंद्राय । हृदा । मनसा । मनीषा । प्रत्नाय । पत्ये । धियः ।
मर्जयंत ॥ २ ॥

अस्मा इदु । अस्मा एवेंद्राय । प्रय इत्यन्ननाम । प्रय इवान्नमिव प्रयंसि । प्रयच्छामि । तदेव स्पष्टोक्रियते । बाधे शत्रूणां बाधनाय समर्थं सुवृक्ति सुष्ठ्वावर्जकमांगूषं स्तोत्ररूपमाघोषं भरामि । संपादयामि । अन्येऽपि स्तोतारः प्रत्नाय पुराणाय पत्ये स्वामिन इंद्राय हृदा हृदयेन मनसा तदंतर्वर्तिनांतःकरणेन मनीषा मनीषया तज्जन्येन ज्ञानेन च धियः स्तुतीः कर्माणि वा मर्जयंत । मार्जयंति संस्कुर्वंति ॥ प्रयंसि । यम उपरम इत्यस्माल्लटि पुरुषव्यत्ययः । बहुलं छंदसीति शपो लुक् । आंगूषं । आंगूष स्तोम आघोष इति यास्कः । आङ्पूर्वाद्घुषेर्घञि पृषोदरादित्वाद्घो इत्यस्य गू आदेशः । आङो ङकारस्य लोपाभावश्च । थाथादिनोत्तरपदांतोदात्तत्वं । बाधे । बाधृ विलोडन इत्यस्मात्तुमर्थे तवेकेनिति भावे केन्प्रत्ययः । एजंतत्वादव्ययत्वेन सुपो लुक् । मनीषा । सुपां सुलुगिति तृतीयाया डादेशः । पत्ये । पतिः समास एव । पा० १. ४. ८. । इति घिसंज्ञायाः समासविषयत्वात् घेर्ङितीति गुणाभावे यणादेशः ॥

तृतीयामृचमाह ॥

अस्मा इदु त्यमुपमं स्वर्षां भराम्यांगूषमास्येन ।
मंहिष्ठमच्छोक्तिभिर्मतीनां सुवृक्तिभिः सूरिं वावृधध्यै ॥३॥
अस्मै । इत् । ऊं इति । त्यं । उपऽमं । स्वःऽसां । भरामि ।
आंगूषं आस्येन ।

मंहिष्ठं । अच्छोक्तिऽभिः । मतीनां । सुवृक्तिऽभिः । सूरिं ।
वृवृधध्यै ॥ ३ ॥

अस्मा इदु । अस्मा एवेंद्राय त्यं तं प्रसिद्धमुपममुपमानहेतु-भूतं स्वर्षां सुष्ठुरणीयस्य धनस्य दातारं सूरिं विपश्चितमिंद्रं वावृधध्यै वर्धयितुं सुवृक्तिभिः सुष्ठावर्जकैः । समर्थैरित्यर्थः । मतीनां स्तुतीनां संबंधिभिरच्छोक्तिभिः स्वच्छैर्वचोभिर्मंहिष्ठ-मतिशयेन प्रवृद्धमेवंलक्षणमांगूषमाघोषमास्येन मुखेन भरामि । करोमीत्यर्थं ॥ उपमं । उपमीयतेऽनेनेत्युपमः । घञर्थे कवि-धानमिति करणे कप्रत्ययः । आतो लोप इटि चेत्याकारलोपः । स्वर्षां । सुपूर्वाद्दतेर्विजंतः स्वर्णब्दः । षणु दाने । जनसनखन-क्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं । सनोतेरनः । पा० ८. ३. १०८. । इति षत्वं । भरामि । पादादित्वान्नि-घाताभावः । अच्छोक्तिभिः । अच्छा उक्तयो येषां । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । मतीनां । नामन्यतरस्यामिति नाम उदात्तत्वं । वावृधध्यै । वृधु वृद्धावित्यस्मादंतर्भावितण्यर्थात्तु-मर्थे सेसेनिति कध्यैप्रत्ययः । कित्त्वाद्गुणाभावः । द्विर्भावश्छां-दसः । यद्वा । यङ्लुगंतादस्मिन्प्रत्यय आगमानुशासनस्या-नित्यत्वाद्वीगाद्यभावः । अन्येषामपि दृश्यत इति सांहितिक-मभ्यासस्य दीर्घत्वं । प्रत्ययाद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

अस्मा इदु स्तोमं सं हिनोमि रथं न तष्टेव तत्सिनाय ।
गिरश्च गिर्वाहसे सुवृक्तींद्राय विश्वमिन्वं मेधिराय ॥ ४ ॥
अस्मै । इत् । ऊं इति । स्तोमं । सं । हिनोमि । रथं । न ।
तष्टाऽइव । तत्ऽसिनाय ।

गिरः। च। गिर्वाहसे। सुऽवृक्ति। इंद्राय। विश्वंऽइन्वं॥
मेधिराय॥ ४॥

अस्मा एवेंद्राय स्तोमं शस्त्ररूपं स्तोत्रं संहिनोमि। प्रेरयामि। तत्र दृष्टांतः। तत्सिनाय। सिनमित्यन्ननाम। सिनमन्नं भवति सिनाति भूतानीति यास्कः। नि० ५. ५.। तेन रथेन सिनमन्नं यस्य स तथोक्तः। तस्मै रथस्वामिने तष्टेव। तष्टा तक्षको रथनिर्माता रथं न। यथा रथं प्रेरयति तद्वत्। इवेत्येतत्पदपूरणं। तथा गिर्वाहसे गीर्भिः स्तुतिभिरुह्यमानायेंद्राय गिरश्च शस्त्रसंबंधिनीः केवला ऋचश्च सुवृक्ति शोभनमावर्जनं यथा भवति तथा प्रेरयामि। तथा मेधिराय मेधाविनं इंद्राय विश्वमिन्वं विश्वव्यापकं विश्वैर्व्याप्तं सर्वोत्कृष्टं हविश्च संहिनोमीत्यनुषंगः॥ हिनोमि। हि गतौ वृद्धौ च। स्वादित्वात् श्नुः। तष्टेव। तक्षू तनूकरणे। ताच्छीलिकस्तृन्। ऊदित्वात्वाच्च इडभावः। स्कोः संयोगाद्योरंते चेति ककारलोपः। नित्स्वादाद्युदात्तत्वं। तत्सिनाय। सिनशब्दः षिञ् बंधन इत्यस्मादिणसिञ्दीङुष्यविभ्यो नक्। उ० ३. २.। इति नक्प्रत्ययांतः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। गिर्वाहसे। वाहिहाधाञ्भ्यश्छंदसीति वहतेः केवलाद्विहितोऽसुन्प्रत्ययो गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वस्यापि भवति पूर्वपदप्रकृतिस्वरत्वं च। णिदित्यनुवृत्तेरुपधावृद्धिः। हलि चेति दीर्घाभावश्छांदसः। विश्वमिन्वं। इवि व्याप्तौ। विश्वमिन्वति व्याप्नोतीति विश्वमिन्वं। पचाद्यच्। लुगभावश्छांदसः। यद्वा खश्प्रत्ययो बहुलवचनादस्मादपि धातोर्द्रष्टव्यः। मेधिराय। मेधा अस्यास्तीति मेधिरः। मेधारथाभ्यामिरन्नि-

रचौ वक्तव्यौ। पा० ५. २. १०९. ३.। इति मत्वर्थीय इरन्। नित्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

अस्मा इदु सप्तिमिव श्रवस्येंद्रायार्कं जुह्वा३ समंजे।
वीरं दानौकसं वंदध्यै पुरां गूर्तश्रवसं दर्माणं ॥ ५ ॥

अस्मै। इत्। ऊं इति। सप्तिंऽइव। श्रवस्या। इंद्राय।
अर्कं। जुह्वा। सं। अंजे।
वीरं। दानऽओकसं। वंदध्यै। पुरां। गूर्तऽश्रवसं।
दर्माणं ॥ ५ ॥

अस्मा एवेंद्रायार्कं स्तुतिरूपं मंत्रं श्रवस्या श्रवस्ययान्नेच्छया। अन्नलाभायेत्यर्थः। जुह्वाह्वानसाधनेन वागिंद्रियेण समंजे। समक्तं करोमि। एकीकरोमीत्यर्थः। तत्र दृष्टांतः। सप्तिमिव। यथान्नलाभाय गंतुकामः पुमान् अश्वं रथेनैकीकरोति तद्वत्। एकीकृत्य च वीरं शत्रुक्षेपणकुशलं दानौकसंदानानामेकनिलयं गूर्तश्रवसं प्रशस्यान्नं पुरामसुरपुराणां दर्माणं विदारयितारं। एवंगुणविशिष्टमिंद्रं वंदध्यै वंदितुं स्तोतुं प्रवृत्तोऽस्मीति शेषः॥ सप्तिमिव। षप समवाये। समवैति रथेनैकीभवतीति सप्तिरश्वः। वसस्तिप्। उ० ४. १८१.। इति विधीयमानस्तिप्प्रत्ययो बहुलवचनादस्मादपि धातोर्भवति। प्रत्ययस्य पित्वादनुदात्तत्वे धातुस्वरः। इवेन समास उक्तः। श्रवस्या। श्रवस्शब्दात्सुप आत्मनः क्यच्। क्यजंताद्धातोर्भावे अ प्रत्ययादित्यकारप्रत्ययः। ततष्टाप्। सुपां सुलुगिति तृतीयाया डादेशः। उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं। अर्कं। ऋच स्तुतौ। ऋच्यते स्तूयतेऽनेनेत्यर्को मंत्रः। सि संज्ञाय

घः प्रायेणेति करणे घप्रत्ययः। चजोः कु घिण्यतोरिति कुत्वं। लघूपधगुणः। प्रत्ययस्वरः। जुह्वा। बहुलं छंदसीति कृतसंप्रसारणस्य ह्वेञो हुवः श्रुवच्चेति क्विप्। धातोर्दीर्घश्च। धातुस्वरेणांतोदात्तत्वं। तृतीयैकवचन उदात्तस्वरितयोर्यण इति स्वरितत्वं। उदात्तयणो हल्पूर्वादित्यस्य विभक्त्युदात्तत्वस्य नोङ्धात्वोः। पा० ६. १. १७५.। इति प्रतिषेधः। अंजे। अंजू व्यक्तिम्रक्षणकांतिगतिषु। व्यत्ययेनात्मनेपदं। वंदध्यै। वदि अभिवादनस्तुत्योः। तुमर्थे सेसेनिति कध्यैप्रत्ययः। गूर्तश्रवसं। गॄ शब्दे। निष्ठायां श्र्युकः कितीतीट्प्रतिषेधः। बहुलं छंदसीत्युत्वं। हलि चेति दीर्घः। नसत्तनिषत्तेत्यादौ निपातनान्निष्ठानत्वाभावः। गूर्तं श्रवो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। दर्माणं। दॄ विदारणे। अन्येभ्योऽपि दृश्यंत इति मनिन्। नेड्वशि कृतीतीट्प्रतिषेधः। व्यत्ययेन प्रत्ययाद्युदात्तत्वं। यद्वा। औणादिको मनिप्रत्ययो द्रष्टव्यः॥

॥ इति प्रथमस्य चतुर्थे सप्तविंशो वर्गः॥

षष्ठीमृचमाह॥

अस्मा इदु त्वष्टा तक्षद्वज्रं स्वपस्तमं स्वर्यं१ रणाय।
वृत्रस्य चिद्विदद्येन मर्म तुजन्नीशानस्तुजता कियेधाः॥६॥

अस्मै। इत्। ऊं इति। त्वष्टा। तक्षत्। वज्रं। स्वपःऽतमं।
स्वर्यं। रणाय।
वृत्रस्य। चित्। विदत्। येन। मर्म। तुजन्। ईशानः।
तुजता। कियेधाः॥ ६॥

त्वष्टा विश्वकर्मास्मा इदु। अस्मा एवेंद्राय वज्रं वर्जकमायुधं रणाय युद्धार्थं तक्षत्। तीक्ष्णमकरोत्। कीदृशं वज्रं।

स्वपस्तमं । अतिशयेन शोभनकर्माणं । स्वर्यं । सुष्ठु शत्रुषु प्रेर्यं । यद्वा स्तुत्यं । तुजन् शत्रून्हिंसन् ईशान ऐश्वर्यवान् कियेधा बलवान् एवंगुणविशिष्ट इंद्रो वृत्रस्य चित् आवरकस्यासुरस्य मर्म मर्मस्थानं तुजता हिंसता येन वज्रेण विदत् । प्राहार्षीदित्यर्थः ॥ स्वपस्तमं । शोभनमपः कर्म यस्यासौ । अतिशयेन स्वपाः स्वपस्तमः । तमपः पित्त्वादनुदात्तत्वं । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । स्वर्यं । स्वर्यं ततचेत्यत्रोक्तं । विदत् । विद्लृ लाभे । लृदित्वात् च्लेरङादेशः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । यद्वृत्तयोगादनिघातः । तुजन् । तुज हिंसायां । शपि प्राप्ते व्यत्ययेन शः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । ईशानः । ईश ऐश्वर्ये । शानच्यदादित्वाच्छपो लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । तुजता । शतुरनुम इति विभक्तेरुदात्तत्वं । कियेधाः । अत्र निरुक्तं । कियेधाः कियद्धा इति वा क्रममाणधा इति वेति । नि० ६.२०. । अस्यायमभिप्रायः । कियत् किंपरिमाणमस्य बलस्येत्यस्य बलस्येयत्तां यः कोऽपि न जानातीत्यर्थः । तादृशं बलं दधाति धारयतीति कियद्धाः । यद्वा क्रममाणमाक्रममाणं परेषां बलं धारयति निवारयतीति क्रममाणधाः । उभयत्रापि पृषोदरादित्वात्पूर्वपदस्य कियेभावः । दधातेर्विच् ॥

सप्तमीमृचमाह ॥

अस्येदु मातुः सवनेषु सद्यो महः पितुं पपिवाञ्चार्वन्ना ।
मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो
अद्रिमस्ता ॥ ७ ॥

अस्य । इत् । ऊं इति । मातुः । सवनेषु । सद्यः । महः ।
पितुं । पपिऽवान् । चारु । अन्ना ।
मुषायत् । विष्णुः । पचतं । सहीयान् । विध्यत् । वराहं ।
तिरः । अद्रिं । अस्ता ॥ ७ ॥

इदु इत्येतन्निपातद्वयं पादपूरणं । यद्वावधारणार्थं । मातुर्वृष्टिद्वारेण सकलस्य जगतो निर्मातुर्महो महतोऽस्य यज्ञस्य सवनेष्ववयवभूतेषु प्रातःसवनादिषु त्रिषु सवनेषु पितुं सोमलक्षणमन्नं सद्यः पपिवान् । यदाग्नौ हूयते तदानीमेव पानं कृतवानित्यर्थः । तथा चार्वन्ना चारूणि शोभनानि धानाकरंभादिहविर्लक्षणान्यन्नानि भक्षितवानिति शेषः । किंच विष्णुः सर्वस्य जगतो व्यापकः पचतं परिपक्वमसुराणां धनं यदस्ति तन्मुषायत् अपहरन् । सहीयान् अतिशयेन शत्रूणामभिभविताद्रिमस्ताद्रेर्वज्रस्य क्षेपकः । एवंभूत इंद्रस्तिरः । सत इति प्राप्तस्येति यास्कः । तिरः प्राप्तः सन् वराहं मेघं विध्यत् । अताडयत् । यद्वा । विष्णुः सुत्यदिवसात्मको यज्ञः । यज्ञो देवेभ्यो निलीय विष्णुरूपं कृत्वेत्याम्नानात् । स विष्णुः पचतं परिपक्वमसुरधनं यत्तन्मुषायत् । अचूचुरत् । तदनंतरं दीक्षोपसदात्मनां दुर्गरूपाणां सप्तानामह्नां परस्तादासीत् । अद्रिमस्ता सहीयानिंद्रो दुर्गाण्यतीत्य तिरः प्राप्तः सन् वराहमुत्कृष्टदिवसरूपं तं यज्ञं विध्यत् । तथा च तैत्तिरीयकं । वराहोऽयं वाममोषः सप्तानां गिरीणां परस्ताद्वित्तं वेद्यमसुराणां बिभर्तीति । स दर्भपिंजूलमुद्वृत्य सप्त गिरीन्भित्त्वा तमहन्निति च ॥ महः । महतः । अच्छब्दलोपश्छांदसः । यद्वा । मह इत्येतत्पितुविशेषणं । महः पूज्यं पितुमित्यर्थः । पपिवान् । पिबतेर्लिटः क्वसुः । वस्वेका-

जामित्यामितोडागमः। आतो लोप इटि चेत्याकारलोपः। प्रत्ययस्वरः। चारु। सुपां सुलुगिति विभक्तेर्लुक्। सुषायत्। सुष स्तेये। घञर्थे कविधानमिति भावे कप्रत्ययः। सुषमात्मन इच्छति। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्ववद्दीर्घस्यापि प्रतिषेधे व्यत्ययेन दीर्घः। अस्मात्क्यजंतान्नटः मट। आगमानुशासनस्यानित्यत्वान्नुमभावः। द्वितीयपक्षे तु क्यजंतान्नङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। अत्र स्तेयेच्छया तदुत्तरभाविनी क्रिया लक्ष्यते। पचतं। भृमृदृशीत्यादिना पचतेरतच्प्रत्ययः। चित्वादंतोदात्तत्वं। विध्यत्। व्यध ताडने। लङि दिवादित्वात् श्यन्। तस्य ङित्त्वाद्ग्रहिज्यादिना संप्रसारणं। श्यनो नित्त्वादाद्युदात्तत्वं। पादादित्वान्निघाताभावः। वराहं। वरमुदकमाहारो यस्य। यद्वा वरमाहरतीति वराहारः सन् पृषोदरादित्वाद्वराह इत्युच्यते। अत्र निरुक्तं। वराहो मेघो भवति वराहारः। वरमाहारमाहार्षीरिति च ब्राह्मणमिति। नि० ५. ४.। यस्मिन्पक्षे तु वरं च तदहो वराहः। राजाहःसखिभ्य इति समासांतष्टच्प्रत्ययः। चित्वादंतोदात्तत्वं। अस्ता। असु क्षेपण इत्यस्मात्साधुकारिणि तृनो डभावश्छांदसः। न लोकाव्ययेति षष्ठीप्रतिषेधः॥

अष्टमीमृचमाह॥

अस्मा इदु ग्नाश्चिद्देवपत्नीरिंद्रायार्कमहिहत्य ऊवुः।
परि द्यावापृथिवी जभ्र उर्वी नास्य ते महिमानं परि
ष्टः॥ ८॥

अस्मै। इत्। ऊं इति। ग्नाः। चित्। देवऽपत्नीः। इंद्राय। अर्कं। अहिऽहत्ये। ऊवुरित्यवुः।

परि । द्यावापृथिवी इति । जभ्रे । उर्वी इति । न । अस्य ।
ते इति । महिमानं । परि । स्त इति स्तः ॥ ८ ॥

अस्मा एवेंद्रायाहिहत्येऽहेर्वृत्रस्य हनने निमित्तभूते सति ग्नाश्चित् गमनस्वभावा अपि स्थिता देवपत्नीर्देवानां पालयित्र्यो गायत्र्याद्या देवता अर्कमर्चनसाधनं स्तोत्रमूवुः । समतन्वत । चक्रुरित्यर्थः । स चेंद्र उर्वी विस्तृते द्यावापृथिवी द्यावापृथिव्यौ परिजभ्रे । स्वतेजसा परिजहार । अतिचक्रामेत्यर्थः ॥ ऊवुः । वेञ् तंतुसंताने । लिटि वेञो वयिः । पा० २. ४. ४१. । लिटः कित्त्वाद्यजादित्वेन संप्रसारणे क्रियमाणे यकारस्य लिटि वयो यः । पा० ६. १. ३८. । इति प्रतिषेधादकारस्य संप्रसारणं परपूर्वत्वं द्विर्वचनादि । वश्चास्यान्यतरस्यां किति । पा० ६. १. ३९. । इति यकारस्य वकारादेशः । जभ्रे । हृञ् हरणे । लिटि ञित्त्वात्कर्त्रभिप्राय आत्मनेपदं । हृग्रहोर्भ इति भत्वं । उर्वी । उरुशब्दाद्वोतो गुणवचनादिति ङीष् । वा छंदसीति पूर्वसवर्णदीर्घत्वं ॥

नवमीमृचमाह ॥

अस्येदेव प्र रिरिचे महित्वं दिवस्पृथिव्याः पर्यंतरिक्षात् ।
स्वरालिंद्रो दम आ विश्वगूर्तः स्वरिरमत्रो ववक्षे
रणाय ॥ ९ ॥

अस्य । इत् । एव । प्र । रिरिचे । महिऽत्वं । दिवः ।
पृथिव्याः । परि । अंतरिक्षात् ।
स्वऽराट् । इंद्रः । दमे । आ । विश्वऽगूर्तः । सुऽअरिः ।
अमत्रः । ववक्षे । रणाय ॥ ९ ॥

अस्येदेव । इदिति पादपूरणः । अस्यैवेंद्रस्य महित्वं

माहात्म्यं प्ररिरिचे। अतिरिच्यते। अधिकं भवतीत्यर्थः। अत्रोपसर्गो धात्वर्थस्य निवृत्तिमाचष्टे। यथा प्रस्मरणं प्रस्थानमिति। कुतः सकाशात्प्ररिरिच इत्यत आह। दिवः। द्युलोकात्। पृथिव्याः। भूलोकात्। अंतरिक्षात्। द्यावापृथिव्योर्मध्ये वर्तमानादंतरिक्षलोकाच्च। पर्युपर्यर्थः। त्रींल्लोकानतीत्योपरि प्ररिरिच इत्यर्थः। दमे दमयितव्ये विषये स्वराट् स्वेनैव तेजसा राजमानो विश्वगूर्तो विश्वस्मिन्कार्ये उद्गूर्णः समर्थः। यद्वा विश्वं सर्वमायुधं गूर्तमुद्यतं यस्य स तथोक्तः। स्वरिः। शोभनशत्रुकः। शोभने शत्रौ हंतव्ये सति हंता वीर्यवत्तम इति गम्यते। यथाकवारिं दिव्यं शासमिंद्रमिति। अकुत्सितारिमिति हि तस्यार्थः। अमत्रः। युद्धादिषु गमनकुशलः। मात्रयेयत्तया रहितो वा। अमत्रोऽमात्रो महान्भवत्यभ्यमितो वेति यास्कः। नि० ६. २३.। एवंभूत इंद्रो रणाय रणं युद्धमाववक्षे। आवहति। मेघान्प्रापयति। मेघैः परस्परयुद्धं कारयित्वा वृष्टिं चकारेति भावः। यद्वा युद्धाय स्वकीयान्भटान् गमयति॥ अस्य। ऊडिदमिति विभक्तेरुदात्तत्वं। रिरिचे। रिचिर् विरेचने। छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट्। पृथिव्याः। उदात्तयण इति विभक्तेरुदात्तत्वं। स्वराट्। राजृ दीप्तावित्यस्मात्सत्सूद्विषेति क्विप्। व्रश्चादिना षत्वे जश्त्वं। दमे। दम उपशम इत्यस्मात्कर्मणि घञि नोदात्तोपदेशस्य मांतस्यानाचमेः। पा० ७. ३. ३४.। इति वृद्धिप्रतिषेधः। घञो ञित्त्वादाद्युदात्तत्वं। विश्वगूर्तः। गॄ निगरणे। अस्मान्निष्ठायां श्र्युकः कितीतीट्प्रतिषेधः। बहुलं छंदसीत्युत्वं। हलि चेति दीर्घः। यद्वा गूरी उद्यमे।

अस्मान्निष्ठा । नसत्तनिषत्तेत्यादौ निपातनान्निष्ठानत्वाभावः । तत्पुरुषपक्षे मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । बहुव्रीहिपक्षे तु बहुव्रीहौ विश्वं संज्ञायामित्यसंज्ञायामपि पूर्वपदांतोदात्तत्वं । अमत्रः । अम गत्यादिषु । अमिनक्षियजिबंधीत्यादिनौणादिकोऽत्रन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । ववक्षे । वहेर्लेटि सिब्बहुलं लेटीति सिप् । बहुलं छंदसीति शपः श्लुः । ढत्वषत्वकत्वानि । लोपस्त आत्मनेपदेष्विति तलोपः । रणाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । यद्वा । गत्यर्थकर्मणीति चतुर्थी ॥

दशमीमृचमाह ॥

अस्येदेव शवसा शुषंतं वि वृश्चद्वज्रेण वृत्रमिंद्रः ।
गा न व्राणा अवनीरमुंचदभि श्रवो दावने सचेताः ॥१०॥

अस्य । इत् । एव । शवसा । शुषंतं । वि । वृश्चत् । वज्रेण । वृत्रं । इंद्रः ।
गाः । न । व्राणाः । अवनीः अमुंचत् । अभि । श्रवः । दावने । सऽचेताः ॥ १० ॥

अस्यैवेंद्रस्य शवसा बलेन शुषंतं शुष्यंतं वृत्रमिंद्रो वज्रेण विवृश्चत् । व्यवच्छिनत् । तथा गा न चोरैरपहृता गाव इव व्राणा वृत्रेणावृता अवनी रक्षणहेतुभूता अपोऽमुंचत् । अवर्षीत् । तथा दावने हविर्दात्रे यजमानाय सचेतास्तेन यजमानेन समानचित्तः सन् श्रवः कर्मफलभूतमन्नमभ्याभिमुख्येन ददातीति शेषः ॥ शुषंतं । शुष शोषणे । श्यनि प्राप्ते व्यत्ययेन शः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वर एव शिष्यते । व्राणाः । वृञ् वरणे । कर्मणि लटः शानचि बहुलं

छंदसीति यको लुक्। शानचो ङित्त्वाद्गुणाभावे यणादेशः। अवनीः। अवतेः करणेऽर्तिसृधृधमीत्यादिनानिप्रत्ययः। प्रत्ययाद्युदात्तत्वं। दावने। आतो मनिन्निति वनिप्। चतुर्थ्येकवचनेऽल्लोपाभावश्छांदसः॥

॥ इति प्रथमस्य चतुर्थेऽष्टाविंशो वर्गः॥

एकादशीमृचमाह॥

अस्येदु त्वेषसा रंत सिंधवः परि यद्वज्रेण सीमयच्छत्।
ईशानकृद्दाशुषे दशस्यन्तुर्वीतये गाधं तुर्वणिः कः॥ ११॥

अस्य। इत्। ऊं इति। त्वेषसा। रंत। सिंधवः। परि।
यत्। वज्रेण। सीं। अयच्छत्।
ईशानऽकृत्। दाशुषे। दशस्यन्। तुर्वीतये। गाधं।
तुर्वणिः। करिति कः॥ ११॥

अस्येवेंद्रस्य त्वेषसा दीप्तेन बलेन सिंधवः समुद्राः। यद्वा गंगाद्याः सप्त नद्यो रंत। स्वे स्वे स्थाने रमंते। यद्यस्मादयमिंद्रो वज्रेण सीमेनान्सिंधून्पर्ययच्छत्। परितो नियमितवान्। अपि च। ईशानकृत् वृत्रादिशत्रुवधेनात्मानमैश्वर्यवंतं कुर्वन्निंद्रो दाशुषे हविर्दत्तवते यजमानाय फलं दशस्यन् प्रयच्छन् तुर्वणिस्तूर्णसंभजनः। तुर्वणिस्तूर्णवनिरिति यास्कः। यद्वा तुर्विता शत्रूणां हिंसिता। एवंभूत इंद्रस्तुर्वीतय एतत्संज्ञायोदके निमग्नाय ऋषये गाधमवस्थानयोग्यं धिष्ण्यं प्रदेशं कः। अकार्षीत्॥ रंत। रमु क्रीडायां। छांदसे लङि बहुवचने बहुलं छंदसीति शपो लुक्। धातोरंत्यलोपश्छांदसः। अयच्छत्। यम उपरमे। इषुगमियमां छ इति छत्वं। कः। करोतेर्लुङि मंत्रे घसह्वरणशेत्यादिना। पा० २.४.८०.।

च्चेर्लुक् । गुणः । हल्ङ्यादिना तलोपः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः ॥

द्वादशीमृचमाह ॥

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः ।
गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै ॥ १२ ॥

अस्मै । इत् । ऊं इति । प्र । भर । तूतुजानः । वृत्राय ।
वज्रं । ईशानः । कियेधाः ।
गोः । न । पर्व । वि । रद । तिरश्चा । इष्यन् । अर्णांसि ।
अपां । चरध्यै ॥ १२ ॥

तूतुजान इति क्षिप्रनाम । तूतुजानस्त्वरमाणः । यद्वा शत्रून्हिंसन् । ईशान ईश्वरः सर्वेषां कियेधाः कियतोऽनवधृतपरिमाणस्य बलस्य धाता । यद्वा क्रममाणं शत्रुबलं दधात्यवस्थापयतीति कियेधाः । हे इंद्र । एवंभूतस्त्वमस्मै वृत्राय वज्रं प्रभर । इमं वृत्रं वज्रेण प्रहरेत्यर्थः । प्रहृत्य चार्णांसि वृष्टिजलानीष्यन् तस्माद्वृत्राद्गमयंस्त्वमपां चरध्यै तासामपां चरणाय भूप्रदेशं प्रतिगमनाय तस्य वृत्रस्य मेघरूपस्य पर्व पर्वाण्यवयवसंधीन्तिरश्चा तिर्यगवस्थितेन वज्रेण विरद । विलिख । छिंद्धीत्यर्थः । तत्र दृष्टांतः । गोर्न । यथा मांसस्य विकर्तारो लौकिकाः पुरुषाः पशोरवयवानितस्ततो विभजंति तद्वत् । अत्र निरुक्तं । अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वा क्रममाणधा इति वा । गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय । नि० ६. २०. । इति ॥ भरा । द्व्यचोऽतस्तिङ इति सांहितिको दीर्घः । तूतुजानः । तुज हिंसायां । कानाच

तुजादीनां दीर्घोऽभ्यासस्येत्यभ्यासस्य दीर्घत्वं । छंदस्युभयथेति कानचः सार्वधातुकत्वे सत्यभ्यस्तानामादिरित्याद्युदात्तत्वं । क्रियेधाः । तुजता क्रियेधा इत्यत्रोक्तं । रदा । रद विलेखने । तिङ्ङतिङ इति निघातः । तिरश्चा । तिरोऽंचतीति तिर्यङ् । ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । तृतीयैक-वचने भसंज्ञायामच इत्यकारलोपः । सुत्वेन सकारस्य शकारः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । इष्यन् । इष गता-वित्यस्मादंतर्भावितण्यर्थाच्छतरि दिवादिभ्यः श्यन् । तस्य नित्त्वादाद्युदात्तत्वं । चरध्यै । तुमर्थे सेसेनिति चरतेरध्यैप्रत्ययः ॥

त्रयोदशीमृचमाह ॥

अस्येदु प्र ब्रूहि पूर्व्याणि तुरस्य कर्माणि नव्य उक्थैः ।
युधे यदिष्णान आयुधान्यृघायमाणो निरिणाति शत्रून् ॥ १३ ॥

अस्य । इत् । ऊं इति । प्र । ब्रूहि । पूर्व्याणि । तुरस्य । कर्माणि । नव्यः । उक्थैः ।
युधे । यत् । इष्णानः । आयुधानि । ऋघायमाणः । निऽरिणाति शत्रून् ॥ १३ ॥

उक्थैः शस्त्रैर्नव्यः स्तुत्यो य इंद्र अस्येदु । अस्यैव तुरस्य युद्धार्थं त्वरमाणस्येंद्रस्य पूर्व्याणि पुराणानि कर्माण्येतत्कृतानि बलकर्माणि हे स्तोतः प्रब्रूहि । प्रशंस । यद्यदा युधे योधना-यायुधानि वज्रादीनीष्णान आभीक्ष्ण्येन प्रेरयन् शत्रूनृघाय-माणो हिंसन्निंद्रो निरिणाति । अभिमुखं गच्छति । तदानीं प्रब्रूहीति पूर्वेण संबंधः ॥ पूर्व्यमिति पुराणनाम । पूर्व्यमह्ना-येति पुराणनामसु पाठात् । तुरस्य । तुर त्वरणे । इगुपधलक्षणः

कः । नव्यः । णु स्तुतौ । अचो यदिति यत् । गुणः । धातोस्तन्निमित्तस्यैवेत्यवादेशः । इष्णानः । इष आभीक्ष्ण्ये । क्र्यादिकः व्यत्ययेनात्मनेपदं । शानचश्चित्त्वादंतोदात्तत्वं । ऋघायमाणः । न हि त्वा रोदसी उभे ऋघायमाणमित्यत्र व्युत्पादितं । निरिणाति । री गतिरेषणयोः क्र्यादिभ्यः श्ना । प्वादीनां ह्रस्व इति ह्रस्वत्वं । तिपः पित्त्वादनुदात्तत्वे विकरणस्वरः शिष्यते । तिङि चोदात्तवतीति गतेर्निघातः । यद्वृत्तयोगात्तिङ्ङतिङ इति निघाताभावः ॥

चतुर्दशीमृचमाह ॥

अस्येदु भिया गिरयश्च दृळ्हा द्यावा च भूमा जनुषस्तुजेते ।
उपो वेनस्य जोगुवान ओणिं सद्यो भुवद्वीर्याय नोधाः ॥ १४ ॥

अस्य । इत् । ऊं इति । भिया । गिरयः । च । दृळ्हाः ।
द्यावा । च । भूम । जनुषः । तुजेते इति ।
उपो इति । वेनस्य । जोगुवानः । ओणिं । सद्यः । भुवत् ।
वीर्याय । नोधाः ॥ १४ ॥

अस्यैवेंद्रस्य भिया पक्षच्छेदभयेन गिरयः पर्वता अपि दृळ्हा निश्चलाः स्वस्वदेशेऽवतिष्ठते । जनुषः प्रादुर्भूतादस्मादेवेंद्राद्भीत्या द्यावा भूमा च द्यावापृथिव्यावपि तुजेते । तुजिर्हिंसार्थोऽप्यत्र कंपने द्रष्टव्यः । कंपेते इत्यर्थः । किंच वेनस्य कांतस्यास्यौणिं दुःखस्यापनयकं रक्षणमुपो जोगुवानोऽनेकैः सूक्तैः पुनः पुनरुपशब्दयन् । उपश्लोकयन्नित्यर्थः । एवंभूतो नोधा ऋषिः सद्यस्तदानीमेव वीर्याय भुवत् । वीर्यवानभवत् ॥ द्यावा च भूमा । द्यावा भूमित्यनयोर्मध्ये चशब्दस्य पाठश्छांदसः । दिवो द्यावेति दिवशब्दस्य द्यावादेशः । सुपां सुलुगिति

विभक्तेर्डादेशः । छांदसमत्वं पदकारैः कृतं । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । पदद्वयप्रसिद्धिरपि सांप्रदायिकी । जनुषः । जनी प्रादुर्भावे । जनेरुसिरित्यौणादिक उसिप्रत्ययः । जोगुवानः । गुङ् अव्यक्ते शब्दे । अस्माद्यङ्लुगंताद्व्यत्ययेन शानच् । अदादिवच्चेति वचनाच्छपो लुक् । उवङादेशः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । ओणिं । ओणृ अपनयने । अस्मादौणादिक इप्रत्ययः । भुवत् । भवतेर्लेट्यडागमः । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः । नोधाः । नोधा ऋषिर्भवति नवनं दधातीति यास्कः । नि० ४. १६. । तस्माद्दधातेरसुन् नवशब्दस्य नोभावश्च ॥

पंचदशीमृचमाह ॥

अस्मा इदु त्यदनु दाय्येषामेको यद्वव्ने भूरेरीशानः ।
प्रैतशं सूर्ये पस्पृधानं सौवश्व्ये सुष्विमावदिंद्रः ॥ १५ ॥

अस्मै । इत् । ऊं इति । त्यत् । अनु । दायि । एषां । एकः । यत् । वव्ने । भूरेः । ईशानः ।
प्र । एतशं । सूर्ये । पस्पृधानं । सौवश्व्ये । सुस्विं । आवत् । इंद्रः ॥ १५ ॥

एक एक एव शत्रूञ्जेतुं समर्थो भूरेर्बहुविधस्य धनस्येशानः स्वामी यत्स्तोत्रं वव्ने । ययाचे । एषां स्तोतॄणां संबंधि । यद्वा विभक्तिव्यत्ययः । एतैस्त्यत् तत्प्रसिद्धं स्तोत्रमस्मा इंद्रायानुदायि । अकारीत्यर्थः । उत्तरार्द्धस्येयमाख्यायिका ॥ स्वश्वो नाम कश्चिद्राजा । स च पुत्रकामः सूर्यमुपासां चक्रे । तस्य च सूर्य एव पुत्रो बभूव । तेन सहैतशनाम्नो महर्षेर्युद्धं जातमिति तदेतदिहोच्यते । अयमिंद्रः सौवश्व्ये स्वश्वपुत्रे सूर्ये

पस्पृधानं स्पर्धमानं सुष्विं सोमानामभिषोतारमेतत्सं ज्ञकमृषिं प्रावत्। प्रारक्षत्॥ दाथि।ऽ बहुलं छंदस्यमाङ्योगेऽपीत्यङभावः। वव्ने। वनु याचने। लिटि व्यत्ययेनोपधालोपः। पस्पृधानं। स्पर्ध संघर्षे। अस्माल्लिटः कानच्। द्विर्वचने शर्पूर्वाः खय इति पकारः शिष्यते। धात्वकारस्य लोपो रेफस्य संप्रसारणं च पृषोदरादित्वात्। चित्त्वादंतोदात्तत्वं। सौवश्व्यं। स्वश्व इति जनपदशब्दः क्षत्रिये संज्ञात्वेन वर्तते। वा नामधेयस्य वृद्धसंज्ञा वक्तव्या। स्वश्वस्यापत्यं सौवश्व्यः। वृद्धेत्कोसलाजादाञ्ञ्यङ्। पा० ४. १. १७१.। इत्यपत्यार्थे ञ्यङ्प्रत्ययः। न य्वाभ्यां पदांताभ्यां। पा० ७. ३. ३.। इति वृद्धिप्रतिषेधः। ऐजागमश्च। ञित्त्वादाद्युदात्तत्वं। सुष्विं। षुञ् अभिषवे। उत्सर्गश्छंदसि। पा० ३. २. १७१. २.। इत्यस्मात्क्विन्प्रत्ययः। लिड्वद्भावात् द्विर्भावः। यणादेशः। उवङादेशाभावश्छांदसः॥

षोड़शीमृचमाह॥

एवा ते हरियोजना सुवृक्तींद्र ब्रह्माणि गोतमासो अक्रन्।
ऐषु विश्वपेशसं धियं धाः प्रातर्मक्षू धियावसुर्जगम्यात्॥ १६॥

एव। ते। हरिऽयोजन। सुऽवृक्ति। इंद्र। ब्रह्माणि। गोतमासः। अक्रन्।
आ। एषु। विश्वऽपेशसं। धियं। धाः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ १६॥

हर्योरश्वयोर्योजनं यस्मिन्रथे स तथोक्तः। तस्य स्वामित्वेन संबंधो हरियोजनः। हे हरियोजनेंद्र गोतमासो गोतमगोत्रोत्पन्ना ऋषयः सुवृक्ति सुष्ठावर्जकान्यभिमुखीकरणकुशलानि

ब्रह्माणि स्तुतिरूपाणि मंत्रजातानि ते तवैवाक्रन् । अकृषत । एषु स्तोत्रेषु विश्वपेशमं बहुविधरूपयुक्तं धियं धाः । धिया लभ्यत्वाद्धीर्धनमुच्यते । यद्वा । धीशब्दः कर्मवचनः । पश्वादि-बहुविधरूपं धनमग्निष्टोमादिकं बहुविधरूपं कर्म वा धाः । धेहि । स्थापय । प्रातरिदानीमिव परेद्युरपि प्रातःकाले धिया-वसुर्बुद्ध्या कर्मणा वा प्राप्तधन इंद्रो मक्षू शीघ्रं जगम्यात् । अस्मद्रक्षणार्थमागच्छतु ॥ एवा । निपातस्य चेति संहितायां दीर्घः । सुष्टुक्ति । सुपां सुलुगिति शसो लुक् । अक्रन् । करोतेर्लुङि मंत्रे घसह्वरेत्यादिना च्लेर्लुक् । अंतादेशः । तस्य ङित्त्वाद्गुणाभावे यणादेशः । इतश्चेतीकारलोप संयो-गांतलोपे चाडागमः । धाः । छंदसि लुङ्लङ्लिट इति लोडर्थे लुङि गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्य-डभावः ॥

॥ इति प्रथमस्य चतुर्थ एकोनत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके चतुर्थोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

अथ पंचमाध्याय आरभ्यते। प्रथमे मंडल एकादशेऽनुवाके चत्वारि सूक्तानि गतानि। प्र मन्महे इत्येतत्त्रयोदशर्चं पंचमं सूक्तं। तत्रानुक्रम्यते। प्र सप्तोनेति। अनिरुक्ता संख्या विंशतिरित्युक्तत्वात्र सप्तोनेत्युक्ते त्रयोदशेत्युक्तं भवति। ऋषिश्चान्यस्मादिति परिभाषया नोधा ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। इंद्रो देवता। गतः सामान्यविनियोगः। विशेषविनियोगस्तु लिंगादवगंतव्यः ॥

तत्र प्रथमामृचमाह ॥

प्र मन्महे शवसानाय शूषमांगूषं गिर्वणसे अंगिरस्वत् ।
सुवृक्तिभिः स्तुवत ऋग्मियायार्चामार्कं नरे विश्रुताय ॥१॥

प्र। मन्महे। शवसानाय। शूषं। आंगूषं। गिर्वणसे।
अंगिरस्वत्।
सुवृक्तिऽभिः। स्तुवते। ऋग्मियाय। अर्चाम। अर्कं। नरे।
विऽश्रुताय ॥ १ ॥

शवसानाय। शव इति बलनाम। तदिवाचरते। यथा बलं शत्रून्हंति तथा शत्रूणां हंतेत्यर्थः। गिर्वणसे। गीर्भिः स्तुतिलक्षणैर्वचोभिः संभजनीयाय। गिर्वणा देवो भवति

गीर्भिरेनं वनयंतीति यास्कः। एवं भूतायेंद्राय। शूषमिति सुखनाम। शूषं सुखहेतुभूतं। आंगूष स्तोम आघोष इति यास्कः। आंगूषं स्तोत्रमंगिरस्वत् अंगिरस इव प्रमन्महे। वयं स्तोतारः प्रकर्षेणावगच्छामः। अवगत्य च सूक्तिभिः सुष्ठ्वावर्जकैः स्तुत्याभिमुखीकरणसमर्थैः स्तोत्रैः स्तुवते स्तोत्रं कुर्वते ऋषये य इंद्र ऋग्मियोऽर्चनीयो भवति। यद्वा कर्मणि कर्तृप्रत्ययः। ऋषिणा स्तूयमानायेत्यर्थः। नरे सर्वेषां नेत्रे। यद्वा नरे यजमाने विश्रुताय यष्टव्यतया विशेषेण प्रख्याताय। एवंभूताय तस्मा अर्कं मंत्ररूपं स्तोत्रं। अर्को मंत्रो भवति यदेनेनार्चंतीति यास्कः। अर्चाम। पूजयाम। उच्चारयामेत्यर्थः॥ मन्महे। मनु अवबोधने। तनादित्वादुप्रत्ययः। लोपश्चास्यान्यतरस्यां म्वोः। पा० ६. ४. १०७. इति मकारादौ प्रत्यय उकारलोपः। शवसानाय। शव इवाचरति शवस्यते। अस्माल्लटः शानच्। बहुलं छंदसीति शपो लुक्। चित शानचश्छंदस्युभयथेत्यार्द्धधातुकत्वादतोलोपयोर्लोपौ। चित इत्यंतोदात्तत्वं। ननु क्यङो ङित्त्वात्तास्यनुदात्तेदिति शानचोऽनुदात्तेन भवितव्यं। एवं। तर्हि ताच्छीलिकश्चानश्। तस्य सार्वधातुकत्वेऽपि लसार्वधातुकत्वाभावाच्चितः स्वर एव शिष्यते। शूषं। शूष प्रसवे। पचाद्यच्। आंगूषं। आङ्पूर्वाद्घुषेः पचाद्यचि घो इत्यस्य गू आदेशः पृषोदरादित्वात्। आङो ङकारस्येत्संज्ञाभावश्छांदसः। चित्स्वरेणोत्तरपदस्यांतोदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं। घञि वा थाथादिनोत्तरपदांतोदात्तत्वं। गिर्वणसे। गॄ शब्दे। संपदादिलक्षणो भावे क्विप्। ऋत इद्धातोरितीत्वं। गिर्भिर्वन्यते संभज्यत इति गिर्वणाः।

औणादिकः कर्मण्यसुन् । संज्ञापूर्वकस्य विधेरनित्यत्वाद्वलि चेति दीर्घाभावः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्पूर्वपदप्रकृतिस्वरत्वं । अंगिरस्वत् । तेन तुल्यमिति वतिः । नभोऽंगिरोमनुषां वत्युपसंख्यानमिति भसंज्ञायां रुत्वाद्यभावः । प्रत्ययस्वरः । सुवृक्तिभिः । वृजी वर्जने । भावे क्तिन् । तितुत्रेतीट्प्रतिषेधः । शोभनमावर्जनं येषां । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । ननु क्तिनंतस्योत्तरपदस्याद्युदात्तत्वादाद्युदात्तं द्व्यच् छंदसीति वचनादुत्तरपदाद्युदात्तत्वं प्राप्नोति । एवं । तर्हि तत्पुरुषोऽस्तु । शोभनमावर्जितो भवत्येभिरिति सुवृक्तयः स्तोत्राणि । करणे क्तिन् । तादौ च नितीति गतेः प्रकृतिस्वरत्वे प्राप्ते मन्क्तिन्नित्यादिना कारकादुत्तरस्य क्तिनो विहितमुत्तरपदांतोदात्तत्वमकारकादपि व्यत्ययेन भवति । स्तुवते । शतुरनुम इति विभक्तेरुदात्तत्वं । ऋग्मियाय । एकाचो नित्यं मयटमिच्छंतीति ऋक्शब्दाद्विकारार्थे मयट् । स्वादिष्वसर्वनामस्थान इति पदसंज्ञायां कुत्वजश्त्वे । व्यत्ययेनेत्वं । यद्वा । ऋच स्तुतावित्यस्माद्भावे मक् । बहुलवचनात्कुत्वं जश्त्वं च । ऋग्मं स्तुतिमर्हतीति ऋग्मियः । अर्हार्थे घच् । चित इत्यंतोदात्तत्वं । अर्चामि । अर्च पूजायां । भौवादिकः । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । अर्कं । अर्च्यतेऽनेनेत्यर्कः । पुंसि संज्ञायां घः प्रायेणेति घप्रत्ययः । चजोः कु घिण्ण्यतोरिति कुत्वं । नरे । नृशब्दाच्चतुर्थ्येकवचने गुणश्छांदसः । विश्रुताय । श्रु श्रवणे । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

प्र वो महे महि नमो भरध्वमांगूष्यं शवसानाय साम ।
येना नः पूर्वे पितरः पदज्ञा अर्चंतो अंगिरसो गा
अविंदन् ॥ २ ॥

प्र । वः । महे । महि । नमः । भरध्वं । आंगूष्यं ।
शवसानाय । साम ।
येन । नः । पूर्वे । पितरः । पदऽज्ञाः । अर्चंतः । अंगिरसः ।
गाः । अविंदन् ॥ २ ॥

हे ऋत्विजः । वो यूयं महे महते शवसानाय बलमिवाचरते । अतिबलायेत्यर्थः । उत्तरवाक्ये यच्छब्दश्रुतेस्तच्छब्दाध्याहारः । एवंभूताय तस्मा इंद्राय महि महत्प्रौढं नमः स्तोत्रं प्रभरध्वं । प्रकर्षेण संपादयत । किं तत्स्तोत्रमित्याह । आंगूष्यं साम । आघोषयोग्यं रथंतरादि साम । तन्निष्पाद्यमित्यर्थः । अभि त्वा शूरेत्यादिषृक्षु यद्गानं तस्य सामेत्याख्या । तथा चोक्तं । गीतिषु सामाख्येति । येनेंद्रेण नोऽस्माकं पितरः पितृविशेषाः पूर्वे पूर्वपुरुषा अंगिरसः पणिनाम्नासुरेणापहृतानां गवां पदज्ञाः संतः । अत एवार्चंतस्तं पूजयंतो गा अविंदन् । अलभंत ॥ वः । प्रथमार्थे द्वितीया । पदज्ञाः । पदानि जानंतीति । आतोऽनुपसर्गे क इति कः । आतो लोप इटि चेत्याकारलोपः । अविंदन् । विद्लृ लाभे । शे मुचादीनामिति नुमागमः ॥

तृतीयामृचमाह ॥

इंद्रस्यांगिरसां चेष्टौ विदत्सरमा तनयाय धासिं ।
बृहस्पतिर्भिनदद्रिं विदद्गाः समुस्रियाभिर्वावशंत नरः ॥३॥

इंद्रस्य । अंगिरसां । च । इष्टौ । विदत् । सरमा ।
तनयाय । धासिं ।
बृहस्पतिः । भिनत् । अद्रिं । विदत् । गाः । सं ।
उस्रियाभिः । वावशंत । नरः ॥ ३ ॥

अत्रेदमाख्यानं । सरमा नाम देवशुनी । पणिभिर्गोष्वपहृतासु तदन्वेषणाय तां सरमामिंद्रः प्राहैषीत् । यथा लोके व्याधो वनांतर्गतमृगान्वेषणाय श्वानं विसृजति तद्वत् । सा च सरमैवमवोचत् । हे इंद्र अस्मदीयाय शिशवे तद्गोसंबंधि क्षीराद्यन्नं यदि प्रयच्छसि तर्हि गमिष्यामीति । स तथेत्यब्रवीत् । तथा च शाट्यायनकं । अन्नादिनीं ते सरमे प्रजां करोमि या नो गा अन्वविंद इति । ततो गत्वा गवां स्थानमज्ञासीत् । ज्ञात्वा चास्मै न्यवेदयत् । तथा निवेदितासु गोषु तमसुरं हत्वा ता गाः स इंद्रोऽलभतेति । अयमर्थोऽस्यां प्रतिपाद्यते ॥ इंद्रस्यांगिरसामृषीणां चेष्टौ प्रेषणे सति सरमा देवशुनी तनयाय स्वपुत्राय धासिमन्नं विदत् । अविंदत् । धासिरित्यन्ननाम । धासिरिरीति तन्नामसु पाठात् । तथा गोषु निवेदितासु बृहस्पतिर्बृहतां देवानामधिपतिरिंद्रोऽद्रिमत्तारमसुरं भिनत् । अवधीत् । तेनापहृता गा विदत् । अलभत । ततो नरो नेतारो देवा उस्रियाभिर्गोभिः सह । उस्रियेति गोनाम । संवावशंत । भृशं हर्षशब्दमकुर्वन् । यद्वा । गोभिः साधनभूताभिस्तदीयं क्षीरादिकमकामयंत । समगच्छंतेत्यर्थः ॥ इष्टौ । इष गतावित्यस्माद्भावे क्तिनि मंत्रे वृषेषेति क्तिन उदात्तत्वं । विदत् । विदॢ लाभे । लुङि लृदित्वादङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अङ एव स्वरः

गिष्यते । पादादित्वान्निघाताभावः । सरमा । सरमा सरणात् । नि० ११. २४. । इति यास्कः । सर्तेरौणादिकोऽमप्रत्ययः । धासिं । धेट् पाने । धीतये पीयत इति धासिः । औणादिकः सिप्रत्ययः । यद्वा । दधातेः पोषणार्थात् सिप्रत्ययः । बृहस्पतिः । तद्बृहतोः करपत्योश्चोरदेवतयोः सुट् तलोपश्च । पा० ६. १. १५७. । इति सुडागमस्तलोपश्च । बृहच्छब्दोऽतोदात्तः । तस्य केचिदाद्युदात्तत्वं वर्णयंतीत्युक्तं । पतिशब्दो डतिप्रत्ययांत आद्युदात्तः । अत उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं । उस्रियाभिः । निवसत्यस्यां चौरादिकमित्युस्रा गौः । वस निवास इत्यस्मात् स्फायितंचीत्यादिनाधिकरणे रक् । वचिस्वपीत्यादिना संप्रसारणं । उस्राशब्दात्स्वार्थे पृषोदरादित्वेन घप्रत्यय इति निघंटुकभाष्यं । घस्येयादेशः । प्रत्ययस्वरः । वावशंत । वाशृ शब्दे । अस्माद्यङंताल्लङि छस्यांतादेशे सति तस्य छंदस्युभयथेत्यार्धधातुकत्वादतोलोपयलोपौ । व्यत्ययेन धातोर्ह्रस्वत्वं । यद्वा । वश कांतावित्यस्माद्यङि न वशः । पा० ६. १. २०. । इति संप्रसारणे प्रतिषिद्धे पूर्ववत्प्रक्रिया ॥

चतुर्थीमृचमाह ॥

स सुष्टुभा स स्तुभा सप्त विप्रैः स्वरेणाद्रिं स्वर्यो३ नवग्वैः ।
सरण्युभिः फलिगमिंद्र शक्र वलं रवेण दरयो दशग्वैः ॥ ४॥

सः । सुऽस्तुभा । सः । स्तुभा । सप्त । विप्रैः । स्वरेण । अद्रिं ।
स्वर्यः । नवऽग्वैः ।
सरण्युऽभिः । फलिऽगं । इंद्र । शक्र । वलं । रवेण । दरयः ।
दशऽग्वैः ॥ ४ ॥

अंगिरसो द्विविधाः । सत्रयागमनुतिष्ठंतो ये नवभिर्मासैः समाप्य गतास्ते नवग्वाः । नवग्वा नवनीतगतय इति यास्को व्याचख्यौ । नि॰ ११. १९. । ये तु दशभिर्मासैः समाप्य जग्मुस्ते दशग्वाः । तादृशैरुभयविधैर्विप्रैर्मेधाविभिः सरण्युभिः सरणं शोभनां गतिमिच्छद्भिः सप्त सप्तसंख्याकैः । सप्त ह्यत्र मेधातिथिप्रभृतयोऽंगिरसो दृश्यंते । एवंभूतैरंगिरोभिः सुष्टुभा शोभनस्तोभयुक्तेन स्वरेणोदात्तादिशब्दस्वरोपेतेन । यद्वा । मंद्रमध्यमादिस्वरेण स्तुभा स्तोत्रेण स्वर्यः सुष्ठु प्राप्यः । यद्वा । शब्दनीयः स्तुत्य इत्यर्थः । हे शक्र शक्तिमन्निंद्र । एवंभूतः स त्वमद्रिमादरणीयं । वज्रेण छेत्तव्यमित्यर्थः । फलिगं । प्रतिफलं प्रतिबिंबं । तदस्मिन्नस्तीति फलि स्वच्छमुदकं । तद्गच्छ-त्याधारत्वेनेति फलिगः । यद्वा व्रीह्यादि फलं । तदस्मिन्सति भवतीति फलि वृष्टिजलं । तद्गच्छतीति फलिगः । एवभूतं वलं मेघं रवेणात्मीयेन शब्देन दरयः । अभायय । त्वदीय-शब्दश्रवणमात्रेण मेघो बिभेतीत्यर्थः । यद्वा । अद्रिः पर्वतः । अद्यतेऽस्मिन्पटलादिकमिति । फलिगो मेघः । फलिग उपर इति तन्नामसु पाठात् । वलोऽसुरः । देवा वै वले गाः पर्य-पश्यन्नित्यादावसुरे प्रयुक्तत्वात् । एते त्रयोऽपि त्वदीयशब्द-श्रवणमात्रेणाबिभयुरित्यर्थः ॥ स इत्येकः पादपूरणः । सुष्टुभा । स्तोभतिः स्तुतिकर्मा । संपदादिलक्षणो भावे क्विप् । शोभनः स्तुप् स्तोभो यस्य । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । उप-सर्गात्सुनोतीति षत्वं । स्तुभा । करणभूतस्यापि स्तोत्रस्य स्वव्यापारे कर्तृत्वात् स्तोभति स्तौतीति क्विप् चेति कर्तरि क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं । सप्त । सुपां सुलु-

गिति भिसो लुक् । स्वर्यः । स्वृ शब्दोपतापयोः । ऋहलोर्ण्यं दिति ण्यत् । वृद्ध्यभावश्छांदसः । तित्स्वरित इति स्वरितत्वं । नवग्वैः । नवशब्द उपपदे गमेर्भावे क्विपि गमः क्वावित्यनुनासिकलोप ऊङ् च गमादीनामिति वक्तव्यमित्यूकारांतादेशः । नवभिर्गूर्गमनं येषां ते नवग्वाः । अकारोपजनश्छांदसः । यद्वा । । गमेर्भावे ड्वप्रत्ययः । पूर्ववद्बहुव्रीहिः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सरण्युभिः । सरणमात्मन इच्छंतः सरण्यवः । क्यच्यंत्यलोपश्छांदसः । क्याच्छंदसीत्युः । फलिगं । फलुदकं गच्छतीति फलिगः । डोऽन्यत्रापि दृश्यत इति गमेर्डः । वलं । वृणोतीति वलः । पचाद्यच् । कपिलकादित्वाल्लत्वं । दरयः । दृ विदारणे । दृणी क्षतायां दृ भय इति घटादिषु पाठान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं ॥

पंचमीमृचमाह ॥

गृणानो अंगिरोभिर्दस्म वि वरुषसा सूर्येण गोभिरंधः ।
वि भूम्या अप्रथय इंद्र सानु दिवो रज उपरमस्तभायः ॥ ५ ॥.

गृणानः । अंगिरःऽभिः । दस्म । वि । वः । उषसा ।
सूर्येण । गोभिः । अंधः ।
वि भूम्याः । अप्रथयः । इंद्र । सानु । दिवः । रजः ।
उपरं । अस्तभायः ॥ ५ ॥

हे दस्म दर्शनीय शत्रूणामुपक्षयितवींद्र त्वमंगिरोभिर्ऋषिभिर्गृणानः स्तूयमानः सन् उषसा सूर्येण च सह गोभिः किरणैरंधोऽधकारं विवः । व्यवृणोः । व्यनाशय इत्यर्थः । तथा हे

इंद्र त्वं भूम्याः पृथिव्याः सानु समुच्छ्रितप्रदेशं व्यप्रथयः। विशेषेण विस्तीर्णमकरोः। विषमामिमां समीकृतवानित्यर्थः। तथा दिवोऽंतरिक्षस्य रजो रजसो लोकस्योपरमुग्रं मूलप्रदेशमस्तभायः। अस्तभ्नाः। यथांतरिक्षस्य मूलं दृढं भवति तथा कार्षीरित्यर्थः॥ गृणानः। कर्मणि लटः शानचि यकि प्राप्ते व्यत्ययेन श्ना। प्वादीनां ह्रस्व इति ह्रस्वत्वं। चित्स्वरेणांतोदात्तत्वं। दस्म। दसु उपक्षये। इषियुधींधिदसीत्यादिना मक्। वः। वृञ् वरणे। लुङि सिपि मंत्रे घसेत्यादिना च्लेर्लुक्। गुणे हल्ङ्याब्भ्य इति सलोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। अंधः। तमोऽप्यंध उच्यते। नास्मिन्ध्यानं भवति। नि० ५. १.। इति यास्कः। रजः। लोका रजांस्युच्यंत इत्युक्तत्वाद्रजःशब्दो लोकवचनः। सुपां सुलुगिति षष्ठ्या लुक्। अस्तभायः। लङि स्तंभुस्तुंभ्वित्यादिना। पा० ३. १. ८२.। श्नाप्रत्ययः। छंदसि शायजपि। पा० ३. १. ८४.। इत्यह्रावपि व्यत्ययेन श्नाप्रत्ययस्य शायजादेशः। अनिदितामिति नलोपः। अडागमः॥

॥ इति प्रथमस्य पंचमे प्रथमो वर्गः॥

प्रवर्ग्येऽभिष्टवे तदु प्रयक्षतममित्येषा। अथोत्तरमित्यत्र सूत्रितं। तदु प्रयक्षतममस्य कर्मास्मिन्वन्नभो दुह्नते घृतं पयः। आ० ४. ७.। इति॥

तामेतां सूक्ते षष्ठीमृचमाह॥

तदु प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः।
उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य१श्चतस्रः॥ ६॥

तत्। ऊं इति। प्रयक्षऽतमं। अस्य। कर्म। दस्मस्य।
चारुऽतमं। अस्ति। दंसः।
उपऽह्वरे। यत्। उपराः। अपिन्वत्। मधुऽअर्णसः। नद्यः।
चतस्रः॥ ६॥

दस्मस्य दर्शनीयस्यास्येंद्रस्य तदु तदेव कर्म प्रयक्षतमं। अतिशयेन पूज्यं। दंस इति कर्मनाम। दंसस्तदेव कर्म चारुतमं। अतिशयेन शोभनं। किं तदित्यत आह। अयमिंद्र उपह्वर उपह्वर्तव्ये गंतव्ये पृथिव्याः संबंधिनि समीपदेश उपरा उप्ताः स्थापिता मध्वर्णसो मधुरोदकाश्चतस्रो नद्यः प्रधानभूता गंगादिनदीरपिन्वत्। असिंचदिति। यदेतत्कर्म तदन्येन कर्तुमशक्यत्वात्पूज्यमित्यर्थः॥ प्रयक्षतमं। यक्ष पूजायां। यक्षत इति यक्षः। अतिशयेन यक्षो यक्षतमः। पुनः प्रादिसमासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। दंसः। दसि दंसनदर्शनयोः। चुरादिरात्मनेपदी। दंस्यते कर्तव्यतया दृश्यत इति दंसः कर्म। औणादिकः कर्मण्यसुन्। उपह्वरे। ह्वृ कौटिल्ये। कौटिल्यलक्षणगतिवाचिनाच्च गतिमात्रं लक्ष्यते। उपह्वरंति गच्छंत्यस्मिन्नद्य इत्युपह्वरो भूप्रदेशः। पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घप्रत्ययः। गुणः। कृदुत्तरपदप्रकृतिस्वरत्वं। अपिन्वत्। पिवि सेचने। भौवादिकः। चतस्रः। शस्। त्रिचतुरोः स्त्रियां तिसृचतसृ इति चतुर्शब्दस्य चतस्रादेश आद्युदात्तो निपातितः। पूर्वसवर्णदीर्घे प्राप्तेऽचि र ऋत इति रेफादेशः। चतुर्शब्दस्याद्युदात्तत्वात्स्थानिवद्भावेन चतस्रादेशस्याद्युदात्तत्वे सिद्धेऽपि पुनराद्युदात्तनिपातनसामर्थ्याद्यणादेशस्य वा पूर्वविधौ स्थानिवद्भावाच्चतुरः शसीत्यंतोदात्तत्वस्याभावः। न च न पदांतेति

स्थानिवद्भावप्रतिषेधः । स्वरदीर्घयलोपेषु लोपाजादेश एव न स्थानिवत् अन्यत्र स्थानिवदेव । पा० १. १. ५८. १. । इति नियमात् ॥

सप्तमीमृचमाह ॥

द्विता वि वव्रे सनजा सनीळे अयास्यः स्तवमानेभिरर्कैः ।
भगो न मेने परमे व्योमन्नधारयद्रोदसी सुदंसाः ॥ ७ ॥

द्विता । वि । वव्रे । सनऽजा । सनीळे इति सऽनीळे ।
अयास्यः । स्तवमानेभिः । अर्कैः ।
भगः । न । मेने इति । परमे । विऽओमन् । अधारयत् ।
रोदसी इति । सुऽदंसाः ॥ ७ ॥

अयास्यः । यासः प्रयत्नः । तत्साध्यो यास्यः । न यास्योऽयास्यः । युद्धरूपैः प्रयत्नैः साधयितुमशक्य इत्यर्थः । कथं साध्यत इत्यत आह । स्तवमानेभिः स्तोत्रं कुर्वद्भिः पुरुषैः । अर्कैः स्तुतिरूपैर्मंत्रैः स्तूयमानः सन्निंद्रः सुसाध्यो भवति । यद्वा । अयास्यः पंचवृत्तिर्मुख्यप्राणः । स ह्यास्यान्मुखादयते गच्छति निष्क्रामति । तदुपासकोऽप्यंगिरा उपचारादयास्य उच्यते । तथा च छंदोगैराम्नातं । तं हायास्य उद्गीथमुपासां चक्रे । एतमु एवायास्यं मन्यंते । आस्याद्यदयते तेनेति । अथवा । अयमास्ये मुखे वर्तत इत्ययास्यः । तथा च वाजसनेयकं । ते होचुः क्व नु सोऽभूद्यो न इत्थमसक्तेत्ययमास्यांतरितीति । पूर्ववदुपासकोऽप्ययास्यः । तेन ऋषिणा स्तवमानेभिर्गुणिनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वद्भिरर्कैर्मंत्रैः करणभूतैः स्तूयमानः सन् सनजा । सनेति निपातो नित्यार्थः । नित्यजाते सर्वदा विद्यमानस्वभावे इत्यर्थः । प्रथमभावविकार-

वाचिना जनिना द्वितीयो भावविकारः सत्ता लक्ष्यते। यथौत्पत्तिकस्तु शब्दस्यार्थेन संबंध इत्यौत्पत्तिकमिति नित्यं ब्रूम इति हि तद्भाष्यं। सनीळे समानं नीळमोको निवासस्थानं ययोस्ते। संलग्ने इत्यर्थः। एवंविधे द्यावापृथिव्यौ द्विता द्विधा विवव्रे। विवृते अकरोत्। भेदेनास्थापयदित्यर्थः। मेने मननीये परम उत्कृष्टे व्योमन् विविधरक्षणे नभसि वर्तमानो भगो न सूर्य इव सुदंसाः शोभनकर्मेंद्रो रोदसी द्यावापृथिव्याववधारयत्। अपोषयत्। यद्वा मेनेति स्त्रीनाम। तथा च यास्कः। नि० ३. २१.। मेना ग्ना इति स्त्रीणां मेना मानयंत्येना इति। स्त्रीरूपमापन्ने रोदसी इंद्रोऽपुष्यदित्यर्थः॥ द्विता। द्विधेत्यस्य धकारस्य तकारश्छांदसः। सनजा। जनी प्रादुर्भावे। अस्माद्भावेऽन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात् केवलादपि जनेर्डप्रत्ययः। सना नित्यं जो जननं ययोस्ते सनजे। पूर्वपदस्य ह्रस्वश्छांदसः। एवमादित्वादंतोदात्तत्वं। तदेव बहुव्रीहिस्वरेण शिष्यते। सुपां सुलुगिति विभक्तेराकारः। अयास्यः। यसु प्रयत्ने। यासः प्रयत्नः। तत्र भवो यास्यः। भवे छंदसीति यत्। न यास्योऽयास्यः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। श्रुत्युक्तनिर्वचने तु पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। मेने। सप्तम्येकवचनस्य सुपां सुलुगिति शे आदेशः। शे इति प्रगृह्यत्वं। यद्वा मन्यत इति मेना। पंचाद्यच्। नशिमन्योरलिट्येत्वं वक्तव्यं। पा० ६.४.१२०.५.। इत्येत्वं। ततष्टाप्। द्विवचन ईदूदेद्द्विवचनं। पा० १.१.११.। इति प्रगृह्यत्वं। सुदंसाः। दंस इति कर्मवाची। असन्प्रत्ययांत आद्युदात्तः। बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं॥

अष्टमीमृचमाह ॥

सनाद्दिवं परि भूमा विरूपे पुनर्भुवा युवती स्वेभिरेवैः ।
कृष्णेभिरक्तोषा रुशद्भिर्वपुर्भिरा चरतो अन्यान्या ॥ ८ ॥

सनात् । दिवं । परि । भूम । विरूपे इति विऽरूपे ।
पुनःऽभुवा । युवती इति । स्वेभिः । एवैः ।
कृष्णेभिः । अक्ता । उषाः । रुशत्ऽभिः । वपुःऽभिः । आ ।
चरतः । अन्याऽअन्या ॥ ८ ॥

विरूपे शुक्लकृष्णतया विषमरूपे पुनर्भुवा पुनः पुनः प्रतिदिवं संजायमाने युवती तरुण्यौ । रात्र्युषसोः सर्वदैकरूप्यादेवंभूते रात्र्युषसौ दिवं द्युलोकं भूमा भूमिं च सनाच्चिरकालादारभ्य स्वेभिरेवैः स्वकीयैर्गमनैः परिचरतः । पर्यावर्तेते । अयमेवार्थः स्पष्टीक्रियते । अक्ता रात्रिः कृष्णेभिरंधकाररूपैर्वर्णैरुपलक्षिता । उषाश्च रुशद्भिर्दीप्यमानैर्वपुर्भिः स्वशरीरभूतैस्तेजोभिरुपलक्षिता । अन्यान्या परस्परव्यतिहारेणाचरतः । आवर्तेते । हे इंद्र । एतत्सर्वं त्वयैव कार्यते त्वदधीनत्वात्सर्वासां देवतानामित्यर्थः ॥ भूमा । सुपां सुलुगिति द्वितीयाया डादेशः । छांदसो ह्रस्वः । एवैः । इण् गतौ । इण्शीङ्भ्यां वन्निति भावे वन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । अक्ता । नक्तेति रात्रिनाम । नलोपश्छांदसः । वपुर्भिः । अर्तिपृवपीत्यादिनोम् । नित्त्वादाद्युदात्तः । अन्यान्या । कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलं । पा॰ ८. १. १२. ९. । इति द्विर्भावे तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितस्यानुदात्तत्वं ॥

नवमीमृचमाह ॥

सनेमि सख्यं स्वपस्यमानः सूनुर्दाधार शवसा सुदंसाः ।
आमासु चिद्दधिषे पक्कमंतः पयः कृष्णासु रुशद्रोहि-
णीषु ॥ ९ ॥

सनेमि । सख्यं । सुऽअपस्यमानः । सूनुः । दाधार । शवसा ।
सुऽदंसाः ॥
आमासु । चित् । दधिषे । पक्कं । अंतरिति । पयः ।
कृष्णासु । रुशत् । रोहिणीषु ॥ ९ ॥

स्वपस्यमानः । स्वपः शोभनं कर्म । तदिवाचरन् शवसा शवसो बलस्य सूनुः पुत्रः । अतिबलवानित्यर्थः । सुदंसाः । शोभनयागादिकर्मसंयुक्तः । एवंभूत इंद्र सख्यं यजमानानां सखित्वं सनेमि पुराणं दाधार । धारयति पोषयतीत्यर्थः । सनेमीति पुराणनाम । प्रवयाः सनेमीति पाठात् । किंच । आमासु चित् । आर्द्रास्वपरिपक्वासु गोषु चांतर्मध्ये पक्वं परिपक्वं पयो दधिषे । धारयसि । तथा कृष्णासु कृष्णवर्णासु रोहिणीषु लोहितवर्णासु च गोषु तद्विपरीतं रुशद्दीप्यमानं श्वेतवर्णं पयो दधिषे ॥ सख्यं । सख्युर्य इति यः । प्रत्ययस्वरः । दाधार । धृञ् धारणे । तुजादित्वादभ्यासस्य दीर्घत्वं । पक्कं । पचो व इति निष्ठातकारस्य वत्वं । रोहिणीषु । रुह बीज-
जन्मनि प्रादुर्भावे । रुहे रश्च लो वेतीतन्प्रत्ययांतो रोहित-
शब्द आद्युदात्तो वर्णवाची । वर्णादनुदात्तात्तोपधात्तो नः ।
पा० ४. १. ३९. । इति ङीप् । तत्संनियोगेन तकारस्य नकारादेशश्च । ङीपः पित्त्वादनुदात्तत्वे प्रातिपदिकस्वर एव शिष्यते ॥

दशमीमृचमाह ॥

सनात्सनीला अवनीरवाता व्रता रक्षंते अमृताः सहोभिः ।
पुरू सहस्रा जनयो न पत्नीर्दुवस्यंति स्वसारो
अह्रयाणं ॥ १० ॥

सनात् । सऽनीलाः । अवनीः । अवाताः । व्रता । रक्षंते ।
अमृताः । सहःऽभिः ।
पुरु । सहस्रा । जनयः । न । पत्नीः । दुवस्यंति । स्वसारः ।
अह्रयाणं ॥ १० ॥

सनाच्चिरकालादारभ्य सनीलाः समाननिवासस्थाना अवाताः । वातं गमनं । तद्रहिताः । एकपार्श्वस्थानात् । अवनय इत्यंगुलिनाम । एवंभूता अवनीरंगुलयः पुरू पुरूणि बहूनि सहस्रासंख्यातानि व्रता व्रतानींद्रसंबंधीनि कर्माण्यमृताः पुनःपुनःकरणेऽप्यालस्यरहिताः सत्यः सहोभिरात्मीयैर्बलैः रक्षंते । पालयंति । अपि च स्वसारः । स्वयमेव सरंत्योऽंगुलयः पत्नीः पालयित्र्योऽह्रयाणं लज्जारहितं प्रगल्भमित्यर्थः । यद्वा अह्नीतयानं प्रशस्तगमनमिंद्रं जनयो न । जनय इति देवानां पत्न्य उच्यंते । देवानां वै पत्नीर्जनय इति श्रुतेः । ता इव दुवस्यंति । परिचरंति । अंजलिबंधनेनेंद्रं प्रीणयंतीत्यर्थः ॥ अवनीः । अवनयोऽंगुलयो भवंत्यवंति कर्माणीति यास्कः । सुपां सुलुगिति जसः पूर्वसवर्णदीर्घत्वं । अवाताः । वा गतिगंधनयोः । असिहसीत्यादिना भावे तन् प्रत्ययः । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । व्रता । शेश्छंदसि बहुलमिति शेर्लोपः । दुवस्यंति । दुवस्यतिः परिचरणकर्मा । कंड्वादिः । अतो यक एव स्वरः शिष्यते । पादा·

दित्वान्निघाताभावः । अक्षयाणं । क्षी लज्जायांपिषत । तत्र छंदसीति श्नोरभावः । व्यत्ययेन शानच् । सुगभावाभसि कंपंते नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । यद्वा । बहुलं ई । गमह-शपो लुकि छंदस्युभयथेति शानच आर्धधातुकत्वेन ङित्त्वं इत्यंतो-गुणायादेशौ । पूर्ववत्समासस्वरौ । यास्कस्त्वेवं व्याख्यातवान् जघान अक्षयाणोऽक्षीतयान इति । नि० ५. २५. ॥ लक्ष ।

॥ इति प्रथमस्य पंचमे द्वितीयो वर्गः ॥

एकादशीमृचमाह ॥

सनायुवो नमसा नव्यो अर्कैर्वसूयवो मतयो दस्म दद्रुः ।
पतिं न पत्नीरुशतीरुशंतं स्पृशंति त्वा शवसावन्म-
नीषाः ॥ ११ ॥

सनाऽयुवः । नमसा । नव्यः । अर्कैः । वसुऽयवः । मतयः ।
दस्म । दद्रुः ।
पतिं । न । पत्नीः । उशतीः । उशंतं । स्पृशंति । त्वा ।
शवसाऽवन् । मनीषाः ॥ ११ ॥

हे दस्म दर्शनीयेंद्र । अर्कैः शस्त्ररूपैर्मंत्रैर्नमसा नमस्कारेण यस्त्वं नव्यः स्तुत्यो भवसि । सनायुवः सनातनमग्निहोत्रादि नित्यं कर्मात्मन इच्छंतो वसूयवो वसु धनमात्मन इच्छंतो धनकामा वा मतयो मेधाविनस्त्वां दद्रुः । बहुना प्रयासेन जग्मुः । हे शवसावन् बलवन्निंद्र तैः प्रयुक्ता मनीषाः स्तुतयस्त्वा त्वां स्पृशंति । प्राप्नुवंति । तत्र दृष्टांतः । उशतीरुशत्यः कामयमानाः पत्नीः पत्न्य उशंतं कामयमानं पतिं न । यथा पतिं संभजंते तद्वत् ॥ सनायुवः । सनेत्येतदव्ययं नित्यत्वमा-चष्टे । तेन च तद्वान् लक्ष्यते । सना सनातनं कर्मात्मन इच्छं-

सनात्सनियुवः। क्याच्छंदसीत्युप्रत्ययः। जसि वर्णव्यत्ययेन पुरू सन्तयः। मन ज्ञाने। मन्यंत इति मतयः स्तोतारः। च संज्ञायामिति क्तिच्। न क्तिचि दीर्घश्चेति निषेधे सना अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। चित्त्वादन्तोदात्तत्वं। दद्रुः। द्रा कुत्सायां गतौ। लिट्युस्यातो लोप इटि चेत्याकारलोपः। उशतीः। वश कांतौ। लटः शतृ। अदादित्वाच्छपो लुक्। ग्रहिज्यादिना संप्रसारणं। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। वा छंदसीति पूर्वसवर्णदीर्घः। शवसावन्। मतुप्याकारोपजनश्छांदसः। यद्वा मत्वर्थीय आवनिप्॥

द्वादशीमृचमाह॥

सनादेव तव रायो गभस्तौ न क्षीयंते नोप दस्यंति दस्म।
द्युमाँ असि क्रतुमाँ इंद्र धीरः शिक्षा शचीवस्तव नः शचीभिः॥ १२॥

सनात्। एव। तव। रायः। गभस्तौ। न। क्षीयंते। न। उप। दस्यंति। दस्म।
द्युऽमान्। असि। क्रतुऽमान्। इंद्र। धीरः। शिक्ष। शचीऽवः। तव। नः। शचीभिः॥ १२॥

हे दस्म दर्शनीयेंद्र। गभस्तिरिति बाहुनाम। तव गभस्तौ हस्ते सनादेव चिरकालादारभ्य स्थितानि रायो धनानि न क्षीयंते। न नश्यंति। नोपदस्यंति च। स्तोतृभ्यो दत्तेऽपि त्वद्धस्तगतं धनमुपक्षयं न प्राप्नोति। अपि तु वर्धते। हे इंद्र धीरो बुद्धिमान् धृष्टो वा त्वं द्युमान् दीप्तिमानसि। तथा क्रतुमान् लोकरक्षणहेतुभूतकर्मयुक्तोऽसि। हे शचीवः कर्म-

वन्निंद्र तव शचीभिस्त्वदीयैः कर्मभिर्नोऽस्मभ्यं रंपिषत। तत्र देहि। शिक्षतिर्दानकर्मा॥ चीयंते। चीषृणभसि कंपंते क्र्यादिः। अस्मात्कर्मकर्तरि कर्मवद्भावाद्यगात्मनेपदे। गमष्व-स्वाश्रयमपि यथा स्यादिति कर्तृवद्भावादचः कर्तृयि इत्यंतो-दात्तत्वं। चादिलोपे विभाषेति निघातप्रतिषेधः। जह्नान शच्यस्यास्तीति शचीवान्। छंदसीर इति मतुपो वत्वं। लक्। मतुवसो रुरिति नकारस्य रुत्वं॥

त्रयोदशीमृचमाह॥

सनायते गोतम इंद्र नव्यमतक्षद्ब्रह्म हरियोजनाय।
सुनीथाय नः शवसान नोधाः प्रातर्मक्षू धियावसुर्ज-
गम्यात्॥ १३॥

सनाऽयते। गोतमः। इंद्र। नव्यं। अतक्षत्। ब्रह्म।
हरिऽयोजनाय।
सुऽनीथाय। नः। शवसान। नोधाः। प्रातः। मक्षु।
धियाऽवसुः। जगम्यात्॥ १३॥

स इंद्र सनायते। नित्य इवाचरति। सर्वेषामाद्यो भवति। हे शवसान बलवन्निंद्र हरियोजनाय। हरी अश्वौ रथे योजय-तीति हरियोजनः। सुनीथाय सुष्ठु नेत्रे। एवंभूताय तस्मै तुभ्यं गोतमो गोतमस्य ऋषेः पुत्रो नोधा ऋषिर्नव्यं नूतनं ब्रह्मैतत्सूक्तरूपं स्तोत्रं नोऽस्मदर्थमतक्षत्। अकरोत्। अतो-ऽस्माभिरनेन स्तोत्रेण स्तुतः सन्धिया बुद्ध्या कर्मणा वा प्राप्त-वसुरिंद्रः प्रातःकाले मक्षु शीघ्रं जगम्यात्। आगच्छतु॥ सनायते। सनेति निपातो नित्यशब्दसमानार्थः। तस्मादाचा-

सनात्सनीयुधः । सुनीथाय । णीञ् प्रापण इत्यस्मादौणादिकस्तथ्यः । थाथादिस्वरः ॥

॥ इति प्रथमस्य पंचमे तृतीयो वर्गः ॥

त्वं महानिति नवर्चं षष्ठं सूक्तं । नोधस आर्षं त्रैष्टुभमैंद्रं । अनुक्रांतं च । त्वं नवेति॥ समूळ्हे दशरात्रे द्वितीये ऽहनि मरुत्वतीये शस्त्र एतत्सूक्तं । विश्वजितो ऽग्निं नर इति खंडे सूत्रितं । तां सु ते कीर्तिं त्वं महां इंद्र यो ह । आ० ८. ७. । इति ॥

तत्र प्रथमामृचमाह ॥

त्वं महाँ इंद्र यो ह शुष्मैर्द्यावा जज्ञानः पृथिवी अमे धाः ।
यद्ध ते विश्वा गिरयश्चिदभ्वा भिया दृळ्हासः किरणा नैजन् ॥ १ ॥

त्वं । महान् । इंद्र । यः । ह । शुष्मैः । द्यावा । जज्ञानः । पृथिवी इति । अमे । धाः ।
यत् । ह । ते विश्वा । गिरयः । चित् । अभ्वा । भिया । दृळ्हासः । किरणाः । न । ऐजन् ॥ १ ॥

हे इंद्र त्वं महान् गुणैः सर्वाधिको भवसि । यो ह यः खलु त्वममे ऽसुरकृते भये सति जज्ञानस्तदानीमेव प्रादुर्भूतः सन् शुष्मैः शत्रूणां शोषकैरात्मीयैर्बलैर्द्यावापृथिवी द्यावापृथिव्यौ धाः । अधारयः । तादृशाद्भयादमूमुच इत्यर्थः । किंच । यद्ध ते यस्य खलु तव संबंधिन्या भिया भीत्या विश्वा विश्वानि व्याप्तानि यानि भूतजातानि गिरयश्चित् ये च शिलोच्चयाः । अभ्वा । महन्नमैतत् । अन्यान्यपि महांति यानि

इति तेऽपि सर्वे हलूहासो दृढा अप्येजन्। अकंपिषत। तत्र दृष्टांतः। किरणा न। यथा सूर्यरश्मय इतस्ततो नभसि कंपंते तद्वत्॥ जज्ञानः। जनी प्रादुर्भावे। लिटः कानच्। गमहने त्यादिनोपधालोपः। स्थानिवद्भावाद्द्विर्भावादि। चित इत्यंतोदात्तत्वं। द्यावापृथिवी इत्यस्य समस्तपदस्य मध्ये जज्ञान इत्यस्य पाठश्छांदसः। यत्। सुपां सुलुगिति षष्ठ्या लुक्। अभ्वा। आ समंताद्भवंतो सद्भावं प्राप्नुवंतीत्यभ्वा महांतः। आङ्पूर्वाद्भवतेरौणादिको ड्वन्प्रत्ययः। उपसर्गस्य ह्रस्वत्वं च। यद्वा। नञ्पूर्वाद्भवतेः प्राप्त्यर्थान्नञि भुवो डिदिति क्वन्प्रत्ययः। महांतो हि प्राप्तुं न शक्यंते। लोपश्छंदसि बहुलमिति यलोपः। किरणाः। कीर्यंते विक्षिप्यंत इति किरणाः कृ विक्षेपे। कृपृवृजिमंदिनिधाञ्भ्यः क्युरिति क्युप्रत्ययः। योरनादेशे प्रत्ययाद्युदात्तत्वं। ऋत इद्धातोरितीत्वं। ऐजन्। एजृ कंपने। लङ्याडागमः। स चोदात्तः। वृद्धिश्च॥

द्वितीयामृचमाह॥

आ यद्धरी इंद्र विव्रता वेरा ते वज्रं जरिता बाह्वोर्धात्।
येनाविहर्यतक्रतो अमित्रान्पुर इष्णासि पुरुहूत पूर्वीः॥२॥

आ। यत्। हरी इति। इंद्र। विऽव्रता। वेः। आ। ते।
वज्रं। जरिता। बाह्वोः। धात्।
येन। अविहर्यतक्रतो इत्यविहर्यतऽक्रतो। अमित्रान्।
पुरः। इष्णासि। पुरुऽहूत। पूर्वीः॥ २॥

हे इंद्र त्वं यद्यदा विव्रता विविधकर्माणौ हरी त्वदीयावश्वावावेः। रथ आगमयसि। रथे योजयसीत्यर्थः। तदानीं

ते तव बाह्वोर्हस्तयोर्जरिता स्तोता वज्रमाधात् । स्तोत्रैः स्थापयति । स्तोत्रा स्तुतेः प्रयत्नमंतरेण वज्रं त्वद्धस्ते न दृश्यत इत्यर्थः । हे अविहर्यतक्रतोऽप्रेप्सितकर्मन्निंद्र । अमित्रान् शत्रून्येन वज्रेणेष्णासि । अभिगच्छसि । हे पुरुहूत पुरुभिर्बहुभिर्यजमानैराहूत त्वं पूर्वीर्बह्वीः पुरोऽसुरपुराणि भेत्तुमभिगच्छसीत्यर्थः ॥ विव्रता । व्रतमिति कर्मनाम । विविधं व्रतं ययोस्तौ । सुपां सुलुगिति पूर्वसवर्णदीर्घत्वं । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वेः । वी गतिप्रजननकांत्यशनखादनेषु । अंतर्भावितण्यर्थाच्छांदसे लङि सिप्यदादित्वाच्छपो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । धात् । दधातेश्छांदसे लुङि गातिस्थेति सिचो लुक् । पूर्ववदडभावः । अविहर्यतक्रतो । हर्यतिः । प्रेप्साकर्मेति यास्कः । हर्य गतिकांत्योः । कांतिरभिलाषः । विहर्यतोऽभिलषितः । अविहर्यतोऽनभिलषित इत्यर्थः । तादृशः क्रतुः कर्म यस्य स तथोक्तः । अमित्रान् । न संति मित्राण्येष्विति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । इष्णासि । इष आभीक्ष्ण्ये । अत्र गत्यर्थः । क्र्यादिभ्यः श्ना । सिपः पित्त्वादनुदात्तत्वे तस्यैव स्वरः शिष्यते । यद्वृत्तयोगादनिघातः ॥

तृतीयामृचमाह ॥

त्वं सत्य इंद्र धृष्णुरेतान्त्वमृभुक्षा नर्यस्त्वं षाट् ।
त्वं शुष्णं वृजने पृक्ष आणौ यूने कुत्साय द्युमते
सचाहन् ॥ ३ ॥

त्वं । सत्यः । इंद्र । धृष्णुः । एतान् । त्वं । ऋभुक्षाः ।
नर्यः । त्वं । षाट् ।

त्वं । शुष्णं । वृजने । पृक्षे । आणौ । यूने । कुत्साय । द्युऽमते । सचा । अहन् ॥ ३ ॥

हे इंद्र त्वं सत्यः सत्यु भवः । सर्वोत्कृष्ट इत्यर्थः । एतान् शत्रूनभिगतः सन् धृष्णुस्तेषां धर्षयिता तिरस्कर्ता । किंच त्वमृभुक्षा ऋभूणामधिपतिः । तेषु कृतनिवासो वा । यद्वा महन्नामैतत् । महान्प्रवृद्धोऽसि । नर्यो नृभ्यो हितः । तथा त्वं षाट् शत्रूणामभिभविता । हंतेत्यर्थः । किंच वृजन इत्यादीनि त्रीणि संग्रामनामानि । अत्र पूर्वे विशेषणे । वृजने वर्जनयुक्ते संग्रामे हि वीराः पुरुषा वर्जते हिंस्यंते । पृक्षे संपर्चनीये वीर्यैर्योद्धृ प्राप्तव्ये । एवंविध आणौ संग्रामे द्युमते दीप्तिमते यूने तरुणाय कुत्साय सचा त्वं सहायो भूत्वा शुष्णं शोषयितारमेतत्संज्ञमसुरमहन् । अवधीः ॥ ऋभुक्षाः । ऋभुरिति मेधाविनाम । उरु विस्तीर्णं भाति । यद्वा । ऋतेन यज्ञेन भाति भवतीति वा ऋभुः । उरुशब्दे ऋतशब्दे वोपपदे भातेर्भवतेर्वा मृगय्वादयश्च । उ० १. ३७. । इति कुप्रत्ययः पूर्वपदस्य ऋभावश्च निपात्यते । क्षयतिरैश्वर्यकर्मा । तेषामीष्ट इत्यृभुक्षाः । यद्वा क्षि निवासगत्योः । तेषु निवसतीति पतेस्थ इति विधीयमान इनिप्रत्ययो बहुलवचनादस्मादपि भवति । टिलोपश्च । सौ पथिमथ्यृभुक्षामादित्यात्वं । प्रत्ययस्वरः । षाट् । सह अभिभवे । छंदसि सह इति केवलादपि ण्विः । षत्वं छांदसं । द्युमते । द्यौर्दीप्तिरस्मिन्नस्तीति द्युमान् । स्वादिष्वसर्वनामस्थाने इति पदसंज्ञायां दिव उदित्युत्वं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं ॥

चतुर्थीमृचमाह ॥

त्वं ह त्यदिंद्र चोदीः सखा वृत्रं यद्वज्रिन्वृषकर्मन्नुभ्नाः ।

यद्ध शूर वृषमणः पराचैर्वि दस्यूँर्योनावकृतो वृथाषाट् ॥४॥

त्वं । ह । त्यत् । इंद्र । चोदीः । सखा । वृत्रं । यत् ।
वज्रिन् । वृषऽकर्मन् । उभ्नाः ।

यत् । ह । शूर । वृषऽमनः । पराचैः । वि । दस्यून् ।
योनौ । अकृतः । वृथाषाट् ॥ ४ ॥

हे इंद्र त्वं ह त्वं खलु सखा कुत्सस्य सहायः सन् त्यत्तत्प्रसिद्धं धनं जयलक्षणं यशो वा चोदीः । प्रेरितवान् । अकार्षीरित्यर्थः । हे वृषकर्मन् वृष्ट्युदकसेचनरूपकर्मोपेत वज्रिन् वज्रवन्निंद्र वृत्रं सर्वस्य धनस्यावरीतारं कुत्सस्य शत्रुं यत् यदोभ्नाः । अतुभ्नाः । अहिंसीः । अपि च हे शूर शत्रूणां प्रेरक वृषमणः कामाभिवर्षकमनस्केंद्र वृथाषाट् अनायासेन शत्रूणामभिभविता त्वं यद्ध यदा खलु योनौ वीरैर्मिश्रणीये संग्रामे दस्यून्कुत्सस्योपक्षयितृनन्यान् शत्रून्पराचैः परागमनैर्व्यकृतः । पराङ्मुखा यथा भवंति तथा व्यच्छिनः । तदानीं कुत्सः सर्वं यशः प्राप्नोदित्यर्थः ॥ चोदीः । चुद प्रेरणे । लुङि नेटीति सिचि वृद्धिप्रतिषेधः । उभ्नाः । उभ तुभ हिंसायां । क्र्यादिकः । लङि सिपि तलोपश्छांदसः । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । पराचैरित्येतदव्ययं । नीचैरुच्चैरितिवदिति भट्टभास्करमिश्रः । पराचैः परांचनैरिति निरुक्तं । नि० ११. २५. । दस्यून् । दीर्घादटि समानपाद इति नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेत्यूकारस्य सानुनासिकता । अकृतः ।

कृतो छेदने । लङि सिपि तुदादित्वाच्छप्रत्ययः । आगमानुशासनस्यानित्यत्वात् शे मुचादीनामिति नुमागमस्याभावः ॥

पंचमीमृचमाह ॥

त्वं ह त्यदिंद्रारिषण्यन्दृळ्हस्य चिन्मर्तानामजुष्टौ ।
व्य१स्मदा काष्ठा अर्वते वर्घनेव वज्रिञ्छ्नथिह्यमित्रान् ॥५॥

त्वं । ह । त्यत् । इंद्र । अरिषण्यन् । दृळ्हस्य । चित् ।
मर्तानां । अजुष्टौ ।
वि । अस्मत् । आ । काष्ठाः । अर्वते । वः । घनाऽइव ।
वज्रिन् । श्नथिहि । अमित्रान् ॥ ५ ॥

हे इंद्र त्वं ह त्वं खलु त्यत् तस्य दृळ्हस्य चित् दृढस्य कस्यचिदप्यरिषण्यन् रेषणमनिच्छन् एवंस्वभावो भवसि। देवतात्वेनानुग्रहीतृत्वात्। तथापि मर्तानां स्तोतॄणामस्माकं शत्रुभिरजुष्टावप्रीतौ सत्यामस्मदर्वते,स्मदीयायाश्वाय गंतुं काष्ठा दिश आ समंतात् विवः। विवृताः कुरु। यथा सर्वासु दिक्ष्वस्मदीया अश्वाः प्रतिरोधमंतरेण गच्छंति तथा कुर्वित्यर्थः। किंच तत्रत्यानमित्रान् हे वज्रिन्वज्रवन्निंद्र घनेव घनेन कठिनेन पर्वतेनेव वज्रेण श्नथिहि। श्नथय। जहीत्यर्थः। यद्वा मर्तानां मनुष्याणां मध्ये यस्मिन्कस्मिंश्चित्तवाप्रीतौ सत्यां तस्य शत्रोर्दृढस्याप्यरिषण्यन् रेषणं हिंसनमनिच्छन्वर्तसे। यस्मिंस्तु कुत्सादौ प्रीतिरस्ति तस्य शत्रुवधं चकर्षे। अतस्तव प्रियाणामस्माकमर्वत इत्यादि पूर्ववत्॥ त्यत्। सुपां सुलुगिति षष्ठ्या लुक्। अरिषण्यन्। रिष्टशब्दात् क्यचि दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति। पा० ७. ४. ३६.। इति रिषण्भावो निपात्यते। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। अस्मत्। पूर्ववत् षष्ठ्या

लुक् । अर्वते । अर्वणस्त्रसावनञ इति नकारस्य तकारादेशः ॥ वनिप्सुपौ पित्त्वादनुदात्तौ । परिशिष्टाद्धातुस्वरः । घनेव । मूर्तौ घन इति काठिन्ये गम्यमाने हन्तेरप्प्रत्ययांतो निपात्यते । श्नथिहि । श्नथ हिंसार्थः । ण्यंताल्लोटि बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य पंचमे चतुर्थो वर्गः ॥

षष्ठीमृचमाह ॥

त्वां ह त्यदिंद्रार्णसातौ स्वर्मीळ्हे नर आजा हवंते ।
तव स्वधाव इयमा समर्य ऊतिर्वाजेष्वतसाय्या भूत् ॥ ६ ॥

त्वां । ह । त्यत् । इंद्र । अर्णऽसातौ । स्वःऽमीळ्हे । नरः । आजा । हवंते ।
तव । स्वधाऽवः । इयं । आ । सऽमर्ये । ऊतिः । वाजेषु । अतसाय्या । भूत् ॥ ६ ॥

हे इंद्र । अर्णसातावर्णानां गंतृणां युद्धे प्रवृत्तानां पुरुषाणां सातिर्लाभो यस्मिन् । स्वर्मीळ्हे । मीळ्हमिति धननाम । सुष्ठुरणीयं धनं यस्मिन् । एवंभूत आजा आजौ संग्रामे त्यत्तं प्रसिद्धं त्वामेव नरो योद्धुकामाः पुरुषाः सहायार्थं हवंते । आह्वयंति । यद्वा । अर्णस उदकस्य सातिर्लाभो यस्मिन्वृत्रादियुद्धे तस्मिन्नित्यर्थः । वृष्टिनिरोधकेन वृत्रेण सह वर्षणार्थं तव यद्युद्धं तत्र स्तोतारस्त्वां प्रोत्साहयंतीति भावः । यस्मादेवं तस्मात् हे स्वधावः । हे अन्नवन् बलवन्वेंद्र समर्ये संग्रामे तव संबंधिनीयमूतिस्त्वदीयमिदं रक्षणं आ अस्मदाभिमुख्येन भूत् । भवतु । वाजेषु संग्रामेषु दैषोतिरतसाय्या योद्धृभिः प्रार्थया भवति ॥ त्यत् । सुपां सुलुगिति द्वितीयाया लुक् । अर्णसातौ ।

... गतौ। बहुलवचनादौणादिको नप्रत्ययः। षणु दाने इत्यस्माद्भावे क्तिनि :जनसनखनामित्यनुनासिकस्यात्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यद्वा। उदके नुट् चेत्यर्तेरसुन् प्रत्ययो नुडागमश्च। पीवोपवसनादीनां छंदसि लोपो वक्तव्यः॥ पा° ६. २. १०९. ९.। इति सलोपः। नित्त्वादाद्युदात्तत्वं। पूर्ववद्बहुव्रीहिस्वरः। स्वर्मीळ्हे। स्वरशब्दो व्यङ्स्वरौ स्वरितावित स्वरितः। बहुव्रीहिस्वरेण स एव शिष्यते। आजा। सुपां सुलुगिति सप्तम्या डादेशः। स्वधावः। मतुवसो रुरिति मतुपो रुत्वं। :अतसाय्या। अत सातत्यगमने। औणादिकः साय्यप्रत्ययः। तस्याडागमश्च। आगमानुदात्तत्वे प्रत्ययाद्युदात्तत्वं। भूत्। छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

सप्तमीमृचमाह॥

त्वं ह त्यदिंद्र सप्त युध्यन्पुरो वज्रिन्पुरुकुत्साय दर्दः।
बर्हिर्न यत्सुदासे वृथा वर्गंहो राजन्वरिवः पूरवे कः॥७॥
त्वं। ह। त्यत्। इंद्र। सप्त। युध्यन्। पुरः। वज्रिन्।
पुरुऽकुत्साय। दर्दरिति दर्दः।
बर्हिः। न। यत्। सुऽदासे। वृथा। वर्क्। अंहो। राजन्।
वरिवः। पूरवे। करिति कः॥७॥

हे वज्रिन् वज्रवन्निंद्र पुरुकुत्सायैतत्संज्ञाय ऋषये युध्यन् तदीयशत्रुभिः सह युद्धं कुर्वाणस्त्वमेव त्यत् ताः सप्त पुरः तदीयानि सप्तसंख्यानि नगराणि दर्दः। व्यदारयः। अभैत्सीरित्यर्थः। अपि च सुदास एतत्संज्ञाय राज्ञेऽंहोरितत्संज्ञस्यासुरस्य संबंधि यद्धनमस्ति तद्वृथानायासेन बर्हिर्न बर्हिरिव

वर्क्। अवृणक्। अच्छिन इत्यर्थः। तदनंतरं पूरवे त्वां हविषा पूरयते तस्मै सुदासे हे राजन् स्वामिन्निंद्र वरिवो धनं कः। अकार्षीः॥ त्यत्। सुपां सुलुगिति विभक्तेर्लुक्। दर्दः। दॄ विदारणे। अस्माद्यङ्लुगंताल्लङि सिप्यदादिवच्चेति वचनाच्छपो लुक्। बाहुलकाद्बलादिशेषाभावः। हल्ङ्याब्भ्य इति सलोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। सुदासे। शोभनं ददातीति सुदाः। असुन्। सुदाः कल्याणदान इति यास्कः। वर्क्। वृजी। वर्जने। लङि सिपि बहुलं छंदसीति विकरणस्य लुक्। लघूपधागुणे पूर्ववत्सलोपः। अडभावश्च। चोः कुरिति कुत्वं। कः। डुकृञ् करणे। लुङि सिपि मंत्रे घसेति च्लेर्लुक् पूर्ववत्सलोपाडभावौ॥

अष्टमीमृचमाह॥

त्वं त्यां न इंद्र देव चित्रामिषमापो न पीपयः परिज्मन्।
यया शूर प्रत्यस्मभ्यं यंसि त्मनमूर्जं न विश्वध क्षरध्यै॥ ८॥

त्वं। त्यां। नः। इंद्र। देव। चित्रां। इषं। आपः। न।
पीपयः। परिऽज्मन्।
यया। शूर। प्रति। अस्मभ्यं। यंसि। त्मनं। ऊर्जं। न।
विश्वध। क्षरध्यै॥ ८॥

हे देव द्योतमानेंद्र त्वं नोऽस्माकं चित्रां चायनीयां त्यां तामिषमन्नं परिज्मन् परितो व्याप्तायां भूमौ पीपयः। प्रवर्धय। यथा सर्वा भूमिरन्नेन पूर्णा भवति तथा कुर्वित्यर्थः। तत्र दृष्टांतः। आपो न। यथापो वृष्ट्युदकानि भूम्यां वर्षणेन प्रवर्धयंति तद्वत्। यद्वा। भूमौ वर्तमानानस्मान्यथापः पाययसि तद्वच्चित्रामिषमपि पाययेति भावः। हे शूरेंद्र ययेषा

मनमात्मानमस्माकं जीवमस्मभ्यं प्रतियंसि। प्रयच्छसि। तत्र दृष्टांतः। विश्वध विश्वतः सर्वतः चरध्यै चरितुमूर्जं न। उदकमिव। यथास्मभ्यं बहुलमुदकं प्रयच्छसि तद्वत्प्राणधारणरूपं जीवनमपि प्रयच्छसीति भावः॥ आपः। शसि प्राप्ते व्यत्ययेन जस्। अप्तृन्नित्यादिना दीर्घः। पीपयः। स्फायी ओप्यायी वृद्धौ। ण्यंताच्छांदसे लुङि प्यायः पी। पा० ६. १. २८.। इति व्यत्ययेन पीभावः। णिश्रिद्रुस्रुभ्य इति च्लेश्चङादेशः। णिलोपादीनि। यद्वा। पीङ् पान इत्यस्माल्लुङि चङि पूर्ववत्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। परिज्मन्। ज्मतिर्गतिकर्मा। अज गतिक्षेपणयोः। आभ्यां परिपूर्वाभ्यां श्वन्नुक्षन्नित्यादौ कनिन्प्रत्ययांतो निपातितः। सुपा सुलुगिति सप्तम्या लुक्। यंसि। यम उपरमे। बहुलं छंदसीति शपो लुक्। त्मनं। आङोऽन्यत्रापि छंदसि दृश्यते। पा० ६. ४. १४१. १.। इत्यात्मन आकारलोपः। संज्ञापूर्वकस्य विधेरनित्यत्वादुपधादीर्घाभावः। विश्वध। विश्वशब्दात्तसिलः सकारलोपो धत्वं च पृषोदरादित्वात्। चरध्यै। चर संचलने। तुमर्थे सेसेनित्यध्यैन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

नवमीमृचमाह॥

अकारि त इंद्र गोतमेभिर्ब्रह्माण्योक्ता नमसा हरिभ्यां।
सुपेशसं वाजमा भरा नः प्रातर्मक्षू धियावसुर्जगम्यात्॥९॥

अकारि। ते। इंद्र। गोतमेभिः। ब्रह्माणि। आऽउक्ता।
नमसा। हरिऽभ्यां।
सुऽपेशसं। वाजं। आ। भर। नः। प्रातः। मक्षु। धियाऽवसुः। जगम्यात्॥ ९॥

हे इंद्र ते तव गोतमेभिर्गोतमैरेतत्स्तोत्रं ऋषिभिरकारि । स्तोत्रं कृतमित्यर्थः । एतदेव स्पष्टीकरोति । ब्रह्माणि मंत्रजातानि नमसा हविर्लक्षणेनान्नेन सह हरिभ्यामश्वाभ्यां युक्ताय तुभ्यमोक्ता । आभिमुख्येनोक्तानि । यद्वा मर्यादायामाकारः । यथाशास्त्रं प्रयुक्तानि । स त्वं सुपेशसं । पेश इति रूपनाम । बहुविधरूपयुक्तं वाजमन्नं नोऽस्मभ्यमाभर । आहर । देहीति यावत् । धिया बुद्ध्या कर्मणा वा प्राप्तधन इंद्रः प्रातःकालेऽस्मद्रक्षणार्थं जगम्यात् । आगच्छतु ॥ आक्ता । शेश्छंदसि बहुलमिति शेर्लोपः । सुपेशसं । पिश अवयवे । असुन् । बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । भर । हृग्रहोर्भ इति भत्वं । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः ॥

॥ इति प्रथमस्य पंचमे पंचमो वर्गः ॥

वृष्णे शर्धायेति पंचदशर्चं सप्तमं सूक्तं । नोधस आर्षं मारुतं । अंत्या त्रिष्टुप् । शिष्टाश्चतुर्दश जगत्यः । तथा चानुक्रांतं । वृष्णे पंचोना मारुतं त्रिष्टुबंतमिति ॥ चातुर्विंशकेऽहन्याग्निमारुत इदं मारुतं निविद्धानीयं । सूत्रितं च । पृक्षस्य वृष्णो वृष्णे शर्धाय यज्ञेन वर्धतेत्याग्निमारुतं । आ० ७. ४. । इति ॥ आभिप्लविके पंचमेऽहन्यप्येतदाग्निमारुते मारुतं निविद्धानीयं । सूत्रितं च । पृक्षस्य वृष्णो वृष्णे शर्धाय नू चित्सहोजा इत्याग्निमारुतं । आ० ७. ७. । इति ॥

तत्र प्रथमामृचमाह ॥

वृष्णे शर्धाय सुमखाय वेधसे नोधः सुवृक्तिं प्र भरा मरुद्भ्यः ।
अपो न धीरो मनसा सुहस्त्यो गिरः समंजे
विदथेष्वाभुवः ॥ १ ॥

वृष्णे । शर्धाय । सुऽमखाय । वेधसे । नोधः । सुऽवृक्तिं ।
प्र । भर । मरुत्ऽभ्यः ।
अपः । न । धीरः । मनसा । सुऽहस्त्यः । गिरः । सं । अंजे ।
विदथेषु । आऽभुवः ॥ १ ॥

अत्र पूर्वार्धेन स्तुतौ नोधाः प्रेर्यते । हे नोधः । वृष्णे कामानां वर्षित्रे सुमखाय शोभनयज्ञाय वेधसे पुष्पफलादीनां कर्त्रे । वायौ सति हि पुष्पाणि फलानि चोत्पद्यंते । एवंविधाय मरुद्भ्यः । विभक्तिव्यत्ययः । मरुतां मितराविणां शर्धाय समूहाय सुवृक्तिं सुष्ठ्वावर्जकं सुष्ठु प्रवृत्तं वा स्तोत्रं प्रभर । प्रेरय । स्तुहीति यावत् । स्तुतौ प्रेरिता नोधा आह । धीरो धीमान् सुहस्त्यः शोभनांगुलियुक्तः । कृतांजलिरित्यर्थः । एवंभूतोऽहं मनसा गिरः स्तुतिलक्षणा वाचः समंजे । सम्यग्व्यक्ताः करोमि । या गिरो विदथेषु यज्ञेष्वाभुवः । आङ् मर्यादायां । यथाशास्त्रं प्रयुक्ता भवंतीत्याभुवः । देवताभिमुखीकरणाय समर्थाः । यज्ञयोग्यैः स्तोत्रैर्मनःपूर्वकं मरुद्गणं स्तौमीति भावः । तत्र दृष्टांतः । अपो न । यथा पर्जन्यो युगपदेव बहुषु प्रदेशेषु बहुशो जलानि वर्षति तद्वत् ॥ वृष्णे । वृषु सेचने । कनिन्युवृषितक्षीत्यादिना कनिन्प्रत्ययः । कित्त्वाद्गुणाभावो नित्त्वादाद्युदात्तत्वं । चतुर्थ्येकवचनेऽल्लोपोऽन इत्यकारलोपः । शर्धाय । शृधु प्रसहने । शर्ध्यते प्रसह्यतेऽनेन पर्वतादिकमिति शर्धो मरुत्संघः । करणे घञ् । ञित्त्वादाद्युदात्तत्वं । सुमखाय । शोभना मखा यस्य । नञ्सुभ्यामिति प्राप्ते व्यत्ययेन पूर्वपदप्रकृतिस्वरत्वं । नोधः । पादादित्वात् षाष्ठिकमामंत्रिताद्युदात्तत्वं । सुहस्त्यः । हस्ते भवो हस्त्यः । भवे छंदसीति यत् ।

यताऽनाव इत्याद्युदात्तत्वं । ततः सुशब्देन बहुव्रीहावाद्युदात्तत्वं। द्वग्छंदसीत्युत्तरपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

ते जज्ञिरे दिव ऋष्वास उक्षणो रुद्रस्यो मर्या असुरा
अरेपसः ।
पावकासः शुचयः सूर्या इव सत्वानो न द्रप्सिनो
घोरवर्पसः ॥ २ ॥

ते । जज्ञिरे । दिवः । ऋष्वासः । उक्षणः । रुद्रस्य । मर्याः ।
असुराः । अरेपसः ।
पावकासः । शुचयः । सूर्याःऽइव । सत्वानः । न । द्रप्सिनः ।
घोरऽवर्पसः ॥ २ ॥

ते मरुता दिवोऽंतरिक्षाज्जज्ञिरे । प्रादुर्बभूवुः । कीदृशाः । ऋष्वासः । दर्शनीयाः । उक्षणः । सेक्तारः । पुमान इत्यर्थः । रुद्रस्य मर्याः । मर्यशब्दो मनुष्यवाच्याह मरुतां मर्त्यत्वासंभवात्पुत्रा इत्यस्मिन्नर्थे पर्यवस्यति । मरुतां रुद्रपुत्रत्वं च मंत्रांतरे स्पष्टं । आ ते पितर्मरुतां सुम्नमेत्विति । असुराः । शत्रूणां निरसितारः । अरेपसः । रेप इति पापनाम । पापरहिताः । पावकासः । सर्वेषां शोधकाः । सूर्या इव शुचयो दीप्ताः । सत्वानो न । यथा परमेश्वरस्य भूतगणा अतिशयेन बलपराक्रमाः । तत्सदृशा इत्यर्थः । सत्वान इति भूतगणा उच्यंते । अथो ये अस्य सत्वान इत्यादौ तथा दर्शनात् । द्रप्सिनः । वृष्ट्युदकबिंदुभिर्युक्ताः । मरुतः सृष्टां वृष्टिं नयंतीति श्रुतेः । घोरवर्पसः । वर्प इति रूपनाम । घोररूपाः । यथा भूतगणा भयंकररूपाः । शत्रूणां भयंकररूपा इत्यर्थः । यद्वा

सत्वानो न घोरवर्पसः । यथा भूतगणा भयंकररूपास्तद्वदेते-पोत्यर्थः ॥ ऋष्वासः । ऋषी गतौ । गत्यर्था बुद्ध्यर्था इत्यत्र ज्ञानार्थः । सर्वनिघृष्वेत्यादौ । उ० १. १५२. । वप्रत्ययांतो निपातितः । आज्जसेरसुक् । उच्चणः । वा षपूर्वस्य निगम इत्युपधादीर्घाभावः । अरेपसः । बहुव्रीहौ नञ्सुभ्यामित्युत्तर-पदांतादात्तत्वं । सत्वानः । षद्‍ विशरणगत्यवसादनेषु । प्र ईरसद्योस्तुट् च । उ० ४. ११८. । इति विधीयमानः क्वनि-प्प्रत्ययो बहुलवचनात्केवलादपि भवति । प्रत्ययस्य पित्त्वादनु-दात्तत्वे धातुस्वरः शिष्यते । घोरवर्पसः । हंतेरच् घुर च । उ० ५. ६४. । इति हंतेर्घुरादेशः । अच । वृङ्धातोर्वृङ्शीङ्भ्या-मित्यसुन् । पुडागमः । बहुव्रीहिस्वरः ॥

तृतीयामृचमाह ॥

युवानो रुद्रा अजरा अभोग्घनो ववक्षुरध्रिगावः पर्वता इव ।
दृळ्हा चिद्विश्वा भुवनानि पार्थिवा प्र च्यावयंति दिव्यानि
मज्मना ॥ ३ ॥

युवानः । रुद्राः । अजराः । अभोक्ऽहनः । ववक्षुः ।
अध्रिऽगावः । पर्वताःऽइव ।
दृळ्हा । चित् । विश्वा । भुवनानि । पार्थिवा । प्र ।
च्यवयंति । दिव्यानि । मज्मना ॥ ३ ॥

युवानस्तरुणा रुद्रा रुद्रपुत्रा अजरा जरारहिता अभोग्घनो ये देवान्हविर्भिर्न भोजयंति तेषां हंतारः । अध्रिगावोऽधृत-गमनाः परैरनिवारितगतयः । पर्वता इव दृढांगाः । एवंभूता मरुतो ववक्षुः । स्तोतृणामभिमतं प्रापयितुमिच्छंति । अपि च विश्वा सर्वाणि भुवनानि सद्भावं प्राप्तानि पार्थिवा पृथिव्यां

भवानि दिव्यानि दिवि भवानि च वसूनि दृळ्हा चित् दृढान्यपि मज्मना । मज्मनेति बलनाम । मज्मना शोधकेन बलेन प्रच्यावयंति । प्रचालयंति ॥ अभोग्घनः । भोजयंतीति भोजः । न भोजोऽभोजः । तेषां हंतारः । बहुलं छंदसीति हंतेः क्विप् । छ्वयो होऽन्यतरस्यादमिति हकारस्य घत्वं । इन्हन्पूषार्यम्णां शौ । पा० ६. ४. १२. । इति नियमाद्दीर्घाभावः । ववक्षुः । वह प्रापणे । अस्मादिच्छासन्येकाच इतीट्प्रतिषेधः । द्विर्भावः । ढत्वकत्वषत्वानि । सन्यत इतीत्वाभावश्छांदसः । लिड्यङ्समंते । पा० ३. १. ३५. । इति निषेधादाम्प्रत्ययाभावेऽतो लोप इत्यकारलोपः । प्रत्ययस्वरः । पादादित्वान्निघाता वः ॥

चतुर्थीमृचमाह ॥

चित्रैरंजिभिर्वपुषे व्यंजते वक्षःसु रुक्माँ अधि येतिरे शुभे ।
अंसेष्वेषां नि मिमृक्षुर्ऋष्टयः साकं जज्ञिरे स्वधया दिवो नरः ॥ ४ ॥

चित्रैः । अंजिऽभिः । वपुषे । वि । अंजते । वक्षःऽसु । रुक्मान् । अधि । येतिरे । शुभे ।
अंसेषु । एषां । नि । मिमृक्षुः । ऋष्टयः । साकं । जज्ञिरे । स्वधया । दिवः । नरः ॥ ४ ॥

वपुरिति रूपनाम । वपुषे रूपाय शोभार्थं मरुतश्चित्रैर्नानाविधैरंजिभी रूपाभिव्यंजनसमर्थैराभरणैः स्वशरीराणि व्यंजते । व्यक्तं कुर्वंति । अलंकुर्वंतीत्यर्थः । वक्षःसु भुजांतरेषु रुक्मान् रोचमानान्हारानधियेतिरे । उपरि चक्रिरे । किमर्थं । शुभे । शोभार्थं । अपि च । एषां मरुतामंसेष्वृष्टय आयुधान्

निमिमृक्षुः । निमृष्टाः स्थिता बभूवुः । तैरायुधैः सहिता नरो नेतारो मरुतो दिवोऽंतरिक्षात्स्वधया स्वकीयेन बलेन साकं सह जज्ञिरे । प्रादुर्बभूवुः ॥ येतिरे । यती प्रयत्ने । लिट्यत एकहल्मध्य इत्येत्वाभ्यासलोपौ । शुभे । शुभ दीप्तौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति चतुर्थ्या उदात्तत्वं । मिमृक्षुः । मृजूष् शुद्धौ । सन्यूदित्त्वादिडभावः । हलंताच्चेति सनः कित्त्वाद्गुणाभावः । द्विर्वचनादि । सन्यत इतीत्वं । लिट्यभ्यासे लोप इत्यकारलोपः । जज्ञिरे । जनी प्रादुर्भावे । लिटि गमहनेत्यादिनोपधालोपः ॥

पंचमीमृचमाह ॥

ईशानकृतो धुनयो रिशादसो वातान्विद्युतस्तविषीभिरक्रत ।
दुहंत्यूधर्दिव्यानि धूतयो भूमिं पिन्वंति पयसा परिज्रयः ॥५॥

ईशानऽकृतः । धुनयः । रिशादसः । वातान् । विऽद्युतः ।
तविषीभिः । अक्रत ।
दुहंति । ऊधः । दिव्यानि । धूतयः । भूमिं । पिन्वंति ।
पयसा । परिऽज्रयः ॥ ५ ॥

ईशानकृतः स्तोतारमीशानं धनाधिपतिं कुर्वाणा धुनयो मेघादीनां कंपयितारो रिशादसो रिशानां हिंसकानामत्तारः । यद्वा रिशतां हिंसतामसितारो निरसितारः । एवंभूता मरुतस्तविषीभिरात्मीयैर्बलैर्वातान् पुरो वातादीन् विद्युतो विद्योतमानास्तडितश्चाक्रत । कुर्वंति । कृत्वा च परिज्रयः परितो गंतारो धूतयः कंपयितारो मरुतो दिव्यानि दिविभवान्यूधऊधःस्थानीयान्यभ्राणि दुहंति । रिक्तीकुर्वंति । जलरहितानि कुर्वंतीत्यर्थः । तदनंतरं भूमिं पयसा मेघान्निर्गतेनोदकेन जलेन

पिन्वंति । सिंचंति ॥ रिशादसः । रिशि हिंसायां । इगुपधज्ञाप्रीकिरः कः । रिशंति हिंसंतीति रिशाः शत्रवः । तानदंतीति रिशादसः । असुन् । नित्त्वादाद्युदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं । यद्वा रिशच्छब्दाच्छत्रंतादस क्षेपण इत्येतस्मात् क्विप् । व्यत्ययेन पूर्वपदस्योपधादीर्घः । अंतोदात्तत्वं च । अक्रत । करोतेश्छांदसो वर्तमाने लुङ् । मंत्रे घसेति च्लेर्लुक् ॥ ऊधः । सुपां सुलुगिति विभक्तेर्लुक् ॥

॥ इति प्रथमस्य पंचमे षष्ठो वर्गः ॥

मरुत्वीयशस्त्रे पिन्वंत्यप इत्येषा धाय्या । सूत्रितं च । अग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः । आ० ५. १४. । इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

पिन्वंत्यपो मरुतः सुदानवः पयो घृतवद्विदथेष्वाभुवः ।
अत्यं न मिहे वि नयंति वाजिनमुत्सं दुहंति स्तनयं-
तमक्षितं ॥ ६ ॥

पिन्वंति । अपः । मरुतः । सुऽदानवः । पयः । घृतऽवत् ।
विदथेषु । आऽभुव ।
अत्यं । न । मिहे । वि । नयंति । वाजिनं । उत्सं । दुहंति ।
स्तनयंतं । अक्षितं ॥ ६ ॥

सुदानवः शोभनदाना मरुतः पयः क्षीरवत् सारवतीरपः पिन्वंति । सिंचंति । आभुवः । आभवंतीत्याभुव ऋत्विजः । ते विदथेषु यज्ञेषु घृतवत् यथा घृतं सिंचंत्येवं मरुतोऽपि वृष्टिं कुर्वंतीति भावः । तत्र हेतुमाह । अत्यं न । यथाश्वं सादिनो विनयंति युद्धार्थं शिक्षंत्येवं मरुतो वाजिनं वेगवंतं मेघं मिहे

वर्षणाय विनयंति । स्वाधीनं कुर्वंतीति भावः । विनीय च स्तनयंतं गर्जंतमच्छितमक्षीणमुत्सं । उत्स्रवंत्यस्मादाप इत्युत्सो मेघः । तं दुहंति । रिक्तीकुर्वंति ॥ सुदानवः । नुप्रत्ययांतो दानुशब्द आद्युदात्तः । बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं । मिहे । मिह सेचने । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तिरुदात्ता । स्तनयंतं । स्तन शब्दे । चुरादिरदंतः । अतो लोपस्य स्थानिवद्भावाद्वृद्ध्याद्यभावः ॥

सप्तमीमृचमाह ॥

महिषासो मायिनश्चित्रभानवो गिरयो न स्वतवसो
रघुष्यदः ।
मृगा इव हस्तिनः खादथा वना यदारुणीषु तविषीर-
युग्ध्वं ॥ ७ ॥

महिषासः । मायिनः । चित्रऽभानवः । गिरयः । न ।
स्वऽतवसः । रघुऽस्यदः ।
मृगाःऽइव । हस्तिनः । खादथ । वना । यत् । आरुणीषु ।
तविषीः । अयुग्ध्वं ॥ ७ ॥

महिषः इति महन्नाम । महिषासो महांतः । मायेति ज्ञाननाम । मायिनः प्राज्ञाश्चित्रभानवः शोभनदीप्तयः । गिरयो न स्वतवसः । पर्वता इव स्वकीयेन बलेन युक्ताः । रघुष्यदः । शीघ्रगमनाः । हे मरुतः । एवंभूतगुणविशिष्टा यूयं हस्तिनो हस्तवतो मृगा इव गजा इव वना वनानि वृक्षजातानि खादथ । भक्षयथ । प्रभंजयथेति यावत् । यद्यस्मादारुणीष्वरुणवर्णासु वडवासु तविषीर्बलान्ययुग्ध्वं । संयोजितवंतः । तस्माद्भवतामिव वाहनस्यापि प्रबलत्वात्तत्संयुक्ता भवंतः सर्वं भंजंतीत्यर्थः ॥

रघुष्यदः। स्यंदू प्रस्रवणे। रघु शीघ्रं स्यंदंते गच्छंतीति रघुष्यदः। क्विप् चेति क्विप्। अनिदितामिति नलोपः। बालमूललघुलमिति लत्वविकल्पः। पा० ८. २. १८. २.। कृदुत्तरपदप्रकृतिस्वरत्वं। खादथा। खाद भक्षणे। अयुग्ध्वं। युजिर् योगे। लुङि च्लेः सिच्। एकाच इतीट्प्रतिषेधः। धि च। पा० ८. २. २५.। इति सकारलोपः। चोः कुरिति कुत्वं। अडागम उदात्तः। यद्वृत्तयोगादनिघातः॥

अष्टमीमृचमाह॥

सिंहा इव नानदति प्रचेतसः पिशा इव सुपिशो
विश्ववेदसः।
क्षपो जिन्वंतः पृषतीभिर्ऋष्टिभिः समित्सबाधः शवसाहि-
मन्यवः॥ ८॥

सिंहाःऽइव। नानदति। प्रऽचेतसः। पिशाःऽइव।
सुऽपिशः। विश्वऽवेदसः।
क्षपः। जिन्वंतः। पृषतीभिः। ऋष्टिऽभिः। सं। इत्।
सऽबाधः। शवसा। अहिऽमन्यवः। ८॥

प्रचेतसः प्रकृष्टज्ञाना मरुतः सिंहा इ नानदति। भृशं शब्दं कुर्वंति यथा सिंहा गिरिगह्वरेषु गंभीरं शब्दं कुर्वंति। एवं मरुत्स्वप्यागतेषु गंभीरः शब्द उत्पद्यत इति भावः। तथा सुपिशः शोभनावयवाः शोभनालंकारा वा। तत्र दृष्टांतः। पिशा इव। पिश इति रुरुनाम। यथा रुरवः स्वशरीरगतैः श्वेतबिंदुभिरलंकृतास्तद्वत्। विश्ववेदसः सर्वज्ञाः। शपः शत्रूणां क्षपयितारः। जिन्वंतः स्तोतॄन्प्रीणयंतः। शवसा बलेन। हि-मन्यव आहननशीलमन्युयुक्ताः। यद्विषयः कोपो जायते तस्य

हनने समर्था इत्यर्थः । यद्वा मननं ज्ञानं मन्युः । अहीनज्ञाना उत्कृष्टबुद्धय इत्यर्थः । एवंभूता मरुतः पृषतीभिः । पृषत्य इति मरुतां वाहनस्याख्या । पृषत्यः श्वेतबिंदंकिता मृग्य इत्यैतिहासिकाः । नानावर्णा मेघमाला इति नैरुक्ताः । ताभिर्ऋष्टिभिरायुधैश्च सहिताः संतः सबाधः शत्रुभिर्बाधितान्यजमानान् समित् समानमेव युगपदेव रक्षितुमागच्छंतीति शेषः ॥ नानदति । नद अव्यक्ते शब्दे । अस्माद्यङ्लुगंताल्लट् । पिशा इव । पिश अवयवे । इगुपधलक्षणः कः । सुपिशः । सुपूर्वात्पिश अवयव इत्यस्मात् क्विप् चेति क्विप् । पृषतीभिः । पृषु सेचने । वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्च । पा० ४. १. ६. १. । इति शतृवद्भावादुगितश्चेति ङीप् । अत एव शतुरनुम इति नद्या उदात्तत्वे प्राप्ते बृहन्महतोरुपसंख्यानमिति नियमात्तस्याभावः ॥

नवमीमृचमाह ॥

रोदसी आ वदता गणश्रियो नृषाचः शूराः शवसाहिमन्यवः ।
आ वंधुरेष्वमतिर्न दर्शता विद्युन्न तस्थौ मरुतो रथेषु वः ॥ ९ ॥

रोदसी इति । आ । वदत । गणऽश्रियः । नृऽसाचः । शूराः । शवसा । अहिऽमन्यवः ।
आ । वंधुरेषु । अमतिः । न । दर्शता । विऽद्युत् । न । तस्थौ । मरुतः । रथेषु । वः ॥ ९ ॥

हे गणश्रियः । गणशः श्रयमाणाः सप्तगणरूपेणावस्थिताः । नृषाचः । नॄन् यजमानान्हविःस्वीकरणाय सेवमानाः । शूराः शौर्योपेताः । एवंभूता हे मरुतः शवसा बलेनाहिमन्यवः ।

आह्वननस्वभावकोपयुक्ताः संतो रोदसी द्यावापृथिव्यावावदत । आ समंताच्छब्दयत । युष्मदागमने सति भवदीयशब्देन द्यावापृथिव्यौ पूर्णे कुरुतेति भावः । किंच हे मरुतः । वो युष्माकं तेजो वंधुरेषु । बंधककाष्ठानिर्मितं सारथेः स्थानं वंधुरमित्युच्यते । तद्युक्तेषु रथेष्वातस्थौ । आतिष्ठति । अवस्थितं सत्सर्वैर्दृश्यते । तत्र दृष्टांतद्वयमुच्यते । अमतिर्न । अमतिरिति रूपनाम । यथा निर्मलं रूपं सर्वैर्दृश्यते । दर्शता विद्युन्न । यथा वा दर्शनीया विद्युन्मेघस्था सर्वैर्दृश्यते । एवं रथे स्थितानां युष्माकं ज्योतिरपि सर्वैर्दृश्यत इत्यर्थः ॥ वदता । ऋचि तुनुघेत्यादिना दीर्घः । नृषाचः । पादादित्वादामंत्रितान्याद्युदात्तत्वं । अमतिः । अम गत्यादिषु । अमेरतिरित्यौणादिकोऽतिप्रत्ययः । प्रत्ययाद्युदात्तत्वं । दर्शता । भृमृदृशीत्यादिनातच्प्रत्ययः । चित्त्वादंतोदात्तत्वं ॥

दशमीमृचमाह ॥

विश्ववेदसो रयिभिः समोकसः संमिश्लासस्तविषीभिर्विरप्शिनः ।
अस्तार इषुं दधिरे गभस्त्योरनंतशुष्मा वृषखादयो नरः ॥ १० ॥

विश्वऽवेदसः । रयिऽभिः । संऽओकसः । संऽमिश्लासः । तविषीभिः । विऽरप्शिनः ।
अस्तारः । इषुं । दधिरे । गभस्त्योः । अनंतऽशुष्माः । वृषऽखादयः । नरः ॥ १० ॥

विश्ववेदसः सर्वज्ञा रयिभिर्धनैः समोकसः समाननिवासाः समवेता वा । धनाधिपतय इत्यर्थः । तविषीभिर्बलैः संमिश्लासः

संमिश्लाः। संयुक्ता इत्यर्थः। विरप्शिनः। महन्नामैतत्। महांतः। अस्तारः शत्रूणां निरसितारः। अनंतशुष्मा अनवच्छिन्नबलाः। वृषखादयः। वृषेंद्रः खादिरायुधस्थानीयो येषां ते तथोक्ताः। यद्वा वृषा सोमः खादिः खाद्यः पेयो येषां ते। नरो नेतारः। एवंभूता मरुतः। गभस्तिरिति बाहुनाम। गभस्त्योर्बाह्वोरिषुं दधिरे। शत्रूणां निरसनाय धनुर्बाणादिकमायुधं धारयंति॥ समोकसः। उच समवाये। असुनि बहुलवचनात्कुत्वमित्योक उचः। के। पा० ७. ३. ६४.। इत्यत्रोक्तं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। संमिश्लासः। कपिलकादित्वाल्लत्वं। विरप्शिनः। रप लप व्यक्तायां वाचि। विपूर्वादस्माद्बहुलवचनात् शक्प्रत्ययः। विविधं शब्दं रपंतीति विरप्शाः स्तोतारः। त एषां संतीति विरप्शिनः। यद्वा विविधं रपणं विरप्शं। तदेषामस्तीति। मरुतो हि विविधं शब्दं कुर्वंति। इनिप्रत्ययस्वरः। अस्तारः। ताच्छीलिकस्तृन्। इडभावश्छांदसः। नित्त्वादाद्युदात्तत्वं। अनंतशुष्माः। नास्त्यंतोऽस्येत्यनंतः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। अनंतः शुष्मो बलं येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वृषखादयः। खादृ भक्षणे। औणादिक इन्प्रत्ययः। वृषन्शब्दः कनिन्प्रत्ययांत आद्युदात्तः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं॥

॥ इति प्रथमस्य पंचमे सप्तमो वर्गः॥

एकादशीमृचमाह॥

हिरण्ययेभिः पविभिः पयोवृध उज्जिघ्नंत आपथ्यो३ न
पर्वतान्।

मखा अयासः स्वसृतो ध्रुवच्युतो दुध्रकृतो मरुतो
भ्राजदृष्टयः ॥ ११ ॥

हिरण्ययेभिः । पविऽभिः । पयःऽवृधः । उत् । जिघ्नंते ।
आऽपथ्यः । न । पर्वतान् ।
मखाः । अयासः । स्वऽसृतः । ध्रुवऽच्युतः । दुध्रऽकृतः ।
मरुतः । भ्राजत्ऽऋष्टयः ॥ ११ ॥

मरुता हिरण्ययेभिः सुवर्णमयैः । यद्वा हितरमणीयैः पविभिः रथानां चक्रैः पर्वतान्पर्ववतो मेघान् यद्वा शिलोच्चयानुज्जिघ्नंते । ऊर्ध्वं गमयंति । स्थानात्प्रच्यावयंतीत्यर्थः । तत्र दृष्टांतः । आपथ्यो न । यथा पथि गच्छन्रथो मार्गं आस्थितं तृणवृक्षादिकं चूर्णीकृत्योर्ध्वं नयति गमयति । यद्वा यथा संयुक्ता गजा मार्गस्थितं वृक्षादिकं भग्नं कुर्वंति । कीदृशा मरुतः । पयावृधः । पयसा वृष्ट्युदकस्य वर्धयितारः । यद्वा पृश्नेः पयसा वर्धमानाः । पृश्नियै वै पयसो मरुतो जाता इति श्रूयते । मखाः । मख इति यज्ञनाम । तद्वंतः । अयासः । देवयजनदेशं प्रति गंतारः । स्वसृतः । शत्रून्प्रति स्वयमेव सरंतो गच्छंतः । ध्रुवच्युतः । ध्रुवाणां निश्चलानां पर्वतादीनामपि च्यावयितारः । दुध्रकृतः । दुध्रं दुष्टानां धारयितारमात्मानं कुर्वाणाः । यद्वा दुधरमन्यैर्धर्तुमशक्यमात्मानं कुर्वाणाः । भ्राजदृष्टयः । दीप्यमानायुधाः ॥ उज्जिघ्नंते । हंतेर्व्यत्ययेनात्मनेपदं । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । गमहनेत्यादिनोपधालोपः । हो हंतेरिति घत्वं । व्यत्ययेनांतादेशः । पथ्यः । पथि भवः । भवे छंदसीति यत् । नस्तद्धित इति टिलोपः । व्यत्ययेन स्वरितत्वं ।

यद्वा छंदसीवनिपाविति मत्वर्थीय ईकारः । उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं । अयासः । अय पय गतौ । अयंत इत्ययाः । पचाद्यच् । आज्जसेरसुक् । दुध्रकृतः । अत्र दुःशब्देन दुष्टा लक्ष्यंते । धृञ् धारणे । दुष्टान् धारयतीति दुध्रः । मूलविभुजादित्वात् । पा० ३. २. ५. २. । कप्रत्ययः । यद्वा । ईषद्दुःसुष्विति दुःशब्द उपपदे कर्मणि खल् । गुणाभावश्छांदसः । तं कुर्वंतीति दुध्रकृतः । करोतेः क्विप् चेति क्विप् । रेफलोपश्छांदसः ॥

द्वादशीमृचमाह ॥

घृषुं पावकं वनिनं विचर्षणिं रुद्रस्य सूनुं हवसा गृणीमसि ।
रजस्तुरं तवसं मारुतं गणमृजीषिणं वृषणं सश्चत श्रिये ॥ १२ ॥

घृषुं । पावकं । वनिनं । विऽचर्षणिं । रुद्रस्य । सूनुं । हवसा । गृणीमसि ।
रजःऽतुरं । तवसं । मारुतं । गणं । ऋजीषिणं । वृषणं । सश्चत । श्रिये ॥ १२ ॥

घृषुं शत्रूणां बलस्य घर्षकं विनाशयितारं पावकं सर्वेषां शोधकं वनिनं । वनमित्युदकनाम । उदकवंतं वृष्टिप्रदमित्यर्थः । विचर्षणिं विशेषेण सर्वस्य द्रष्टारं । रुद्रस्य महादेवस्य सूनुं पुत्रभूतं । एवंविधं मरुतां समूहं हवसाह्वानसाधनेन स्तोत्रेण गृणीमसि । शब्दयामः । स्तुम इत्यर्थः । हे ऋत्विग्यजमानाः । यूयमपि श्रिय ऐश्वर्याय धनार्थं मारुतं गणं मरुतां संघं सश्चत । प्राप्नुत । कीदृशं । रजस्तुरं । पार्थिवस्य

पांसोस्त्वरयितारं प्रेरकमित्यर्थः । तवसं । प्रवृद्धं । ऋजोषिणं । तृतीयसवने हि मरुतः स्तूयंते । तत्र च ऋजीषमभिमुखंतीति ऋजीषप्रबंधः श्रुतः । अतस्तद्वंतं वृषणं कामानां वर्षितारं ॥ शवसा । श्वेञोऽसिप्रत्यये बहुलं छंदसीति संप्रसारणं । गृणीमसि । गॄ शब्दे । इदंतो मसिः । प्वादीनां ह्रस्व इति ह्रस्वत्वं । रजस्तुरं । रजांसि तुतोर्तीति रजस्तुः । तुर त्वरणे । क्विप् चेति क्विप् । वृषणं । वा षपूर्वस्य निगम इति दीर्घाभावः । सश्चत । ष्चंच षस्ज गतावित्यत्र सश्चिमप्येक इति धातुवृत्तावुक्तं । गतिकर्मसु च सश्चतीति पठितं । श्रियै । सावेकाच इति विभक्तेरुदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

प्र नु स मर्तः शवसा जनाँ अति तस्थौ व ऊती मरुतो यमावत ।
अर्वद्भिर्वाजं भरते धना नृभिरापृच्छ्यं क्रतुमा क्षेति पुष्यति ॥ १३ ॥

प्र । नु । सः । मर्तः । शवसा । जनान् । अति । तस्थौ । वः । ऊती । मरुतः । यं । आवत ।
अर्वत्ऽभिः । वाजं । भरते । धना । नृऽभिः । आऽपृच्छ्यं । क्रतुं । आ । क्षेति । पुष्यति ॥ १३ ॥

स मर्तो मनुष्यः शवसा बलेन जनान् जातानन्यान्पुरुषानति । अतीत्य । नु क्षिप्रं तस्थौ । प्रतिष्ठितो भवति । हे मरुतो वो युष्माकमूती ऊत्या रक्षणेन यं पुरुषमावत । अरक्षत । अपि च स पुरुषोऽर्वद्भिरश्वैः साधनभूतैर्वाजमन्नं नृभिः स्वकीयैर्मनुष्यैर्धनानि च भरते । संपादयति । तथा-

पृच्छ्यमापृष्टव्यं शोभनं क्रतुमग्निष्टोमादिकर्माचेति। आप्नोति। पुष्यति। प्रजया पशुभिः पुष्टो भवति च॥ ऊती। तृतीयायाः पूर्वसवर्णदीर्घत्वं। नृभिः। नृ चान्यतरस्यामिति विभक्त्युदात्तत्वप्रतिषेधः। आपृच्छ्यं। छंदसि निष्टर्क्येत्यादावाङ्पूर्वात्पृच्छतेः क्यच्प्रत्ययांतो निपात्यते। ग्रहिज्यादिना संप्रसारणं। प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। क्रदुत्तरपदप्रकृतिस्वरत्वं। चेति। चि निवासगत्योः। बहुलं छंदसीति विकरणस्य लुक्। पुष्यति। पुष पुष्टौ। दिवादित्वात् श्यन्। नित्त्वादाद्युदात्तत्वं। तिङः परत्वान्निघाताभावः॥

चतुर्दशीमृचमाह॥

चर्कृत्यं मरुतः पृत्सु दुष्टरं द्युमंतं शुष्मं मघवत्सु धत्तन।
धनस्पृतमुक्थ्यं विश्वचर्षणिं तोकं पुष्येम तनयं शतं
हिमाः॥ १४॥

चर्कृत्यं। मरुतः। पृत्ऽसु। दुस्तरं। द्युऽमंतं। शुष्मं।
मघवत्ऽसु। धत्तन।
धनऽस्पृतं। उक्थ्यं। विश्वऽचर्षणिं। तोकं। पुष्येम।
तनयं। शतं। हिमाः॥ १४॥

हे मरुतः। मघवत्सु हविर्लक्षणधनयुक्तेषु यजमानेषु पुत्रं धत्तन। स्थापयतेति यावत्। कीदृशं पुत्रं। चर्कृत्यं। कार्येषु पुनः पुनः पुरस्कर्तव्यं। सर्वकर्मकुशलमित्यर्थः। पृत्सु संग्रामेषु दुष्टरं। दुःखेन तरितव्यं। अजेयमित्यर्थः। द्युमंतं। दीप्तिमंतं। शुष्मं। शत्रूणां शोषकं बलवंतं। धनस्पृतं। धनानां स्रष्टारं धनैः प्रीतं वा। उक्थ्यं। उक्थ्यं स्तोत्रं तदर्हं प्रशस्यमित्यर्थः। विश्वचर्षणिं। विशेषेण द्रष्टारं सर्वज्ञं। एवंविधं

तोकं पुत्रं तनयं पौत्रं च शतं हिमा हेमंततूपलक्षितान् शतं संवत्सरान् जीवंतः संतः पुष्येम । पोषयेम । अत्र हिमशब्देन तद्युक्ता हेमंतर्तवोऽभिधीयंते । तथा च ब्राह्मणमेवमाम्नायते । शतं हिमा इत्याह शतं त्वा हेमंतानि धिषीयेति वावैतदाहेति ॥ चर्कृत्यं । प्रकृतिग्रहणे यङ्लुगंतस्यापि ग्रहणमिति न्यायेन करोतेर्यङ्लुगंताद्विभाषा कृवृषोरिति क्यप् । तुगागमः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । पृत्सु । पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृदादेशः । दुष्टरं । तॄ प्लवनतरणयोः । ईषद्दुःसुष्विति खल् । सुषामादेराकृतिगणत्वात् षत्वं । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । धत्तन । तप्तनप्तनथनाश्चेति तस्य तनादेशः । हिमाः । हंतेर्हिं चेति मक्प्रत्ययः । अर्शआद्यच् । वृषादित्वादाद्युदात्तत्वं ॥

ऐकादशिनस्य मारुतस्य पशोर्वपायागस्य नू ष्ठिरमित्येषा याज्या । सूत्रितं च । शुची वो हव्या मरुतः शुचीनां नू ष्ठिरं मरुतो वीरवंतं । आ॰ ३. ७. । इति ॥

तामेतां सूक्ते पंचदशीमृचमाह ॥

नू ष्ठिरं मरुतो वीरवंतमृतीषाहं रयिमस्मासु धत्त ।
सहस्रिणं शतिनं शूशुवांसं प्रातर्मक्षू धियावसुर्जगम्यात् ॥ १५ ॥

नु । स्थिरं । मरुतः । वीरऽवंतं । ऋतिऽसहं । रयिं । अस्मासु । धत्त ।
सहस्रिणं । शतिनं । शूशुऽवांसं । प्रातः । मक्षु । धियाऽवसुः । जगम्यात् ॥ १५ ॥

हे मरुतः स्थिरं स्थास्नुं वीरवंतं वीरैः पुत्रैर्वर्धितं तद्वंतं। यद्वा वीर्यापितस्तृतीषाहं गंतृणां शत्रूणामभिभवितारं। एवंविधं रयिं पुत्रलक्षणं धनमस्मासु धत्त। स्थापयत। सहस्रिणं शतिनमितलसंख्याकधनवंतं। अत एव शूशुवांसं प्रवृद्धं। अपि चास्माकं रक्षणाय धिया बुद्ध्या कर्मणा वा प्राप्तधनो मरुद्गणः प्रातःकाले जगम्यात्। आगच्छतु॥ नू ष्ठिरं। ऋचि तुनुघेति दीर्घः। पूर्वपदादिति षत्वं। ऋतीषाहं। ऋ गतौ। कर्तरि क्तिच्। षह अभिभवे। छंदसि सह इति ण्विप्रत्ययः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। सुषामादित्वात् षत्वं। शूशुवांसं। टुओश्वि गतिवृद्ध्योः। लिटः क्वसुः। विभाषा श्वेः। पा॰ ६. १. ३०.। इति संप्रसारणं। द्विर्वचने तुजादित्वादभ्यासस्य दीर्घत्वं। वस्वेकाजाद्घसामिति नियमादिडभावः। प्रत्ययस्वरः॥

॥ इति प्रथमस्य पंचमेऽष्टमो वर्गः॥

॥ इति प्रथमे मंडल एकादशोऽनुवाकः॥

द्वादशेऽनुवाके नव सूक्तानि। तत्र पश्वत्यादीनि षट् सूक्तानि द्वैपदानि। तेष्वध्ययनसमये द्विपदे द्वे द्वे ऋचौ चतुःपदामेकैकामृचं कृत्वा समाम्नायते। अयुक्संख्यासु तु यांत्यातिरिच्यते सा तथैवाम्नायते। प्रायेणार्थोऽपि द्वयोर्द्विपदयोरेक एव। प्रयोगे तु ताः पृथक् पृथक् शंसनीयाः। सूत्र्यते हि पश्वा न तायुमिति द्वैपदं। आ॰ ८. १२.। इति॥ तत्र पश्वेति दशर्चं प्रथमं सूक्तं। अत्रानुक्रम्यते। पश्वा दश पराशरः शाक्त्यो द्वैपदं तदिति। शक्तिपुत्रः पराशर ऋषिः। तत्पुत्रत्वं च स्मर्यते। वसिष्ठस्य सुतः शक्तिः शक्तेः पुत्रः पराशर इति।

द्विपदा विराट् छंदः । विंशतिका द्विपदा विराज इति हि तल्लक्षणं । अग्निर्देवता । परमाग्नेयमैंद्रादिति परिभाषितं । पश्वा न तायुमित्यारभ्येत्या ह्वीत्यतः प्राक् यत्सूक्तजातं तत्सर्वमाग्नेयमिति तस्यार्थः । द्वैपदं तदित्युक्तत्वादिदमादीनि षट् सूक्तानि तुह्यादिपरिभाषया द्वैपदानि ॥ दशमेऽहनि वैश्वदेवशस्त्रे वैश्वदेवसूक्तात्पूर्वमेतद्द्वैपदं सूक्तं शंसनीयं । सूत्रमुदाहृतं ॥

तत्र प्रथमामृचमाह ॥

पश्वा न तायुं गुहा चतंतं नमो युजानं नमो वहंतं ।
सजोषा धीराः पदैरनु ग्मन्नुप त्वा सीदन्विश्वे यजत्राः ॥१॥

पश्वा । न । तायुं । गुहा । चतंतं । नमः । युजानं । नमः ।
वहंतं ।
सऽजोषाः । धीराः । पदैः । अनु । ग्मन् । उप । त्वा ।
सीदन् । विश्वे । यजत्राः ॥ १ ॥

धीरा मेधाविनो देवाः सजोषाः समानप्रीतयः संतो हे अग्ने त्वां पदैर्मार्गे पादकृतैर्लांछनैरनुग्मन् । अन्वगमन् । कीदृशं । पश्वापहृतेन पशुना सह वर्तमानं तायुं न । तायुरिति स्तेननाम । यथा स्तेनः परकीयं पश्वादिधनमपहृत्य दुःप्रवेशे गिरिगह्वरे वर्तते तद्वद्गुहा चतंतं । अप्सुपायां गुहायां गच्छंतं वर्तमानं । चततिर्गतिकर्मा । तथा च तैत्तिरीयैरग्नेरप्सु प्रवेशः समाम्नायते । स निलायत सोऽपः प्राविशदिति । यद्वा । अश्वत्थगुहायां गच्छंतं वर्तमानं । श्रूयते च । अग्निर्देवेभ्यो निलायत । अश्वो रूपं कृत्वा सोऽश्वत्थे संवत्सरमतिष्ठदिति । तथा नमो युजानं । हविर्लक्षणमन्नमात्मना संयुजानं । नमो वहंतं । देवेभ्यः प्रत्तं हविर्वहंतं । यजत्रा यजनीया विश्वे

सर्वे देवा हे अग्ने त्वा त्वामुपसीदन्। समीपं प्राप्नुवन्। इत्यर्थः॥ पश्वा। तृतीयैकवचनस्य जसादिषु छंदसि वावचनमिति नाभावाभावः। उदात्तयण इति विभक्तेरुदात्तत्वं। गुहा। भिदादिषु पाठादङ्प्रत्ययांतः। वृषादिषु पाठादाद्युदात्तत्वं। सुपां सुलुगिति सप्तम्या लुक्। युजानं। ग्रानचि बहुलं छंदसीति विकरणस्य लुक्। सजोषाः। जुषी प्रीतिसेवनयोः। समानं जुषंत इति सजोषसः। समानस्य छंदसीति सभावः। कृदुत्तरपदप्रकृतिस्वरत्वं। सुपां सुलुगिति जसः सुः। ग्मन्। गमेर्लुङि मंत्रे घसेति च्लेर्लुक्। गमहनेत्यादिनोपधालोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। यजत्राः। अमिनक्षीत्यादिनात्रन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

द्वितीयामृचमाह॥

ऋतस्य देवा अनु व्रता गुर्भुवत्परिष्टिर्द्यौर्न भूम।
वर्धंतीमापः पन्वा सुशिश्विमृतस्य योना गर्भे सुजातं॥ २॥

ऋतस्य। देवाः। अनु। व्रता। गुः। भुवत्। परिष्टिः।
द्यौः। न। भूम।
वर्धंति। ईं। आपः। पन्वा। सुऽशिश्विं। ऋतस्य। योना।
गर्भे। सुऽजातं॥ २॥

उक्त एवार्थः स्पष्टीक्रियते। देवा ऋतस्य गतस्य पलायितस्याग्नेर्व्रता व्रतानि कर्माणि गमनावस्थानशयनादिरूपाण्यनुगुः। अन्वेष्टुमगमन्। तदनंतरं परिष्टिः परितः सर्वतोऽन्वेषणं भुवत्। अभवत्। भूम भूमिरप्यग्नेरन्वेष्टृभिर्देवैर्द्यौर्न स्वर्ग इवाभूत्। इंद्रादयः सर्वे देवा अग्नेर्गवेषणाय भूलोकं प्राप्ता

इत्यर्थः । अपोऽब्देवता ईमेनमुदके प्रविष्टमग्निं वर्धंति । प्रवर्धयंति । यथा देवा न पश्यंति तथारक्षन्नित्यर्थः । कीदृशं । पन्वा स्तोत्रेण सुशिश्विं सुष्टु प्रवर्धितं । ऋतस्य योना । योनिरित्युदकनाम । ऋतस्य यज्ञस्यान्नस्य वा कारणभूते जले गर्भे गर्भस्थाने मध्ये सुजातं सुष्टु प्रादुर्भूतं । एवमप्सु वर्तमानमग्निं देवेभ्यो मत्स्यः प्रावोचत् । तदनंतरं देवास्तमज्ञासिषुरिति भावः । तथा च तैत्तिरीयकं । स निलायत सोऽपः प्राविशत्तं देवाः प्रैषमैच्छन् । तं मत्स्यः प्राब्रवीदिति ॥ व्रता । शेश्छंदसि बहुलमिति शेर्लोपः । गुः । इण् गतौ । इणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । आत इति झेर्जुस् । उस्यपदांतादिति पररूपत्वं । परिष्टिः । इषु इच्छायां । क्तिनि तितुत्रेतीट्प्रतिषेधः । शकंध्वादित्वात्पररूपत्वं । पा० ६. १. ९४. २. । तादौ च निती‍ति गतेः प्रकृतिस्वरत्वं । भूम । सुपां सुलुगिति सोर्डादेशः । ह्रस्वश्छांदसः । वर्धंति । छंदस्युभयथेति शप आर्धधातुकत्वास्सेरनिटीति णिलोपः । शपः पित्त्वादनुदात्तत्वं । तिङश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । पन्वा । पन स्तुतौ । औणादिको भाव उप्रत्ययः । सुशिश्विं । टुओश्वि गतिवृद्ध्योः । आदृगमहनजन इत्यत्रोत्सर्गश्छंदसीति वचनात्किप्रत्ययः । वचिस्वपीत्यादिना संप्रसारणं । लिङ्वद्भावाद्द्विर्भावे बहुलं छंदसीत्युकारस्येत्वं । छांदसो यणादेशः । सुः पूजायामिति सोः कर्मप्रवचनीयत्वं । स्वती पूजायामिति प्रादिसमासः । अव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

तृतीयामृचमाह ॥

पुष्टिर्न रण्वा क्षितिर्न पृथ्वी गिरिर्न भुज्म क्षोदो न शंभु ।
अत्यो नाज्मन्त्सर्गप्रतक्तः सिंधुर्न क्षोदः क ईं वराते ॥ ३ ॥

पुष्टिः । न । रण्वा । क्षितिः । न । पृथ्वी । गिरिः न ।
भुज्म । क्षोदः । न । शंऽभु ।
अत्यः । न । अज्मन् । सर्गऽप्रतक्तः । सिंधुः । न । क्षोदः ।
कः । ईं । वराते ॥ ३ ॥

रण्वा रमणीया सर्वेषां हृद्या पुष्टिर्न । अभिमतफलानामभिवृद्धिरिवाग्निः सर्वेषां रमणीयः । ऐहिकामुष्मिककर्मलव्यवहारस्याग्न्यधीनत्वात् । यद्वा पुष्टिरिव रण्वा गंतव्यः । शब्दनीयः स्तुत्यो वा । यथा पुष्टिः प्राप्यते तद्वदग्निर्यज्ञे हविर्भिः प्राप्यत इति भावः । पृथ्वी विस्तीर्णा क्षितिर्न भूमिरिवाग्निरपि विस्तीर्णः सर्वेषु भूतेषु जाठररूपेणावस्थानात् । गिरिर्न पर्वत इव भुज्म सर्वेषां भोजयिता । यथा गिरौ विद्यमानं फलमूलादिकमाहृत्य सर्वे भुंजते तद्वदग्नावपि पचंतः सर्वे भुंजते । यद्वा । अग्नावाहुतिं हुत्वा यजमानाः स्वर्गफलं भुंजते । अथवा गिरिर्यथा दुर्भिक्षे सर्वान्प्राणिनो भुनक्ति स्वकीयफलमूलादिदानेन पालयति । तद्वदयमपि पापादनुष्टातॄन्प्रमुंचति । तथा चाम्नायते । अग्निर्मा तस्मादेनसः प्रमुंचत्विति । शंभु सुखकरं क्षोदो न । उदकमिव । यथोदकं सुखं करोति तद्वदग्निः सर्वेषां सुखकारीत्यर्थः । अज्मन् । संग्रामनामैतत् । अज्मनि संग्रामेऽत्यो न सततगमनशीलो जात्यश्व इव सर्गप्रतक्तः सर्गेण विसर्जनेन प्रगमितः । यथा

सादिना प्रेषितो जात्यश्वो हंतव्यसमीपमाशु गच्छति तद्वदग्निरपि स्तोतृभिः प्रेषितः सन् शत्रून्हंतुं शीघ्रं गच्छतीति भावः । अपि च सिंधुर्न क्षोदः । स्यंदनशीलमुदकमिवायमपि शीघ्रगामी । यथा निम्नप्रदेशाभिमुखो जलप्रवाहो दुर्निवारः । तद्वदध्वराभिमुखोऽग्निरपीत्यर्थः । अतो यस्मादेवं तस्मादीमेनमग्निं को वराते । को वारयेत् । न कोऽपि वारयितुं शक्नोतीत्यर्थः ॥ रथ्या । रविगंत्यर्थः । रथ्यते प्राप्यत इति रथः । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्मणि पचाद्यच् । भुज्म । भुज पालनाभ्यवहारयोः । इषुयुधींधीति विधीयमानो मक् बहुलवचनादस्मादपि भवति । सुपां सुलुगिति सोर्लुक् । अज्मन् । अज गतिक्षेपणयोः । मनिनि बलादावार्द्धधातुके विकल्पयिष्यत इति वचनाद्वीभावाभावः । सुपां सुलुगिति सप्तम्या लुक् । सर्गप्रतक्ताः । सृज विसर्ग इत्यस्माद्घञंतः सर्गशब्द आद्युदात्तः । तंचु गतौ । अस्मादंतर्भावितण्यर्थान्निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । अनिदितामिति नलोपः । सर्गेण प्रतक्ताः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । वराते । वृञ् वरणे । अंतर्भावितण्यर्थाल्लेटि लेटोऽडाटावित्याडागमः । व्यत्ययेन शप् । वैतोऽन्यत्रेत्यैत्वस्य विकल्पितत्वादभावः ॥

चतुर्थीमृचमाह ॥

जामिः सिंधूनां भ्रातेव स्वस्रामिभ्यान्न राजा वनान्यत्ति ।
यद्वातजूतो वना व्यस्थादग्निर्ह दाति रोमा पृथिव्याः ॥४॥

जामिः । सिंधूनां । भ्राताऽइव । स्वस्रां । इभ्यात् । न । राजा । वनानि । अत्ति ।

यत् । वातऽजूतः । वना । वि । अस्थात् । अग्निः । ह ।
दाति । रोम । पृथिव्याः ॥ ४ ॥

सिंधूनां स्यंदनशीलानामपामयमग्निर्जामिर्बंधुः । तासामुत्पादकत्वात् । तथा चाम्नातं । अग्नेरापः इति । यद्वा देवेभ्यः पलायितोऽप्सु वर्तमानः सन्तासामपां बंधुर्बभूवेत्यर्थः । तत्र दृष्टांतः । स्वस्रां स्वसॄणां भ्रातेव । यथा भ्रातातिशयेन हितकरो भवति तद्वत् । तादृशोऽग्निर्वनानि महांत्यरण्यान्यत्ति । भक्षयति । दहतीत्यर्थः । तत्र निदर्शनं । राजेभ्यान्न । भियंयंतीति नैऋत्त्यत्यस्येभ्याः शत्रवः । तान्यथा समूलं हिनस्ति तद्वत् । यद्वा । इभ्या धनिनः । तान्यथा धनमपहरन्राजा हिनस्ति तद्वदित्यर्थः । अपि च । यद्यदा वातजूतो वातेन प्रेरितः सन्वना वनान्यरण्यानि व्यस्थात् । उक्तप्रकारेण विविधमातिष्ठति । दग्धुं प्रवर्तते । तदानीमग्निर्ह । असावग्निरेव पृथिव्या भूमेः संबंधीनि रोमौषधिरूपाणि रोमाणि दाति । छिनत्ति । भूम्यामोषधिवनस्पतिजातं यदस्ति तत्सर्वं दहतीति भावः ॥ स्वस्रां । आमो नुडभावश्छांदसः । अस्थात् । लुङि गातिस्थेति सिचो लुक् । दाति । 'दाप् लवने । अदादित्वाच्छपो लुक् ॥

पंचमीमृचमाह ॥

श्वसित्यप्सु हंसो न सीदन् क्रत्वा चेतिष्ठो विशामुषर्भुत् ।
सोमो न वेधा ऋतप्रजातः पशुर्न शिश्वा विभुर्दूरेभाः ॥५॥

श्वसिति । अप्ऽसु । हंसः । न । सीदन् । क्रत्वा । चेतिष्टः ।
विशां । उषःऽभुत् ।

सोमः । न । वेधाः । ऋतऽप्रजातः । पशुः । न । शिश्वा ।
विऽभुः । दूरेऽभाः ॥ ५ ॥

अयमग्निर्देवेभ्यः पलायितः सन्नप्सूदकेषु श्वसिति । प्राणिति । विगूढो वर्तत इत्यर्थः । तत्र दृष्टांतः । हंसो न सीदन् । उदकमध्य उपविशन्हंस इव । कीदृशोऽग्निः । क्रत्वा क्रतुना ज्ञानहेतुनात्मीयेन प्रकाशेन विशां प्रजानां चेतिष्ठः । अतिशयेन चेतयिता ज्ञापयिता । रात्रौ हि सर्वे जना अंधकारावृतं सर्वमग्नेः प्रकाशाज्जानंति । उषर्भुत् । उषस्युषःकालेऽग्निहोत्रादौ प्रबुद्धः । सोमो न वेधाः । सोम इव विधाता स्रष्टा । सोमो यथा सकलमोषधिरूपं भोग्यजातं सृजति । सोमो वा ओषधीनां राजेति श्रुतेः । तथा सकलं भोक्तृजातं सृजति । अग्नेरेव भोक्तृरूपेणावस्थानात् । तथा च तैत्तिरीयकं । अग्निरन्नादोऽन्नपतिरिति । वाजसनेयकेऽपि भोक्तृभोग्ययोरग्नीषोमात्मकत्वमाम्नातं । एतावद्वा इदमन्नं चैवान्नादश्च सोम एवान्नमग्निरन्नाद इति । ऋतप्रजातः । ऋतमित्युदकनाम । ऋतादुदकात्प्रादुर्भूतः पशुर्न शिश्वा । उदकमध्ये वर्तमानोऽग्निः शयानः पशुरिव तनूकृतः संकुचितगात्रोऽभूत् । ततः प्रादुर्भूतः सन्विभुः प्रभूतः संपन्नः । यद्वा शिश्वा शिशुना गर्भस्थेन वत्सेन सहिता गौरिव विभुः प्रभूतावयवो जात इत्यर्थः । दूरेभाः । दूरे विप्रकृष्टदेशेऽपि भाः प्रकाशो यस्य स तथोक्तः । एवंभूतोऽग्निरप्सु श्वसितीति पूर्वेण संबंधः ॥ श्वसिति । श्वस प्राणने । अदादित्वाच्छपो लुक् । रुदादिभ्यः सार्वधातुके । पा० ७. २. ७६. । इतीडागमः । तिपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । क्रत्वा । जसादिषु छंदसि

वावचनमिति नाभावाभावः । उषसि बुध्यत इत्युषर्भुत् । बुध अवगमने । क्विप् चेति क्विप । एकाचो बश इति भष्भावः । अहरादीनां पत्यादिषूपसंख्यानं । पा० ८ २. ७१. २. । इति सकारस्य रेफादेशः । शिश्वा । शो तनूकरणे । आदेच इत्यात्वं । शः कित्सन्वच्च । उ० १. २०. । इत्युप्रत्ययः । सन्वद्भावाद्द्विर्भावित्वे । अत एव नित्त्वादाद्युदात्तत्वं । किद्वद्भावादातो लोप इटि चेत्याकारलोपः । प्रथमपक्षे सुपां सुलुगिति सोराकारः । द्वितीये तु पूर्ववन्नाभावाभावः । दूरेभाः । तत्पुरुषे कृति बहुलमिति बहुव्रीहावपि बहुलवचनादलुक् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य पंचमे नवमो वर्गः ॥

रयिरिति दशर्चं द्वैपदमध्ययनतः पंचर्चं द्वितीयं सूक्तं पराशरस्यार्षमाग्नेयं । अनुक्तांतं च । रयिरिति । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

रयिर्न चित्रा सूरो न संदृगायुर्न प्राणो नित्यो न सूनुः ।
तक्वा न भूर्णिर्वना सिषक्ति पयो न धेनुः शुचिर्विभावा ॥१॥

रयिः । न । चित्रा । सूरः । न । संऽदृक् । आयुः । न ।
प्राणः । नित्यः । न । सूनुः ।
तक्वा । न । भूर्णिः । वना । सिसक्ति । पयः । न । धेनुः ।
शुचिः । विभाऽवा ॥ १ ॥

अयमग्नी रयिर्न धनमिव चित्रा चायनीयो विचित्ररूपो वा । सूरो न सूर्य इव संदृक् संद्रष्टा सर्वेषां वस्तूनां दर्शयिता । आयुर्न प्राणः । आयुर्मुखे संचरन् प्राणः प्रश्वसन्वायुरिव

प्रियतमः । यद्वा यथा प्राणवायुरायुर्जीवनमवस्थापयति । तथा चाम्नायते । यावद्ध्यस्मिन् शरीरे प्राणो वसति तावदायुरिति । एवमग्निरपि जाठररूपेणायुषोऽवस्थापयिता । नित्यो न सूनुः । नित्यो ध्रुवः पुत्र इव प्रियकारी । यथौरसः पुत्रः पितुर्हितमेवाचरति तद्वदयमपि हितस्य स्वर्गस्य प्रापयिता । तथा चाम्नायते । पुत्रः पित्रे लोककृज्जातवेद इति । तक्वा न गतिमानश्व इव भूर्णिर्भर्ता । यथाश्व उपर्यारूढं पुरुषं बिभर्ति धारयति पोषयतीति वा तद्वदयमपीत्यर्थः । पयो न धेनुः । पय इव प्रीणयिता । शुचिर्दीप्तः । विभावा विशिष्टप्रकाशयुक्तः । एवंगुणविशिष्टोऽग्निर्वना वनान्यरण्यानि सिषक्ति । दग्धुं समवैति । सेवते वा ॥ विभ्रा । सुपां सुलुगिति सोः पूर्वसवर्णदीर्घत्वं । नित्यः । नेर्ध्रुवे । पा० ४. २. १०४. ३. । इति त्यप् । प्रत्ययस्य पित्त्वादनुदात्तत्व उपसर्गस्वर एव शिष्यते । तक्वा । तक हसने । गतिकर्मसु पठितत्वादत्र गत्यर्थः । तकति गच्छतीति तक्वा । अन्येभ्योऽपि दृश्यंत इति वनिप् । भूर्णिः । घृणिपृश्निरित्यादौ भरतेर्निप्रत्ययांतो निपातितः ॥

द्वितीयामृचमाह ॥

दाधार क्षेममोको न रण्वो यवो न पक्वो जेता जनानां ।
ऋषिर्न स्तुभ्वा विक्षु प्रशस्तो वाजी न प्रीतो वयो
दधाति ॥ २ ॥

दाधार । क्षेमं । ओकः । न । रण्वः । यवः । न । पक्वः ।
जेता । जनानां ।
ऋषिः । न । स्तुभ्वा । विक्षु । प्रऽशस्तः । वाजी । न ।
प्रीतः । वयः । दधाति ॥ २ ॥

अयमग्निः क्षेमं लब्धस्य धनस्य रक्षणं दाधार। धारयति। स्तोतृभ्यो दत्तस्य धनस्य रक्षणं कर्तुं शक्नोतीति भावः। ओको न। निवासस्थानं गृहमिव रण्वो रमणीयः। यद्वा गंतव्यः। गृहवत्सर्वैः प्राप्यत इत्यर्थः। यवो न यव इव पक्वः। यथा पक्वो यव उपभोगयोग्यो भवति तद्वदग्निरपि पाकादि-कार्यहेतुतयोपभोग्य इत्यर्थः। जनानां जेता। शत्रुजनानां मध्येऽभिभविता। ऋषिर्न मंत्रद्रष्टा ऋषिरिव स्तुभ्वा देवानां स्तोता। विक्षु यजमानलक्षणेषु मनुष्येषु प्रशस्तः प्रख्यातः। वाजी न। अश्व इव प्रीतो हर्षयुक्तः। यथाश्वो हर्षयुक्तो युद्धाभिमुखं गच्छति तद्वदयमपि देवानां हविर्वहने हर्षयुक्तो भवतीत्यर्थः। एवंभूतोऽग्निर्वयोऽन्नं दधाति। दधातु। अस्मभ्यं ददात्वित्यर्थः। वय इत्यन्ननाम। वयः क्षद्मेति तन्नामसु पाठात्॥ दाधार। तुजादीनामित्यभ्यासस्य दीर्घत्वं। क्षेमं। क्षियति निवसत्यनेनेति क्षेमः। अर्तिस्तुस्वित्यादिना मन्। नित्त्वादाद्युदात्तत्वं। रण्वः। रवि धवि गत्यर्थाः। अस्मात्कर्मणि कप्रत्ययः। इदित्वान्नुम्। जेता। तृन्नंत आद्युदात्तः। जनानां। यतश्च निर्धारणं। पा० २. ३. ४१.। इति निर्धारणे षष्ठी। नेयं कर्मणि षष्ठी। न लोकाव्ययनिष्ठेति षष्ठीप्रतिषेधात्। स्तुभ्वा। स्तोभतिः स्तुतिकर्मा। अन्येभ्योऽपि दृश्यंत इति क्वनिप्॥

तृतीयामृचमाह॥

दुरोकशोचिः क्रतुर्न नित्यो जायेव योनावरं विश्वस्मै।
चित्रो यदभ्राट् श्वेतो न विक्षु रथो न रुक्मी त्वेषः समत्सु॥ ३॥

दुरोकऽशोचिः । क्रतुः । न । नित्यः । जायाऽइव । योनौ ।
अरं । विश्वस्मै ।

चित्रः । यत् । अभ्राट् । श्वेतः । न । विक्षु । रथः । न ।
रुक्मी । त्वेषः । समत्ऽसु ॥ ३ ॥

दुरोकशोचिर्दुःप्रापतेजाः क्रतुर्न नित्यः । क्रतुः कर्मणां कर्ता । स इव ध्रुवः । यथा स कर्मसु ध्रुवोऽप्रमत्तः सन् जागर्ति तद्वदयमप्यग्निः कर्मसु रक्षसां दहने ध्रुवो जागर्तीत्यर्थः । योनौ गृहे वर्तमाना जायेव । योषिदिव । अग्निहोत्रादिगृहे वर्तमानो वह्निर्विश्वस्मै सर्वस्मै यष्टृजनायारमलं भूषणं भवति । यथा जायया गृहमलंकृतं भवति तद्वदग्निना यज्ञगृहमप्यलंकृतं भवति दृश्यत इत्यर्थः । चित्रश्चायनीयो विचित्रदीप्तिर्वा यद्यदायमग्निरभ्राट् । भ्राजते । तदानीं श्वेतो न शुभ्रवर्ण आदित्य इव भवति । रात्रौ ह्यहनि सूर्य इवाग्निः प्रकाशको भवति । विक्षु प्रजासु रथो न रथ इव रुक्मी सुवर्णवद्रोचमानदीप्तियुक्तः समत्सु संग्रामेषु त्वेषु दीप्तः । एवंभूतोऽग्निर्यदभ्राडिति पूर्वेणान्वयः ॥ दुरोकशोचिः । उच समवाये । ईषद्दुःसुष्विति कृच्छ्रार्थे खल् । बहुलवचनात्कुत्वं । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । दुरोकं शोचिस्तेजो यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अरं वालमूलेत्यादिना लकारस्य रेफादेशः । अभ्राट् । भ्राजृ दीप्तौ । लङि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपो लुक् । व्रश्चादिषत्वे जश्त्वं । अडागम उदात्तः । यद्वृत्तयोगादनिघातः । समत्सु । समानं माद्यंत्येष्विति समदः संग्रामाः । औणादिकोऽधिकरणे क्विप् । समा-

नस्य छंदसीति सभावः । यद्वा सम्यगत्ति भक्षयति वीरानिति समत् । संपूर्वाददत्तेः क्विप् चेति क्विप् ॥

चतुर्थीमृचमाह ॥

सेनेव सृष्टामं दधात्यस्तुर्न दिद्युत्त्वेषप्रतीका ।
यमो ह जातो यमो जनित्वं जारः कनीनां पतिर्जनीनां ॥४॥

सेनाऽइव । सृष्टा । अमं । दधाति । अस्तुः । न । दिद्युत् ।
त्वेषऽप्रतीका ।
यमः । ह । जातः । यमः । जनिऽत्वं । जारः । कनीनां ।
पतिः । जनीनां ॥ ४ ॥

सृष्टा प्रेरिता सेनेव स्वामिना सह वर्तमाना भटसंहतिरिवायमग्निरमं शत्रूणां भयं दधाति । विदधाति । करोतीत्यर्थः । यद्वा सृष्टा सेनेवामं बलं दधाति । सा यथा बलवती तद्वदग्निरपि बलवानित्यर्थः । निदर्शनांतरमुच्यते । दिद्युदिति वज्रनाम । तेन चात्रेषुर्लक्ष्यते । त्वेषप्रतीका दीप्तमुखास्तुर्न दिद्युत् । क्षेप्तुः संबंधिनीषुरिव । सा यथा भीषयते तद्वदग्निरपि राक्षसादीन् भीषयत इत्यर्थः । अत्र निरुक्तं । सेनेव सृष्टा भयं वा बलं वा दधात्यस्तुरिव दिद्युत्त्वेषप्रतीकेत्यादि । नि० १०. २१. । यच्छति ददाति स्तोतृभ्यः कामानिति यमोऽग्निरुच्यते । यद्वा । इंद्राग्न्योर्युगपदुत्पन्नत्वादग्नेर्यमत्वं । अस्मिन्नर्थे यास्केन मंत्रब्राह्मणे दर्शिते । यमो ह जात इंद्रेण सह संगतः । यमाविहेह मातरेत्यपि निगमो भवति । यो जात उत्पन्नो भूतसंघो यच्च जनित्वं जनयितव्यमुत्पत्स्यमानं भूतजातं तदुभयमपि यमो ह । अग्निरेव । सर्वेषां भावानामाहुतिद्वाराग्न्यधीनत्वात् । कनीनां कन्यकानां जारो जरयिता । यतो विवाहसमय

अग्नौ लाजादिद्रव्येण होमे सति तासां कन्यात्वं निवर्तते। अता जरयितेत्युच्यते। तथा जनीनां जायानां कृतविवाहानां पतिर्भर्ता। तथा चाख्यायते। अनुपजातपुरुषसंभोगेच्छावस्थां स्त्रियं सोमो लेभे। स च सोम ईषदुपजातभोगेच्छां तां विश्वावसवे गंधर्वाय प्रादात्। स च गंधर्वो विवाहसमयेऽग्नये प्रददौ। अग्निश्च मनुजाय भर्त्रे धनपुत्रैः सहितामिमां प्रायच्छदिति। इममर्थं काचिदृक् स्पष्टं ब्रूते। सोमो ददद्गंधर्वाय गंधर्वो ददग्नये। रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमामिति। यास्कश्चाह। तृतीयो अग्निष्टे पतिरित्यपि निगमो भवति। नि॰ १०. २१.। इति। यद्वा जनीनां पालयिता यतोऽयमनुष्ठितैर्यागैः फलं प्रयच्छति॥ सेनेव। इनेन सह वर्तत इति सेना। वोपसर्जनस्येति सभावः। बहुव्रीहिस्वरः। जनित्वं। जनी प्रादुर्भावे। कृत्यार्थे तवैकेनिति कर्मणि त्वन्प्रत्ययः। इडागमः। नित्त्वादाद्युदात्तत्वं। जारः। जरयतीति जारः। दारजारौ कर्तरि णिलुक् चेति निपात्यते। कनीनां। कन्याशब्दात् षष्ठ्येकवचने बहुलं छंदसीति बहुलग्रहणात्संप्रसारणं। परपूर्वत्वं। जनीनां। जन्यंत आभ्यामिति जनयः स्त्रियः। इन् सर्वधातुभ्य इतीन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं॥

पंचमीमृचमाह॥

तं वश्चराथा वयं वसत्यास्तं न गावो नक्षंत इद्धं।
सिंधुर्न क्षोदः प्र नीचीरैनोन्नवंत गावः स्व१र्दृशीके॥ ५॥

तं। वः। चराथा। वयं। वसत्या। अस्तं। न। गावः। नक्षंते। इद्धं।

सिंधुः। न। क्षोदः। प्र। नीचीः। ऐनोत्। नवंत। गावः। स्वः। दृशीके ॥ ५ ॥

व इति व्यत्ययेन बहुवचनं। हे अग्ने तं त्वां चराथा। चरतीति चरथः पशुः। तत्प्रभवैर्हृदयादिभिः साध्याहुतिरपि चरथेत्युच्यते। उपचारात्कार्ये कारणशब्दः। चराथा चरथया पशुप्रभवहृदयादिसाधनयाहुत्या। वसत्या। वसति निवसतीति स्थावरा व्रीह्यादिर्वसतिः। पूर्ववत्तत्साध्याहुतिर्लक्ष्यते। वसत्या पुरोडाशाद्याहुत्या च वयमिद्धं प्रदीप्तमग्निं नक्षंते। व्याप्नुयाम। पुरुषव्यत्ययः। तत्र दृष्टांतः। अस्तं न गावः। अस्तमिति गृहनाम। यथा गावो गृहं व्याप्नुवंति तद्वत्। अत्र यास्कः। तं वश्चराथा चरंत्या पश्वाहुत्या वसत्या च निवसंत्यौषधाहुत्यास्तं यथा गाव आप्नुवंति तथाप्नुयाम। नि॰ १०. २१.। इति। अयमग्निः सिंधुर्न क्षोदः स्यंदनशीलमुदकमिव नीचीर्नितरा-ञ्चतीरितस्ततो नितरामुद्गच्छंतीर्ज्वालाः प्रैनोत्। प्रेरयति। यथा जलप्रवाहो निम्नदेशे शीघ्रं गच्छति तद्वदग्नेर्ज्वाला दग्धव्यं प्रति गच्छंतीति भावः। स्वर्नभसि वर्तमाने दृशीके दर्शनीये तस्मिन्नग्नौ गावो गमनस्वभावा रश्मयो नवंत। संगच्छते। नवतिर्गतिकर्मा ॥ चराथा। चरेरौणादिकोऽथक्-प्रत्ययः। दीर्घश्छांदसः। सुपां सुलुगिति विभक्तेराकारः। वसत्या। वहिवस्यर्तिभ्यश्चित्। उ॰ ४. ६१.। इत्यतिप्रत्ययः। उदात्तयण इति विभक्तेरुदात्तत्वं। अस्तं। अस्यतेऽस्मिन्सर्व-मित्यस्तं गृहं। असिहसीत्यादिना तन्। तितुत्रेतीट्प्रतिषेधः। नित्त्वादाद्युदात्तत्वं। नक्षंते। नक्षतिर्व्याप्तिकर्मा। नक्ष गतौ। व्यत्ययेनात्मनेपदं। चादिलोपे विभाषेति निघाताभावः।

नीचीः । निपूर्वादंचतेश्चोपसंख्यानमिति ङीप् । अच इत्यकारलोपे चाविति दीर्घत्वं । न्यधी च । पा० ६. २. ५३. । इति गतेः प्रकृतिस्वरत्वं । ऐनोत् । इण् गतौ । अंतर्भावितण्यर्थाच्छंदसि लुङ्लङ्लिट इति वर्तमाने लङि व्यत्ययेन श्नु. । आडागमो वृद्धिश्च । दृशोके । दृशिर् प्रेक्षणे । अनिदृशिभ्यां चेति कीकन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

॥ इति प्रथमस्य पंचमे दशमो वर्गः ॥

वनेष्विति द्वैपदं दशर्चमध्ययनतः पंचर्चं तृतीयं सूक्तं पराशरस्यार्षमाग्नेयं । वनेष्वित्यनुक्रांतं । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

वनेषु जायुर्मर्तेषु मित्रो वृणीते श्रुष्टिं राजेवाजुर्यं ।
क्षेमो न साधुः क्रतुर्न भद्रो भुवत्स्वाधीर्होता हव्यवाट् ॥१॥
वनेषु । जायुः । मर्तेषु । मित्रः । वृणीते । श्रुष्टिं ।
राजाऽइव । अजुर्यं ।
क्षेमः । न । साधुः । क्रतुः । न । भद्रः । भुवत् । सुऽआधीः ।
होता । हव्यऽवाट् ॥ १ ॥

वनेषु जायुररण्येषु जायमानो मर्तेषु मनुष्येषु मित्रः सखा सोऽयमग्निः श्रुष्टिं । श्वाश्वश्नुते कर्माणि व्याप्नोतीति श्रुष्टिर्यजमानः । क्षिप्रेण कर्मणामनुष्ठातेत्यर्थः । तथा च यास्कः । श्रुष्टीति क्षिप्रनामाशु अष्टीति । नि० ६. १२. । एवंभूतं यजमानं वृणीते । संभजते । अनेन प्रत्तं हविः स्वीकृत्य रक्षतीति भावः । तत्र दृष्टांतः । राजेवाजुर्यं । अजुर्यं जरारहितं दृढांगं सर्वकार्येषु शक्तमित्यर्थः । एवंभूतं पुरुषं यथा राजा वृणीते तद्वत् । क्षेमो न रक्षक इव साधुः साधयिता । क्रतुर्न

क्रतुः कर्मणां कर्ता । स इव भद्रो भजनीयः कल्याणो वा । होता देवानामाह्वाता हव्यवाट् हव्यवाहनो नाम देवानामग्निः । तथा चाम्नायते । त्रयो वा अग्नयो हव्यवाहनो देवानां कव्यवाहनः पितॄणां सहरक्षा असुराणामिति । एवंभूतोऽग्निः स्वाधीः शोभनकर्मा शोभनध्यानो वा भुवत् । भवतु ॥ जायुः । जि जये । कृवापाजीत्युण् । अजुर्यं । जृष् वयोहानौ । भावे ण्यत् । वृद्धौ कृतायामाकारस्य व्यत्ययेनोकारः । जुर्यं जरा नास्त्यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । भुवत् । भवतेर्लेट्यडागमः । बहुलं छंदसीति विकरणस्य लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः ॥

द्वितीयामृचमाह ॥

हस्ते दधानो नृम्णा विश्वान्यमे देवान्धाद्गुहा निषीदन् ।
विदंतीमत्र नरो धियंधा हृदा यत्तष्टान्मंत्राँ अशंसन् ॥ २ ॥

हस्ते । दधानः । नृम्णा । विश्वानि । अमे । देवान् । धात् ।
गुहा । निऽसीदन् ।
विदंति । ईं । अत्र । नरः । धियंऽधाः । हृदा । यत् ।
तष्टान् । मंत्रान् । अशंसन् ॥ २ ॥

विश्वानि सर्वानि नृम्णा नृम्णानि हविर्लक्षणानि धनानि हस्ते स्वकीये बाहौ दधानि धारयन्नयमग्निर्गुहा गुहायामप्सु मध्येऽश्वत्थादौ वा संवृतप्रदेशे निषीदन् निगूढो वर्तमानः सन्नमे भये देवान्धात् । अस्थापयत् । अग्नौ हविर्भिः सह पलायिते सति सर्वे देवा अभैषुरित्यर्थः । नरो नेतारो धियंधाः कर्मणां बुद्धीनां वा धारयितारो देवा अत्रास्मिन्काल ईमेनमग्निं विदंति । जानंति । यद्यदा हृदा हृदयावस्थितया बुद्ध्या

तष्टान्निर्मितानग्निस्तुतिपरान्मंत्रानशंसन् । अस्तुवन् । अवोचन्नित्यर्थः ॥ निषीदन् । सदेरप्रतेरिति षत्वं । विदंति । विद ज्ञाने । अदादित्वाच्छपो लुक् । प्रत्ययस्वरः । धियंधाः । आतोऽनुपसर्गे क इति कः । तत्पुरुषे कृते बहुलमिति बहुलवचनाद्द्वितीयाया अप्यलुक् । तष्टान् । तक्षू त्वक्षू तनूकरणे । निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । स्कोः संयोगाद्योरिति कलोपः ॥

तृतीयामृचमाह ॥

अजो न क्षां दाधार पृथिवीं तस्तंभ द्यां मंत्रेभिः सत्यैः ।
प्रिया पदानि पश्वो नि पाहि विश्वायुरग्ने गुहा गुहं
गाः ॥ ३ ॥

अजः । न । क्षां । दाधार । पृथिवीं । तस्तंभ । द्यां ।
मंत्रेभिः । सत्यैः ।
प्रिया । पदानि । पश्वः । नि । पाहि । विश्वऽआयुः ।
अग्ने । गुहा । गुहं । गाः ॥ ३ ॥

अजो न । अजति गच्छतीत्यजः सूर्यः । यद्वा न जायत इत्यजः । जन्मरहित इत्यर्थः । स इव क्षां । क्षेति पृथिवीनाम । क्षां भूमिं दाधार । अयमग्निः प्रकाशकत्वेन धारयति । पृथिवीत्यंतरिक्षनाम । पृथिवीमंतरिक्षं च धारयतीत्येव । द्यां द्युलोकं सत्यैरवितथार्थैर्मंत्रेभिर्मंत्रैस्तस्तंभ । स्तभ्नाति । यथाधो न पतति । उपर्येव तिष्ठति तथा करोतीत्यर्थः । मंत्रैर्दिवो धारणं तैत्तिरीये समाम्नातं । देवा वा आदित्यस्य स्वर्गलोकस्य पराचोऽतिपाताद्बिभयुः । तं छंदोभिरदृंहन्धृत्या इति । यद्वा सत्यैर्मंत्रैः स्तूयमानोऽग्निर्द्यां तस्तंभेति । हे अग्ने विश्वायुः ।

विश्वं सर्वमायुरन्नं यस्य स त्वं पश्वः पशोः प्रिया प्रियाणि पदानि शोभनतृणोदकोपेतानि स्थानानि निपाहि । नितरां पालय । मा धाक्षीरित्यर्थः । तर्हि कुत्र निवसामीति चेत् तत्राह । गुहा गुहाया अपि गुहं गुहां गवां संचारायोग्यस्थानं गाः । गच्छ । तत्रैव निवसेत्यर्थः ॥ पश्वः । जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । उदात्तयण इति विभक्तेरुदात्तत्वं । गुहा । सुपां सुलुगिति ङस्या आजादेशः । चित्वादंतोदात्तत्वं । गुहं । व्यत्ययेन ह्रस्वत्वं । गाः । छांदसो लुङ् । इणो गा लुङीति गादेशः ॥

चतुर्थीमृचमाह ॥

य ईं चिकेत गुहा भवंतमा यः ससाद धारामृतस्य ।
वि ये चृतंत्यृता सपंत आदिद्वसूनि प्र ववाचास्मै ॥ ४ ॥
यः । ईं । चिकेत । गुहा । भवंतं । आ । यः । ससाद ।
धारां । ऋतस्य ।
वि । ये । चृतंति । ऋता । सपंतः । आत् । इत् । वसूनि ।
प्र । ववाच । अस्मै ॥ ४ ॥

यः पुमान् ईमेनं गुहा भवंतं गुहायां संतमग्निं चिकेत । जानाति । यश्च ऋतस्य सत्यस्य यज्ञस्य वा धारयितारमेन-मग्निमाससाद । आसीदति । उपास्त इत्यर्थः । ये च ऋता ऋतानि सत्यानि यज्ञान्वा सपंतः समवयंतः स्पृशंतो वा पुरुषा एतमग्निं विचृतंति । अग्निमुद्दिश्य स्तुतीर्ग्रथ्नंति । कुर्वंती-त्यर्थः । आदित् स्तुत्यनंतरमेवास्मै सर्वस्मै स्तोतृजनाय वसूनि धनानि प्रववाच । प्रकथयति ॥ चिकेत । कित ज्ञाने । लिटि

णलि लित्स्वरः । चृतंति । चृती हिंसाग्रथनयोः । तौदादिकः । लसार्वधातुकानुदात्तत्वे विकरस्वरः श्रिथते । ववाच । लिटि ब्रुवो वचिः । लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं । संप्रसारणाच्चेति परपूर्वत्वस्य वा छंदसि । पा० ६.१.१०८.१. इति विकल्पनाद्यणादेशः ॥

पंचमीमृचमाह ॥

वि यो वीरुत्सु रोधन्महित्वोत प्रजा उत प्रसूष्वंतः ।
चित्तिरपां दमे विश्वायुः सद्मेव धीराः संमाय चक्रुः ॥ ५ ॥

वि । यः । वीरुत्ऽसु । रोधत् । महिऽत्वा । उत । प्रऽजाः । उत । प्रऽसूषु । अंतरिति ।
चित्तिः । अपां । दमे । विश्वऽआयुः । सद्मऽइव । धीराः । संऽमाय । चक्रुः ॥ ५ ॥

योऽग्निर्वीरुत्स्वोषधीषु महित्वा यानि महत्त्वानि संति तानि विरोधत् । विरुणद्धि । विशेषेणावृणोति । नावशेषयति । उत अपि च प्रजाः प्रकर्षेणोत्पन्नाः पुष्पफलादिलक्षणाः प्रसूषूत्पादयित्रीषु मातृस्थानीयास्वोषधीष्वंतर्मध्ये विरुणद्धीत्येव । द्वितीय उतशब्दः पादपूरणः । तथा चित्तिश्चेतयिता ज्ञापयितापां दमे जलानां मध्यभूते गृहे विश्वायुः सर्वान्नो योऽग्निर्वर्तत इति शेषः । तमग्निं धीरा मेधाविनः संमाय संमाननं पूजनं कृत्वा । स्तुतिभिः स्तुत्वेत्यर्थः । चक्रुः । कर्माणि कुर्वंति । तत्र दृष्टांतः । सद्मेव । यथा सदनं गृहं प्रथमतः संपूज्य पश्चात्तत्र कर्माण्याचरंति तद्वत् ॥ वीरुत्सु । विपूर्वाद्रोहतेः क्विप् । न्यंक्वादिषु वीरुध् इति पठितत्वादुपसर्गस्य दीर्घो

धकारस्यांतादेशः। उक्तं च। वीरुध ओषधयो भवंति। रोधत्। रुधिर् आवरणे। लेट्यडागमः। इतश्च लोप इतीकारलोपः। संमाय। माङ् माने शब्दे च। समासेऽनञ्पूर्वे क्तो ल्यप्। पा० ७. १. ३७.। न ल्यपि। पा० ६. ४. ६९.। इतीत्वप्रतिषेधः॥

॥ इति प्रथमस्य पंचम एकादशो वर्गः॥

श्रीणन्निति द्वैपदं दशर्चं चतुर्थं सूक्तं। तत्राध्ययनतः पंचर्चं। ऋष्याद्याः पूर्ववत्। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

श्रीणन्नुप स्थाद्दिवं भुरण्युः स्थातुश्चरथमक्तून्व्यूर्णोत्।
परि यदेषामेको विश्वेषां भुवद्देवो देवानां महित्वा॥ १॥

श्रीणन्। उप। स्थात्। दिवं। भुरण्युः। स्थातुः। चरथं।
अक्तून्। वि। ऊर्णोत्।
परि। यत्। एषां। एकः। विश्वेषां। भुवत्। देवः।
देवानां। महिऽत्वा॥ १॥

भुरण्युर्हविषां भर्ता धारयिता पयःप्रभृतिना श्रयणद्रव्येण सोममिव तैर्हविर्भिः श्रीणन् मिश्रयन्दिवमुपस्थात्। उपतिष्ठति। प्राप्नोतीत्यर्थः। स्थातुः स्थावरं चरथं जंगमं तदुभयात्मकं जगदक्तून् सर्वा रात्रीश्च व्यूर्णोत्। स्वतेजसा विशेषेणाच्छादयति। हविर्वहनं कुर्वन्सर्वमपि जगत्स्वभासा प्रकाशयति स्मेति भावः। विश्वेषां सर्वेषां देवानां दानादिगुणयुक्ताना-मिंद्रादीनां मध्ये देवो द्योतमानः। एक एवायमग्निरेषां पूर्वोक्तानां स्थावरादीनां महित्वा महत्त्वानि माहात्म्यानि

यद्यस्मात्परिभुवत् । परिभवति । परिगृह्णाति । परितो व्याप्य वर्तते । परिपूर्वो भवतिः परिग्रहार्थः । यद्वा । एषां विश्वेषां स्थावरादीनां मध्ये वर्तमानोऽयं देवोऽग्निर्देवानां महत्त्वानि यद्यदा परिभुवत् । परितो व्याप्नोति । तदानीमिति पूर्वत्रान्वयः ॥ ऊर्णोत् । ऊर्णुञ् आच्छादने । ऊर्णोतिर्विभाषा । पा० ७, २, ६, । इति वृद्धेर्विकल्पः ॥

द्वितीयामृचमाह ॥

आदित्ते विश्वे क्रतुं जुषंत शुष्काद्यद्देव जीवो जनिष्ठाः ।
भजंत विश्वे देवत्वं नाम ऋतं सपंतो अमृतमेवैः ॥ २ ॥

आत् । इत् । ते । विश्वे । क्रतुं । जुषंत । शुष्कात् । यत् । देव । जीवः । जनिष्ठाः ।
भजंत । विश्वे । देवऽत्वं । नाम । ऋतं । सपंतः । अमृतं । एवैः ॥ २ ॥

हे देव द्योतमानाग्ने जीवो जीवन्प्रज्वलन् शुष्कान्नीरसादरणिरूपात्काष्ठाद्यद्यदा जनिष्ठाः । प्रादुर्भवसि । मथनेनोत्पद्यसे । आदित् अनंतरमेव विश्वे सर्वे यजमानास्ते तुभ्यं क्रतुं कर्म जुषंत । सेवंते । अनुतिष्ठंति । तथानुष्ठाय च विश्वे ते सर्वे नाम नामकमृतमवितथं देवत्वं देवतात्वं भजंत । भजंते प्राप्नुवंति । किं कुर्वंतः । अमृतममरणं त्वामेवैस्त्वां गंतृभिः स्तोत्रैः सपंतः समवयंतः प्राप्नुवंत इत्यर्थः ॥ जुषंते त्यादीनि त्रीण्याख्यातानि छंदसि लुङ्लङ्लिट इति वर्तमानार्थानि । एवैः । यंति स्तोतव्याभिमुख्येन गच्छंतीत्येवानि स्तोत्राणि । इणशीङ्भ्यां वन् ॥

तृतीयामृचमाह॥

ऋतस्य प्रेषा ऋतस्य धीतिर्विश्वायुर्विश्वे अपांसि चक्रुः।
यस्तुभ्यं दाशाद्यो वा ते शिक्षात्तस्मै चिकित्वान्रयिं
दयस्व॥ ३॥

ऋतस्य। प्रेषाः। ऋतस्य। धीतिः। विश्वऽआयुः। विश्वे।
अपांसि। चक्रुः।
यः। तुभ्यं। दाशात्। यः। वा। ते। शिक्षात्। तस्मै।
चिकित्वान्। रयिं। दयस्व॥ ३॥

ऋतस्य गतस्य देवयजनं प्राप्तस्याग्नेः प्रेषाः प्रकर्षेणेष्यमाणाः स्तुतयः क्रियंते। धीतिः। धीयते सोमः पीयतेऽस्मिन्निति धीतिर्यागः। सोऽपि ऋतस्य देवयजनदेशं प्राप्तस्याग्नेरेव क्रियते। अतः सोऽग्निर्विश्वायुः। विश्वं सर्वमायुरन्नं यस्य स तथाविधो भवति। अपि चास्मै विश्वे सर्वे यजमाना अपांसि दर्शपूर्णमासादीनि कर्माणि चक्रुः। कुर्वंति। हे अग्ने तुभ्यं यो दाशात्। चरुपुरोडाशादीनि हवींषि ददाति। यो वान्योऽपि यो यजमानस्ते शिक्षात्। त्वदीयं कर्म कर्तुं शक्तो भूयासमितीच्छति। उभयविधाय तस्मै यजमानाय चिकित्वान् तत्कृतमनुष्ठानं जानंस्त्वं रयिं दयस्व। धनं देहि॥ दाशात्। दाशृ दाने। लेट्याडागमः। शिक्षात्। शक्ल शक्तौ। इच्छार्थे सन्। सनि मीमाघुरभलभशकेत्यकारस्येसादेशः। अत्र लोपोऽभ्यासस्येत्यभ्यासलोपः। स्कोः संयोगाद्योरितीसः सलोपः। पूर्ववल्लेट्याडागमः। चिकित्वान्। कित ज्ञाने। लिटः क्वसुः। दयस्व। दय दानगतिरक्षणहिंसादानेषु॥

चतुर्थीमृचमाह ॥

होता निषत्तो मनोरपत्ये स चिन्न्वासां पती रयीणां ।
इच्छंत रेतो मिथस्तनूषु सं जानत स्वैर्दक्षैरमूराः ॥ ४ ॥

होता । निऽसत्तः । मनोः । अपत्ये । सः । चित् । नु ।
आसां । पतिः । रयीणां ।
इच्छंत । रेतः । मिथः । तनूषु । सं । जानत । स्वैः ।
दक्षैः । अमूराः ॥ ४ ॥

हे अग्ने त्वं मनोरपत्ये यजमानस्वरूपायां प्रजायां होता देवानामाह्वाता सन् निषत्तो निषसः । मानव्यो हि प्रजा इति हि ब्राह्मणं । स चिन्नु स एव त्वमासां प्रजानां रयीणां गवादीनां धनानामपि पतिः स्वामी । अतस्ताः प्रजास्तनूष्वात्मीयेषु शरीरेषु मिथः संसृष्टमेकीभूतं पुत्ररूपेण परिणतं रेतो वीर्यमिच्छंत । ऐच्छन् । त्वदनुग्रहेण पुत्रमलभंतेति यावत् । लब्धपुत्राश्च ताः प्रजा अमूरा अमूढाः सत्यः स्वैः स्वकीयैर्दक्षैः समर्थैः पुत्रैः सह संजानत । सम्यक् अवगच्छंति । चिरकालं जीवंतीत्यर्थः । यद्वा दक्षशब्दः प्राणवाची । प्राणो वै दक्षोऽपानः क्रतुरिति श्रुतेः । स्वैर्दक्षैः स्वकीयैः प्राणैरमूराः संगतास्त्वयैव सर्वं जानंति ॥ इच्छंत । व्यत्ययेनात्मनेपदं । जानत । छांदसो लङ् । श्नाभ्यस्तयोरात इत्याकारलोपः । अमूरा । मूरा अमूरेत्यत्र यास्क एवं व्याचख्यौ । मूढा वयं स्मोऽमूढस्त्वमसि । नि० ६. ८. । इति । अतोऽत्राप्यमूरशब्देनामूढत्वमुच्यते । वर्णव्यापत्त्या ढकारस्य रेफः । यद्वा मुर्छा मोहसमुच्छ्राययोः । अस्मात्संपदादिलक्षणो भावे क्विप् । राल्लोप

इति च्छलोपः। रो मत्वर्थीयः। न मूरा अमूराः। अथवा। अम गत्यादिषु। अस्मादौणादिक ऊरन्प्रत्ययः॥

पंचमोमृचमाह॥

पितुर्न पुत्राः क्रतुं जुषंत श्रोषन्ये अस्य शासं तुरासः।
वि राय और्णोद्दुरः पुरुक्षुः पिपेश नाकं स्तृभिर्दमूनाः॥५॥
पितुः। न। पुत्राः। क्रतुं। जुषंत। श्रोषन्। ये। अस्य।
शासं। तुरासः।
वि। रायः। और्णोत्। दुरः। पुरुऽक्षुः। पिपेश। नाकं।
स्तृभिः। दमूनाः॥ ५॥

अस्याग्नेः शासं शासनं तुरास्त्वरमाणाः संतो ये यजमानाः श्रोषन्। शृखंति। ते सर्वे तेनानुशिष्टं क्रतुं कर्म जुषंत। सेवंते। तत्र दृष्टांतः। पितुर्न पुत्राः। यथा पुत्राः पुरु बहुलं त्रायकाः पुन्नाम्नो नरकाद्वा रक्षकास्तनयाः पितुराज्ञां कुर्वंति तद्वत्। पुत्रः पुरु त्रायते निपरणाद्वा पुं नरकं ततस्त्रायत इति वा। नि० २. ११.। इति यास्कः। पुरुक्षुः। क्षु इत्यन्ननाम। बहन्नः सोऽग्निरेषां यजमानानां दुरो द्वाराणि यज्ञस्य द्वारभूतानि रायो धनानि व्यौर्णोत्। विवृणोति प्रकाशयति ददातीति यावत्। अपि च दमूना दमे यज्ञगृहे मनो यस्य सोऽग्निः। नास्मिन्नकं दुःखमस्तीति नाको द्युलोकः। तं। स्तृभिरिति नक्षत्रनाम। स्तृभिर्नक्षत्रैः पिपेश। अवयवीचकार। नक्षत्रैर्युक्तमकरादित्यर्थः॥ श्रोषन्। श्रु श्रवणे। लेट्यडागमः। सिब्बहुलं लेटीति सिप्। बहुलं छंदसीति विकरणस्य लुक्। इतश्च लोप इतीकारलोपः। संयोगांतस्य लोपः। पिपेश। पिश अवयवे॥ ॥ इति प्रथमस्य पंचमे द्वादशो वर्गः॥

शुक्र इति हैपदं दशर्चमध्ययनतः पंचदशं पंचमं सूक्तं पराशरस्यार्षमाग्नेयं। शुक्र इत्यनुक्रांतं। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

शुक्रः शुशुक्वाँ उषो न जारः पप्रा समीची दिवो न ज्योतिः।
परि प्रजातः क्रत्वा बभूथ भुवो देवानां पिता पुत्रः सन्॥१॥

शुक्रः। शुशुक्वान्। उषः। न। जारः। पप्रा। समीची इति संऽईची। दिवः। न। ज्योतिः।
परि। प्रऽजातः। क्रत्वा। बभूथ। भुवः। देवानां। पिता। पुत्रः। सन्॥१॥

शुक्रः शुभ्रवर्णोऽयमग्निरुषां न जारः। उषसो जरयिता सूर्य इव शुशुक्वान् शोचयिता सर्वस्य प्रकाशयिता भवति। तथा समीची संगते द्यावापृथिव्यौ दिवो न ज्योतिर्द्योतिमानस्य सूर्यस्य ज्योतिरिव पप्रा। स्वतेजसा पूरयिता। हे अग्ने। स त्वं प्रजातः प्रादुर्भूतः सन् क्रत्वा कर्मणा यद्वा ज्ञानहेतुना प्रकाशेनोक्तप्रकारेण सर्वं जगत्परिबभूथ। परितो व्याप्नोषि। दीव्यंतीति देवा ऋत्विजः। तेषां पुत्रः सन् पुन्नाम्नो नरकात्त्रायकः सन् पिता भुवः। पालयिता भवसि। यद्वा देवानामिंद्रादीनामेव पुत्रः सन् पुत्र इव दूतो भूत्वा पिता हविर्भिः पालयिता भवसि॥ शुशुक्वान्। शुच दीप्तौ। लिटः क्वसुः। व्यत्ययेन कुत्वं। पप्रा। पृ पालनपूरणयोरित्यस्मादादृगमहनजन इति किप्रत्ययः। सुपां सुलुगिति सोर्डादेशः। समीची। संपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। समः समि। पा० ६. ३. ९३.। इति सम्य् आदेशः। अंचतेश्चेति वक्तव्यमिति ङीप्।

अत्र कुलकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। वा छंदसीति पूर्वसवर्णदीर्घत्वं। यदि तु सऽईचोः इति पदविभागः क्रियते। तर्ह्युद ईत्। पा० ६. ४. १६९.। इति विधीयमानमीत्वं सम उत्तरस्यापि द्रष्टव्यं। बभूथ। बभूथाततंथ। पा० ७. २. ६४. इति निपातनादिड-भावः॥

द्वितीयामृचमाह॥

वेधा अदृप्तो अग्निर्विजानन्नूधर्न गोनां स्वाद्मा पितूनां।
जने न शेव आहूर्यः सन्मध्ये निषत्तो रण्वो दुरोणे॥ २॥

वेधाः। अदृप्तः। अग्निः। विऽजानन्। ऊधः। न। गोनां।
स्वाद्मः। पितूनां।
जने। न। शेवः। आऽहूर्यः। सन्। मध्ये। निऽसत्तः।
रण्वः। दुरोणे॥ २॥

वेधाः। मेधाविनामैतत्। मेधावी यद्वा विधाता सर्वस्य कर्ताऽदृप्तो दर्परहितो विजानन् कर्तव्याकर्तव्यविभागं जानन्न-ग्निर्गोनां गवामूधर्न गोसंबंधिपयस आश्रयभूतं स्थानमिव पितूनामन्नानां स्वाद्म स्वादयिता रसयिता। यथा गोरूधः पयःप्रदानेन सर्वाण्यन्नानि स्वादूनि करोति तद्वदग्निरपि सम्यक्पाकेन सर्वाण्यन्नानि स्वादूनि करोतीत्यर्थः। अपि च। एवंभूतोऽग्निर्जने न शेवः। जनपदे लोकसुखकरः पुरुष इव मध्ये यज्ञेषु मध्य आहूर्यं आह्वातव्यः सन् दुरोणे यज्ञगृहे निषत्तो निषण्णो रण्वो रमयिता स्तुत्यो वा भवति॥ गोनां। गोः पदांते। पा० ७. १. ५७.। इत्यपादांतेऽपि नुट्। स्वाद्म। स्वद आस्वादने। अंतर्भावितण्यर्थादन्येभ्योऽपि दृश्यंत इति

मनिन् । सुपां सुलुगिति सोर्लुक् । पितूनां । नामन्यतरस्या मिति नाम उदात्तत्वं । आह्वयः । आङ्पूर्वात् ह्वयतेरचो यदिति यत् । बहुलं छंदसीति संप्रसारणं । हल इति दीर्घः । रेफोपजनश्छांदसः । यतोऽनाव इत्याद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

पुत्रो न जातो रण्वो दुरोणे वाजी न प्रीतो विशो वि
तारीत् ।
विशो यदह्वे नृभिः सनीला अग्निर्देवत्वा विश्वान्यश्याः ॥३॥

पुत्रः । न । जातः । रण्वः । दुरोणे । वाजी । न । प्रीतः ।
विशः । वि । तारीत् ।
विशः । यत् । अह्वे । नृऽभिः । सऽनीलाः । अग्निः ।
देवऽत्वा । विश्वानि । अश्याः ॥ ३ ॥

पुत्रो न पुत्र इव जातः प्रादुर्भूतोऽग्निर्दुरोणे गृहे रण्वो रमयिता भवति । वाजीव अश्व इव प्रीतो हर्षयुक्तः सन्विशः संग्रामे वर्तमानाः शत्रुभूताः प्रजा वितारीत् । विशेषेण तरति । अतिक्रामति । अपि च नृभिर्ऋत्विग्लक्षणैर्मनुष्यैः सहितोऽहं सनीलाः समाननिवासस्थाना विशो दैवीः प्रजा यद्यदाह्वे । आह्वयामि । तदानीमयमग्निर्विश्वानि सर्वाणि देवत्वा देवत्वान्यश्याः । अश्नुते प्राप्नोति । स्वयमेव तत्तद्देवता-रूपो भवतीत्यर्थः । तथा च मंत्रांतरमाम्नायते । त्वमग्ने वरुणो जायसे यत्त्वं मित्रो भवसि य यत्समिद्ध इत्यादि ॥ अश्याः । अशू व्याप्तौ । लिङि व्यत्ययेन परस्मैपदमध्यमौ । बहुलं छंद-सीति विकरणस्य लुक् ॥

चतुर्थीमृचमाह ॥

नकिष्ट एता व्रता मिनंति नृभ्यो यदेभ्यः श्रुष्टिं चकर्थ ।
तत्तु ते दंसो यदहन्त्समानैर्नृभिर्यद्युक्तो विवे रपांसि ॥ ४ ॥

नकिः । ते । एता । व्रता । मिनंति । नृऽभ्यः । यत् ।
एभ्यः । श्रुष्टिं । चकर्थ ।
तत् । तु । ते । दंसः । यत् । अहन् । समानैः । नृऽभिः ।
यत् । युक्तः । विवेः । रपांसि ॥ ४ ॥

हे अग्ने ते तव संबंधीन्येता व्रता । एतानि परिदृश्यमानानि दर्शपूर्णमासादीनि कर्माणि नकिर्मिनंति । राक्षसादयो बाधका न हिंसंति । यद्यस्मात्त्वमेभ्यः कर्मसु वर्तमानेभ्यो नृभ्यो यज्ञस्य नेतृभ्यो यजमानेभ्यः श्रुष्टिं । अश्नुते व्याप्नोतीति श्रुष्टिर्यज्ञफलरूपं सुखं । तच्चकर्थ । कृतवानसि । सति हि तव व्रतानां बाधक एतन्नोपपद्यते । अतोऽवगम्यते तव व्रतानां हिंसका न संतीति । हे अग्ने ते त्वदीयं तत्तु दंसस्तदेव कर्म यद्यदि राक्षसादिरहन् । हंति नाशयति । तदानीं समानैः समगणरूपेण सदृशैर्नृभिर्नेतृभिर्मरुद्भिः युक्तस्त्वं रपांसि बाधकानि राक्षसादीनि यद्यस्मात्त्वं विवेः । गमयसि पलायनं प्रापयसि । तत्तस्मात्तव व्रतानि न हिंसंतीति योज्यं ॥ मिनंति । मीञ् हिंसायां । क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वं । विवेः । छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् । वी गत्यादिषु । सिप्यदादित्वाच्छपो लुकि प्राप्ते बहुलं छंदसीति शपः श्लुः ॥

पंचमीमृचमाह ॥

उषो न जारो विभावोस्रः संज्ञातरूपश्चिकेतदस्मै ।

त्मना वहंतो दुरो व्यृण्वन्नवंत विश्वे स्व१र्दृशीके ॥ ५ ॥

उषः । न । जारः । विभाऽवा । उस्रः । संज्ञातऽरूपः ।
· चिकेतत् । अस्मै ।

त्मना । वहंतः । दुरः । वि । ऋण्वन् । नवंत । विश्वे ।
स्वः । दृशीके ॥ ५ ॥

उषो न जारः । उषसो जरयितादित्य इव विभावा विशिष्टप्रकाशयुक्त उस्रो निवासयिता संज्ञातरूपः सर्वैः प्राणिभिरवगतस्वरूपः । देवतांतरवदप्रत्यक्षो न भवतीत्यर्थः । एवंभूतोऽग्निरस्मै यजमानाय चिकेतत् । जानातु । अभिमतफलं ददात्वित्यर्थः । यद्वा विभक्तिव्यत्ययः । अस्या इदं सूक्तरूपं स्तोत्रं चिकेतत् । जानातु । तथास्य रश्मयस्त्मनात्मनैव स्वयमेव वहंतो हविर्वहनं कुर्वंतो दुरो यज्ञगृहद्वाराणि व्यृण्वन् । विशेषेण गच्छंति । व्याप्नुवंतीत्यर्थः । तदनंतरं दृशीके दर्शनीये स्वर्नभसि विश्वे सर्वे ते रश्मयो नवंत । गच्छंति । नवतिर्गतिकर्मा । देवान्प्राप्नुवंतीत्यर्थः ॥ उस्रः । वस निवासे । स्फायितंचीत्यादिना रक् । यजादित्वात्संप्रसारणं । चिकेतत् । कित ज्ञाने । जौहोत्यादिकः । लेट्यडागमः । बहुलं छंदसीति वक्तव्यं । पा० ७. ३. ८७. २. । इति वचनान्नाभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधाभावः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । ऋण्वन् । इति रिवि धिवि गत्यर्थाः । इदित्वान्नुम् । छांदसो लङ् । व्यत्ययेन रेफस्य संप्रसारणं । यद्वा ऋणु गतौ । तनोत्यादिः ॥

॥ इति प्रथमस्य पंचमे त्रयोदशो वर्गः ॥

वनेमेति द्विपदैकादशर्चमध्ययनतः षड्चं षष्ठं सूक्तं। ऋष्याद्याः पूर्ववत्। अनुक्रांतं च। वनेमैकादशेति। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

वनेम पूर्वीरर्यो मनीषा अग्निः सुशोको विश्वान्यश्याः।
आ दैव्यानि व्रता चिकित्वाना मानुषस्य जनस्य जन्म॥१॥

वनेम। पूर्वीः। अर्यः। मनीषा। अग्निः। सुऽशोकः।
विश्वानि। अश्याः।
आ। दैव्यानि। व्रता। चिकित्वान्। आ। मानुषस्य।
जनस्य। जन्म॥१॥

पूर्वीः प्रभूता इषाऽन्नानि वनेम। संभजेमहि। अग्निस्तान्यन्नानि ददात्वित्यर्थः। मनीषा। मनीषया बुद्ध्यार्यो गंतव्यः प्राप्तव्यः। यद्वा मनीषयायं स्वामी। सुशोकः शोभनदीप्तिः। एवंभूतोऽग्निर्विश्वानि सर्वाणि कर्माण्यश्याः। अश्नुते व्याप्नोति। किं कुर्वन्। दैव्यानि देवेषु भवानि व्रता व्रतानि कर्माणि चिकित्वान् आ। समंताज्जानन्। तथा मानुषस्य जनस्य मनुष्यजातस्य जन्मोत्पत्तिरूपं कर्म चिकित्वान्। आभिमुख्येन जानन्। द्यावापृथिव्योः संबंधीनि यानि कर्माणि तानि सर्वाण्यवगच्छन् अवगत्य व्याप्नोतीत्यर्थः॥ वनेम। वन षण संभक्तौ। शपि प्राप्ते व्यत्ययेन शः। तदुपदेशात्सार्वधातुकानुदात्तत्वे विकरणस्वरः शिष्यते। पूर्वीः। पुरुशब्दाद्वोतो गुणवचनादिति ङीष्। हलि चेति दीर्घः। मनीषा। ईषा अक्षादित्वात्प्रकृतिभावः। सुशोकः। शुच दीप्तौ। भावे घञ्। चजोः कु घिण्यतोरिति कुत्वं। शोभनः शोको

यस्य। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। अश्याः। देवत्वा विश्वान्यश्या इतिवत्। चिकित्वान्। कित ज्ञाने। लिटः क्वसुः॥

द्वितीयामृचमाह॥

गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथां।
अद्रौ चिदस्मा अंतर्दुरोणे विशां न विश्वो अमृतः स्वाधीः॥२॥

गर्भः। यः। अपां। गर्भः। वनानां। गर्भः। च। स्थातां।
गर्भः। चरथां।
अद्रौ। चित्। अस्मै। अंतः। दुरोणे। विशां। न। विश्वः।
अमृतः। सुऽआधीः॥ २॥

योऽग्निरपां गर्भो गर्भवदंतर्वर्ती। अपांनपात्संज्ञः। यश्च वनानामरण्यानां गर्भो दावाग्निरूपेण तन्मध्ये वर्तते। यश्च स्थातां स्थावराणां काष्ठादीनां गर्भोऽंतरवस्थाता। चरथां चरणवतां जंगमानां गर्भो जठररूपेण देहमध्येऽवतिष्ठते। एवंभूतायास्मा अग्नये दुरोणे दुस्तर्यगृहेऽद्रौ चित् पर्वतेऽप्यंतर्मध्ये हविः प्रयच्छंतीति शेषः। सोऽयममृतोऽमरणधर्मोऽग्निः स्वाधीः शोभनकर्मयुक्तः शोभनध्यानो वा। अस्माकं भवतीति शेषः। तत्र दृष्टांतः। विश्वो निवेशयिता सुखेनावस्थापयिता राजा विशां न। प्रजानां यथा रक्षणरूपशोभनकर्मयुक्तो भवति तद्वत्॥ स्थातां। तिष्ठतेः क्विपि छांदसस्तुक्। यद्वा। औणादिकस्तुप्रत्ययः। आस्यंत्यलोपश्छांदसः। चरथां। शीङ्शपिरुगमि। उ० ३. ११२. इति विधीयमानोऽथप्रत्ययो बहुलवचनाच्चरेरपि द्रष्टव्यः। आगमानुशासनस्यानित्यत्वादामो नुडभावे सवर्णदीर्घः। विश्वः। विश प्रवेशने।

अस्मादंतर्भावितण्यर्थादशिप्रषीत्यदिना क्तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

स हि क्षपावाँ अग्नी रयीणां दाशद्यो अस्मा अरं सूक्तैः ।
एता चिकित्वो भूमा नि पाहि देवानां जन्म मर्ताँश्च
विद्वान् ॥ ३ ॥

सः । हि । क्षपाऽवान् । अग्निः । रयीणां । दाशत् । यः ।
अस्मै । अरं । सुऽउक्तैः ।
एता । चिकित्वः । भूम । नि । पाहि । देवानां । जन्म ।
मर्तान् । च । विद्वान् ॥ ३ ॥

स ह्यग्निः क्षपावान् । क्षपेति रात्रिनाम । रात्रिमान् । आग्नेयी वै रात्रिरिति श्रुतेः । रात्रेरग्निसंबंधोऽप्यग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति हूयमानत्वात् । यद्वा । राक्षसादीनां क्षपणेन नाशेन युक्तः । एवंभूतोऽग्निः स्तोत्रे यजमानाय रयीणां धनानि दाशत् । दाशति प्रयच्छति । यो यजमानोऽस्मा अग्नये सूक्तैः सुष्टूक्तैर्यथाशास्त्रं प्रयुक्तैर्मंत्रैररमलं पर्याप्तं स्तोत्रं करोति तस्मा इत्यर्थः । हे चिकित्वः । चिकित्वांश्चेतनावानिति यास्कः । हे चेतनावन् सर्वज्ञाग्ने त्वं देवानामिंद्रादीनां जन्म जन्मानि मर्तान्मनुष्यांश्च विद्वान् जानन्नेतानि भूमा भूम्युपलक्षितानि भूतजातानि निपाहि । नितरां पालय । यतस्त्वं देवमनुष्यादीन्सर्वान् जानासि । अत एवमुच्यत इत्यर्थः ॥ रयीणां । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । दाशत् । दाश्टृ दाने । लेट्यडागमः । अरं । बालमूलेत्यादिना लत्वविकल्पः । सूक्तैः । सूपमानात् क्त इत्यु-

त्तरपदांतोदात्तत्वं । चिकित्वः । मतुवसो रुरिति नकारस्य रुत्वं । भूमा । सुपां सुलुगिति भूमिशब्दादुत्तरस्या द्वितीयाया डादेशः । पदकाले कृम्वम्छांदसः ॥

चतुर्थीमृचमाह ॥

बर्धान्यं पूर्वीः क्षपो विरूपाः स्थातुश्च रथमृतप्रवीतं ।
अराधि होता स्वर्निषत्तः कृण्वन्विश्वान्यपांसि सत्या ॥४॥

बर्धान् । यं । पूर्वीः । क्षपः । विऽरूपाः । स्थातुः । च ।
रथं । ऋतऽप्रवीतं ।
अराधि । होता । स्वः । निऽसत्तः । कृण्वन् । विश्वानि ।
अपांसि । सत्या ॥ ४ ॥

पूर्वीर्बह्वत्र उषसः क्षपो निशाश्च विरूपाः शुक्लकृष्णतया विविधरूपाः सत्यो यमग्निं बर्धान् । बर्धयंति । तथा स्थातुः स्थावरं वृक्षादिकं रथं रममाणं जंगमं मनुष्यादिकं च ऋतप्रवीतमृतेनोदकेन सत्येन यज्ञेन वा प्रकर्षेण वेष्टितं यमग्निं बर्धंति । सोऽग्निः स्वः सुष्ठरणीये देवयजने निषत्तो निषस्य उपविष्टः सन् होता देवानामाह्वाताराधि । संसिद्धोऽभूत् । यद्वा ऋत्विग्भिराराधि । आराधित इत्यर्थः । किं कुर्वन् । विश्वानि सर्वाणि सत्या सत्य, यजमानेषु भवानि यद्वा सत्यफलान्यपांसि कर्माणि कृण्वन् कुर्वन् ॥ वर्धान् । वृधेर्ण्यंतान्लेट्याडागमः । छंदस्युभयथेति शप आर्द्धधातुकत्वात् णिलोपः । इतश्च लोप इतोकारलोपे संयोगांतलोप । ऋतप्रवीतं । व्येञ् संवरणे । अस्मात्कर्मणि निष्ठा । वचिस्वपीत्यादिना संप्रसारणं । कृदुत्तरे गतिकारकपूर्वस्य ग्रहणा-

तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। अराधि। राध साध संसिद्धौ। कर्तरि लुङि व्यत्ययेन चिण्॥

पंचमीमृचमाह॥

गोषु प्रशस्तिं वनेषु धिषे भरंत विश्वे बलिं स्वर्णः।
वि त्वा नरः पुरुत्रा सपर्यन्पितुर्न जिव्रेर्वि वेदो भरंत॥ ५॥
गोषु। प्रऽशस्तिं। वनेषु। धिषे। भरंत। विश्वे। बलिं।
स्वः। नः।
वि। त्वा। नरः। पुरुऽत्रा। सपर्यन्। पितुः। न। जिव्रेः।
वि। वेदः। भरंत॥ ५॥

हे अग्ने त्वं वनेषु वननीयेषु संभजनीयेषु गोष्वस्मदीयेषु पशुषु प्रशस्तिं प्रशंसां धिषे। दधिषे स्थापयसि। अस्माकं प्रशस्ता गवादिपशवो भवंत्वित्यर्थः। विश्वे सर्वे जना नोऽस्मभ्यं स्वः सुष्ठुरणीयं बलिमुपायनरूपं धनं भरंत। आहरंतु। हे अग्ने त्वा त्वां नरो मनुष्याः पुरुत्रा बहुषु देवयजनदेशेषु विसपर्यन्। विविधं पूजयंति। पूजयित्वा च वेदो धनं विभरंत। त्वत्तो विशेषेण हरंति। गृह्णंतीत्यर्थः। तत्र दृष्टांतः। जिव्रेर्जीर्णाद्वृद्धात्पितुर्न। पितुरिव। यथा पुत्रा वृद्धात्पितुः सकाशाद्धनं हरंति तद्वत्॥ धिषे। छांदसो वर्तमाने लिट्। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः। भरंत। हृञ् हरणे। केवलोऽपि सोपसर्गार्थो द्रष्टव्यः। छांदसो लङ्। हृग्रहोर्भ इति भत्वं। पुरुत्रा। देवमनुष्यपुरुषपुरुमर्त्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः। जिव्रेः। जृष् वयोहानौ। जृशॄस्तॄजागृभ्यः क्विन्। ऋत इद्धातोरितीत्वं। उणादयो व्युत्पन्नानि प्रातिपदिकानीति जिव्रिकिर्योर्गिर्योरित्येवमादिषु

दीर्घो न भवति। पा॰ ८. २. ७८. २.। इत्युक्तत्वात् हलि चेति दीर्घस्याभावः। रेफवकारयोर्विपर्ययः। उक्तं च। वर्णागमो वर्णविपर्ययश्च। पा॰ ६. ३. १०९. ८.। इति नित्त्वादाद्युदात्तत्वं। वेद इति धननाम। विद्यते लभ्यत इति वेदः। विद्लृ लाभे। कर्मण्यसुन्॥

द्विपदास्वयुक्संख्यासु यांत्यातिरिच्यते सा तथैव पठितव्येत्युक्तं। उत्तरा तादृशी द्विपदा॥

तामेतां षष्ठीमृचमाह॥

साधुर्न गृध्नुरस्तेव शूरो यातेव भीमस्त्वेषः समत्सु॥ ६॥

साधुः। न। गृध्नुः। अस्ताऽइव। शूरः। याताऽइव। भीमः। त्वेष। समत्ऽसु॥ ६॥

अयमग्निः साधुर्न साधक इव गृध्नुर्गृहीता। यथा साधकः साध्यफलमाशु गृह्णाति तद्वदग्निरपि सर्वं स्वीकरोतीत्यर्थः। तथायमग्निरस्तेव शूरः। यथेषूणां क्षेप्ता धानुष्कः शत्रून्प्रेरयति तद्वदग्निरपि दहन् सर्वं प्राणिजातं प्रेरयति। तथा यातेव भीमः। याता यातयिता हिंसको भीमः सर्वेषां भयंकरो भवति। तद्वदग्निरपि दृष्टमात्रेण सर्वेषां भयमुत्पादयति। अत एवंविधोऽग्निः समत्सु संग्रामेषु त्वेषो दीप्तः सन् अस्माकं सहायो भवत्वित्यर्थः॥ गृध्नुः। गृधु अभिकांक्षायां। त्रसिगृधिधृषिक्षिपेः क्नुः। शूरः। शु गतौ। अंतर्भावितण्यर्थादस्मात् शुषिचिमीनां दीर्घश्चेति क्रन्॥

॥ इति प्रथमस्य पंचमे चतुर्दशो वर्गः॥

उप प्रेति दशर्चं सप्तमं सूक्तं। अत्रानुक्रम्यते। उप प्र दशेति। ऋषिश्चान्यस्मादिति परिभाषया शक्तिपुत्रः पराशर

ऋषिः । अनादेशपरिभाषया त्रिष्टुप् । परमाग्नेयमैंद्रादिति परिभाषितत्वादग्निर्देवता ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदमादीनि त्रीणि सूक्तानि । अथैतस्या इति खंडे तथैव सूत्रितं । उप प्र जिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते । आ० ४. १३. । इति । आश्विनशस्त्रेऽपि प्रातरनुवाकातिदेशा-दिदमादीनि त्रीणि सूक्तानि । तथैव सूत्र्यते । एतयाग्नेयं गायत्रमुपसंतनुयात् प्रातरनुवाकन्यायेनेति ॥

तत्र प्रथमामृचमाह ॥

उप प्र जिन्वन्नुशतीरुशंतं पतिं न नित्यं जनयः सनीड़ाः ।
स्वसारः श्यावीमरुषीमजुषूञ्चित्रमुच्छंतीमुषसं न गावः ॥१॥

उप । प्र । जिन्वन् । उशतीः । उशंतं । पतिं । न । नित्यं ।
जनयः । सऽनीड़ाः ।
स्वसारः । श्यावीं । अरुषीं । अजुषून् । चित्रं । उच्छंतीं ।
उषसं । न । गावः ॥ १ ॥

उशतीरुशत्यः कामयमानाः सनीड़ाः । नीड़ो निवास-स्थानं । समाननिवासस्थानाः । एकपाण्यवस्थानात् । स्वसारः इत्यंगुलिनाम । एवंभूता अंगुलय उशंतं कामयमानमग्निं जनयो जाया नित्यमसाधारणं पतिं न भर्तारमिवोपप्रजिन्वन् । उपेत्य हविःप्रदानादिकर्मणा प्रीणयंति । प्रीणयित्वा च चित्रं चायनीयं पूजनीयं तमग्निमंजलिबंधनेनाजुषून् । असेवत । तत्र दृष्टांतः । श्यावीं श्याववर्णां रात्रिसंबंधात्कृष्णां । तत उच्छंतीं सूर्यकिरणसंबंधात्तमो वर्जयंतीं । अत एवारुषीमारोच-मानां । यद्वा शुभ्ररूपयुक्तामुषसं न । उषोदेवतां गावो रश्मयो यथा सेवंते तद्वत् । यथा रश्मय उषसा नित्यसंबद्धाः ।

एवं सर्वेषु यज्ञेष्वग्निपरिचरणेनांगुलयो नित्यसंबद्धा इति तात्पर्यार्थः ॥ जिन्वन् ।जिवि प्रीणनार्थः । इदित्वान्नुम् । लेख्य-डागमः । उशतीः । वा छंदसीति पूर्वसवर्णदीर्घत्वं । शतुरनुम इति नद्या उदात्तत्वं । स्वसारः । असु क्षेपण इत्यस्मात् सु अस-सिऋन् । उ° २.९२. । इति ऋन् । न षट्स्वस्रादिभ्यः । पा° ४. १. १०. । इति ङीप्प्रतिषेधः । नित्त्वादाद्युदात्तत्वं । श्यावीं । श्यु गतौ । इणश्रीङ्भ्यामिति बाहुलकाद्वन् । शार्ङ्गर-वादित्वान्ङीन् । अरुषीं । अरुषमिति रूपनाम । ऋ गतौ । ऋहनिभ्यामुषन् । छंदसीवनिपाविति मत्वर्थीय ईकारः । व्यत्ययेनाद्युदात्तत्वं । अजुषन् । जुषी प्रीतिसेवनयोः । तौदा-दिकः । लङि व्यत्ययेन परस्मैपदं । रुडित्यनुवृत्तौ बहुलं छंदसीत्यंतादेशस्य रुडागमः ॥

द्वितीयामृचमाह ॥

वीळु चिद्दृळ्हा पितरो न उक्थैरद्रिं रुजन्नंगिरसो रवेण ।
चक्रुर्दिवो बृहतो गातुमस्मे अहः स्वर्विविदुः केतुमुस्राः ॥२॥

वीळु । चित् । दृळ्हा । पितरः । नः । उक्थैः । अद्रिं ।
रुजन् । अंगिरसः । रवेण ।
चक्रुः । दिवः । बृहतः । गातुं । अस्मे इति । अहरिति ।
स्वः । विविदुः । केतुं । उस्राः ॥ २ ॥

नोऽस्माकं पितरोऽगिरस एतत्संज्ञा ऋषय उक्थैः शस्त्रै-रग्निं स्तुत्वा वीळु चिद्दृळ्हा । वीळ्विति बलनाम । बलवंतं दृढांगमप्यद्रिमत्तारं पणिनामानमसुरं रवेण स्तुतिशब्दमात्रेणैव रुजन् । अभंजन् । तैः स्तुतोऽग्निस्तमसुरं हतवानित्यर्थः । किंच बृहतो महतो दिवो द्युलोकस्य गातुं मार्गमस्मे अस्माकं

चक्रुः। कृतवंतः। आवरकस्यासुरस्याग्निना हतत्वात्। मार्गं कृत्वा च स्वः सुष्ठुरणीयमसुररहित्येन सुखेन प्राप्यमहर्दिवसं विविदुः। अजानन् लब्धवंतो वा। तथा केतुमक्तां केतयितारं ज्ञापयितारमादित्यमुस्राः पणिनापहृता गाश्च विविदुरित्यनुषंगः। वोलु। सुपां सुलुगिति विभक्तेर्लुक्। इलहा। इढः स्थूलबलयोरिति निपातितः। सुपां सुलुगिति डादेशः। रुजन्। रुजो भंगे। तौदादिकः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। विविदुः। विद ज्ञाने विद्लृ लाभ इति वा लिट्युसि रूपं॥

तृतीयामृचमाह॥

दधन्नृतं धनयन्नस्य धीतिमादिदर्यो दिधिष्वो३विभृत्राः।
अतृष्यंतीरपसो यंत्यच्छा देवाञ्जन्म प्रयसा वर्धयंतीः॥ ३॥

दधन्। ऋतं। धनयन्। अस्य। धीतिं। आत्। इत्। अर्यः। दिधिष्वः। विऽभृत्राः।
अतृष्यंतीः। अपसः। यंति। अच्छ। देवान्। जन्म। प्रयसा। वर्धयंतीः॥ ३॥

ऋतं देवयजनदेशं प्राप्तमग्निमंगिरसो महर्षयो दधन्। गार्हपत्यादिरूपेणाधारयन्। धारयित्वा चास्याग्नेर्धीतिं कर्माग्निहोत्रादिलक्षणं धनयन्। धनमकुर्वन्। यथा पुरुषा धनं संपादयंति तद्वदग्निदेवत्यं कर्मान्वतिष्ठन्नित्यर्थः। आदित् अंगिरसामनुष्ठानानंतरमेवार्योऽर्या धनस्य स्वामिन्यो दिधिष्वस्तेन धनेन दिधिष्वोऽग्नीनां धारणं कुर्वत्यः। कृताग्न्याधाना इत्यर्थः। विभृत्रा आहितानग्नीनग्निहोत्रादिकर्मणि विहरंत्योऽतृष्यंतीविषयांतरतृष्णारहिताः। अत एवापसोऽपसा कर्मणा

युक्ताः। एवंभूता यजमानलक्षणाः प्रजाः प्रथमा हविर्लक्षणे-नान्नेन देवानिंद्रादीञ्जन्म जातान्मनुष्यांश्च वर्धयंतीर्वर्धयंत्यः सत्य एनमग्निमच्छाभिमुख्येन यंति। प्राप्नुवंति। परिचरंतीति यावत् ॥ दधन्। दध धारणे। लङि व्यत्ययेन परस्मैपदं। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। धनयन्। धनशब्दात्तत्करोतीति णिच्। इष्ठवन्णौ प्रातिपदिकस्येतीष्ठवद्भावाट्टिलोपः। लङि पूर्ववत्। अर्यः। अर्यः स्वामिवैश्ययोरिति निपातितः। लिंगवचनव्यत्ययौ। अर्यः स्वाम्याख्या चेदित्यंतोदात्तत्वं। दिधिष्वः। डुधाञ् धारणपोषणयोः षो अंतकर्मणीत्यस्मात् मंदूरंभूजंबुकफिलूककर्कंधूदिधिषूः। उ० १.९३.। इति कूप्रत्ययांतो निपातितः। प्रत्ययस्वरः। उदात्तस्वरितयोर्यण इति जसः स्वरितत्वं। विभृत्राः। हृञ् हरणे। विपूर्वादस्मादौणादिकः क्त्रप्रत्ययः। हृग्रहोर्भ इति भत्वं। अतृष्यंतीः। ञितृषा पिपासायां। जसि वा छंदसीति पूर्वसवर्णदीर्घस्य विकल्पितत्वात्पूर्वसवर्णदीर्घः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। अपसः। अपस्शब्दादुत्पन्नस्य मत्वर्थीयस्य विनो बहुलं छंदसीति बहुलवचनाल्लुक्। पा० ५.२.१२२.। विनंतस्य त्रिलिंगत्वेन नब्विषयत्वाभावात्प्रातिपदिकस्वरेणांतोदात्तत्वं। जायंत इति जन्मानो मनुष्याः। अन्येभ्योऽपि दृश्यंत इति मनिन्। सुपां सुलुगिति शसो लुक् ॥

चतुर्थीमृचमाह ॥

मथीद्यदीं विभृतो मातरिश्वा गृहेगृहे श्येतो जेन्यो भूत्।
आदीं राज्ञे न सहीयसे सचा सन्ना दूत्यं१भृगवाणो विवाय ॥ ४ ॥

सथीत् । यत् । ईं । विऽभृतः । मातरिश्वा । गृहेऽगृहे ।
श्येतः । जेन्यः । भूत् ।
आत् । ईं । राज्ञे । न । सहीयसे । सचा । सन् । आ ।
दूत्यं । भृगवाणः । विवाय ॥ ४ ॥

मातरिश्वा व्यानवृत्तिरूपेणावस्थितो मुख्यप्राण ईमेनमग्निं यद्यदा सथीत् । अमथ्नात् । अग्नेर्मंथनस्य व्यानवायुसाध्यत्वमथ यः प्राणापानयोः संधिः स व्यान इत्युपक्रम्य छंदोगैराम्नातं । अतो यान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथनमाजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोतीति । मंत्रांतरं च भवति । आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेरिति । कीदृशो मातरिश्वा । विभृतः । प्राणेषु प्राणापानादिपंचवृत्तिरूपेण विहृतो विभज्य स्थितः । तदपि प्राणसंवादे तैरेवाम्नातं । तानवरिष्ठः प्राण उवाच । मा मोह-मापद्यथाहमेवैतत् पंचधात्मानं प्रविभज्यैतत् वाणमवष्टभ्य विधारयामीति । मंथनेनोत्पन्नोऽयमग्निः श्येतः शुभ्रवर्णो भूत्वा गृहेगृहे सर्वस्मिन्यज्ञगृहे यदा जेन्यः प्रादुर्भूतो भूत् । यद्वा रक्षसां जेन्यो जेताभिभविता भूत् । तथा च तैत्तिरीयकं । देवासुराः संयत्ता आसन् । ते देवा बिभ्यतोऽग्निं प्राविशन् । तस्मादाहुरग्निः सर्वा देवता इति । तेऽग्निमेव वरूथं कृत्वा-सुरानभ्यभवन्निति । ऐतरेयिणोऽप्यामनंति । ते देवाः प्रति-बुध्याग्निं पुरस्तात्प्रातःसवने पर्यौहंस्तेऽग्निनैव पुरस्तात्प्रातः-सवनेऽसुररक्षांस्यपाघ्नतेति । आत् यज्ञगृहे प्रादुर्भावानंतरमी-मेनमग्निं भृगवाणः । भृगुर्ऋषिः । स इवाचरन्यजमानो दूत्यं दूतस्य कर्माविवाय । शास्त्रमर्यादया प्रापयामास । तत्र

दृष्टांतः । सचा सन् । सखा भवन्नन्यो राजा सहीयसेऽभिभ॰ विचे प्रवर्ताय राज्ञे न । यथा राज्ञे स्वपुरुषं दूतकर्म प्रापयति तद्वत् ॥ मथील् । मथे विलोडने । लुङि इंरतचणीति वृद्धि-प्रतिषेधः । जेन्यः । जनी प्रादुर्भावे । अस्मादौणादिक एन्य-प्रत्ययष्टिलोपश्चेति भट्टभास्करमिश्रः । यद्वा जि जय इत्यस्मा-त्कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तर्यचो यदिति यत् । तस्य नुडागमश्च । यतोऽनाव इत्याद्युदात्तत्वं । दूत्यं । दूतस्य कर्म दूत्यं । दूतस्य भागकर्मणी इति यत् । तित्स्वरित इति स्वरितत्वं । यतोऽनाव इत्याद्युदात्तत्वं त्वनित्यमिति वीरवीर्यौ चेत्यत्र ज्ञापितं । भृगवाणः । भृगुरिवाचरन् । सर्वप्रातिप-दिकेभ्यः क्विब्वक्तव्य इति वचनात् क्विप् । तदंताल्लटो व्यत्ययेन शानच् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे प्रत्ययांतधातोरंतो-दात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं । विवाय । वी गत्यादिषु । अस्मादंतर्भावितण्यर्थाल्लिट् ॥

पंचमीमृचमाह ॥

महे यत्पित्र ईं रसं दिवे करव त्सरत्पृशन्यश्चिकित्वान् ।
सृजदस्ता धृषता दिद्युमस्मै स्वायां देवो दुहितरि
त्विषिं धात् ॥ ५ ॥

महे । यत् । पित्रे । ईं । रसं । दिवे । कः । अव । त्सरत् ।
पृशन्यः । चिकित्वान् ।
सृजत् । अस्ता । धृषता । दिद्युं । अस्मै । स्वायां । देवः ।
दुहितरि । त्विषिं । धात् ॥ ५ ॥

महे महते पित्रे पालयित्रे दिवे द्योतमानाय देवगणायै-मिमं रसं पृथिव्याः सारभूतं हविर्यद्यदा यजमानः कः ।

करोति। तदानीं पृशन्यः स्पर्शनकुशलो राक्षसादिस्त्विकित्वान् ह्वींषि बहंतं हे अग्ने त्वां जानन् अवत्सरत्। त्वद्भयात्पलायते। अस्तेषुक्षेपणशीलोऽग्निर्धृषता धर्षकेन धनुषास्मै पलायमानाय राक्षसादये दिद्युं दीप्यमानं बाणं सृजत्। विसृजति। देवो दीप्यमान उषःकालं प्राप्तोऽग्निः स्वायां स्वकीयायां दुहितरि दुहितृवत्तस्मनंतरभाविन्यामुषसि त्विषिं स्वकीयां दीप्तिं धात्। स्थापयति। उषःकाले हि सूर्यकिरणाः प्रादुर्भवंति। तैः स्वकीयं प्रकाशमेकीकरोति। तथा च तैत्तिरीयकं। उद्यंतं वावादित्यमग्निरनुसमारोहति तस्माद्धूम एवाग्नेर्दिवा ददृश इति। अत उषसि दीप्तिं निदधातीत्युच्यते॥ कः। करोतेर्लुङि मंत्रे घसेत्यादिना च्लेर्लुक्। त्सरत्। त्सर छद्मगतौ। लेख्य-डागमः। इतश्चेतीकारलोपः। पृशन्यः। स्पृश संस्पर्शने। कृपृवृजीति विधीयमानः क्युप्रत्ययो बहुलवचनादस्मादपि भवति। स्पृशनं स्पर्शः। तत्र साधुरिति यत्। सलोपश्छांदसः। तित्स्वरितमिति स्वरितत्वं। दिद्युं। दिद्युरिति वज्रनाम। अंत्यलोपश्छांदसः। धात्। छांदसो वर्तमाने लुङ्॥

॥ इति प्रथमस्य पंचमे पंचदशो वर्गः॥

षष्ठीमृचमाह॥

स त्वा यस्तुभ्यं दम आ विभाति नमो वा दाशादुशतो
अनु द्यून्।
वर्धो अग्ने वयो अस्य द्विबर्हा यासद्राया सरथं यं
जुनासि॥ ६॥

स। आ। यः। तुभ्यं। दमे। आ। विऽभाति। नमः। वा।
दाशात्। उशतः। अनु। द्यून्।

वर्धी इति । अग्ने । वयः । अस्य । द्विऽवर्हाः । यासत् ।
राया । सऽरथं । यं । जुनासि ॥ ६ ॥

हे अग्ने तुभ्यं त्वां स्वे दमे स्वकीये यज्ञगृहे यो यजमानः । एक आकारो मर्यादायां । यथाशास्त्रमाविभाति । आ समंतात्समिदादिभिः काष्ठैः प्रज्वलयति । अनु द्यून् अनुदिवसमुशतः कामयमानाय तुभ्यं नमो वा दाशात् । हविर्लक्षणमन्नं वा दद्यात् । अस्य यजमानस्य हे अग्ने द्विबर्हा द्वयोर्मध्यमोत्तमस्थानयोर्वृहितो वर्धितस्त्वं वयोऽन्नं वर्धी । वर्धयैव । सरथं रथेन सहितं युयुत्सुं यं पुरुषं जुनासि । युद्धे प्रेरयसि स पुरुषो राया धनेन यासत् । संगच्छते ॥ तुभ्यं । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी । दाशात् । दाशृ दाने । लेट्याडागमः । उशतः । शतुरनुम इति विभक्तेरुदात्तत्वं । चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी । अनु द्यून् । द्युरित्यहर्नाम । लक्षणेऽनोः कर्मप्रवचनीयत्वं । कर्मप्रवचनीययुक्त इति द्वितीया । वर्धी । वध उ । वृधिर्ण्यंतात्लोटि छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । ऊञा सहैकादेश ऊञः । पा० १. १. १७. । इति प्रगृह्यत्वं । यासत् । या प्रापणे । सिब्बहुलं लेटीति सिप् । लेटोऽडाटावित्यडागमः । जुनासि । जु इति गत्यर्थः सौत्रो धातुः । शपि प्राप्ते व्यत्ययेन श्ना ॥

सप्तमीमृचमाह ॥

अग्निं विश्वा अभि पृक्षः सचंते समुद्रं न स्रवतः
सप्त यह्वीः ।

न जामिभिर्वि चिकिते वयो नो विदा देवेषु प्रमतिं
चिकित्वान् ॥ ७ ॥

अग्निं । विश्वाः । अभि । पृक्षः । सचंते । समुद्रं । न ।
स्रवतः । सप्त । यह्वीः ।

न । जामिऽभिः । वि । चिकिते । वयः । नः । विदाः ।
देवेषु । प्रऽमतिं । चिकित्वान् ॥ ७ ॥

विश्वाः पृक्षः चरुपुरोडाशादीनि सर्वाण्यन्नान्यग्निमंगनादिगुणयुक्तमेनमभिसचंते। आभिमुख्येन समवयंति। प्राप्नुवंति। तत्र दृष्टांतः। स्रवतः समुद्रं न। यथा स्रवंत्यो नद्यः समुद्रमभिगच्छंति तद्वत्। कीदृश्यो नद्यः। सप्त। सप्तसंख्याकाः। इमं मे गंग इत्यस्यामृचि सप्त हि नद्यः प्राधान्येन श्रूयंते। यह्वीः। महन्नामैतत्। महत्यः। जमंत्येकस्मिन्पात्रे सह भुंजत इति जामयो ज्ञातयः। तैर्नोऽस्मदीयं वयोऽन्नं न चिकिते। न ज्ञायते। तेभ्यो दातुमस्माकमन्नं प्रभूतं नास्तीति भावः। अतो हे अग्ने त्वं देवेषु। दीव्यंतीति देवा धनपतयः। तेषु प्रमतिं प्रकर्षेण मननीयं धनं चिकित्वानवगच्छन्विदाः। अस्मभ्यं लंभय। यद्वा प्रमतिं प्रकृष्टं स्तोत्रं देवेषु विदाः। वेदय ज्ञापय॥ पृक्षः। अन्ननामैतत्। पृची संपर्क इत्यस्मादौणादिकः कर्मणि क्विप् धातोः षुगागमश्च। यद्वा। असुनि सुपां सुलुगिति जसो लुक्। स्रवतः। स्रु गतौ। स्रवणं। स्रवः। तत्कुर्वंति। सर्वप्रातिपदिकेभ्यः क्विब्वक्तव्य इति क्विप्। एतदंताद्धातोः क्विप् चेति क्विप्। ह्रस्वस्य पितीति तुक्। क्विवंताद्धातोः सति शिष्टत्वाद्धातुस्वरेणांतोदात्तत्वं। यह्वीः। पिप्पल्यादिभ्यश्चेति गौरादिषु पठितत्वात्तस्य चाकृतिगण-

त्वादत्रापि ङीष्। वा छंदसीति पूर्वसवर्णदीर्घत्वं। चिकिते। छांदसो वर्तमाने कर्मणि लिट्। विद्यः। विद्लृ लाभे। अंतर्भावितण्यर्थात्तस्माड्डागमः। तुदादित्वाच्छः। आगमानुशासनस्यानित्यत्वान्नुमभावः। विकरणस्वरः शिष्यते। यद्वा विदेर्ज्ञानार्थस्य लेटि व्यत्ययेन शः॥

अष्टमीमृचमाह॥

आ यदिषे नृपतिं तेज आनट् शुचि रेतो निषिक्तं द्यौरभीके।
अग्निः शर्धमनवद्यं युवानं स्वाध्यं जनयत्सूदयच्च॥ ८॥

आ। यत्। इषे। नृऽपतिं। तेजः। आनट्। शुचि। रेतः। निऽसिक्तं। द्यौः। अभिके।
अग्निः। शर्धं। अनवद्यं। युवानं। सुऽआध्यं। जनयत्। सूदयत्। च॥ ८॥

अग्नेर्यत्तेजो नृपतिं नृणामृत्विजां पालकं यजमानमानट्। जाठररूपेण आ समंताद्व्याप्नोत्। किमर्थं। इषे। अन्नाय। कीदृशं। शुचि शुद्धं। द्यौर्दीप्तं। तेन तेजसा परिपक्वमन्नं रसरूपं रेतो वीर्यमभीकेऽभ्यक्तेऽभिगतेऽभिप्राप्ते गर्भस्थाने निषिक्तं नितरां सिक्तमग्निर्वक्ष्यमाणगुणविशिष्टपुत्ररूपेण जनयत्। जनयतु। शर्धं बलवंतमनवद्यमवद्यरहितं युवानं तरुणं। जरारहितमित्यर्थः। स्वाध्यं शोभनकर्माणं शोभनप्रज्ञं वोत्पन्नं पुत्रं सूदयच्च। यागादिकर्मसु प्रेरयतु च। यद्वा रेत इत्युदकनाम। निषिक्तं मेघेन वृष्टमुदकमिषेऽन्नाय शस्यादिनिष्पत्तयेऽग्नेर्यत्तेज आनट्। व्याप्नोत्। वृष्ट्युदकेन भौमाग्नेः संयोगे सति हि शस्यान्युत्पद्यंते। कीदृशं तेजः। नृपतिं। नृणां

वर्चकं । शुचि दीप्तं । तादृशेन तेजसा युक्तो द्यौर्दीप्तोऽग्निरभीक आसन्नकाल एव शर्धादिगुणविशिष्टं पुत्रं जनयतु तं च प्रेरयतु यज्ञादौ ॥ इषे । सावेकाच इति विभक्तेरुदात्तत्वं । नृपतिं । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । आनट् । अशू व्याप्तौ । लङि व्यत्ययेन परस्मैपदम्नमौ । अडागमः । अश्वादिषत्वे ष्टुत्वं । निषिक्तं । षिचिर् चरणे कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । उपसर्गात्सुनोतीति षत्वं । अभीके । अभिपूर्वादंचतेः पचाद्यचि पृषोदरादित्वाद्रूपसिद्धिः । यद्वा । इण् गतावित्यस्मादौणादिकः कक्प्रत्ययः । उभयथापि दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । स्वाध्यं । एरनेकाच इति यणादेशः । उदात्तस्वरितयोर्यण इति स्वरितत्वं । जनयत् । जनेर्ण्यंतात्लङ्यडागमः । सूदयत् । षूद चरणे । पूर्ववल्लङ्यडागमः ॥

नवमीमृचमाह ॥

मनो न योऽध्वनः सद्य एत्येकः सत्रा सूरो वस्व ईशे ।
राजाना मित्रावरुणा सुपाणी गोषु प्रियममृतं रक्षमाणा ॥९॥

मनः । न । यः । अध्वनः । सद्यः । एति । एकः । सत्रा
सूरः । वस्वः । ईशे ।
राजाना । मित्रावरुणा । सुपाणी इति सुऽपाणी । गोषु ।
प्रियं । अमृतं । रक्षमाणा ॥ ९ ॥

यः सूरः सूर्य एक एकाक्यसहायः सन्नध्वनो दिव्यान्मार्गान्सद्य एति । आशु गच्छति । असहायत्वं च श्रूयते । सूर्य एकाकी चरतीत्याह । असौ वा आदित्य एकाकी चरतीति । शीघ्रगमनं च स्मर्यते । योजनानां सहस्रे द्वे द्वे शते द्वे च

योजने। एकेन निमिषार्द्धेन क्रममाण नमोऽस्तु त इति। शीघ्रगमने दृष्टांतः। मनो न। यथा मनः शीघ्रं गच्छति तद्वत्। स च सूरो वस्वो धनस्य सत्रा सहैव युगपदेवेशे। ईष्टे। यो हि शीघ्रं गच्छति स बहुदेशेष्ववस्थितानि धनानि प्राप्नोति। तथा राजाना राजमानौ सुपाणी शोभनबाहू मित्रावरुणा मित्रावरुणावस्मदीयासु गोषु प्रियं सर्वेषां प्रीतिकरमसृतममृतवत्स्वादुभूतं पयो रक्षमाणा रक्षंतौ वर्तेते। हे अग्ने तत्तद्रूपेण त्वमेवैव वर्तस इति भावः॥ वस्वः। लिंगव्यत्ययः। जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः। ईशे। ईश ऐश्वर्ये। लोपस्त आत्मनेपदेष्विति तलोपः। मित्रावरुणा। देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं॥

दशमीमृचमाह॥

मा नो अग्ने सख्या पित्र्याणि प्र मर्षिष्ठा अभि
विदुष्कविः सन्।
नभो न रूपं जरिमा मिनाति पुरा तस्या अभिशस्तेरधीहि॥ १०॥

मा। नः। अग्ने। सख्या। पित्र्याणि। प्र। मर्षिष्ठाः।
अभि। विदुः। कविः। सन्।
नभः। न। रूपं। जरिमा। मिनाति। पुरा। तस्याः।
अभिऽशस्तेः। अधि। इहि॥ १०॥

हे अग्ने पित्र्याणि पितरं वसिष्ठमुपक्रम्यागतानि सख्या सखित्वानि मा प्रमर्षिष्ठाः। मा विनाशय। अत्र मृष्यतेरुपसर्गवशादर्थांतरे वृत्तिः। यतस्त्वं कविः क्रांतदर्शी सन् अभ्याभि-

सुखेन विदुः सर्वविद्वान् । नभो न रूपं । यथांतरिक्षं रूपवंतः सूर्यरश्मय आच्छादयंति तद्वदाच्छादयति जरिमा जरा मिनाति । मां सूक्तद्रष्टारं हिनस्ति । अभिशस्तेर्हिंसाहेतोस्तस्या जराया पुराधीहि । मां बुध्यस्व । सा यथा न प्राप्नोति तथा कुरु । अमृतत्वं प्रयच्छेति यावत् ॥ सख्या । सख्युर्भावः सख्यं । सख्युर्य इति यः । पित्र्याणि । पितृभ्य आगतानि । पितुर्यच्च । पा॰ ४. ३. ७९. । इति यत्प्रत्ययः । रीङृतः । पा॰ ७. ४. २७. । इति रीङादेशः । यस्येति चेतीकारलोपः । यतोऽनाव इत्याद्युदात्तत्वं । मर्षिष्ठाः । मृष तितिक्षायां । प्रार्थनायां छांदसो लुङ् । न माङ्योग इत्यडभावः । विदुः । विद ज्ञाने । बहुलमन्यत्रापीत्युसिप्रत्ययः । अत एव बहुलवचनाद्गुणाभावः । छंदसि वाप्राम्रेडितयोरिति विसर्जनीयस्य षत्वं । नभः । नह्रेर्दिवि भश्च । उ॰ ४. २१०. । इत्यसुन् । जरिमा । जृष् वयोहानौ । औणादिको भाव इमनिच्प्रत्ययः । मिनाति । मीञ् हिंसायां । प्वादीनां ह्रस्व इति ह्रस्वत्वं । अभिशस्तेः । अभिशस्यते हिंस्यतेऽनयेत्यभिशस्तिः । करणे क्तिन् । तादौ चेति गतेः प्रकृतिस्वरत्वं । अधीहि । इक् स्मरणे । लोप्यदादित्वाच्छपो लुक् । हेरपित्त्वेन ङित्त्वाद्गुणाभावः ॥

॥ इति प्रथमस्य पंचमे षोड़शो वर्गः ॥

नि काव्येति दशर्चमष्टमं सूक्तं त्रैष्टुभमाग्नेयं पराशरस्यार्षं । अनुक्रांतं च । नि काव्येति । प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः ॥

तत्र प्रथमामृचमाह ॥

नि काव्या वेधसः शश्वतस्कर्हस्ते दधानो नर्या पुरूणि ।
अग्निर्भुवद्रयिपती रयीणां सत्रा चक्राणो अमृतानि
विश्वा ॥ १ ॥

नि । काव्या । वेधसः । शश्वतः । कः । हस्ते । दधानः ।
नर्या । पुरूणि ।
अग्निः । भुवत् । रयिऽपतिः । रयीणां । सत्रा । चक्राणः ।
अमृतानि । विश्वा ॥ १ ॥

शश्वतः शाश्वतस्य नित्यस्य वेधसो विधातुर्ब्रह्मणः संबंधीनि काव्या काव्यानि मंत्ररूपाणि स्तोत्राण्ययमग्निर्निकः । नियमेन स्वात्माभिमुखं करोति । किं कुर्वन् । नर्या नृभ्यो हितानि नृषु साधूनि वा पुरूणि बहूनि धनानि हस्ते दधानः । हस्ते धारयन् । ईदृग्भूतमग्निमवलोक्य सर्वे जनाः स्तुवंतीति भावः । स्तोतृभ्यो धनेषु दत्तेष्वप्यग्नेर्धनं न क्षीयत इत्याह । अग्निरिति । अयमग्नी रयीणां रयिपतिर्भुवत् । धनानां मध्ये यानि धनान्युत्कृष्टानि तेषां स्वामी भवति । किं कुर्वन् । विश्वा विश्वानि सर्वाण्यमृतानि । हिरण्यनामैतत् । अमृतं वै हिरण्यमिति श्रुतेः । सर्वाणि हिरण्यानि स्तोतृभ्यः सत्रा सहैव चक्राणः कुर्वन् । युगपत्प्रयच्छन्नित्यर्थः ॥ कः । करोतेश्छांदसो लुङ् । मंत्रे घसेति च्लेर्लुक् । हल्ङ्याब्भ्य इति तकारलोपः । नर्या । नरशब्दाद्धितार्थे गवादिलक्षणो यत्प्रत्ययो

कृष्णाः । यद्वा तत्र साधुरिति यत् । चक्राणः । करोतेर्लटः शानच् । बहुलं छंदसीति विकरणस्य लुः । नन्वेवं सत्यभ्यस्ता-नामादिरित्याद्युदात्तत्वं प्राप्नोति । एवं । तर्हि लिटः कान-जस्तु । तस्यार्द्धधातुकत्वेनाभ्यस्ताद्युदात्तत्वाभावे चित्स्वर एव शिष्यते ॥

द्वितीयामृचमाह ॥

अस्मे वत्सं परि षंतं न विंदन्निच्छंतो विश्वे अमृता अमूराः ।

अश्रमयुवः पदव्यो धियंधास्तस्थुः पदे परमे चार्वग्नेः ॥ २ ॥

अस्मे इति । वत्सं । परि । संतं । न । विंदन् । इच्छंतः ।

विश्वे । अमृताः । अमूराः ।

अश्रमऽयुवः । पदऽव्यः । धियंऽधाः । तस्थुः । पदे । परमे ।

चारु । अग्नेः ॥ २ ॥

अस्मे अस्माकं वत्सं वत्सवदत्यंतं प्रियं । यद्वा वत्सः पुत्रः पश्चादुत्पन्नत्वात् । तद्वदग्निरप्यस्माकं पुत्रः । तथा चाम्नायते । ममैव सन्वह हव्यान्यग्ने पुत्रः पित्रे लोककृज्जातवेद इति । परिषंतं परितः सर्वत्र वर्तमानं । देवेभ्यो निर्गत्याश्वत्थवेणवादिषु निलीनं संतमित्यर्थः । एवंविधमग्निमिच्छंतो विश्वेऽमृताः सर्वेऽमरणधर्माणो देवा अमूरा अमूढा मरुतश्च न विंदन् । तमग्निं नालभंत । अलभमानाश्च ते अश्रमयुवो हव्यवाहनस्या-भावेन हविषामभावात्तज्जन्येन श्रमेण क्लेशेनैकीभूताः ।

तस्याग्नेरन्वेषणाय पदव्यः पादैर्गच्छंतः । धियंधा धियामग्नः शयनासनस्थानादिलक्षणानां कर्मणां धारयितारः । एवंविधाः संतश्चारु चारुणि शोभनेऽग्नेः परम उत्तमेऽरीं पदे । यत्र ह्यग्निर्निलीनो वर्तते तत्रेत्यर्थः । तस्मिन्पदे तस्थुः । स्थितवंतः । बहुविधेन प्रयासेनाग्निं दृष्टवंत इत्यर्थः ॥ परिषंतं । उपसर्गप्रादुर्भ्यामस्तिर्यच्परः । पा० ८. ३. ८७. । इति षत्वं । श्रमयुवः । यु मिश्रणे । श्रमेण यूयंत इति श्रमयुवः । क्विब्वचिप्रच्छीत्यादिना विधीयमानो क्विब्दीर्घावस्मादपि धातोर्भवतः । तन्वादित्वादुवङ् । पदव्यः । वी गत्यादिषु । पादेन वियंति गच्छंतीति पदव्यः । क्विप् चेति क्विप् । धियंधाः । आतोऽनुपसर्गे क इति कः । तत्पुरुषे कृति बहुलमिति बहुलवचनाद्द्वितीयाया अप्यलुक् । तस्थुः । पादादित्वान्निघाताभावः । चारु । सुपां सुलुगिति सप्तम्या लुक् ॥

तृतीयामृचमाह ॥

तिस्रो यदंग्ने शरदस्त्वामिच्छुचिं घृतेन शुचंयः सपर्यान् ।
नामानि चिद्दधिरे यज्ञियान्यसूदयंत तन्वः सुजाताः ॥३॥

तिस्रः । यत् । अग्ने । शरदः । त्वां । इत् । शुचिं । घृतेन ।
शुचयः । सपर्यान् ।
नामानि । चित् । दधिरे । यज्ञियानि । असूदयंत । तन्वः ।
सुऽजाताः ॥ ३ ॥

शुचयः शोधयितारो दीप्ता वा मरुतो हे अग्ने शुचिं शुद्धं दीप्यमानं वा त्वामिद्देवेभ्यो निर्गतं त्वामेवोद्दिश्य तिस्रः

शरदस्तीन् संवत्सरान्घृतेनाज्येन यद्यदा सपर्यान्। पूजां कुर्युः। तदानीं त्वमाविरभूः। तदनंतरं ते मरुतस्त्वयानुगृहीताः संतो यज्ञियानि यज्ञार्हाणि यज्ञे प्रयोक्तुं योग्यानि नामानि चित् नामान्यपि दधिरे। अधारयन्। नामानि च तैत्तिरीयके समाम्नायंते। ईदृक् चान्यादृक् च तादृङ् च प्रतिदृङ् च मितश्च संमितश्च सभरा इत्यादीनि। एतैश्चाग्निचयने मारुताः सप्तकपाला हूयंते। नामानि धारयित्वा च सुजाताः पूर्वं रूपं परित्यज्य शोभनममृतत्वं प्राप्ताः संतस्त्वः स्वकीयानि शरीराण्यसूदयंत। स्वर्गं प्रापितवंतः॥ तिस्रः। शसि त्रिचतुरोः स्त्रियां तिसृचतसृ इति पूर्वसवर्णदीर्घत्वे प्राप्तेऽचि र ऋत इति रेफादेशः। त्रिशब्दः फिष् इत्यंतोदात्तः। तिस्रादेशस्यापि स्थानिवद्भावेनांतोदात्तत्व उदात्तयणो हल्पूर्वादिति शस उदात्तत्वं। शरदः। शॄ हिंसायां। शीर्यंतेऽस्यामोषधय इति शरत्संवत्सरः। शृदृभसोऽदिः। उ० १. १२९.। इत्यदिप्रत्ययः। उभयत्र कालाध्वनोरत्यंतसंयोगे। पा० २. ३. ५.। इति द्वितीया। सपर्यान्। सपर पूजायां। कंड्वादिः। लेट्याडागमः। इतश्च लोप इतीकारलोपः। यज्ञियानि। यज्ञर्त्विग्भ्यां घखञावित्यर्हार्थे घप्रत्ययः॥

चतुर्थीमृचमाह॥

आ रोदसी बृहती वेविदानाः प्र रुद्रिया जभ्रिरे यज्ञियासः।

विदन्मर्तो नेमधिता चिकित्वानग्निं पदे परमे तस्थिवांसं॥ ४॥

आ । रोदसी इति । बृहती इति । वेविदानाः । प्र ।

रुद्रियाः । जभ्रिरे । यज्ञियासः ।

विदत् । मर्तः । नेमऽधिता । चिकित्वान् । अग्निं । पदे ।

परमे । तस्थिऽवांसं ॥ ४ ॥

बृहती महत्यौ रोदसी द्यावापृथिव्यावावेविदाना अत्यर्थं ज्ञापयंतः । कुत्राग्निर्वर्तत इति परस्परं वदंतो द्यावापृथिव्योर्मध्य वर्तमाना इत्यर्थः । यद्वा महत्योर्द्यावापृथिव्योर्मध्य आवेविदाना अग्निमुपलभमानाः । एवंभूता यज्ञियासो यज्ञार्हा देवा रुद्रियाः । रुद्रोऽग्निः । देवानामसुरैः सह युद्धसमये तैर्देवैः स्थापितं धनमपहृत्य गतवंतमग्निं देवा आगत्याग्नेः सकाशाद्बलेन तद्धनमगृह्णन् । तदानीं सोऽग्निररोदीत् । तस्माद्रुद्र इत्याख्यायते । तथा च तैत्तिरीयकं । तदग्निर्न्यकामयत । तेनापाक्रामत् । तद्देवा विजित्यावरुरुत्समाना अन्वायन् । तदस्य सहसादित्संत । सोऽरोदीत् । यदरोदीत्तद्रुद्रस्य रुद्रत्वमिति । तस्य रुद्रस्यार्हाणि स्तोत्राणि प्रजभ्रिरे । प्रजह्रिरे । चक्रुरित्यर्थः । नेमधिता । नेमशब्दोऽर्धवचनः । तथा च यास्कः । त्वो नेम इत्यर्धस्य । नि॰ ३. २०. । इति । सर्वेषां देवानामर्धभागेन धीयते धार्यत इति नेमधित इंद्रः । सर्वे देवा एकोऽर्धः । इंद्र एक एवापरोऽर्ध इति यावत् । तथा च तैत्तिरीयकं । यत्सर्वेषामर्धमिंद्रः प्रति तस्मादिंद्रो देवानां भूयिष्ठभाक्तम इति । तेनेंद्रेण संहितो मर्तो मरुद्गणः परम उत्तमेऽत्ये पदे स्थानेऽन्तरिक्षे तस्थिवांसं स्थितवंतमग्निं

चिकित्वान्ज्ञानन्विदत्। अलभत॥ विविदानाः। विदेर्ज्ञानार्थाल्लाभार्थाद्वा यङंताल्लटः शानच्। बहुलं छंदसीति शपो लुक्। छंदस्युभयथेति शानच आर्द्धधातुकत्वादतोलोपयलोपौ। अभ्यस्तानामादिरित्याद्युदात्तत्वं। विदत्। विद् लाभे। लुङि लृदित्त्वात् च्लेरङादेशः। नेमधिता। दधातेः कर्मणि निष्ठा। सुधित वसुधित नेमधित। पा० ७. ४. ४५। इति धिभाव निपात्यते। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। सुपां सुलुगिति तृतीयाया आकारः। तस्थिवांसं। तिष्ठतेर्लिटः क्वसुः। वस्वेकाजाद्घसामितीडागमः॥

घर्माभिष्टये संजानाना इत्येषा। अथोत्तरमिति खंडे सूत्रितं। संजानाना उप सीदन्नभिज्ञु दशभिर्विवस्वतः। आ० ४. ७. । इति॥

तामेतां सूक्ते पंचमीमृचमाह॥

संजानाना उप सीदन्नभिज्ञु पत्नीवंतो नमस्यं नमस्यन्।
रिरिक्वांसस्तन्वः कृण्वत स्वाः सखा सख्युर्निमिषि
रक्षमाणाः॥ ५॥

संऽजानानाः। उप। सीदन्। अभिऽज्ञु। पत्नीऽवंतः।
नमस्यं। नमस्यन्निति नमस्यन्।
रिरिक्वांसः। तन्वः। कृण्वत। स्वाः। सखा। सख्युः।
निऽमिषि। रक्षमाणाः॥ ५॥

हे अग्ने त्वां संजानानाः सम्यक् जानंतो देवा उपसीदन्।

उपसीदंति प्राप्नुवंति। उपसत्तिं कृत्वा च पत्नीवंतः सपत्नीकाः संतो नमस्यं नमस्काराहमभिज्ञ आभिमुख्येनावस्थितजानुयुक्तं त्वां नमस्यन्। अपूजयन्। पूजयित्वा च सख्युर्मित्रस्य तव निमिषि दर्शने निमित्तभूते सति रक्षमाणास्त्वया परिरक्ष्यमाणाः सखा सखायो देवाः स्वास्तन्वः स्वकीयानि शरीराणि रिरिक्वांसः। अनशनादिरूपेण दीक्षानियमेन रिक्तीकुर्वंतः शोषयंतः कृखत। यागानकुर्वन्। देवा वै यज्ञमतन्वतेति श्रुतेः॥ नमस्यन्। नमोवरिवश्चित्रङ इति पूजार्थे क्यच्। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। रिरिक्वांसः। रिचिर् विरेचने। लिटः क्वसुः। निमिषि। मिष स्पर्धायां। अत्रोपसर्गवशाद्दर्शनार्थः। संपदादिलक्षणो भावे क्विप्। रक्षमाणाः। कर्मणि लटः शानच्। यकि प्राप्ते व्यत्ययेन शप्॥

॥ इति प्रथमस्य पंचमे सप्तदशो वर्गः॥

षष्ठीमृचमाह॥

त्रिः सप्त यद्गुह्यानि त्वे इत्पदाविदन्निहिता यज्ञियासः।
तेभी रक्षंते अमृतं सजोषाः पशूंश्च स्थातृञ्चरथं च पाहि॥६॥

त्रिः। सप्त। यत्। गुह्यानि। त्वे इति। इत्। पदा।
अविदन्। निऽहिता। यज्ञियासः।
तेभिः। रक्षंते। अमृतं। सऽजोषाः। पशून्। च। स्थातृन्।
चरथं। च। पाहि॥ ६॥

त्रिः सप्त। एकविंशतिसंख्याकानि गुह्यानि रहस्यानि विद्वैकसमधिगम्यानि यद्यानि पदा पदानि। पद्यते गम्यते स्वर्ग एभिरिति व्युत्पत्त्या पदशब्देनात्र यज्ञा उच्यंते। ते चैकविंशति-संख्याकाः। औपासनहोमवैश्वदेवादयः सप्त पाकयज्ञाः। अग्न्याधेयदर्शपूर्णमासादयः सप्त हविर्यज्ञाः। अग्निष्टोमात्य ग्निष्टोमादयः सप्त सोमयज्ञाः। एवमेकविंशतिसंख्याकानि यज्ञलक्षणानि पदानि हे अग्ने त्वे इत् त्वय्येव निहिता स्थापितानि। तेषां सर्वेषां त्वत्प्रधानत्वात्। न ह्यग्निमंतरेण यागा अनुष्ठातुं शक्यंते। यज्ञियासो यज्ञार्हा अर्थित्वसामर्थ्य-वैदुष्यादिभिरधिकारहेतुभिर्युक्ताः। तथा चोक्तं। अर्थी समर्थो विद्वान् शास्त्रेणापर्युदस्तः कर्मण्यधिकारीति। एवंविधलक्षणो-पेता यजमानास्तानि पदान्यविदन्। अलभंत। लब्ध्वा च तैर्यज्ञलक्षणैः पदैरमृतममरणधर्माणं त्वां रक्षंते। पालयंति। यजंतीत्यर्थः। संजोषास्तैर्यजमानैः समानप्रीतिस्त्वं पशून् गवाश्वादिपशूंश्च स्थातृन् व्रीह्यादिस्थावराणि चरथं पशुव्यति-रिक्तमन्यच्चप्राणिजातमस्ति तच्च पाहि। रक्ष। तेषु हि रक्षितेषु त्वदीया यागाः कर्तुं शक्यंते नान्यथा। अतस्त्वमेव-मुच्यत इत्यर्थः॥ यत्। सुपां सुलुगिति विभक्तेर्लुक्। गुह्यानि। गुहायां भवानि। भवे छंदसीति यत्। यतोऽनाव इत्याद्यु-दात्तत्वं। त्वे। सुपां सुलुगिति सप्तम्याः शे आदेशः। अविदन्। विदॢ लाभे। लुङि लृदित्त्वादङ्। पशून् स्थातृन्। उभयत्रो-भयथर्त्त्वित्युभयथाभावान्नकारस्य रुत्वाभावः॥

सप्तमीमृचमाह ॥

विद्वाँ अग्ने वयुनानि क्षितीनां व्यानुषक्छुरुधो जीवसे

धाः ।

अंतर्विद्वाँ अध्वनो देवयानानतंद्रो दूतो अभवो

हविर्वाट् ॥ ७ ॥

विद्वान् । अग्ने । वयुनानि । क्षितीनां । वि । आनुषक् ।

शुरुधः । जीवसे । धाः ।

अंतःऽविद्वान् । अध्वनः । देवऽयानान् । अतंद्रः । दूतः ।

अभवः । हविःऽवाट् ॥ ७ ॥

हे अग्ने वयुनानि । ज्ञाननामैतत् इह तु ज्ञातव्ये वर्तते । सर्वाणि ज्ञातव्यानि विद्वान् जानंस्त्वं क्षितीनां यजमानलक्षणानां प्रजानां जीवसे जीवितुं शुरुधः शुद्रूपस्य शोकस्य रोधयित्रीरिषोऽन्नान्यानुषक् अनुषक्तं सततं यथा भवति तथा विधाः । निधेहि । कुर्वित्यर्थः । एवं यजमानानन्नसमृद्धान्कृत्वानंतरं हविर्वाट् तैर्देवेभ्यः प्रत्तं हविर्वहन्दूतोऽभवः । देवानां दूतो भवसि । कीदृशस्त्वं । अंतर्विद्वान् । द्यावापृथिव्योर्मध्ये जानन् । किं जानन् । अध्वनः । मार्गान् । कीदृशान् । देवयानान् । देवा यैर्मार्गैर्यांति गच्छंति तान्मार्गानित्यर्थः । अतंद्रः । पुनर्हविर्वहने,प्यनलसः ॥ वयुनानि । अज गतिक्षेपणयोः । अजियमिशीङ्भ्यश्च । उ० ३. ६१. । इति कर्मण्युनप्रत्ययः । अजेर्व्यघञपोरिति वीभावः । क्षितीनां । क्षियंति

निवसंतीति क्षितयो मनुष्याः । क्षिच्क्तौ च संज्ञायामिति कर्तरि क्तिच् । अंतोदात्तादुत्तरपदादन्यतरस्यामित्युत्तरस्य नामो नामन्यतरस्यामित्युदात्तत्वं । शुरुधः । शुचं रुंधंतीति शुरुधः । क्विप् चेति क्विप् । पूर्वपदस्यांत्यलोपः पृषोदरादित्वात् ॥

अष्टमीमृचमाह ॥

स्वाध्यो दिव आ सप्त यह्वी रायो दुरो व्यृतज्ञा अजानन् ।

विदद्गव्यं सरमा दृळ्हमूर्वं येना नु कं मानुषी भोजते

विट् ॥ ८ ॥

सुऽआध्यः । दिवः । आ । सप्त । यह्वीः । रायः । दुरः ।

वि । ऋतऽज्ञाः । अजानन् ।

विदत् । गव्यं । सरमा । दृळ्हं । ऊर्वं । येन । नु । कं ।

मानुषी । भोजते । विट् ॥ ८ ॥

स्वाध्यः शोभनकर्मयुक्ता यह्वीर्यह्व्यो महत्यः सप्त गंगाद्याः सप्त नद्यो दिवो द्युलोकादागत्य भूम्यां प्रवहंतीति शेषः । हे अग्ने । ईदृग्विधा नद्यस्त्वया स्थापिताः । अग्नौ होमे सति हि तेन तृप्तः सूर्यो वृष्टिं करोति । तस्मिन्नर्थे स्मृतिः पूर्वमुदाहृता । अतो वृष्टिद्वाराग्निरेव नदीः करोतीत्युच्यते । तथा ऋतज्ञा ऋतं यज्ञं जानंतोऽंगिरसो रायो बलनाम्नासुरेणापहृतस्य गोरूपस्य धनस्य दुरो द्वाराणि गमनमार्गानजानन् । त्वया ज्ञातवंतः । त्वत्साध्येन यागेन प्रीत इंद्रो गवामन्वेषणाय सरमां नाम देवशुनीं प्रेषितवान् । सा च सरमा गवां स्थान-

मवगत्येंद्रस्य न्यवेदयत्। इंद्रश्च तानंगिरसो गाः प्रापयत्। अत एतत्सर्वं त्वमेव कृतवान्। अंगिरोभ्यः सकाशाद्गव्यं गवि भवं दृळ्हं स्थूलं। बहुलमित्यर्थः। एवंविधं पयोलक्षणमूर्वमन्नं सरमा देवशुनी विदत्। अलभत। कमित्येतत्पादपूरणं। येन नु येन हि गव्येन मानुषी विट् मनोः संबंधिनी प्रजा भोजते। इदानीं भुंक्ते। तद्गव्यमपि परंपरयाग्निरेव करोति॥ स्वाध्यः। सुआङ्पूर्वाद्धीशब्दाज्जस्येरनेकाच इति यणादेशः। यह्वीः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। गव्यं। सर्वत्र गोरजादिप्रत्ययप्रसंगे यद्वक्तव्यमिति भावार्थं यत्। ऊर्वं। उर्वी हिंसार्थः। ऊर्वति क्षुधं हिनस्तीत्यूर्वमन्नं। पचाद्यच्। भोजते। भुज पालनाभ्यवहारयोः। अस्मि प्राप्ते व्यत्ययेन शप्॥

नवमीमृचमाह॥

आ ये विश्वा स्वपत्यानि तस्थुः कृण्वानासो अमृतत्वाय गातुं।

मह्ना महद्भिः पृथिवी वि तस्थे माता पुत्रैरदितिर्धायसे वेः॥ ९॥

आ। ये। विश्वा। सुऽअपत्यानि। तस्थुः। कृण्वानासः। अमृतऽत्वाय। गातुं।

मह्ना। महत्ऽभिः। पृथिवी। वि। तस्थे। माता। पुत्रैः। अदितिः। धायसे। वेरिति वेः॥ ९॥

य आदित्या अमृतत्वायामरणत्वसिद्धये गातुं मार्गमुपायं कृण्वानासः कुर्वाणाः संतो विश्वा विश्वानि सर्वाणि स्वपत्यानि शोभनान्यपतनहेतुभूतानि चतुर्दशरात्रशट्त्रिंशद्रात्रादित्यानामयनादीनि कर्माण्यातस्थुः। आस्थितवंतः। कृतवंत इत्यर्थः। तथा च तैत्तिरीयकं। आदित्या अकामयंत सुवर्गं लोकमियामेतीति। त एतं षट्त्रिंशद्रात्रमपश्यन्। तमाहरंत तेनायजंतेति च। महद्भिरनुष्ठानेन महानुभावैस्तैः पुत्रैः सहिता माता जनयित्र्यदितिरदीना पृथिवी धायसे सर्वस्य जगतो धारणाय मह्ना स्वकीयेन महत्त्वेन वितस्थे। विशेषेण तिष्ठति। हे अग्ने यतस्त्वं वेः। आदित्यैरनुष्ठितेषु यागेषु चरुपुरोडाशादीनि हवींष्यभक्षयः। अत एतत्सर्वं जातमित्यर्थः॥ कृण्वानासः। कृवि हिंसाकरणयोश्च। व्यत्ययेनात्मनेपदं। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। तत्संनियोगेनाकारांतादेशश्च। तस्यातो लोपे सति स्थानिवद्भावाद्गुणाभावः। शानचश्चित्त्वादंतोदात्तत्वं। आज्जसेरसुक्। मह्ना। महिम्नेत्यस्य वर्णलोपश्छांदसः। धायसे। वहिहाधाञ्भ्यश्छंदसीति दधातेर्भावेऽसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। वेः। वी गतिप्रजनकांत्यसनखादनेषु। लङि सिप्यदादित्वाच्छपो लुक्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। धायस इत्यस्य वाक्यांतरगतत्वादस्य निघाताभावः॥

दशमीमृचमाह॥

अधि श्रियं नि दधुश्चारुमस्मिन्दिवो यदक्षी अमृता अकृण्वन्।

अध॑ चरंति॒ सिंध॑वो॒ न सृ॒ष्टाः प्र नीची॑रग्ने॒ अरु॑षीर-

जानन् ॥ १० ॥

अधि॑ । श्रियं॑ । नि । द॒धुः । चारुं॑ । अ॒स्मिन् । दि॒वः । यत् ।

अ॒क्षी इति॑ । अ॒मृता॑: । अकृ॑ण्वन् ।

अध॑ । च॒रं॒ति । सिंध॑वः । न । सृ॒ष्टाः । प्र । नीची॑: । अ॒ग्ने ।

अरु॑षीः । अ॒जा॒न॒न् ॥ १० ॥

अस्मिन्नग्नौ चारुं शोभमां श्रियं परिस्तरणपरिषेचनादिरूपां यज्ञसंपदमधिनिदधुः । यजमानाः स्थापितवंतः । निधाय च यद्यदाक्षी यज्ञस्याज्यभागलक्षणे चक्षुषी अकृण्वन् । कुर्वंति । चक्षुषी वा एते यज्ञस्य यदाज्यभागाविति श्रुतेः । तदानीं दिवो द्युलोकादमृता अमरणधर्माणो देवा यागसमयो जात इत्यवगम्यागच्छंतीति शेषः । अथाज्यभागानंतरं सृष्टा अग्नेरुत्पन्नाः सिंधवो न शीघ्रं गच्छंत्यो नद्य इव नीचीर्नितरां सर्वासु दिक्षु गच्छंतीररुषीरारोचमानाः । यद्वा निर्मलरूपाः । हे अग्ने । एवंभूतास्त्वदीया ज्वालाः चरंति । संचलंति । सर्वासु दिक्षु गच्छंतीत्यर्थः । आगता देवाश्च प्राजानन् । अस्माकं होमायेदृश्यो ज्वाला उत्पन्ना इति हृष्टाः संतः प्रकर्षेण जानंति ॥ अक्षी । परत्वान्नुमं बाधित्वा ई च द्विवचने । पा० ७. १. ७७. । इत्यक्षिशब्दस्येकारांतादेशः । स चोदात्तः । ईत्वे कृते सकृद्गतपरिभाषया पुनर्नुम् न भवति । सवर्णदीर्घः । नीचीः । निपूर्वादंचतेः ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । अंचतेश्चोपसंख्यानमिति ङीप् । अच इत्यकार-

लोपे चाविति दीर्घत्वं। ऋध्यौ चेति गतेः प्रकृतिस्वरत्वं। अरुषी। अरुषमिति रूपनाम। ऋहनिभ्यामुषच् इत्यर्तेरुषच्। छंदसीवनिपाविति मत्वर्थीय ईकारः॥

॥ इति प्रथमस्य पंचमेऽष्टादशो वर्गः ॥

रयिर्नेति दशर्चं नवमं सूक्तं पराशरस्यार्षं त्रैष्टुभमाग्नेयं। अनुक्रांतं च। रयिर्नेति। प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

तत्र प्रथमामृचमाह॥

रयिर्न यः पितृवित्तो वयोधाः सुप्रणीतिश्चिकितुषो न

शासुः।

स्योनशीरतिथिर्न प्रीणानो होतेव सद्म विधतो वि

तारीत्॥ १॥

रयिः। न। यः। पितृऽवित्तः। वयःऽधाः। सुऽप्रनीतिः।

चिकितुषः। न। शासुः।

स्योनऽशीः। अतिथिः। प्रीणानः। होताऽइव। सद्म।

विधतः। वि तारीत्॥ १॥

पितृवित्तः पितुः सकाशाल्लब्धो रयिर्धनमिव योऽग्निर्वयोधा अन्नस्य दाता। यथा पैतृकं धनं विश्रंभेण व्यवह्रियमाणं सदन्नप्रदं भवति तद्वदग्निरपि सर्वेषु यज्ञेषु विश्रंभेण व्यवहृतः सन् अन्नप्रदो भवतीत्यर्थः। चिकितुषो विदुषो धर्म

शास्त्राभिज्ञस्य शासुः शासनमिव सुप्रणीतिः सुखेन प्रणेतव्यः । यथा विद्वच्छासनं सर्वेष्वनुष्ठेयेषु तत्तत्संशयनिर्णयाय नीयते । तद्वदग्निरपि सर्वेषु यज्ञेषु प्रणीयते । यश्च स्योनशीः सुखप्रदे गार्हपत्यायतनादौ शयानोऽतिथिर्न सुखासन उपवेशितोऽर्घ-पाद्यादिभिः सत्कृतोऽतिथिरिव प्रीणानो हविर्भिस्तर्पणीयः सोऽग्निर्विधतः परिचरतो यजमानस्य सद्म गृहं वितारीत् । प्रवर्धयति ददाति वा । तत्र दृष्टांतः । होतेव । होता होम-कर्ताध्वर्युस्तत्तत्कर्मकरणेन फलैर्यजमानस्य गृहं यथा वर्धयति तद्वत् ॥ पितृवित्तः । विद् लाभे । कर्मणि निष्ठा । यस्य विभाषेतीट् प्रतिषेधः । विभाषा गमहनविदविशामिति क्वसा-वस्य धातोरिटो विकल्पितत्वात् तत्रापि विशिसाहचर्यात्तौ-दादिक एव विदिर्गृह्यत इत्युक्तं । वित्तो भोगप्रत्यययोः । पा० ८. २. ५८. । इति निष्ठानत्वाभावो निपातितः । वयोधाः । डुधाञ् धारणपोषणयोः । आतो मनिन्निति विच् । सुप्रणीतिः । प्रणीयत इति प्रणीतिः । कर्मणि क्तिन् । तादौ चेति गतेः प्रकृतिस्वरत्वं । पुनः सुशब्देन समासे कृदुत्तरपदप्रकृतिस्वरत्वं । चिकितुषः । लिटः क्वसुः । षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं । शासुः । शासु अनुशिष्टौ । भृमृशीत्यादिना विधीयमान उप्रत्ययो बहुलवचनादस्मादपि द्रष्टव्यः । तत्र निदित्यनुवृत्तेराद्युदात्तत्वं । स्योनशीः । स्योन-मिति सुखनाम । स्योने सुखकरे गार्हपत्यादिस्थाने शेत इति स्योनशीः । क्विप् चेति क्विप् । प्रीणानः । प्रीञ् तर्पणे । कर्मणि शानचि व्यत्ययेन श्ना । विधतः । विध विधाने ।

श्चियतिः परिचरणकर्मेति नैरुक्ताः। तुदादित्वाच्छप्रत्ययः। शतुरनुम इति विभक्तेरुदात्तत्वं ॥

द्वितीयामृचमाह ॥

देवो न यः सविता सत्यमन्मा क्रत्वा निपाति वृजनानि विश्वा।
पुरुप्रशस्तो अमतिर्न सत्य आत्मेव शेवो दिधिषाय्यो भूत् ॥२॥

देवः। न। यः। सविता। सत्यऽमन्मा। क्रत्वा।
निऽपाति। वृजनानि। विश्वा।
पुरुऽप्रशस्तः। अमतिः। न सत्यः। आत्माऽइव। शेवः।
दिधिषाय्यः। भूत् ॥ २ ॥

देवो न सविता द्योतमानः सर्वस्य प्रेरकः सूर्य इव योऽग्निः सत्यमन्मा सत्यज्ञानो यथार्थदर्शी सोऽग्नि क्रत्वात्मीयेन कर्मणा विश्वा वृजनानि। विभक्तिव्यत्ययः। सर्वेभ्यः संग्रामेभ्यो निपाति। नितरां पालयति। वर्ज्यते हिंस्यतेऽस्मिन्निति वृजनं संग्रामः। अपि च पुरुप्रशस्तः पुरुभिर्यजमानैः स्तुतोऽग्नि-रमतिर्न। रूपनामैतत्। रूपमिव सत्यो बाधरहितः। रूप्यत इति रूपं स्वरूपं। यथा पृथिव्यादेः स्वरूपमागमापायिषु विशेषेषु सत्स्वपि स्वयमेकरूप्येण नित्यं भवति। तद्वदग्नि-रप्युच्चावचेषु सर्वेषु कर्मसु स्वयमेक एव व्याप्य वर्तते। सोऽग्निः शेवः सुखकरः। तत्र दृष्टांतः। आत्मेव। परमप्रेमास्पदतया निरतिशयानंदस्वरूप आत्मा यथा सर्वान्सुखयति। एतस्यैवानं-

दस्यान्यानि भूतानि मात्रमुपजीवंति। एष ह्येवानंदयतीति च श्रवणात्। तद्वदग्निरपि स्वर्गादिफलहेतुतया सुखयति। एवंभूतोऽग्निर्दिधिषाय्यो भूत्। सर्वैर्यजमानैर्धारणीयो भवति। परित्यागे हि वीरहत्यालक्षणो दोषो भवति। तथा च तैत्तिरीयकं। वीरहा वा एष देवानां योऽग्निमुद्वासयत इति॥ सत्यमन्मा। मननं मन्म। मन ज्ञाने। अन्येभ्योऽपि दृश्यंत इति मनिन्। सत्यमवितथं मन्म यस्य। बहुव्रीहिस्वरः। वृजनानि। वृजी वर्जने। कृपृवृजीत्यादिना क्युप्रत्ययः। पुरुप्रशस्तः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते प्रवृद्धादीनां च। पा० ६. २. १४७.। इत्युत्तरपदांतोदात्तत्वं। स ह्याकृतिगण इत्युक्तं। अमतिः। अम गत्यादिषु। अमेरतिः। दिधिषाय्यः। दधातेर्दिधिषाय्यः। उ० ३. ९६.। इति साय्यप्रत्ययांतो निपात्यते॥

तृतीयामृचमाह॥

दे॒वो न यः पृ॑थि॒वीं वि॒श्वधा॑या उप॒क्षेति॑ हि॒तमि॑त्रो॒ न राजा॑।

पु॒रः॒सदः॑ शर्म॒सदो॒ न वी॒रा अ॑नव॒द्या पति॑जुष्टेव॒ नारी॑॥ ३॥

दे॒वः। न। यः। पृ॒थि॒वीं। वि॒श्वऽधा॑याः। उ॒प॒ऽक्षेति॑। हि॒तऽमि॑त्रः। न। राजा॑।

पु॒रः॒ऽसदः॑। श॒र्म॒ऽसदः॑। न। वी॒राः। अ॒न॒व॒द्या। पति॑जुष्टाऽइव। नारी॑॥ ३॥

देवो न द्योतमानः सूर्य इव योऽग्निर्विश्वधायाः सर्वस्य जगतो धर्ता। यथा सूर्यो वृष्ट्यादिप्रदानेन सर्वं जगद्धत्ते। एवमग्निरपि यज्ञादिसाधनेन कृतस्नस्य जगतो धारयिता। सोऽग्निः पृथिवीं पृथिव्यामुपचेति। सर्वेषां प्रियः सत्यन्नगृहादौ निवसति। तत्र दृष्टांतः। हितमित्रो न राजा। हितान्यनुकूलानि मित्राणि यस्य तादृशो राजा यथा सुखेन निवसति तद्वत्। यथा सर्वजनमित्रो राजा। एवमग्निरपि सर्वजनमित्र इत्यर्थः। न ह्यग्निं कश्चन द्विष्टे। यस्याग्नेः पुरःसदः पुरस्तात्सीदंत उपविशंतः पुरुषाः शर्मसदो न वीराः पितृगृहे वर्तमानाः पुत्रा इव वर्तंते। पिता पुत्रानिवाग्निः स्वस्य परिचारकान्रक्षतीति भावः। सोऽयमग्निरतिशयेन शुद्धः कर्मयोग्यो भवति। तत्र दृष्टांतः। अनवद्यानिंदिता पतिजुष्टेव नारी स्वपतिना सेविता स्वीकृता योषिदिव। स यथा पातिव्रत्येन शुद्धा सती सर्वकर्मयोग्या भवति। एवमग्निरपि॥ विश्वधायाः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वादपि दधातेर्वहिहाधाञ्भ्यश्छंदसीत्यसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं। उपचेति। चि निवासगत्योः। बहुलं छंदसीति विकरणस्य लुक्। अनवद्या। बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। पतिजुष्टेव। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। नारी। नृनरयोर्वृद्धिश्चेति शार्ङ्गरवादिषु पाठात् ङीनंत आद्युदात्तः॥

चतुर्थीमृचमाह ॥

तं त्वा नरो दम आ नित्यमिद्धमग्ने सचंत क्षितिषु ध्रुवासु ।

अधि द्युम्नं नि दधुर्भूर्यस्मिन्भवा विश्वायुर्धरुणो रयीणां ॥ ४ ॥

तं । त्वा । नरः । दमे । आ । नित्यं । इद्धं । अग्ने । सचंत ।

क्षितिषु । ध्रुवासु ।

अधि । द्युम्नं । नि । दधुः । भूरि । अस्मिन् । भव ।

विश्वऽआयुः । धरुणः । रयीणां ॥ ४ ॥

हे अग्ने तं त्वा पूर्वोक्तगुणविशिष्टं त्वां नरो यज्ञस्य नेतारो यजमाना ध्रुवासु क्षितिषु निश्चलासु चलनरहितासु भूमिषु निरुपद्रवेषु ग्रामेष्वित्यर्थः । दमे स्वकीये यज्ञगृहे नित्यमिद्धमनवरतं समिद्भिः प्रज्वलितं कृत्वासचंत । अभिमुख्येन सेवंते । किंच । अस्मिन्नग्नौ द्युम्नं हविर्लक्षणमन्नं भूरि चरुपुरोडाशादिरूपेण बहुविधमधिनिदधुः । स्थापितवंतः । एवंगुणविशिष्टो योऽग्निः स त्वं विश्वायुरुक्तप्रकारेण सर्वान्नो भूत्वा रयीणां धनानां धरुणो धारयिता भव । अस्मभ्यं दातुं धनानि धारयेत्यर्थः ॥ सचंत । षच समवाये । छांदसो वर्तमाने लङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । भवा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । धरुणः । धारेर्णिलुक् चेत्युनप्रत्ययः ॥

पंचमीमृचमाह ॥

वि पृक्षो अग्ने मघवानो अश्युर्वि सूरयो ददतो विश्वमायुः ।

सनेम वाजं समिथेष्वर्यो भागं देवेषु श्रवसे दधानाः ॥ ५ ॥

वि । पृक्षः । अग्ने । मघऽवानः । अश्युः । वि । सूरयः ।

ददतः । विश्वं । आयुः ।

सनेम । वाजं । सम्ऽइथेषु । अर्यः । भागं । देवेषु । श्रवसे ।

दधानाः ॥ ५ ॥

हे अग्ने मघवानो हविर्लक्षणेन धनेन युक्ता यजमानाः पृक्षाऽन्नानि व्यश्युः । व्याप्नुवंतु । त्वयानुगृहीताः सर्वाण्यन्नानि लभंतां । ये च सूरयो विद्वांसस्त्वां स्तुवंति ददतश्च ये तुभ्यं हवींषि ददतः प्रयच्छंतो वर्तंते ते सर्वे विश्वमायुः सर्वं जीवितं व्यश्युः । व्याप्नुवंतु । वयं च समिथेषु संग्रामेष्वर्योऽरेः शत्रोः संबंधिनं वाजमन्नं सनेम । त्वदनुग्रहात्संभजेमहि । तदनंतरं देवेषु त्वत्प्रमुखेष्विंद्रादिषु श्रवसे यशसे तदर्थं भागं हविर्भागं दधानाः स्थापयंतो भूयास्मेति शेषः ॥ अश्युः । अशू व्याप्तौ । व्यत्ययेन परस्मैपदं । बहुलं छंदसीति विकरणस्य लुक् । ददतः । नाभ्यस्ताच्छतुरिति नुमागमप्रतिषेधः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सनेम । वन षण संभक्तौ । व्यत्ययेन शः । अर्यः । अरिशब्दात्षष्ठ्येकवचने जसादिषु च्छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । अरिशब्दः अच इरितीप्रत्ययांतोऽंतोदात्तः । उदात्तयण इति विभक्तेरुदात्तत्वं । भागं । कर्षात्वत इत्यंतोदात्तत्वं ॥

॥ इति प्रथमस्य पंचम एकोनविंशो वर्गः ॥

षष्ठीमृचमाह ॥

ऋतस्य हि धेनवो वावशानाः स्मदूध्नीः पीपयंत द्युभक्ताः ।
परावतः सुमतिं भिक्षमाणा वि सिंधवः समया सस्रुरद्रिं ॥६॥

ऋतस्य । हि । धेनवः । वावशानाः । स्मत्ऽऊध्नीः ।
पीपयंत । द्युऽभक्ताः ।
पराऽवतः । सुऽमतिं । भिक्षमाणाः । वि । सिंधवः ।
समया । सस्रुः । अद्रिं ॥ ६ ॥

ऋतस्य हि ऋतं देवयजनदेशं प्राप्तमग्निमेव धेनवोऽग्नि-होत्रादिहविषां दोग्ध्र्यो गावः पीपयंतः । चौरादिलक्षणं गव्यमपाययन् । कीदृश्यो गावः । वावशानाः । अग्निं पुनः पुनः कामयमानाः । स्मदूध्नीः । स्मच्छब्दो नित्यशब्दसमानार्थः । नित्यमूधसा युक्ताः । सर्वदा पयसः प्रदात्र्य इत्यर्थः । द्युभक्ताः । दिवा प्रकाशेन संभक्ताः संश्लिष्टाः । तेजस्विन्य इत्यर्थः । अपि च सिंधवः स्यंदनशीला नद्यः सुमतिमस्याग्नेः शोभनामनु-ग्रहात्मिकां बुद्धिं भिक्षमाणा याचमानाः सत्योऽद्रिं समयाद्रेः पर्वतस्य समीपे परावतो दूरदेशाद्विसस्रुः । विशेषेण गच्छंति प्रवहंति । अग्नये दातव्यानां हविषां निष्पत्तये प्रवहंतीत्यर्थः ॥ ऋतस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । वावशानाः । वश कांतौ । यङंताच्छानच् । न वश इति संप्रसारणप्रतिषेधः । बहुलं छंदसीति शपो लुक् । छंदस्यु-भयथेति शानच आर्धधातुकत्वादतोलोपयलोपौ । अत एव

लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते। समदूध्नीः। समत् नित्यान्यूधांसि यासां। ऊधसोऽनङ्। पा° ५. ४. १३१.। इत्यनङादेशः समासांतः। संख्याव्ययादेर्ङीप्। पा° ४. १. २६.। इति ङी्। भसंज्ञायामल्लोपोऽन इत्यल्लोपः। ङीपः पित्त्वादनुदात्तत्वे बहुव्रीहिस्वर एव शिष्यते। पीपयंत। पा पाने। अस्माद्धेतुमण्णिचि शाच्छासाह्वेति युक्। ण्यंतान्नङि ण्णुश्वङादेशादि। चङ्यन्यतरस्यामिति चङः पूर्वस्योदात्तत्वं। हि चेति निघातप्रतिषेधः। परावतः। परागतात्। दूरं हि परागतं भवति। अस्मिन्धात्वर्थे गम्यमान उपसर्गाच्छंदसि धात्वर्थे। पा° ५. १. ११८.। इति वतिः॥

सप्तमीमृचमाह॥

त्वे अ॑ग्ने सुम॒तिं भिक्ष॑माणा दि॒वि श्रवो॑ दधिरे य॒ज्ञिया॑सः।

नक्ता॑ च च॒क्रुरु॒षसा॒ विरू॑पे कृ॒ष्णं च॒ वर्ण॑मरु॒णं च॒ सं धुः॥७॥

त्वे इति॑। अ॒ग्ने॒। सु॒ऽम॒तिं। भिक्ष॑माणाः। दि॒वि। श्रवः॑।

द॒धि॒रे॒। य॒ज्ञिया॑सः।

नक्ता॑। च॒। च॒क्रुः। उ॒षसा॑। विरू॑पे॒ इति॒ विऽरू॑पे। कृ॒ष्णं॑।

च॒। वर्ण॑। अ॒रु॒णं। च॒। सं। धु॒रिति॑ धुः॥ ६॥

हे अग्ने सुमतिं शोभनामनुग्रहात्मिकां बुद्धिं भिक्षमाणा याचमाना यज्ञियासो यज्ञार्हाः सर्वे देवा दिवि द्योतमाने त्वे त्वयि श्रवो हविर्लक्षणमन्नं दधिरे। अस्थापयन्। अग्निर्देवानामन्नाद इति श्रुतेः। तदनंतरं तादृशे हविर्युक्तायानुष्ठानाय

विरूपे विविधरूपे उषमोषःकालोपलक्षितमहर्नक्ता च नक्तं रात्रिं च चक्रुः। अकुर्वन्। एतदेव स्पष्टयति। कृष्णं च वर्णं रात्र्यां श्यामलवर्णमंधकारमहुररुणमारोचनं श्वेतवर्णं तेजस्त्र संधुः। सम्यक् स्थापितवंतः॥ त्वे। सुपां सुलुगिति सप्तम्याः शे आदेशः। नक्ता। तेनैव द्वितीयाया डादेशः। उषसा। तेनैव विभक्तेराकारः। धुः। डुधाञ् धारणपोषणयोः। लुङि गातिस्थेति सिचो लुक्। आत इति झेर्जुसादेशः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

अष्टमीमृचमाह॥

यन्राये मर्तान्त्सुषूदो अग्ने ते स्याम मघवानो वयं च।

छायेव विश्वं भुवनं सिसक्ष्यापप्रिवान्रोदसी अंतरिक्षं॥ ८॥

यान्। राये। मर्तान् सुसूदः। अग्ने। ते स्याम।

मघऽवानः। वयं। च।

छायाऽइव। विश्वं। भुवनं। सिसक्षि। आपप्रिऽवान्।

रोदसी इति। अंतरिक्षं॥ ८॥

यान्मर्तान्मनुष्यानस्मान्राये धनाय सुषूदः। अग्निहोत्रादिकर्मसु प्रेरयसि। ते तादृशा वयं च मघवानो धनिनः स्याम। भवेम। रोदसी द्यावापृथिव्यावंतरिक्षं चापप्रिवान् स्वतेजसा ह्यम्युदकेन वापूरितवांस्त्वं च विश्वं भुवनं सर्वं जगत् सिसक्षि। सेवसे। अनुगृह्य सर्वं रक्षसीत्यर्थः। तत्र दृष्टांतः। छायेव। यथा छत्रादिच्छायातपादिजनितं क्लेशं निवार्य रक्षति तद्वत्॥

शये। ऊडिदमिति विभक्तेरुदात्तत्वं। सुषूदः। षूद प्रेरणे। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। सिसक्षि। षच समवाये। बहुलं छंदसीति शपः श्लुः। इदित्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं। आपप्रिवान्। प्रा पूरणे। लिटः क्वसुः। वस्वेकाजाद्घसामितीडागमः। आतो लोप इटि चेत्याकारलोपः। द्विर्वचनेऽचीति स्थानिवद्भावात् द्विर्भावादि॥

नवमीमृचमाह॥

अर्वाद्भिरग्ने अर्वतो नृभिर्नॄन्वीरैर्वीरान्वनुयामा त्वोताः।

ईशानासः पितृवित्तस्य रायो वि सूरयः शतहिमा नो

अश्युः॥ ९॥

अर्वत्ऽभिः। अग्ने। अर्वतः। नृऽभिः। नॄन्। वीरैः।

वीरान्। वनुयाम। त्वाऽऊताः।

ईशानासः। पितृऽवित्तस्य। रायः। वि। सूरयः।

शतऽहिमाः। नः। अश्युः॥ ९॥

हे अग्ने त्वोतास्त्वया रक्षिताः संतो वयमर्वद्भिरस्मदीयैरश्वैरर्वतः शत्रुसंबंधिनोऽश्वान्नृभिरस्मदीयैर्भटैर्नॄन् शत्रोर्भटान्। वीर्याज्जायंत इति वीराः पुत्राः। तैर्वीरान् शत्रुपुत्रांश्च वनुयाम। हन्याम। वनुष्यतिर्हंतिकर्मानवगतसंस्कारो भवति। नि॰ ५. २.। इति यास्कः। पितृवित्तस्य पित्रादिपरंपरया लब्धस्य

रायो धनस्येशानास्वः स्वामिनः सूरयो विद्वांसो नोऽस्माकं पुत्राः शतहिमाः शतं संवत्सरान् जीवंतः संतो व्यश्युः। विशेषेण भुंजतां। अस्मदीयानां पुत्राणामारोग्यं दीर्घमायुश्च भवत्वित्यर्थः॥ त्वोताः। त्वयोताः। प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः। व्यत्ययेनात्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। शतहिमाः। अत्र हिमशब्देन तद्वान्हेमंतो लक्ष्यते। ब्राह्मणं च भवति। शतं हिमा इत्याह। शतं त्वा हेमंतानिंधिषीयेति वावैतदाहेति। शतं हिमाः शतं हेमंतर्तवो येषां ते शतसंवत्सरजीविन इत्यर्थः। अश्युः। अश भोजने। बहुलं छंदसीति विकरणस्य लुक्॥

दशमीमृचमाह॥

एता ते अग्न उचथानि वेधो जुष्टानि संतु मनसे हृदे च।

शकेम रायः सुधुरो यमं तेऽधि श्रवो देवभक्तं दधानाः॥१०॥

एता। ते। अग्ने। उचथानि। वेधः। जुष्टानि। संतु।

मनसे। हृदे। च।

शकेम। रायः। सुऽधुरः। यमं। ते। अधि। श्रवः।

देवऽभक्तं। दधानाः॥ १०॥

हे वेधः। मेधाविनामैतत्। मेधाविन्नग्ने। एतोचथान्येतानीदानीमस्माभिः प्रयुक्तानि स्तोत्राणि ते तव मनसे मनोहृतये हृदे तद्वृत्तिमतेऽंतःकरणाय च जुष्टानि संतु। प्रियाणि

भवंतु । ते तव संबंधिनः सुधुरः सुष्टु निर्वाहकस्य । [यद्वा शोभनं धूर्वंति दारिद्र्यं हिनस्तीति सुधः । तादृशस्य रायो धनस्य यमं नियमनं कर्तुं शकेम । शक्ता भूयास्म । किं कुर्वंतः । देवभक्तं देवैः संभजनीयं अवो हविर्लक्षणमन्नमधिदधानाः । अग्नेरुपरि धारयंतः । अग्नौ हविर्भिर्होमं कुर्वंत इत्यर्थः ॥ उचथानि । वच परिभाषणे । रुदिविदिभ्यां किदिति विधीयमानोऽथप्रत्ययः कित्त्वं च बहुलवचनादस्मादपि भवति । वच्यादिना संप्रसारणं । जुष्टानि । जुष्टार्पिते च छंदसि नित्यं मंत्रे । पा० ६. १. २०९. २१०. । इत्याद्युदात्तत्वं । हृदे । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः । शकेम । शक्लृ शक्तौ । लिङ्याशिष्यङ् । सुधुरः । धुर्वी हिंसार्थः । क्विप् चेति क्विप् । राल्लोप इति वकारलोपः । न पूजनादिति समासांतप्रतिषेधः । देवैर्भक्तं देवभक्तं । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य पंचमे विंशो वर्गः ॥

॥ इति प्रथमे मंडले द्वादशोऽनुवाकः ॥

त्रयोदशोनुवाक एकादश सूक्तानि । तत्रोपप्रयंत इति नवर्चं प्रथमं सूक्तं । तत्रानुक्रम्यते । उपप्रयंतो नव गोतमो राहूगणो गायत्रं त्विति । अस्यायमर्थः । रहूगणनामा कश्चिदृषिः । तस्य पुत्रो गोतमोऽस्य सूक्तस्य ऋषिः । गायत्रं त्वित्युक्तत्वादिदमुत्तरं च गायत्रीछंदस्कं । परमाग्नेयमैंद्रादिति परिभाषितत्वादग्निर्देवता ॥ प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे छंदस्येतदादिके द्वे सूक्ते । सूत्रितं च । आपो रेवतीः क्षयथा हि वस्व उपप्रयंत इति सूक्ते । आ० ४. १३. । इति । आश्विनशस्त्रेऽप्येते सूक्ते प्रातरनुवाकन्यायेनेत्यतिदेशात् ॥ पृष्ठ्यषडहस्य प्रथमेऽहन्येत-

देव सूक्तमाज्यशस्त्रं। सूत्रितं च। उपप्रयंत इति तु प्रथमेऽ-छन्याज्यं। आ० ७. १०.। इति॥

तत्र प्रथमामृचमाह॥

उपप्रयंतो अध्वरं मंत्रं वोचेमाग्नये। आरे अस्मे च शृण्वते॥ १॥

उपऽप्रयंतः। अध्वरं। मंत्रं। वोचेम। अग्नये। आरे।

अस्मे इति। च। शृण्वते॥ १॥

अध्वरं हिंसाप्रत्यवायरहितमग्निष्टोमादियज्ञमुपप्रयंत उपेत्य प्रकर्षेण यंतो गच्छंतः। प्रागविच्छेदेन सम्यगनुतिष्ठंत इत्यर्थः। तादृशा वयमग्नयेऽंगनादिगुणयुक्ताय देवाय मंत्रं मननसाधन-मितत्सूक्तरूपं स्तोत्रं वोचेम। वक्तारो भूयास्मेत्याशास्महे। कीदृशायाग्नये। आरेऽस्मे च शृण्वते। चशब्दोऽप्यर्थ आरे-शब्दात्परो द्रष्टव्यः। आरे च दूरेऽपि स्थित्वास्माकं स्तुतीः शृण्वते। अस्मासु प्रीत्यतिशयेन सर्वत्र प्रवर्तमानोऽग्निरस्म-दीयमेव स्तोत्रं शृणोतीति भावः॥ वोचेम। ब्रुवो वचिः। लिङ्याशिष्यङ्। वच उमित्युमागमः। शृण्वते। शतुरनुम इति विभक्तेरुदात्तत्वं॥

द्वितीयामृचमाह॥

यः स्नीहितीषु पूर्व्यः संजग्मानासु कृष्टिषु। अरक्षद्दाशुषे गयं॥ २॥

यः। स्नीहितीषु। पूर्व्यः। संऽजग्मानासु। कृष्टिषु।

अरक्षत्। दाशुषे। गयं॥ २॥

पूर्व्यश्चिरंतनो योऽग्निः स्नीहितीषु बधकारिणीषु क्राष्टिषु अनुभूतासु प्रजासु संजग्मानासु संगतासु सतीषु दाशुषे हवींषि दत्तवते यजमानाय गयं धनमरक्षत्। रक्षति। तस्मै मंत्रं वोचेमेति पूर्वेण संबंधः। स्नीहितीषु। ष्णिह स्नेहने। चुरादिः। स्नेहयतीति बधकर्मसु पठितः। स्नेह्यंते हिंस्यंते प्रजा अभिरिति स्नेहितयः। करणे क्तिन्। तितुत्रेष्वग्रहादीनामिति वक्तव्यमिति वचनान्निग्रहीतिर्निपठितिरितिवादेडागमः। व्यत्ययेनेकारस्येकारादेशः। क्तिनो दीर्घश्च। निस्वादाद्युदात्तत्वं। संजग्मानासु। समो गम्यृच्छीत्यात्मनेपदे लिटः कानच्। गमहनेत्यादिनोपधालोपः। अरक्षत्। छंदसि लुङ्लङ्लिट इति वर्तमाने लङ्॥

अग्निमंथने जातायानुब्रूहीत्युक्त उत ब्रुवंत्वित्येषानुवचनीया। प्रातर्वैश्वदेव्यामिति खंडे सूत्रितं। शिष्टेनोत्तरामुत ब्रुवंतु जंतवः। आ॰ २. १६.। इति॥ तथा साकमेधेषु मरुद्भ्यः क्रीडिभ्यः पुरोडाशमित्यस्यामिष्टावेषैव प्रथमाज्यभागानुवाक्या। सूत्रितंच। च मरुद्भ्यः क्रीडिभ्य उत्तरोत ब्रुवंतु जंतव इति॥

तामेतां सूक्ते तृतीयामृचमाह॥

उत ब्रुवंतु जंतव उदग्निर्वृत्रहाजनि। धनंजयो रणेरणे ॥३॥

उत। ब्रुवंतु। जंतवः। उत्। अग्निः। वृत्रऽहा। अजनि।

धनंऽजयः। रणेऽरणे॥ ३॥

अग्निरुदजनि। अरण्योः सकाशादुत्पन्नः। उतानंतरं जंतवो जाताः सर्वे ऋत्विजो ब्रुवंतु। तमग्निं स्तुवंतु। कीदृशोऽग्निः। वृत्रहा। वृत्राणामावरकाणां शत्रूणां हंता रणे रणे

सर्वेषु संग्रामेषु धनंजयः शत्रुधनानां जेता ॥ धनंजयः । संज्ञायां भृतॄवृजीति । पा० ३. २. ४६. । खच् । अरुर्द्विषदजंतस्य । पा० ६. ३. ६७. । इति मुम् । तित्स्वरेणांतोदात्तत्वं । रणे रणे । रण शब्दार्थः । रणंति दुंदुभयोऽस्मिन्निति रणः संग्रामः । वशिरण्योरुपसंख्यानं । पा० ३. ३. ५८. ३. । इत्यप् । नित्यवीप्सयोरिति द्विर्वचनं । आम्रेडितानुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

यस्य॑ दू॒तो अ॑सि॒ क्षये॒ वेषि॑ ह॒व्यानि॑ वी॒तये॑ ।

द॒स्मत्कृ॒णोष्य॑ध्व॒रं ॥ ४ ॥

यस्य॑ । दू॒तः । असि॑ । क्षये॑ । वेषि॑ । ह॒व्यानि॑ । वी॒तये॑ ।

द॒स्मत् । कृ॒णोषि॑ । अ॒ध्व॒रं ॥ ४ ॥

हे अग्ने यस्य यजमानस्य क्षये देवयजनलक्षणे गृहे देवानां दूतस्त्वमसि । भवसि । यस्य च हव्यानि चरुपुरोडाशादीनि हवींषि वीतये देवानां भक्षणाय वेषि । गमयसि । यस्य चाध्वरं यज्ञं दस्मत् सर्वदर्शनीयं कृणोषि । करोषि तमित्सुहव्यमित्युत्तरया संबंधः ॥ वेषि । वी गत्यादिषु । अंतर्भावितण्यर्थाल्लट् । अदादित्वाच्छपो लुक् । पादादित्वान्निघाताभावः । दस्मत् । दसि दंसनदर्शनयोः । इषियुधींधीत्यादिना मक् । दस्ममित्यत्र मकारस्य वर्णव्यत्ययेन तकारः । कृणोषि । कृवि हिंसाकरणयोश्च । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तत्संनियोगेन वकारस्याकारः । तस्यातो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः । यस्येत्यनुषंगान्निघाताभावः ॥

पंचमीमृचमाह ॥

त्वमित्सु॒हव्य॑मंगिरः सु॒देवं॑ सहसो यहो । जना॑ आहुः

सु॒ब॒र्हिषं॑ ॥ ५ ॥

तं । इत् । सु॒ऽहव्यं॑ । अं॒गि॒रः॒ । सु॒ऽदे॒वं । स॒ह॒सः॒ । य॒हो॒

इति॑ । जना॑ः । आ॒हुः॒ । सु॒ऽब॒र्हिषं॑ ॥ ५ ॥

हे सहसो यहो । बलस्य पुत्र । अंगिरः । अंगनादिगुणयुक्ताग्ने । यो यजमानः पूर्वमुक्तस्त्वमित् तमेव यजमानं सुहव्यं शोभनहविष्कं सुदेवं शोभनदेवतं सुबर्हिषं । बर्हिरिति यज्ञनाम । शोभनयज्ञं च जनाः सर्वे मनुष्या आहुः । कथयंति ॥ सुहव्यमित्यादिषु नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सहसो यहो । सुबामंत्रित इति परांगवद्भावात्षष्ठ्यामंत्रितसमुदायस्याष्टमिकमामंत्रितानुदात्तत्वं ॥

॥ इति प्रथमस्य पंचम एकविंशो वर्गः ॥

षष्ठीमृचमाह ॥

आ च॒ वहा॑सि॒ ताँ इ॒ह दे॒वाँ उप॒ प्रश॑स्तये । ह॒व्या सु॑श्चंद्र

वी॒तये॑ ॥ ६ ॥

आ । च॒ । वहा॑सि । तान् । इ॒ह । दे॒वान् । उप॑ । प्रऽश॑स्तये ।

ह॒व्या । सु॒ऽचं॒द्र॒ । वी॒तये॑ ॥ ६ ॥

हे सुश्चंद्र शोभनाह्लादनाग्ने तान्देवानिहास्मिन्कर्मण्युपास्मत्समीपं प्रशस्तये स्तुतयः आवहासि च । आवह प्रापय च ।

आगतेभ्यस्तेभ्यो हव्या हव्यानि चरुपुरोडाशादीनि हवींषि वीतये भक्षणाय प्रापयेत्यर्थः । वहासि । वह प्रापणे । लेट्याडागमः । प्रशस्तये । शंसु स्तुतौ । भावे क्तिन् । नितुत्वे तीट्प्रतिषेधः । अनिदितामिति नलोपः । तादौ चेति गतेः प्रकृतिस्वरत्वं । सुश्चंद्र । ह्रस्वाच्चंद्रोत्तरपदे मंत्र इति सुट् ॥

सप्तमीमृचमाह ॥

न योरुपब्दिरश्व्यः शृण्वे रथस्य कच्चन । यदग्ने यासि दूत्यं ॥ ७ ॥

न । योः । उपब्दिः । अश्व्यः । शृण्वे । रथस्य । कत् । चन । यत् । अग्ने । यासि । दूत्यं ॥ ७ ॥

हे अग्ने यद्यदा दूत्यं देवानां दूतत्वं यासि । प्राप्नोषि । कच्चन कदाचन तदानीं सर्वदापि योर्गच्छतस्तव रथस्याश्वो-ऽश्वैरुत्पादित उपब्दिः श्रवणार्हः शब्दो न शृण्वे । न श्रूयते । रथस्य शीघ्रगमनेनास्माभिः शब्दो नोपलभ्यत इत्यर्थः ॥ योः । या प्रापण इत्यस्मात् यो द्वे च । उ० १. २१. । इत्यौणादिकः कुप्रत्ययः । बहुलवचनाद्विर्भावाभावः । उपब्दिरित्येतत् श्रोतु-मर्हस्य शब्दस्याख्या । तथा च तैत्तिरीयाणां प्रातिशाख्यं सशब्दमुपब्दिमत् । तै० प्रा० २. ११. । इति । शृण्वे । श्रु श्रवणे । कर्मणि लटि श्रुवः शृ चेति व्यत्ययेन श्नुः शृभावश्च । लोपस्त आत्मनेपदेष्विति तलोपः । हुश्नुवोः सार्वधातुक इति यणादेशः ॥

अष्टमीमृचमाह ॥

त्वोतो वाज्यह्रयोऽभि पूर्वस्मादपरः । प्र दाश्वाँ अग्ने अस्थात् ॥ ८ ॥

त्वाऽऊतः । वाजी । अह्रयः । अभि । पूर्वस्मात् । अपरः । प्र । दाश्वान् । अग्ने । अस्थात् ॥ ८ ॥

यः पुरुषः पूर्वस्मात् स्वस्मादधिकारादपरो निकृष्टो भवति । हे अग्ने स इदानीं दाश्वान् तुभ्यं हवींषि दाता सन् त्वोतस्त्वयातो रक्षितो वाज्यन्नवान् अह्रयो लज्जारहितः । एवंभूतः सन् अभि प्रास्थात् । ऐश्वर्यमभिप्राप्य प्रतितिष्ठति । सर्वोत्कृष्टो भवतीत्यर्थः ॥ अह्रयः । ह्री लज्जायां जिह्रेतीति ह्रयः । न ह्रयोऽह्रयः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । दाश्वान् । दाशृ दाने । दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपातितः ॥

नवमीमृचमाह ॥

उत द्युमत्सुवीर्यं बृहदग्ने विवाससि । देवेभ्यो देव दाशुषे ॥ ९ ॥

उत । द्युऽमत् । सुऽवीर्यं । बृहत् । अग्ने । विवाससि । देवेभ्यः । देव । दाशुषे ॥ ९ ॥

उत अपि च हे देव द्योतमानाग्ने देवेभ्यो दाशुषे चरुपुरोडाशादीनि हवींषि दत्तवते तस्मै यजमानाय बृहत्प्रौढं धनं विवाससि । गमयितुमिच्छसि । प्रापयसीति यावत् । कीदृशं । द्युमत् । अतिशयेन दीप्तं । सुवीर्यं । शोभनवीर्योपेतं ॥ सुवीर्यं । वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं । विवाससि । वा

गतिगंधनयोः । सनि द्विर्भावे सन्यत इतीत्वं । दाशुषे । चतुर्थ्यैकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

॥ इति प्रथमस्य पंचमे द्वाविंशो वर्गः ॥

जुषस्वेति पंचर्चं द्वितीयं सूक्तं । अनुक्रांतं च । जुषस्व पंचेति । ऋष्याद्याः पूर्ववत् ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः । पशौ स्तोकानुवचन आद्या विनियुक्ता । सूत्रितं च । प्रेषितः स्तोकेभ्योऽन्वाह जुषस्व सप्रथस्तमं । आ॰ ३. ४. । इति ॥

तासेतां सूक्ते प्रथमामृचमाह ॥

जुषस्व सप्रथस्तमं वचो देवप्सरस्तमं । हव्या जुह्वान आसनि ॥ १ ॥

जुषस्व । सप्रथःऽतमं । वचः । देवप्सरःऽतमं । हव्या । जुह्वानः । आसनि ॥ १ ॥

हे अग्ने सप्रथस्तममतिशयेन विस्तीर्णं वचः स्तोत्रलक्षणमस्मदीयं वचनं जुषस्व । सेवस्व । कीदृशं । देवप्सरस्तमं । देवानां प्रीणयितृतमं । किं कुर्वन् । आसनि तवास्ये हव्या हव्यानि स्तोकलक्षणानि हवींषि जुह्वानः प्रक्षिपन् । इमानि स्तोकलक्षणानि हवींषि वृथा मा भुवन् तत्सर्वं त्वदीयेन मुखेन स्वीकुर्वित्यर्थः ॥ देवप्सरस्तमं । प्सृ प्रीतिबलनयोः । देवान् प्सृणाति प्रीणयतीति देवप्सराः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारपकारयो

स्थानविपर्ययः। अतिशयेन देवस्वरा देवस्वरस्तमः। जुह्वानः। जुहोतेर्व्यत्ययेन शानच्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। आसनि। पद्दन्नित्यादिनास्यशब्दस्यासन् आ. देश.॥

द्वितीयामृचमाह॥

अयां ते अंगिरस्तमाग्ने वेधस्तम प्रियं। वोचेम ब्रह्म सानसि॥ २॥

अर्थ। ते। अंगिरःऽतम। अग्ने। वेधःऽतम। प्रियं। वोचेम। ब्रह्म। सानसि॥ २॥

हे अंगिरस्तम। अतिशयेनांगनादिगुणयुक्त। यद्वा। अंगिरसां वरिष्ठ। वेधस्तम। वेधा इति मेधाविनाम। अतिशयेन मेधाविन्नग्ने। अथानंतरं ते तुभ्यं सानसि संभजनीयं प्रियं प्रीतिकरं ब्रह्म स्तोत्रं वोचेम। वक्तारो भूयास्म॥ वोचेम। लिङ्याशिष्यङ्। वच उमित्युमागमः। सानसि। वन षण संभक्तौ। सानसिवर्णसीत्यादावसिच्प्रत्ययांतो निपात्यते॥

तृतीयामृचमाह॥

कस्ते जामिर्जनानामग्ने को दाश्वध्वरः। को ह कस्मिन्नसि श्रितः॥ ३॥

कः। ते। जामिः। जनानां। अग्ने। कः। दाशुऽअध्वरः। कः। ह। कस्मिन्। असि। श्रितः॥ ३॥

हे अग्ने जनानां मनुष्याणां मध्ये ते तव को जामिः। को बंधुः। त्वं सर्वैर्गुणैरधिकोऽसि। तवानुरूपो बंधुर्नास्तीति भावः। को दाश्वध्वरः। दाशुर्दत्तोऽध्वरो यज्ञो येन स तथोक्तः। त्वां यष्टुमपि समर्थः कोऽपि नास्तीत्यर्थः। को ह त्वं। कथंभूतस्त्वमीदृग्रूप इति सर्वैर्न ज्ञायस इत्यर्थः। कस्मिन् स्थाने श्रित आश्रितोऽसि वर्तसे तत्स्थानमपि न केनचित् ज्ञायते। अतस्त्वमस्माभिर्मांसदृष्टिभिः कथमुपलब्धव्य इत्यग्निः प्रशस्यते॥ दाश्वध्वरः। दाशृ दाने। उणादयो बहुलमिति बहुलवचनात्कर्मण्युण्प्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यणादेश उदात्तस्वरितयोर्यणः स्वरितोऽनुदात्तस्येति स्वरितत्वं॥

चतुर्थीमृचमाह॥

त्वं जामिर्जनानामग्ने मित्रो असि प्रियः।

सखा सखिभ्य ईड्यः॥ ४॥

त्वं। जामिः। जनानां। अग्ने। मित्रः। असि। प्रियः।

सखा। सखिऽभ्यः। ईड्यः॥ ४॥

हे अग्ने त्वमुक्तप्रकारेणाचिंत्यरूपोऽप्यनुग्रहीतृतया सर्वेषां जनानां जामिर्बंधुरसि। तथा प्रियः प्रीणयिता त्वं यजमानानां मित्रः प्रमीतेस्त्रायकोऽसि। ईड्यः स्तुतिभिः स्तुत्यस्त्वं सखिभ्यः समानख्यानेभ्यः ऋत्विग्भ्यः सखा सखिवदत्यंतं प्रियोऽसि॥ जामिः। जमु अदने। जमंति सहैकस्मिन्पात्रेऽदंतीति जामयो बंधवः। जनिघसिभ्यामिण्। उ० ४. १३१। इति विधीयमान इण् बहुलवचनादस्मादपि द्रष्टव्यः। ईड्यः। ईड स्तुतौ। ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं।

पंचमीमृचमाह ॥

यज॑ा नो मित्रावरु॑णा यज॑ा देवाँ ऋतं बृहत् ।

अग्ने यक्षि स्वं दम॑म् ॥ ५ ॥

यज॑ । नः । मित्रावरु॑णा । यज॑ । देवान् । ऋतं । बृहत् ।

अग्ने॑ । यक्षि॑ । स्वं । दम॑ ॥ ५ ॥

हे अग्ने नोऽस्मदर्थं मित्रावरुणा । एतत्संज्ञौ देवौ यज । हविषा पूजय । तथा देवानिंद्रादीन्यज । पूजय । ऋतं सत्यं यथार्थफलं यज्ञं च यजेत्येतदर्थं बृहत् प्रौढं स्वकीयं दमं यज्ञगृहं यक्षि । यज संगच्छस्व । त्वय्यंतर्विद्यमाने सति हि यज्ञगृहं पूज्यते ॥ यजा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं । देवान् । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । आतोऽटि नित्यमित्यनुनासिक आकारः । यत्वलोपौ । यक्षि । यजेर्बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य पंचमे त्रयोविंशो वर्गः ॥

का त इति पंचर्चं तृतीयं सूक्तं । का त इत्यनुक्रांतं । राहूगणो गोतम ऋषिः । त्रिष्टुप् छंदः । अग्निर्देवता ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे च्छंदसीदमादिके द्वे सूक्ते ॥ सूत्रितं च । उप प्रजिन्वन्निति त्रीणि का त उपेतिरिति सूक्ते ॥ आ० ४ १३. । इति ॥ आश्विनशस्त्रेऽप्येते प्रातरनुवाकातिदेशात् ॥

तत्र प्रथमामृचमाह ॥

का त उपे॑तिर्मन॑सो वरा॑य भुव॑दग्ने शंत॑मा का म॑नीषा ।

को वा॑ य॒ज्ञैः परि॑ दक्षं॑ त आप॒ केन॑ वा ते॒ मन॑सा

दाशेम ॥ १ ॥

का । ते॒ । उप॑ऽइतिः । मन॑सः । वरा॑य । भुव॑त् । अ॒ग्ने॒ ।

शम्ऽत॑मा । का । म॒नी॒षा ।

कः । वा॒ । य॒ज्ञैः । परि॑ । दक्ष॑म् । ते॒ । आ॒प॒ । केन॑ । वा॒ । ते॒ ।

मन॑सा । दा॒शे॒म ॥ १ ॥

हे अग्ने ते तव मनसो वराय निवारणायास्मास्ववस्थापनाय कोपेतिर्भुवत्। कीदृशमुपगमनं भवेत्। न क्वाप्यस्ति तवोचितमुपगमनं वयं कर्तुं न शक्नुम इति भावः। मनीषा स्तुतिः शंतमा तवातिशयेन सुखकरा का कीदृशी भवेत्। तवोचिता स्तुतिरपि नास्तीत्यर्थः। को वा यजमानो यज्ञैस्तव संबंधिभिर्यागैर्दक्षं वृद्धिं बलं वा पर्याप। पर्याप्नोत। न कोऽपीत्यर्थः। तवोचितान्यागाननुष्ठाय तैः फलं प्राप्यत इत्येतदपि दुर्घटमेवेति भावः। उपगमनादिकं तावदास्तां। तस्य सर्वस्य साधनभूतं मन एवास्माकं दुर्लभमित्याह। केनेति। हे अग्ने ते तुभ्यं केन मनसा कीदृश्या बुद्ध्या दाशेम। हवींषि प्रयच्छाम। तवोपगमनाद्यनुरूपं मनोऽस्माकं नोत्पद्यत इत्यर्थः। उपेतिः। तादौ चेति गतेः प्रकृति स्वरत्वं। वराय। वृञ् वरणे। अस्मादंतर्भावितण्यर्थाद्ग्रहवृदनिश्चिगमश्चेत्यप्। तस्य पित्त्वादनुदात्तत्वे धातुस्वरः। भुवत्। लेट्यडागमः। बहुलं छंदसीति शपो लुक्। भूसुवोस्तिङीति गुणप्रतिषेधः। दक्षं। दक्ष वृद्धौ। भावे करणे वा घञ्। ञित्त्वादाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

एह्यग्न इह होता नि षीदादब्धः सु पुरएता भवा नः ।
अवतां त्वा रोदसी विश्वमिन्वे यजा महे सौमनसाय देवान् ॥ २ ॥

आ । इहि । अग्ने । इह । होता । नि । सीद । अदब्धः ।
सु । पुरःऽएता । भव । नः ।
अवतां । त्वा । रोदसी इति । विश्वमिन्वे इति विश्वंऽइन्वे ।
यज । महे । सौमनसाय । देवान् ॥ २ ॥

हे अग्ने । एहि । आगच्छ । इहास्मिन्यज्ञे होता देवानामाह्वाता सन्निषीद । उपविश । नोऽस्माकं पुरएता पुरतो गंता सु भव । सुष्ठु भव । यस्मात्त्वमदब्धः । राक्षसादिभिरहिंस्योऽसि । तादृशं त्वां विश्वमिन्वे सर्वं व्याप्नुवत्यौ रोदसी द्यावापृथिव्यौ त्वा त्वामवतां । रक्षतां । आगत्योपविश्य च द्यावापृथिवीभ्यां रक्षितश्च सन् महे महते सौमनसाय सौमनस्याय देवान्दानादिगुणयुक्तानिंद्रादीन्यज । हविर्भिः पूजय ॥ निषीद । सदेरप्रतेरिति षत्वं । सौमनसाय । सुमनसो भावः सौमनसं । तस्येदमिति संबंधसामान्य इत्यण्प्रत्ययः । स चात्र भावलक्षणे संबंधविशेषे पर्यवस्यति । यद्वा हायनांतयुवादिभ्योऽण् । पा० ५. १. १३०. । इति भावेऽण् । युवादिष्वस्य पाठो द्रष्टव्यः ॥

तृतीयामृचमाह ॥

प्र सु विश्वा॑न्र॒क्षसो॒ धक्ष्य॑ग्ने॒ भवा॑ य॒ज्ञाना॑मभिश॒स्तिपावा॑ ।
अथा व॑ह॒ सोम॑पतिं॒ हरि॑भ्यामाति॒थ्यम॑स्मै चक्रमा
सु॒दाव्ने॑ ॥ ३ ॥

प्र । सु । विश्वा॑न् । र॒क्षसः॑ । धक्षि॑ । अ॒ग्ने॒ । भव॑ ।
य॒ज्ञाना॑ । अ॒भि॒श॒स्ति॒ऽपावा॑ ।
अथ॑ । आ । व॒ह॒ । सोम॑ऽपतिं । हरि॑ऽभ्यां । आ॒ति॒थ्यं ।
अ॒स्मै॒ । च॒कृ॒म॒ । सु॒ऽदाव्ने॑ ॥ ३ ॥

हे अग्ने विश्वान्सर्वान्रक्षसो राक्षसान्प्र सु धक्षि । प्रकर्षेण दह । दग्ध्वा च यज्ञानामस्माभिरनुष्ठेयानां यागानामभिशस्तिपावाभिशस्तेर्हिंसायाः पाता रक्षिता भव । अथानंतरं सोमपतिं सर्वेषां सोमानां पालकमिंद्रं हरिभ्यां तदीयाश्वाभ्यामावह । अस्मद्यज्ञं प्रापय । आगतायास्मै सुदाव्ने शोभनस्य फलस्य दात्र इंद्रायातिथ्यमतिथ्यर्हं सत्कारं चकृम । कुर्मः ॥ धक्षि । दह भस्मीकरणे । बहुलं छंदसीति शपो लुक् । ढत्वभष्भावकत्वषत्वानि । अभिशस्तिपावा । शसु हिंसायां । अस्मादभिपूर्वाद्भावे क्तिन् । अभिशस्तेः पातीत्यभिशस्तिपावा । पा रक्षणे । आतो मनिन्क्वनिबिति वनिप् । सोमपतिं । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं । सुदाव्ने । पूर्ववद्ददातेर्वनिप् । अल्लोपोऽन इत्यकारलोपः ॥

चतुर्थीमृचमाह ॥

प्रजावता वचसा वह्निरासा च हुवे नि च सत्सीह देवैः ।

वेषि होत्रमुत पोत्रं यजत्र बोधि प्रयंतर्जनितर्वसूनां ॥४॥

प्रजाऽवता । वचसा । वह्निः । आसा । आ । च । हुवे ।

नि । च । सत्सि । इह । देवैः ।

वेषि । होत्रं । उत । पोत्रं । यजत्र । बोधि । प्रऽयंतः ।

जनितः । वसूनां ॥ ४ ॥

प्रजावता यजमानेभ्यो दातव्यापत्यादिफलोपेतेन वचसा स्तोत्रेण स्तुतः सन् योऽग्निरासास्यस्थानीयया ज्वालया वह्निर्देवेभ्यो हविषां वोढा तमग्निमा च हुवे । आह्वयामि । आहूतः सन् त्वमिहास्मिन्कर्मणि देवैरन्यैः सह निसत्सि च । निषीद च । निषद्य च हे यजत्र यजनीयाग्ने होत्रं होत्रा क्रियमाणं कर्म उत अपि च पोत्रं पोत्रा कृतं कर्म च वेषि । कामयस्व । वसूनां धनानां प्रयंतः । प्रकर्षेण नियंतः । वसून्यस्मदायत्तानि कुर्वन् । जनितः । आहुतिद्वारा सर्वस्य जनयितरग्ने बोधि । अस्मान्बोधय ॥ आसा । पद्दन्नित्यादिनास्यशब्दस्यासन्नादेशः । सुपां सुलुगिति तृतीयाया डादेशः । टिलोप उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । हुवे । ह्वञो लटि बहुलं छंदसीति संप्रसारणं । बहुलं छंदसीति शपो लुक् । चवायोगे प्रथमेति निघातप्रतिषेधः । बोधि । बुध अवगमने । अस्मात्ण्यंताच्छंदस्युभयथेति हेरार्धधातुकत्वात्सेरनिटीति णिलोपः । हुझल्भ्यो हेर्धिः । धातोरंत्यलोपश्छांदसः । हेरपित्त्वात्तस्यैव स्वरः शिष्यते ॥

एकादशिनस्याग्नेयस्य पशोर्यथा विप्रस्येत्येषा पशुपुरोडाशस्य याज्या । सूत्रितं च प्रदानानामिति खंडे । यथा विप्रस्य मनुषो हविर्भिः प्र कारवो मनना वच्यमानाः । आ० ३. ७. ॥ इति ॥

तामेतां सूक्ते पंचमीमृचमाह ॥

यथा॒ विप्र॑स्य॒ मनु॑षो ह॒विर्भि॑र्दे॒वाँ अय॑जः क॒विभि॑ः क॒विः सन् ।

ए॒वा हो॑तः सत्यतर॒ त्वम॒द्याग्ने॑ म॒न्द्रया॒ जुह्वा॑ यजस्व ॥ ५ ॥

यथा॑ । विप्र॑स्य । मनु॑षः । ह॒विःऽभि॑ः । दे॒वान् । अय॑जः । क॒विऽभि॑ः । क॒विः । सन् ।

ए॒व । हो॒त॒रिति॑ । स॒त्य॒ऽत॒र॒ । त्वं । अ॒द्य । अग्ने॑ । म॒न्द्रया॑ । जुह्वा॑ । य॒ज॒स्व॒ ॥ ५ ॥

कविः क्रांतदर्शी सन्कविभिर्मेधाविभिर्ऋत्विग्भिः सह विप्रस्य मेधाविनो मनुषो मनोर्यज्ञे हविर्भिश्चरुपुरोडाशादिभिर्हे अग्ने यथा देवानयजः । एवमेव होतर्होमनिष्पादक सत्यतरातिशयेन सत्सु साधो अग्ने त्वमद्यास्मिन्यज्ञे मंद्रया हर्षयित्र्या जुह्वा होमसाधनभूतया स्रुचा यजस्व । देवान्हविर्भिः पूजय ॥ मनुषः । मन ज्ञाने । बहुलमन्यत्रापीति मनेरुसिप्रत्ययः ॥

॥ इति प्रथमस्य पंचमे चतुर्विंशो वर्गः ॥

कथेति पंचर्चं चतुर्थं सूक्तं त्रैष्टुभं गोतमस्यार्षमाग्नेयं । अनुक्रांतं च । कथेति ॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहास्य सूक्तविनियोगः ॥

तत्र प्रथमामृचमाह ॥

कथा दाशेमाग्नये कास्मै देवजुष्टोच्यते भामिने गीः ।
यो मर्त्येष्वमृत ऋतावा होता यजिष्ठ इत्कृणोति देवान् ॥ १ ॥

कथा । दाशेम । अग्नये । का । अस्मै । देवऽजुष्टा । उच्यते । भामिने । गीः ।
यः । मर्त्येषु । अमृतः । ऋतऽवा । होता । यजिष्ठः । इत् । कृणोति । देवान् ॥ १ ॥

अस्मा अग्नये कथा दाशेम । कथं हवींषि दद्याम । अग्नेरनुरूपं यज्ञं कर्तुमशक्ता वयमित्यर्थः । अथवास्मै भामिने तेजस्विनेऽग्नये देवजुष्टा सर्वैर्देवैः सेवितव्या वाक् स्तुतिरपि का कीदृश्युच्यते । तादृशीं स्तुतिमपि कर्तुं न शक्ता इत्यर्थः । अमृतो मरणरहित ऋतावा ऋतवान् सत्यवान्यज्ञवान् होता देवानामाह्वाता होमनिष्पादको वा यजिष्ठोऽतिशयेन यष्टा । एवंभूतो योऽग्निर्मर्त्येषु मरणधर्मस्वस्मासु वर्तमानः सन्देवानित्कृणोति । हविभिर्युक्तान्करोत्येव तादृशायाग्नये कथा दाशेमेति पूर्वेणान्वयः ॥ कथा । था हेतौ च छंदसीति थाप्रत्ययः । भामिने । भा दीप्तौ । अर्तिस्तुस्वित्यादिना मन्प्रत्ययः । ततो मत्वर्थीय इनिः । ऋतावा । छंदसीवनिपाविति मत्वर्थीयो वनिप् । अन्येषामपि दृश्यत इति दीर्घत्वं ॥

द्वितीयामृचमाह ॥

यो अध्वरेषु शंतम ऋतावा होता तमू नमोभिरा कृणुध्वं ।
अग्निर्यद्वेर्मर्ताय देवान्त्स चा बोधाति मनसा यजाति ॥ २॥

यः । अध्वरेषु । शंऽतमः । ऋतऽवा । होता । तं । उं इति । नमःऽभिः । आ । कृणुध्वं ।
अग्निः । यत् । वेः । मर्ताय । देवान् । सः । च । बोधाति । मनसा । यजाति ॥ २ ॥

योऽग्निरध्वरेषु यागेषु शंतमोऽतिशयेन सुखकारी ऋतावा सत्यवान् । यथार्थदर्शीत्यर्थः । होता देवानामाह्वाता भवति । हे ऋत्विग्यजमानाः । यूयं तमू तमेवाग्निं नमोभिः स्तोत्रैरा-कृणुध्वं । अभिमुखीकुरुत । यद्यदायमग्निर्मर्ताय मनुष्याय यजमानाय देवान्वेः । वेति गच्छति । तदानीं सोऽग्निर्यष्टव्या-न्सर्वान्देवान्बोधाति च ॥ जानाति च । ज्ञात्वा च मनसा नमसा तान्यजाति । हविर्भिः पूजयति । अतस्तमेवाग्निमाकृणुध्वमिति योज्यं ॥ वेः । वी गत्यादिषु । छंदसि लुङ्लङ्लिट इति वर्तमाने लङ् । तिङां तिङो भवंतीति प्रथमपुरुषैकवचनस्य मध्यमपुरुषैकवचनादेशः । बोधाति । बुध अवगमने । लेट्या-डागमः । शपः पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । चवायोगे प्रथमेति निघातप्रतिषेधः । मनसा । सकारनकारयोः स्थानविपर्ययः ॥

तृतीयामृचमाह ॥

स हि क्रतुः स मर्यः स साधुर्मित्रो न भूदद्भुतस्य रथीः ।
तं मेधेषु प्रथमं देवयन्तीर्विश उप ब्रुवते दस्ममारीः ॥ ३ ॥

सः । हि । क्रतुः । सः । मर्यः । सः साधुः । मित्रः न ।
भूत । अद्भुतस्य । रथीः ।
तं । मेधेषु । प्रथमं । देवऽयन्तीः । विशः । उप । ब्रुवते । दस्मं ।
आरीः ॥ ३ ॥

स ह्यग्निः क्रतुः कर्मणां कर्ता । स एव मर्यो मारयिता विश्वस्योपसंहर्ता साधुः साधयितोत्पादयितापि स एवाद्भुतस्याभूतस्यालब्धस्य धनस्य रथी रंहयिता प्रापयिता भूत् । भवति । तत्र दृष्टांतः । मित्रो न । तथा सखा धनानि प्रापयति तद्वत् । एवंभूतो योऽग्निस्तमेव मेधेषु यज्ञेषु देवयंतीर्देवयंत्यो देवानात्मन इच्छंत्यो विशः प्रजाः प्रथममुपब्रुवते । स्तुतिभिरुपेत्य प्रधानभूत इति कथयंति । कीदृश्यो विशः । दस्मं दर्शनीयं तमग्निमारीर्गच्छंत्यः । भजंत्य इत्यर्थः ॥ मर्यः मृङ् प्राणत्यागे । अस्मादंतर्भावितण्यर्थाच्छंदसि निष्टर्क्येत्यादौ निपातनाद्यत् । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि द्रष्टव्यः । यतोऽनाव इत्याद्युदात्तत्वं । देवयंतीः । वा छंदसीति पूर्वसवर्णदीर्घत्वं । आरीः । ऋ गतौ । जनिघसिभ्यामिण् इति बहुलग्रहणादस्मादपीण्प्रत्ययः । कृदिकारादक्तिन इति ङीष् । वा छंदसीति पूर्वसवर्णदीर्घत्वं । व्यत्ययेनाद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

स नो॑ नृणां नृत॑मो रि॒शादा॑ अ॒ग्निर्गिरोऽव॑सा वेतु धी॒तिं ।
तना॑ च॒ ये म॒घवा॑नः॒ शवि॑ष्ठा॒ वाज॑प्रसूता इ॒षय॑न्त॒ मन्म॑ ॥ ४ ॥

सः । नः॒ । नृणां । नृऽत॑मः । रि॒शादाः॑ । अ॒ग्निः । गिरः॑ । अव॑सा । वे॒तु॒ । धी॒तिं ।
तना॑ । च॒ । ये । म॒घऽवा॑नः । शवि॑ष्ठाः । वाज॑ऽप्रसूताः । इ॒षय॑न्त । मन्म॑ ॥ ४ ॥

नृणां यज्ञस्य नेतृणां मध्ये नृतमोऽतिशयेन नेता रिशादा रिशानां शत्रूणामत्ता भक्षयिता । यद्वा रिशतां हिंसतामसिता निरसिता । एवंविधः सोऽग्निर्नोऽस्माकं गिरः स्तुतीरवसा हविर्लक्षणेनान्नेन युक्तां धीतिं कर्म च वेतु । कामयतां । अपि च ये यजमानास्तना । धननामैतत् । विस्तृतेन धनेन मघवानो धनवंतः शविष्ठा अतिशयेन बलिनश्च संतो वाजप्रसूताः प्रसूतं प्रेरितं वाजो हविर्लक्षणमन्नं यैस्तादृशा भूत्वा मन्माग्नेर्मननरूपं स्तोत्रमिषयंत । एषयंति । ऋत्विग्भिः कारयितुमिच्छंति । तेषामपि स्तुतिमग्निः कामयतामिति भावः ॥ नृणां । नृ चेत्युभयथाभावाद्दीर्घाभावः । नामन्यतरस्यामिति नाम उदात्तत्वं । तना । तनु विस्तारे । पचाद्यच् । तृतीयैकवचनस्य सुपां सुलुगित्याकारः । वृषादेराकृतिगणत्वादाद्युदात्तत्वं । शविष्ठाः । शव इति बलनाम । अस्मायामेधेति मत्वर्थीयो

निनि. । तत आतिश्यायनिक इष्ठन् । विन्मतोर्लुगिति विनो लुक् । टेरिति टिलोपः । इष्ठनो नित्त्वादाद्युदात्तत्वं । इषयंत । इषु इच्छायां । अस्माण्ण्यंताच्छांदसो लङ् । संज्ञापूर्वकस्य विधेरनित्यत्वाण्णौ लघूपधगुणाभावः । अदुपदेशाल्ल-सार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते ।

पंचमीमृचमाह ॥

एवाग्निर्गोतमेभिर्ऋतावा विप्रेभिरस्तोष्ट जातवेदाः ।
स एषु द्युम्नं पीपयत्स वाजं स पुष्टिं याति जोषमा
चिकित्वान् ॥ ५ ॥

एव । अग्निः । गोतमेभिः । ऋतऽवा । विप्रेभिः । अस्तोष्ट ।
जातऽवेदाः ।
सः । एषु । द्युम्नं । पीपयत् । सः । वाजं । सः । पुष्टिं ।
याति । जोषं । आ । चिकित्वान् ॥ ५ ॥

ऋतावा ऋतवान्यज्ञवान् जातवेदा जातधनो जातप्रज्ञो वायमग्निर्विप्रेभिर्मेधाविभिर्गोतमेभिर्गोतमैर्ऋषिभिरेवमुक्तेन प्रकारेणास्तोष्ट । स्तुतोऽभूत् । स्तुतश्च सोऽग्निरेषु गोतमेषु द्युम्नं द्योतमानं सोमं पीपयत् । अपिबत् । यद्वा । तानृषीनपाययत् । तथा सोऽग्निर्वाजं हविर्लक्षणमन्नं पीपयदीत्येव । एवं समलक्षणं चरुपुरोडाशादिलक्षणं हविश्च स्वीकृत्य सोऽग्निर्जोषमस्माभिः कृत सेवनमाचिकित्वान् । आ संमताज्जानन् पुष्टिं याति । पोषं प्राप्नोति । यद्वा । अस्माकं धनानि पोषं प्रापयतु ॥

भातमेभिः। ऋष्यंधकवृष्णिकुरुभ्यश्चेति विहितस्याणोऽत्रिभृगुकुत्सवसिष्ठगोतमांगिरोभ्यश्च। पा° २. ४. ६५.। इति बहुषु लुक्। अस्तोष्ट। स्तौतेः कर्मणि लुङि चिणभावश्छांदसः। पीपयत्। पा पाने। ण्यंताल्लुङि च्लेश्चङादि। जोषं। जुषी प्रीतिसेवनयोः। भावे घञ्। ञित्वादाद्युदात्तत्वं॥

॥ इति प्रथमस्य पंचमे पंचविंशो वर्गः॥

अभि त्वेति पंचर्चं पंचमं सूक्तं गोतमस्यार्षमाग्नेयं गायत्रं। तथा चानुक्रांतं। अभि त्वा गोयत्रं त्विति। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

अभि त्वा गोतमा गिरा जातवेदो विचर्षणे। द्युम्नैरभि प्र णोनुमः॥ १॥

अभि। त्वा। गोतमाः। गिरा। जातऽवेदः। विऽचर्षणे। द्युम्नैः। अभि। प्र। नोनुमः॥ १॥

हे जातवेदो जातानां वेदितर्विचर्षणे विशेषेण सर्वस्य द्रष्टः। एवंभूताग्ने त्वा त्वां गोतमा अस्य सूक्तस्य द्रष्टा गोतम ऋषिः। ऋषेरेकत्वेऽपि पूजार्थं बहुवचनं। गिरा स्तोत्रलक्षणया वाचाभ्याभिमुख्येनास्तौदिति शेषः। तद्वयमपि त्वां द्युम्नैस्त्वदीयगुणप्रकाशकैर्मंत्रैरभि प्रणोनुमः। आभिमुख्येन पुनः पुनः स्तुमः॥ नोनुमः। णु स्तुतौ। अस्माद्यङ्लुगंताल्लट्। उपसर्गादसमासेऽपीति णत्वं॥

द्वितीयामृचमाह ॥

तमु त्वा गोतमो गिरा रायस्कामो दुवस्यति ।

द्युम्नैरभि प्र णोनुमः ॥ २ ॥

तं । ऊं इति । त्वा । गोतमः । गिरा । रायःऽकाम ।

दुवस्यति । द्युम्नैः । अभि । प्र । नोनुमः ॥ २ ॥

रायस्कामो धनकामो गोतमो यमग्निं गिरा स्तुत्या दुवस्यति । परिचरति । तमु तमेव त्वां द्युम्नैर्द्योतमानैः स्तोत्रैराभिमुख्येन पुनः पुनः स्तुमः ॥ रायस्कामः । रायो धनानि कामयत इति रायास्कामः । कर्मण्यण् । तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक् । ऊडिदमित्यादिना पुर्वपदस्य विभक्तेरुदात्तत्वं । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । अतः कृकमिकंसकुंभेति विसर्जनीयस्य सत्वं । दुवस्यति । दुवस उपतापे परिचरणे च । कंड्वादिः ॥

तृतीयामृचमाह ॥

तमु त्वा वाजसातममंगिरस्वद्धवामहे ।

द्युम्नैरभि प्र णोनुमः ॥ ३ ॥

तं । ऊं इति । त्वा । वाजऽसातमं । अंगिरस्वत् । हवामहे ।

द्युम्नैः । अभि । प्र । नोनुमः ॥ ३ ॥

हे अग्ने वाजासातमं वाजानामतिशयेन सनितारं दातारं तमेव त्वा त्वामंगिरस्वत् । अंगिरस इव हवामहे । आह्वयामः ।

शिष्टं गतं ॥ वाजसातमं । षणु दाने । जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं । अतिशयेन वाजसा वाजसातमः । तमपः पित्त्वादनुदात्तत्वे कृदुत्तरपदप्रकृतिस्वर एव शिष्यते । अंगिरस्वत् तेन तुल्यमिति वतिः । नभोऽङ्गिरोमनुषां वत्युपसंख्यानमिति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः ॥

चतुर्थीमृचमाह ॥

तमु त्वा वृत्रहंतमं यो दस्यूँरवधूनुषे ।
द्युम्नैरभि प्र णोनुमः ॥ ४ ॥

तं । ऊं इति । त्वा । वृत्रहन्ऽतमं । यः । दस्यूँन् ।
अवऽधूनुषे । द्युम्नैः । अभि । प्र । नोनुमः ॥ ४ ॥

हे अग्ने दस्यून् उपक्षपयितॄन् राक्षसादीन्यस्त्वमवधूनुषे । अवचालयसि स्थानात्प्रच्यावयसि वृत्रहंतमं वृत्राणां पाप्मानामतिशयेन हंतारं तमु त्वा तमेव त्वां द्युम्नैरित्यादि पूर्ववत् ॥ वृत्रहंतमं । अतिशयेन वृत्रहा वृत्रहंतमः । पदसंज्ञायां नलोपे नाह्नस्य । पा० ८.२.१७. । इति तमपो नुट् । दस्यून् । दीर्घादटि समानपाद इति नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेत्यकारः सानुनासिकः ॥

पंचमीमृचमाह ॥

अवोचाम रहूगणा अग्नये मधुमद्वचः ।
द्युम्नैरभि प्र णोनुमः ॥ ५ ॥

अवो॑चाम । रहू॑गणाः । अ॒ग्नये॑ । मधु॑ऽमत् । वचः॑ ।

द्यु॒म्नैः । अ॒भि । प्र । नो॒नु॒मः॒ ॥ ५ ॥

ऋषिः कृतं स्तोत्रमनयोपसंहरति । रहूगणा रहूगणस्य पुत्रा वयं गोतमा अग्नये अंगनादिगुणयुक्ताय देवाय मधुमद्वचो माधुर्योपेतं वचनमवोचाम । प्रावादिष्म । तद्वचनरूपैर्द्युम्नैर्द्योतमानैः स्तोत्रैः पुनः पुनरग्निं वयमभिप्रणोनुमः । आभिमुख्येन प्रकर्षेण स्तुमः ।

॥ इति प्रथमस्य पंचमे षड्विंशो वर्गः ॥

हिरण्यकेश इति द्वादशर्चं षष्ठं सूक्तं । रहूगणपुत्रस्य गोतमस्यार्षं । अत्रानुक्रम्यते । हिरण्यकेशो द्वादशाद्यो तृचौ त्रैष्टुभौष्णिहौ पूर्वोऽग्नये वा मध्यमायेति । पूर्वंच गायत्रं त्वित्युक्तत्वादिदमपि गायत्रं सूक्तं । एतावांस्तु विशेषः । आद्यस्तृचस्त्रैष्टुभः । द्वितीयस्त्वौष्णिहः । प्रथमतृचस्य मध्यमस्थानो वैद्युतोऽग्निः शुद्धाग्निर्वा देवता । शिष्टा नवर्चः केवलाग्निदेवताकाः ॥ प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदस्याश्विनशस्त्रे चाद्यस्तृचः । सूत्रितं च । हिरण्यकेश इति तिस्रोऽपश्यमस्य महत इति सूक्ते । आ० ४. १३. । इति ॥ कारीर्यामिग्नेर्धाम छदो हिरण्यकेश इति द्वे ऋचौ याज्यानुवाक्ये । सूत्रितं च । हिरण्यकेशो रजसो विसार इति द्वे त्वं त्या चिदच्युता धाम ते विश्वं भुवनमधिश्रितं । आ० २. १३. । इति ॥

तत्र प्रथमामृचमाह ॥

हिरण्यकेशो रजसो विसारेऽहिर्धुनिर्वात इव ध्रजीमान् ।

शुचिभ्राजा उषसो नवेदा यशस्वतीरपस्युवो न सत्याः ॥१॥

हिरण्यऽकेशः । रजसः । विऽसारे । अहिः । धुनिः ।

वातःऽइव । ध्रजीमान् ।

शुचिऽभ्राजाः । उषसः । नवेदाः । यशस्वतीः । अपस्युवः ।

न । सत्याः ॥ १ ॥

हिरण्यकेशो हितरमणीयाः केशस्थानीया ज्वाला यस्य स तथोक्तः । सुवर्णवद्रोचमानज्वालो वा । अहिरागत्य हंता मेघानां धुनिस्तेषां कंपयिता वात इव वायुरिव ध्रजीमान् शीघ्रगतियुक्तः । एवंभूतो वैद्युतोऽग्नि रजस उदकस्य विसारे विसरणे मेघान्निर्गमने निमित्तभूते सति शुचिभ्राजाः शोभनदीप्तिः सन् मेघाज्जलानि निर्गमयितुं जानाति । उषस उषोदेवता नवेदाः । न विदंति इति नवेदाः । मेघादुदकस्य निःसारणमग्निरेव जानाति उषसस्तु न जानंतीत्यर्थः । अज्ञाने दृष्टांतः । यशस्वतीरन्नयुक्ता अन्नवत्योऽपस्युवोऽपः कर्मात्मन इच्छंत्यः सत्या अवितथारंभा न । एवंभूताः प्रजा इव । अत्रोषसामज्ञानेनाग्निः प्रशस्यते न तु ता निंद्यंते । न हि निंदा निंद्यं निंदितुं अपि तु स्तुत्यं स्तोतुमिति न्यायात् ॥ ध्रजीमान् । ध्रज गतौ । इन् सर्वधातुभ्य इति भाव इन्प्रत्ययः । ततो मतुप् । तस्य पित्त्वादनुदात्तत्व इनो नित्त्वात्प्रातिपदिकस्याद्युदात्तत्वं । नवेदाः । नञ्पूर्वाद्वेत्तेः पचाद्यच् । नभ्राण्नपा-

दित्यादिना नञः प्रकृतिभावः । अपस्युवः । अपस्शब्दात्सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । तन्वादीनां छंदसि बहुलमुपसंख्यानमित्युवङ् ॥

द्वितीयामृचमाह ॥

आ ते सुपर्णा अमिनंतँ एवैः कृष्णो नोनाव वृषभो यदीदं ।
शिवाभिर्न स्मयमानाभिरागात्पतंति मिहः स्तनयंत्यभ्रा ॥ २ ॥

आ । ते । सुऽपर्णाः । अमिनंत । एवैः । कृष्णः । नोनाव ।
वृषभः । यदि । इदं ।
शिवाभिः । न । स्मयमानाभिः । आ । अगात् । पतंति ।
मिहः । स्तनयंति । अभ्रा ॥ २ ॥

हे अग्ने ते तव सुपर्णाः शोभनपतना रश्मय एवैर्गंतृभिर्मरुद्भिः सहामिनंत । आ समंतान्मेघं हिंसंति । वर्षणार्थं ताडयंति । प्रवृत्तस्य कृष्णः कृष्णवर्णो वृषभो वर्षिता मेघो नोनाव । भृशं शब्दमकरोत् । यदि यदेदमीदृशं कर्म तदानीं शिवाभिर्न सुखकारिणीभिः स्मयमानाभिर्हसनवतीभिः कांतिभिरिव शुभ्रवर्णाभिः फेनयुक्ताभिरद्भिर्विद्युद्भिर्वा सहागात् । वैद्युताग्निप्रेरितः पर्जन्य आगच्छति । तदनंतरं मिह आपः पतंति । दिवः सकाशात्प्रवृष्टा भवंति । अभ्राभ्राण्यद्भिः पूर्णा मेघाः स्तनयंति । इतस्ततः शब्दं कुर्वंति ॥ अमिनंत । मीञ् हिंसायां । क्र्यादिकः । व्यत्ययेनांतादेशः । ईर्षा अच्चादित्वाप्रकृतिभावः । अणोऽप्रगृह्यस्य । पा० ८. ४. ५७ ।

इति वैकल्पिकमवसाने विधीयमानमनुनासिकत्वं व्यत्ययेनात्र संहितायामपि द्रष्टव्यं। नोनाव। नौतेर्यङ्लुगंतात्लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः। स्मयमानाभिः। ष्मिङ् ईषद्धसने। शपः पित्त्वादनुदात्तत्वं। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। स्तनयंति। स्तन शब्दे। चुरादिरदंतः। पतंति स्तनयंतीत्यनयोः पादादित्वादाख्यादित्वाच्च निघाताभावः॥

तृतीयामृचमाह॥

यदीमृतस्य पयसा पियानो नयन्नृतस्य पथिभी रजिष्ठैः।
अर्यमा मित्रो वरुणः परिज्मा त्वचं पृंचंत्युपरस्य योनौ॥३॥

यत्। ईं। ऋतस्य। पयसा। पियानः। नयन्। ऋतस्य।
पथिऽभिः। रजिष्ठैः।
अर्यमा। मित्रः। वरुणः। परिऽज्मा। त्वचं। पृंचंति।
उपरस्य। योनौ॥ ३॥

यदीं यदायमग्निर्ऋतस्योदकस्य पयसा पयोवत्सारभूतेन रसेन पियानो जगदाप्ययनं कुर्वन्। आप्यायितं च जगदृतस्योदकस्य संबंधिभी रजिष्ठैर्ऋजुतमैः पथिभिर्मार्गैः स्नानपानादिभिर्नयन् प्रापयन्वर्तते। तदानीमर्यमा मित्रो वरुणश्च परिज्मा परितो गंता मरुद्गणश्चोपरस्य मेघस्य योनौ वृष्ट्युदकोत्पत्तिस्थाने त्वचं पृंचंति। वृष्ट्युदकस्याच्छादकं प्रदेशं स्वकीयैरायुधैः संयोजयंति। उद्घाटयंतीति यावत्॥ पियानः। स्फायी ओप्यायी वृद्धौ। बहुलं छंदसीति शपो लुक्। धात्वोर्व्यत्ययेन पीभावः। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः

शिष्यति । रजिष्ठैः ऋजुशब्दादिष्ठनि विभाषर्जोश्छंदसि । पा० ६. ४. १६२. । इत्यकारस्य रत्वं । टेरिति टिलोपः । पृंचंति । पृची संपर्के । रौधादिकः ।

प्रातरनुवाकस्याग्नेये क्रतावौष्णिहे छंदस्याश्विनशस्त्रे चाग्ने वाजस्येत्याद्यस्तिस्र ऋचः । सूचितं च । अग्ने वाजस्येति तिस्रः पुरु त्वा त्वामग्ने । आ४. १३. । इति ॥

तृचे प्रथमां सूक्ते चतुर्थीमृचमाह ॥

अग्ने वाजस्य गोमत ईशानः सहसो यहो ।

अस्मे धेहि जातवेदो महि श्रवः ॥ ४ ॥

अग्ने । वाजस्य । गोऽमतः । ईशानः । सहसः । यहो इति ।

अस्मे इति । धेहि । जातऽवेदः । महि । श्रवः ॥ ४ ॥

हे सहसो यहो बलस्य पुत्राग्ने गोमतो बहुभिर्गोभिर्युक्तस्य वाजस्यान्नस्येशान ईश्वरस्त्वमसि । अतोऽस्मे अस्मासु हे जातवेदो जातधन जातानां वेदितर्वाग्ने महि प्रभूतं श्रवोऽन्नं धेहि स्थापय ॥ सहसो यहो । परांगवद्भावादामंत्रितस्य चेति पष्ठ्यामंत्रितसमुदायो निहन्यते । अस्मे । सुपांसुलुगिति सप्तम्याः शे आदेशः ॥

पंचमीमृचमाह ॥

स इ॒धा॒नो वसु॑ष्क॒विर॒ग्निरी॒ळेन्यो॑ गि॒रा ।
रे॒वद॒स्मभ्यं॑ पुर्वणीक दीदिहि ॥ ५ ॥

सः । इ॒धा॒नः । वसुः॑ । क॒विः । अ॒ग्निः ई॒ळेन्यः॑ । गि॒रा ।
रे॒वत् । अ॒स्मभ्य॑ं । पु॒रु॒ऽअ॒नी॒क॒ । दी॒दि॒हि ॥ ५ ॥

सोऽग्निरिधानो दीपनशीलो वसुर्निवासयिता सर्वेषां कविः क्रांतदर्शनो मेधावी वा गिरा स्तोत्ररूपया वाचेळेन्यः स्तोतव्यो भवति । हे पुर्वणीक । अनीकं मुखं । पुरुभिर्बहुभिरनीकस्थानीयाभिर्ज्वालाभिर्युक्ताग्ने। अस्मभ्यं रेवद्धनयुक्तमन्नं यथा भवति तथा दीदिहि । दीप्यस्व ॥ इधानः । ञि इंधी दीप्तौ । ताच्छीलिकश्चानश् । बहुलं छंदसीति शपो लुक् । ईळेन्यः । ईड स्तुतौ । औणादिक एन्यप्रत्ययः । रेवत् । रयेर्मतौ बहुलमिति संप्रसारणं । छंदसीर इति मतुपो वत्वं । रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यं । पा० ६. १. १७६. १. । इति मतुप उदात्तत्वं । दीदिहि । दीदेतिश्छांदसो दीप्तिकर्मा ॥

षष्ठीमृचमाह ॥

क्षपो॑ राजन्नु॒त त्मनाग्ने॒ वस्तो॑रु॒तोषसः॑ ।
स ति॑ग्मजंभ र॒क्षसो॑ दह॒ प्रति॑ ॥ ६ ॥

क्षपः॑ । रा॒ज॒न् । उ॒त । त्मना॑ । अग्ने॑ । वस्तोः॑ । उ॒त । उ॒षसः॑ ।
सः । ति॒ग्म॒ऽज॒ंभ॒ । र॒क्षसः॑ द॒ह॒ प्रति॑ ॥ ६ ॥

हे राजन् राजनशीलाग्ने क्षपः । क्षपय । राक्षसादीन् । स्वकीयैः पुरुषैर्बाधस्व । उत अपि च त्मना न केवलमन्यैरेवा-त्मना च तान्बाधस्व । कदेति चेत् उच्यते । वस्तोः । सर्वाण्य-हानि । उत अपि चोषसः । उषःकालोपलक्षिता रात्रीः । अत्यंतसंयोगे द्वितीया । सर्वेष्वहःसु सर्वासु रात्रिषु चेत्यर्थः । हे तिग्मजंभ तीक्ष्णमुखाग्ने रक्षसो राक्षसानुक्तप्रकारेण क्षपयित्वा स एव त्वं प्रतिदह । प्रत्येकं दह । न किंचिद्दग्धव्य-मित्युदास्वेत्यर्थः ॥ क्षपः । क्षपि क्षांत्यां । लोडर्थे छांदसो लङ् । छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । उदात्तनिवृत्तिस्वरेण शप उदात्तत्वं । त्मना । मंत्रेष्वाङ्यादेरात्मनः इत्याकारलोप । रक्षसः । रक्षपालने । रक्षितव्यमस्मादिति रक्षः । भीमादित्वात् । पा० ३. ४. ७४. । अपादानेऽसिप्रत्ययः । क्षरतेर्वा ण्यंतादसिप्रत्यये णिलोपो वर्णविपर्ययश्च । अस्य च रक्षःशब्दस्यासिप्रत्ययांतत्वात्प्रत्ययस्वर एव शिष्यते ॥

॥ इति प्रथमस्य पंचमे सप्तविंशो वर्ग ॥

प्रातरनुवाकस्याग्नेये क्रतौ गायत्रे च्छंदस्यवा नो अग्न इत्याद्याः षडृचः । सूत्रितं च । अवा नो अग्न इति षढग्नि-मीडेऽग्निं दूतं । आ० ४. १३. । इति ॥ आश्विनशस्त्रे चैताः शंसनीयाः प्रातरनुवाकातिदेशात् ॥

षट्सु प्रथमां सूक्ते सप्तमीमृचमाह ॥

अवा॑ नो अग्न ऊ॒तिभि॑र्गाय॒त्रस्य॒ प्रभ॑र्मणि ।

विश्वा॑सु धी॒षु व॑न्द्य ॥ ७ ॥

अव । नः । अग्ने । ऊतिऽभिः । गायत्रस्य । प्रऽभर्मणि ।

विश्वासु । धीषु । वंद्य ॥ ७ ॥

विश्वासु धीषु सर्वेषु कर्मसु वंद्य स्तुत्य हे अग्ने गायत्रस्य गायत्रसाम्नो गायत्रीछंदस्कस्य सूक्तस्य वा प्रभर्मणि प्रभरणे संपादने निमित्तभूते सति नोऽस्मानूतिभिस्त्वदीयैः पालनैरव । रक्ष ॥ अवा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

अष्टमीमृचमाह ॥

आ नो अग्ने रयिं भर सत्रासाहं वरेण्यं ।

विश्वासु पृत्सु दुष्टरं ॥ ८ ॥

आ । नः । अग्ने । रयिं । भर । सत्राऽसहं । वरेण्यं ।

विश्वासु । पृऽतसु । दुस्तरं ॥ ८ ॥

हे अग्ने रयिं धनं नोऽस्मभ्यमाभर । प्रयच्छ । कीदृशं । सत्रासाहं । सत्रा सह युगपदेव दारिद्र्यस्य नाशकं । वरेण्यं । सर्वैर्वरणीयं । विश्वासु । पृत्सु सर्वेषु संग्रामेषु दुष्टरं । शत्रुभिस्तरीतुमशक्यं ॥ सत्रासाहं । छंदसि सह इति ण्विः । वरेण्यं । वृङ एण्यः । पृत्सु । पदादिषु मांस्पृत्स्नूनामुपसंख्यानमिति पृतनाशब्दस्य पृद्भावः । सावेकाच इति विभक्तेरुदात्तत्वं ॥

आयुष्कामेष्ट्यां प्रथमस्याज्यभागस्यानुवाक्या आ नो अग्न इति । सूत्रितं च । आयुष्कामेष्ट्यां जीवातुमंतावा नो अग्ने सुचेतुना । आ० २. १०. । इति ॥ महापितृयज्ञेऽप्येषैव प्रथमाज्यभागानुवाक्या । सूत्रितं च । जीवातुमंतौ सव्योत्तर्युपस्थाः । आ० २, १९. । इति ॥

तामेतां सूक्ते नवमीमृचमाह ॥

आ नो अग्ने सुचेतुना रयिं विश्वायुपोषसं ।

मार्डीकं धेहि जीवसे ॥ ९ ॥

आ । नः । अग्ने । सुऽचेतुना । रयिं । विश्वायुऽपोषसं ।

मार्डीकं । धेहि । जीवसे ॥ ९ ॥

हे अग्ने नोऽस्माकं जीवसे जीवनाय सुचेतुना शोभनेन ज्ञानेन युक्तं रयिं धनमाधेहि । आस्थापय । कीदृशं । मार्डीकं । मृडीकं सुखं तद्धेतुभूतं । विश्वायुपोषसं सर्वस्मिन्नायुषि देहादेः पोषकं । यावज्जीवमस्मदुपभोगपर्याप्तमित्यर्थः ॥ सुचेतुना । चिती संज्ञाने । औणादिक उप्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । विश्वायुपोषसं । विश्वमायुर्यस्मिन् शरीरादौ तद्विश्वायु । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । तत्पुष्णातीति विश्वायुपोषाः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यसुन् पूर्वपदप्रकृतिस्वरत्वं च । सकारलोपश्छांदसः । दीर्घायुत्वाय वर्चस इति यथा ॥

दशमीमृचमाह ॥

प्र पूतास्तिग्मशोचिषे वाचो गोतमाग्नये ।

भरस्व सुम्नयुर्गिरः ॥ १० ॥

प्र । पूताः । तिग्मऽशोचिषे । वाचः । गोतम । अग्नये ।

भरस्व । सुम्नऽयुः । गिरः ॥ १० ॥

हे गोतम सूक्तद्रष्टः सुम्नयुः सुम्नं धनमात्मन इच्छंस्त्वं तिग्मशोचिषे तीक्ष्णज्वालायाग्नये पूताः शुद्धा वाचोऽग्ने र्गृणान् सम्यगभिदधतीर्गिरः स्तुतीः प्रभरस्व। प्रकर्षेण संपादय॥ तिग्मशोचिषे। तिज निशाने। युजिरुचितिजां कुत्वं चेति मक्। तिग्मानि शोचींषि यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। सुम्नयुः। सुम्नशब्दात्क्यचि न छंदस्यपुत्रस्येतीत्वदीर्घयोः प्रतिषेधः। क्याच्छंदसीत्युप्रत्ययः॥

एकादशीमृचमाह॥

यो नो॑ अग्नेऽभि॒दास॒त्यन्ति॑ दू॒रे प॑दी॒ष्ट सः।

अ॒स्माक॒मिद्वृ॒धे भ॑व॥ ११॥

यः। नः। अ॒ग्ने॒। अ॒भि॒ऽदास॑ति। अन्ति॑। दू॒रे। प॒दी॒ष्ट।

सः। अ॒स्माक॑म्। इत्। वृ॒धे। भ॒व॒॥ ११॥

हे अग्ने नोऽस्मान् अंत्यंतिके समीपे दूरे विप्रकृष्टदेशेऽविस्थितः सन् यः शत्रुरभिदासति। उपक्षपयति। स शत्रुः पदीष्ट। पततु नश्यतु। त्वं चास्माकमित् अस्माकमेव वृधे वर्धनाय भव॥ अभिदासति। दसु उपक्षये। अस्मात्ण्यंतात्लटि छंदस्युभयथेति शप आर्द्धधातुकत्वात्सेरनिटीति णिलोपः। अंतिकादिलोपो बहुलमिति वक्तव्यमित्यंतिकशब्दस्य ककारलोपः। वृधे। वृधु वृद्धौ। संपदादिलक्षणो भावे क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं।

द्वादशीमृचमाह ॥

सहस्राक्षो विचर्षणिरग्नी रक्षांसि सेधति ।

होता गृणीत उक्थ्यः ॥ १२ ॥

सहस्रऽअक्षः । विऽचर्षणिः । अग्निः । रक्षांसि । सेधति ।

होता । गृणीते । उक्थ्यः ॥ १२ ॥

सहस्राक्षोऽसंख्यातज्वालः । विचर्षणिर्विशेषेण सर्वस्य द्रष्टायमग्नी रक्षांसि सेधति । प्रतिषेधति । यज्ञान्निर्गमयति । स चाग्निरुक्थ्य उक्थ्यैः शस्त्रैरस्माभिः स्तूयमानः सन् होता देवानामाह्वाता भूत्वा गृणीते । तान्स्तौति ॥ सहस्राक्षः । बहुव्रीहौ सक्थ्यक्ष्णोरिति षच् समासांतः । सति शिष्टत्वात्तस्यैव स्वरः शिष्यते । सेधति । षिधु गत्यां । अत्र केवलोऽपि सोपसर्गार्थो द्रष्टव्यः । गृणीते । गृ शब्दे । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥

॥ इति प्रथमस्य पंचमेऽष्टाविंशो वर्गः ॥

इत्येति षडृचं सप्तमं सूक्तं गोतमस्यार्षमैंद्रं पंक्तिछंदस्कं । अनुक्रांतं च । इत्या षोडशैंद्रं पांक्तं हि । हिशब्दप्रयोगात्तुह्यादिपरिभाषयेदमुत्तरे च द्वे पंक्तिछंदस्के ॥ पृष्ठ्यषडहस्य पंचमेऽहनि मरुत्वतीय इदं सूक्तं । सूत्रितं च । अवितासीत्या हींद्र पिब तुभ्यमिति मरुत्वतीयं । आ० ७. १२. । इति ॥ चतुर्विंशेऽहन्यच्छावाकस्याद्यस्तृचो वैकल्पिकोऽनुरूपः । होत्रकाणामिति खंडे सूत्रितं । इत्या हि सोम इन्मद उभे यदिंद्र रोदसी इति । महाव्रते निष्केवल्यस्य दक्षिणपक्ष इत्या हीत्येका ।

ऽथैव पंचमारभ्यते सूत्रितं । इत्था हि सोम इन्मद इति पंक्तिरिति ॥

तामेतां सूक्ते प्रथमामृचमाह ॥

इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनं ।
शविष्ठ वज्रिन्नोजसा पृथिव्या निः शशा अहिमर्चन्ननु
स्वराज्यं ॥ १ ॥

इत्था । हि । सोमे । इत् । मदे । ब्रह्मा । चकार । वर्धनं ।
शविष्ठ । वज्रिन् । ओजसा । पृथिव्याः । निः । शशाः ।
अहिं । अर्चन् । अनु । स्वऽराज्यं ॥ १ ॥

हे शविष्ठ । अतिशयेन बलवन् वज्रिन्वज्रवन्निंद्र । इत्था हि । इत्थमेव । अनेन शास्त्रोक्तप्रकारेणैव मदे मदकरे हर्षकरे सोमे त्वया पीते सति ब्रह्मा ब्राह्मणः स्तोता वर्धनं तव वृद्धिकरं स्तोत्रं चकार । अनेन सूक्तेन कृतवान् । इदित्येतत्पादपूरणं । अतस्त्वमोजसा बलेन पृथिव्याः सकाशादहिमागत्य हंतारं वृत्रं निःशशः । निःशेषेणाशाः । मा बाधस्वेति शासनं कृत्वा पृथिव्याः सकाशान्निरगमय इत्यर्थः । किं कुर्वन् । स्वराज्यं स्वस्य राज्यं राजत्वमन्वनुलक्ष्यार्चन् पूजयन् । स्वस्य स्वामित्वं प्रकटयन्नित्यर्थः ॥ शशाः । शासु अनुशिष्टौ । लङि लुकि प्राप्ते बहुलं छंदसीति शपः श्लुः । स्वराज्यं । राज्ञो भावः कर्म वा राज्यं । पत्यंतपुरोहितादिभ्य यक् इति यक् । तत्र हि राजस इति पठ्यते । स्वस्य राज्यं स्वराज्यं । अकर्मधारये राज्यं । पा० ६. २. १३०. । इत्युत्तरपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

स त्वामदद्वृषा मदः सोमः श्येनाभृतः सुतः ।

येना वृत्रं निरद्भ्यो जघंथ वज्रिन्नोजसार्चन्ननु स्वराज्यं ॥२॥

सः । त्वा । अमदत् । वृषा । मदः । सोमः । श्येनऽआभृतः ।

सुतः ।

येन । वृत्रं । निः । अत्ऽभ्यः । जघंथ । वज्रिन् । ओजसा ।

अर्चन् । अनु । स्वऽराज्यं ॥ २ ॥

हे इंद्र त्वा त्वां स सोमोऽमदत् । अमदयत् । हर्षं प्रापयत् । कीदृशः सोमः । वृषा । सेचनस्वभावः । मदः । मदकरो हर्षकारी । श्येनाभृतः । श्येनरूपमापन्नया पक्ष्याकारया गायत्र्या दिवः सकाशादाहृतः । सुतः । अभिषुतः । हे वज्रिन् वज्रवन्निंद्र येन पीतेन सोमेनौजसा बलकरेणाद्भ्योऽंतरिक्षसकाशाद्वृत्रं निर्जघंथ । हतवानसि । अन्यत्पूर्ववत् ॥ अमदत् । मदी हर्षे । अस्माण्णिचि मदी हर्षग्लपनयोरिति घटादिषु पाठात् मित्त्वे सति मितां ह्रस्व इति ह्रस्वत्वं । लङि छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । अद्भ्यः । आप इत्यंतरिक्षनाम । अपो भि । पा० ७. ४. ४८. । इति पकारस्य तत्वं । जघंथ । क्रादिनियमप्राप्तस्येट उपदेशेऽत्वत इति प्रतिषेधः । अभ्यासाच्चेति हकारस्य घत्वं । लितीति प्रत्ययात्पूर्वस्योदात्तत्वं । यद्वृत्तयोगादनिघातः ।

तृतीयामृचमाह ॥

प्रेह्यभीहि धृष्णुहि न ते वज्रो नि यंसते ।

इंद्र नृम्णं हि ते शवो हनो वृत्रं जया अपोऽर्चन्ननु

स्वराज्यं ॥ ३ ॥

प्र । इहि । अभि । इहि । धृष्णुहि । न । ते । वज्रः । नि ।

यंसते ।

इंद्र । नृम्णं । हि । ते । शवः । हनः । वृत्रं । जयः ।

अपः । अर्चन् । अनु । स्वऽराज्यं ॥ ३ ॥

हे इंद्र प्रेहि प्रकर्षेण गच्छ । अभीहि । हंतव्यान शत्रुनाभिमुख्येन प्राप्नुहि । प्राप्य च धृष्णुहि । तान् शत्रूनभिभव । ते तव वज्रो न नियंसते । शत्रुभिर्न नियस्यते । अप्रतिहतगतिरित्यर्थः । तथा ते शवस्त्वदीयं बलं नृम्णं नृणां पुरुषाणां नामकमभिभावकं । हि यस्मादेवं तस्माद्वृत्रमसुरं मेघं वा हनः । जहि । ततोऽनंतरं तेन निरुद्धा अप उदकानि जयाः । वृत्रं हत्वा तेनावृतमुदकं लभस्वेत्यर्थः । अन्यत्समानं ॥ यंसते । यमेः कर्मणि लेटि सिब्बहुलमिति सिप् । लेटोडाटावित्यडागमः । हनः । लोडर्थे छांदसो लङ् बहुलं छंदसीति शपो लुगभावः । शपः पित्वादनुदात्तत्वे धातुस्वरः शिष्यते । पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः । जयाः । जयतेर्लेट्याडागमः । पूर्ववत्स्वरः ॥

चतुर्थीमृचमाह ॥

निरिंद्र भूम्या अधि वृत्रं जघंथ निर्दिवः ।

सृजा मरुत्वतीरव जीवधन्या इमा अपोऽर्चन्ननु स्वराज्यं ॥४॥

निः । इंद्र । भूम्याः । अधि । वृत्रं । जघंथ । निः । दिवः ।

सृज । मरुत्वतीः । अवं । जीवऽधन्याः । इमाः । अपः ।

अर्चन् । अनु । स्वऽराज्यं ॥ ४ ॥

हे इंद्र भुम्या अधि भूलोकस्योपरि वृत्रं निर्जघंथ । निःशेषेण हतवानसि । तथा दिवो द्युलोकान्निर्जघथ । हत्वा चेमा अपो वृष्ट्युदकान्यवसृज । अधः पातय । कीदृशीरपः । मरुत्वतीः । मरुद्भिः संयुक्ताः । जीवधन्याः । जीवाः प्राणिनो धन्यास्तृप्ता याभिस्ताः । अन्यत्समानं ॥

पंचमीमृचमाह ॥

इंद्रो वृत्रस्य दोधतः सानुं वज्रेण हीळितः ।

अभिक्रम्याव जिघ्नतेऽपः सर्माय चोदयन्नर्चन्ननु

स्वराज्यं ॥ ५ ॥

इंद्रः । वृत्रस्य । दोधतः । सानुं । वज्रेण । हीळितः ।

अभिऽक्रम्य । अव । जिघ्नते । अपः । सर्माय । चोदयन् ।

अर्चन् । अनु । स्वऽराज्यं ॥ ५ ॥

हीळितः क्रुद्ध इंद्रोऽभिक्रम्याभिमुख्येन गत्वा दोधतो भृशं

कंपमानस्य वृत्रस्य सानुं समुच्छ्रितं हनुप्रदेशं वज्रेणावजिघ्नते। प्रहरति। किं कुर्वन्। अपो वृष्टुदकानि सर्माय सरणाय निर्गमनाय चोदयन्। प्रेरयन्॥ दोधतः। धूञ् कंपने। अस्माद्यङ्लुगंताच्छतर्यत्यलोपश्छांदसः। अभ्यस्तानामादिरित्याद्युदात्तत्वं। हिड़तः। हेड़ होड़ अनादरे। हेड़त इत्येतत् क्रुध्यतिकर्मसु पठितं। अस्मान्निष्ठायां वर्णव्यापत्त्येकारः। जिघ्नते। हंतेर्लटि व्यत्ययेनात्मनेपदं बहुवचनं च। बहुलं छंदसीति शपः श्लुः। इदित्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं। गमहनेत्यादिनोपधालोपः। सर्माय। सृ गतौ। अर्तिस्तुस्वित्यादिना भावे मन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं।

॥ इति प्रथमस्य पंचमे एकोनत्रिंशो वर्गः॥

षष्ठीमृचमाह॥

अधि सानौ नि जिघ्नते वज्रेण शतपर्वणा।
मंदान इंद्रो अंधसः सखिभ्यो गातुमिच्छत्यर्चन्ननु स्वराज्यं॥६॥

अधि। सानौ। नि। जिघ्नते। वज्रेण। शतऽपर्वणा।
मंदानः। इंद्रः। अंधसः। सखिऽभ्यः। गातुं। इच्छति। अर्चन्। अनु। स्वऽराज्यं॥६॥

इंद्रः शतपर्वणा शतसंख्याकधाराभिर्युक्तेन वज्रेण सानावधि निजिघ्नते। अधिः सप्तम्यर्थानुवादी। समुच्छ्रिते वृत्रस्य कपोलादौ स्थाने नितरां हिनस्ति। स चेंद्रो मंदानो मंदमानः

स्तूयमानः सन् सखिभ्यः समानख्यानेभ्यः स्तोतृभ्योऽधऽसोऽन्नस्य गातुं मार्गमुपायमिच्छति । अन्यत्पूर्ववत् ॥ मंदानः । मदि स्तुतौ । कर्मणि शानचि यक् । छंदस्युभयथेति शानच आर्द्धधातुकत्वादतोलोपयलोपौ । अनुदात्तेतः परत्वात् शानचो लसार्वधातुकानुदात्तत्वे सति यक एवोदात्तत्वं । अनुदात्ते शानचि तस्य यको लोपे सत्युदात्तनिवृत्तिस्वरेण शानच उदात्तत्वं प्राप्नोति । एवं तर्हि शानच आर्द्धधातुकत्वादेव लसार्वधातुकानुदात्तत्वाभावे चित्स्वर एव शिष्यते ॥

सप्तमीमृचमाह ॥

इंद्र तुभ्यमिदद्रिवोऽनुत्तं वज्रिन्वीर्यं ।

यद्ध त्यं मायिनं मृगं तमु त्वं माययावधीरर्चन्ननु

स्वराज्यं ॥ ७ ॥

इंद्र । तुभ्यं । इत् । अद्रिऽवः । अनुत्तं । वज्रिन् । वीर्यं ।

यत् । ह । त्यं । मायिनं । मृगं । तं । ऊं इति । त्वं ।

मायया । अवधीः । अर्चन् अनु । स्वऽराज्यं ॥ ७ ॥

अद्रिरिति मेघनाम । हे अद्रिवो वाहनरूपमेघयुक्त वज्रिन् वज्रवन्निंद्र तुभ्यमित् । षष्ठ्यर्थे चतुर्थी । तवैव वीर्यं सामर्थ्यमनुत्तं शत्रुभिरतिरस्कृतं । यद्वयस्मात् येन वीर्येण खलु मायिनं मायाविनं त्यं तं प्रसिद्धं वंचयितारं । लोकोपद्रवकारिणमित्यर्थः । मृगं मृगरूपमापन्नं तं वृत्रं त्वमपि माययैवावधीः । हतवानसि ॥ अनुत्तं । नसत्तनिषत्तेति निपातनान्निष्ठान-

त्वाभावः । अवधीः । हंतेर्लुङि चेति वधादेशः । स चादंतः ।
तस्यातो लोपे सति स्थानिवद्भावात्सिचि वृद्ध्यभावः ।

अष्टमीमृचमाह ॥

वि ते वज्रासो अस्थिरन्नवतिं नाव्या३ अनु ।
महत्त इंद्र वीर्यं बाह्वोस्ते बलं हितमर्चन्ननु स्वराज्यं ॥८॥

वि । ते । वज्रासः । अस्थिरन् । नवतिं । नाव्याः । अनु ।
महत् । ते । इंद्र । वीर्यं । बाह्वोः । ते । बलं । हितं ।
अर्चन् । अनु । स्वऽराज्यं ॥ ८ ॥

हे इंद्र ते तव वज्रासो वज्रास्त्वत्सकाशान्निर्गतान्यायुधानि नाव्या नावा तार्या नवतिं नवतिसंख्याका वृत्रेण निरुद्धा नदीरनूपलक्ष्य व्यवस्थिरन् । विविधमस्थिषत । सर्वत्र व्याप्य वर्तमानं वृत्रं हंतुं तव वज्र एकोऽप्यनेक इवासीदित्यर्थः । किंच । इंद्र ते तव वीर्यं महत प्रभूतं । अन्यैरजेयमित्यर्थः । तथा ते बाह्वोस्त्वदीययोर्हस्तयोर्बलं हितं निहितं । त्वदीयौ बाहू अप्यतिशयेन बलिनावित्यर्थः । अन्यत्पूर्ववत् ॥ अस्थिरन् । तिष्ठतेर्लुङि समवप्रविभ्यःस्थ इत्यात्मनेपदं । मंत्रे घसेति च्लेर्लुक् । स्थाघ्वोरिच्चेतीत्वं । व्यत्ययेन झस्य रन्नादेशः । नाव्याः । नौवयोधर्मेत्यादिना यत् । यतोऽनाव इति पर्युदासात्तित्स्वरित इति स्वरितत्वं । बाह्वोः । उदात्तयण इति विभक्त्युदात्तत्वं ॥

नवमीमृचमाह ॥

सहस्रं साकमर्चत परि ष्टोभत विंशतिः।

शतैनमन्वनोनवुरिंद्राय ब्रह्मोद्यतमर्चन्ननु स्वराज्यं ॥९॥

सहस्रं। साकं। अर्चत। परि। स्तोभत। विंशतिः।

शता। एनं। अनु। अनोनवुः। इंद्राय। ब्रह्म। उत्ऽयतं।

अर्चन्। अनु। स्वऽराज्यं ॥ ९ ॥

सहस्रं सहस्रसंख्याका मनुष्याः साकमर्चत। एनमिंद्रं युगपदेवापूजयन्। तथा विंशतिः षोडशर्त्विजो यजमानः पत्नी च सदस्यः शमिता चेति विंशतिसंख्याकाः। तेषां या विंशतिसंख्या सा परिष्टोभत। परितः सर्वतोऽस्तौत्। तथा च शता शतसंख्याका ऋषय एनमिंद्रमन्वनोनवुः। पुनः पुनरस्तुवन्। अस्माएवेंद्राय ब्रह्म हविर्लक्षणमन्नमुद्यतं। दातुमूर्ध्वं धृतं। अत एवंविध इंद्रो वृत्रमहन्नित्यर्थः। अन्यत्पूर्ववत ॥ परिष्टोभत। स्तोभतिः। स्तुतिकर्मा। उपसर्गात्सुनोतीति षत्वं। अनोनवुः। णु स्तुतौ। अस्माद्यङ्लुगंताल्लुङि सिजभ्यस्तविदिभ्यश्चेति झेर्जुसादेशः। उद्यतं। यम उपरमे। उत्पूर्वादस्मात्कर्मणि निष्ठा। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

दशमीमृचमाह ॥

इंद्रो वृत्रस्य तविषीं निरहन्त्सहसा सहः।

महत्तदस्य पौंस्यं वृत्रं जघन्वाँ असृजदर्चन्ननु स्वराज्यं ॥१०॥

इंद्रः। वृत्रस्यं। तविषीं। निः। अहन्। सहसा। सहः।

महत्। तत्। अस्य। पौंस्यं। वृत्रं। जघन्वान्। असृजत्।

अर्चन्। अनुं। स्वराज्यं ॥ १० ॥

इंद्रो वृत्रस्यासुरस्य तविषीं बलं स्वकीयेन बलेन निरहन्। हतवान्। सहसा सहनेनाभिभवसाधनेनायुधेन सहोऽभिभवसाधनं वृत्रायुधं निरहन्। अस्येंद्रस्य तत्पौंस्यं बलं महत् अतिप्रौढं। यस्मादयं वृत्रं जघन्वाग्हतवान्। हत्वा च तन्निरुद्धा अपोऽसृजत्। तस्माद्वृत्रान्निरगमयत्। अन्यत्पूर्ववत् ॥ पौंस्यं पुंस् अभिवर्धने। चुरादिः। अचो यदिति यत्। यतोऽनाव इत्याद्युदात्तत्वं। जघन्वान्। हंतेर्लिटः क्वसुः। विभाषा गमहनविदेतीटो विकल्पादभावः। अभ्यासाच्चेत्यभ्यासादुत्तरस्य हंतेर्हकारस्य घत्वं ॥

॥ इति प्रथमस्य पंचमे त्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

इमे चित्तवं मन्यवे वेपेते भियसा मही।

यदिंद्र वज्रिन्नोजसा वृत्रं मरुत्वाँ अवंधीरचंन्ननुं

स्वराज्यं ॥ ११ ॥

इमे इतिं। चित्। तवं। मन्यवं। वेपेते इतिं। भियसां।

मही इतिं।

यत् । इंद्र । वज्रिन् । ओजसा । वृत्रं । मरुत्वान् । अवधीः ।

अर्चन् । अनु । स्वऽराज्यं ॥ ११ ॥

मही महत्याविमे द्यावापृथिव्यावपि हे इंद्र तव मन्यवे त्वदीयकोपाद्भियसा भीत्या वेपेते । कंपते । हे वज्रिन्वज्रवन्निंद्र मरुत्वान्मरुद्भिर्युक्तस्त्वमोजसा बलेन यद्यदा वृत्रमवधीः । तदानीं द्यावापृथिव्यावपि भयेनाकंपिषातामित्यर्थः ॥ वेपेते । टुवेपृ कंपेन । भियसा । ञिभी भये । औणादिकः कसिप्रत्ययः ॥

द्वादशीमृचमाह ॥

न वेपसा न तन्यतेंद्रं वृत्रो वि बीभयत् ।

अभ्येनं वज्र आयसः सहस्रभृष्टिरायतार्चन्ननु स्वराज्यं ॥ १२ ॥

न । वेपसा । न । तन्यता । इंद्रं । वृत्रः । वि । बीभयत् ।

अभि । एनं । वज्रः । आयसः । सहस्रऽभृष्टिः । आयत ।

अर्चन् । अनु । स्वऽराज्यं ॥ १२ ॥

वृत्र इंद्रं वेपसा स्वकीयेन वेपनेन कंपनेन न विबीभयत् । भीतं नाकरोत् । तथा तन्यता स्वकीयेन घोरेण गर्जनशब्देन न विबीभयत् । अपि च । इंद्रेण विसृष्ट आयसोऽयोमयः सहस्रभृष्टिरनेकाभिधाराभिर्युक्तो वज्र एनं वृत्रमभ्यायत । हंतुमाभिमुख्येनागच्छत् । अन्यत्पूर्ववत् ॥ तन्यता स्तन शब्दे । ऋतन्यंजीत्यादिना तनोतेर्विधीयमानो यतुच् बहुलवचनादस्मादपि भवति । अत एव सलोपश्च । सुपां सुलुगिति तृतीयाया डादेशः । उदात्तनिवृत्तिस्वरेण तस्योदात्तत्वं ।

बीभयत्। ञिभी भये। हेतुभयाभावाद्भिमेतिर्हेतुभये। पा० ६. १. ५६.। इत्यात्वाभावः। खयंताल्लुङि चुेखङादि। आयत। अय पय गतौ। भौवादिरात्मनेपदी॥

त्रयोदशीमृचमाह॥

यद्वृत्रं तव चाशनिं वज्रेण समयोधयः।
अहिमिंद्र जिघांसतो दिवि ते बद्बधे शवोऽर्चन्ननु
स्वराज्यं॥ १३॥

यत्। वृत्रं। तव। च। अशनिं। वज्रेण। संऽअयोधयः।
अहिं। इंद्र। जिघांसतः। दिवि। ते। बद्बधे। शवः।
अर्चन्। अनु। स्वऽराज्यं॥ १३॥

हे इंद्र यद्यदा वृत्रं तव हननार्थं तेन सृष्टामशनिं च त्वं वज्रेण समयोधयः। सम्यक् प्राहार्षीः। तदानीमहिमागत्य हंतारं वृत्रं जिघांसतो हंतुमिच्छतस्ते तव शवो बलं दिवि बद्बधे। बद्धमनुस्यूतं व्याप्तमासीत्। शिष्टं पूर्ववत्॥ जिघांसतः। हंतेरिच्छार्थे सन्यज्झनगमां सनीत्युपधादीर्घत्वं। बद्बधे बध बंधने। कर्मणि लिटि व्यत्ययेन हलादिशेषाभावः॥

चतुर्दशीमृचमाह॥

अभिष्टने ते अद्रिवो यत्स्था जगच्च रेजते।
त्वष्टा चित्तव मन्यव इंद्र वेविज्यते भियार्चन्ननु स्वराज्यं॥ १४॥

अभिऽस्तने । ते । अद्रिऽवः । यत् । स्थाः । जगत् । च ।
रेजते ।
त्वष्टा । चित् । तव । मन्यवे । इंद्र । वेविज्यते । भिया ।
अर्चन् । अनु । स्वऽराज्यं ॥ १४ ॥

हे अद्रिवो वज्रवन्निंद्र ते तवाभिष्टने सिंहनादे सति स्थाः स्थावरं जगज्जंगमं च यदस्ति तदुभयं रेजति । कंपते । त्वष्टा चित् वज्रनिर्माता त्वष्टा च तव मन्यवे त्वदीयाय कोपाय भिया भीत्या वेविज्यते । भृशं कंपते । अन्यत्समानं ॥ स्थाः । तिष्ठतेः क्विप् चेति क्विप् । वेविज्यते । ओविजी भयचलनयोः । अस्मात्क्रियासमभिहारे यङ् । सन्यङोरिति द्विर्भावः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यङ एव स्वरः शिष्यते । इंद्रेत्यस्य पादादौ वर्तमानस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे सत्यस्य पादादित्वादपादादाविति पर्युदासान्निघाताभावः ॥

पंचदशीमृचमाह ॥

नहि नु यादधीमसींद्र को वीर्या परः ।
तस्मिन्नृम्णमुत क्रतुं देवा ओजांसि सं दधुरर्चन्ननु
स्वराज्यं ॥ १५ ॥

नहि । नु । यात् । अधिऽइमसि । इंद्र । कः । वीर्या । परः ।
तस्मिन् । नृम्णं । उत । क्रतुं । देवाः । ओजांसि । सं ।
दधुः । अर्चन् । अनु । स्वऽराज्यं ॥ १५ ॥

यात् यांतं सर्वत्र व्याप्य वर्तमानमिंद्रं नहि न्वधोसमि। वयं न ह्यवगच्छामः। यतो वयमल्पाः। पर इत्येतस्यकारांत-मव्ययं वेदूर्यंसाचष्टे। परो दिवा पर एनेति यथा। पर परस्तादतिदूरे मनुष्यैरनवगाह्ये स्थाने वीर्या वीर्येण सामर्थ्येन वर्तमानमिंद्रं को मनुष्यो जानीयात्। न कोऽपीत्यर्थः। कस्मादिति चेत्। अत्राह। तस्मिन्निति। यस्मात्तस्मिन्निंद्रे देवा नृम्णं धनं। उत अपि च क्रतुं वीर्यंकर्मौजांसि बलानि च संदधुः। स्थापयां चक्रुः। तस्मादित्यर्थः। यात्। या प्रापणे। अस्माल्लटः शतृ। सुपां सुलुगिति द्वितीयाया लुक्। अधिनमसि। इण् गतौ। इदंतो मसिः वीर्या। सुपां सुलुगिति तृतीयाया आकारः॥

षोडशीमृचमाह॥

यामथर्वा मनुष्पिता दध्यङ् धियमत्नत।
तस्मिन्ब्रह्माणि पूर्वथेंद्र उक्था समग्मतार्चन्ननु स्वराज्यं॥१६॥

यां। अथर्वा। मनुः। पिता। दध्यङ्। धियं। अत्नत॥
तस्मिन्। ब्रह्माणि। पूर्वऽथा। इंद्रे। उक्था। सं
अग्मत। अर्चन्। अनु। स्वऽराज्यं॥ १६॥

अथर्वैतत्संज्ञक ऋषि पिता सर्वासां प्रजानां पितृभूतो मनुश्च दध्यङ् अथर्वणः पुत्र एतत्संज्ञक ऋषिश्च यां धियमत्नत। यत्कर्मातन्वत। अकुर्वन्। तस्मिन्कर्मणि यानि ब्रह्माणि हवि-र्लक्षणान्यन्नान्युक्था शस्त्ररूपाणि स्तोत्राणि च यानि संति तानि सर्वाणि तस्मिन्निंद्रे समग्मत। समगच्छंत। तत्र दृष्टांतः।

पूर्वथा पूर्वेषामन्येषां वसिष्ठादीनां यज्ञेषु यथा हवींषि स्तोत्राणि चेंद्रेण संगच्छंते तद्वत् । य इंद्रः स्वराज्यं स्वस्य राज्यत्व-मन्वर्चन् । अनुपूजयन् वृत्रवधादिरूपेण कर्मणा स्वकीयमधिपतित्वं । प्रकटयन्नित्यर्थः ॥ अत्नत । तनु विस्तारे । बहुलं छंदसीति विकरणस्य लुक् । तनिपत्योश्छंदसीत्युपधालोपः । पूर्वथा प्रत्नपूर्वविश्वेमात्थाल् छंदसीतीवार्थे पूर्वशब्दात्थाल्-प्रत्ययः लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । उकथा । शेश्छं-दसि बहुलमिति शेर्लोपः । समग्मत । समो गम्यृच्छिभ्यामि-त्यात्मनेपदं । लुङि मंत्रे घसेति च्लेर्लुक् । गमहनेत्यादिनोप-धाया लोपः ॥

॥ इति प्रथमस्य पंचमे एकविंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके पंचमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदो यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥
दशतय्याः पंचमोऽयमध्यायो व्याकृतः पुरा ।
धीमता सायणार्येण षष्ठोऽध्यायोऽथ वर्ण्यते ॥

प्रथमे मंडले त्रयोदशानुवाके सप्त सूक्तानि व्याकृतानि । इंद्रो मदायेति नवर्चमष्टमं सूक्तं । अत्रानुक्रम्यते । इंद्रो नवेति । ऋषिश्चान्यस्मादृषिरिति परिभाषया रहूगणपुत्रस्य गोतमस्यानुवृत्तेरस्य सूक्तस्य स ऋषिः । पूर्वसूक्ते पांक्तं होत्युक्तत्वात्तुह्यादिपरिभाषयेदमुत्तरं च सूक्तं पांक्तं । अनादेशपरिभाषयेंद्रो देवता । पृष्ठ्यस्य पंचमेऽहनि निष्केवल्यशस्त्र इदं सूक्तं । सूत्रितं च । प्रेदं ब्रह्मेंद्रो मदाय सत्रा मदास इति निष्केवल्यं । आ०. ७. १२. । इति ॥ आरंभणीये चातुर्विंशकेऽहनि माध्यंदिने सवने ब्राह्मणाच्छंसिनः शस्त्र इंद्रो मदायेत्याद्यस्तृचो वैकल्पिकः स्तोत्रियः । होत्रकाणामिति खंडे सूत्रितं । इंद्रो मदाय वावृधे मदे मदे हि नो ददिः । आ० ७. ४. । इति ॥ महाव्रते निष्केवल्य उत्तरपक्ष इंद्रो मदायेत्येका शंसनीया । तथैव पंचमारण्यके सूत्रितं । इंद्रो मदाय वावृध इति पंक्तिः सूददोहाः ।

तामेतां सूक्ते प्रथमामृचमाह ॥

इंद्रो मदाय वावृधे शवसे वृत्रहा नृभिः।
तमिन्महत्स्वाजिषूतेमर्भे हवामहे स वाजेषु प्र
णोऽविषत् ॥ १ ॥
इंद्रः। मदाय। ववृधे। शवसे। वृत्रऽहा। नृऽभिः।
तं। इत्। महत्ऽसु। आजिषु। उत। ईं। अर्भे।
हवामहे। स। वाजेषु। प्र। नः। अविषत् ॥ १ ॥

वृत्रहा वृत्रस्यावरकस्य वृष्टिनिरोधकस्य मेघस्यासुरस्य वा हंता। यद्वा। आवरकाणां शत्रूणां हंतेंद्रो मदाय हर्षार्थं शवसे। बलनामैतत्। बलार्थं च नृभिर्यज्ञस्य नेतृभिर्ऋत्विग्भिर्वावृधे। स्तोत्रशस्त्ररूपाभिः स्तुतिभिः प्रवर्धितो बभूव। स्तुत्या हि देवता प्राप्तबला सती प्रवर्धते। तमित्तमेवेंद्रं महत्सु प्रभूतेष्वाजिषु संग्रामेषु हवामहे। अस्माकं रक्षणायाह्वयामहे। उत अपि चैमेनमर्भेऽल्पे संग्रामे हवामहे। अस्माभिराहूतः स चेंद्रो वाजेषु संग्रामेषु नोऽस्मान् प्राविषत्। प्रावतु। प्रकर्षेण रक्षतु ॥ वावृधे। वृधेः कर्मणि लिट्। संहितायामभ्यासस्यान्येषामपि दृश्यत इति दीर्घत्वं। तुजादित्वे हि तूतुजान इतिवत्पदकालेऽपि दीर्घः श्रूयते। नृभिः। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य नृ चान्यतरस्यामिति प्रतिषेधः। हवामहे। ह्वयतेर्लटि ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं। शपि गुणावादेशौ। अविषत्। अव रक्षणे। लेट्यडागमः।

इतश्च लोप इतीकारलोपः। सिब्बहुलं लेटीति सिप्। तस्यार्धधातुकत्वाद्वलादिलक्षण इट्॥

द्वितीयामृचमाह॥

असि हि वीर सेन्योऽसि भूरि पराददिः।
असि दभ्रस्य चिद्वृधो यजमानाय शिक्षसि सुन्वते भूरि ते वसु॥२॥

असि। हि। वीर। सेन्यः। असि। भूरि। पराऽददिः। असि। दभ्रस्य। चित्। वृधः। यजमानाय। शिक्षसि। सुन्वते। भूरि। ते। वसु॥२॥

हे वीर शत्रुक्षेपणकुशलेंद्र त्वं सेन्योऽसि। सेनार्हो भवसि। त्वमेकोऽपि सेनासदृशो भवसीत्यर्थः। हि यस्मादेवं तस्माद्भूरि प्रभूतं शत्रूणां धनं पराददिः। परादाता। शत्रूणां पराङ्मुखं यथा भवति तथा दातासि। भवसि। दभ्रस्य चित्। अल्पनामैतत्। अल्पस्यापि तव स्तोतुर्वृधो वर्धयितासि। तथा यजमानाय यागं कुर्वते सुन्वते सोमाभिषवं कुर्वते पुरुषाय शिक्षसि। अपेक्षितं धनं ददासि। शिक्षतिर्दानकर्मा। यस्मात्ते तव वसु धनं भूरि बहुलमक्षयं धनं विद्यते तस्माद्ददासीति भावः॥ पराददिः। डुदाञ् दाने। आदृगमहनजन इति किप्रत्ययः। लिड्वद्भावाद्द्विर्वचने ह्रस्वत्वं। आतो लोप इटि चेत्याकारलोपः। वृधः। वृधेरंतर्भावितण्यर्थादिगुपधलक्षणः कः। सुन्वते। शतुरनुम इति विभक्तेरुदात्तत्वं॥

तृतीयामृचमाह ॥

यदुदीरत आजयो धृष्णवे धीयते धना।

युच्वा मदच्युता हरी कं हनः कं वसौ दधाऽस्माँ इंद्र

वसौ दधः ॥ ३ ॥

यत्। उत्ऽईरते। आजयः। धृष्णवे। धीयते। धना।

युच्व। मदऽच्युता। हरी इति। कं। हनः। कं। वसौ।

दधः। अस्मान्। इंद्र। वसौ। दधः ॥ ३ ॥

अत्रेदमाख्यानं। रहूगणपुत्रो गोतमः कुरुसृंजयानां राज्ञां पुरोहित आसीत्। तेषां राज्ञां परैः सह युद्धे सति स ऋषिस्तेन सूक्तेनेंद्रं स्तुत्वा स्वकीयानां जयं प्रार्थयामासेति। तस्य च तत्पुरोहितत्वं वाजसनेयिभिराम्नातं। गोतमो ह वै राहूगण उभयेषां कुरुसृंजयानां पुरोहित आसीदिति ॥ यद्यदाजयः संग्रामा उदीरते। उद्गच्छंति। उत्पद्यंते। तदानीं धना धनं धृष्णवे। यो धृष्णुर्धर्षयिता शत्रूणां जेता भवति तस्मै धीयते। निधीयते। जयतो धनं भवतीत्यर्थः। हे इंद्र त्वं तादृशेषु युद्धेषु प्रवृत्तेषु मदच्युता शत्रूणां मदस्य गर्वस्य च्यावयितारौ हरी त्वदीयावश्वौ युच्व। रथे योजय। योजयित्वा च कं कंचिद्राजानं तव परिचरणमकुर्वंतं हनः। हन्याः। कं च न। त्वां परिचरंतं वसौ वसुनि धने दधः। स्थापयसि। अतो जयपराजययोस्त्वमेव कारयितासि। तस्मात् हे इंद्रास्मान्मदीयान्राज्ञो वसौ धने दधः। स्थापय ॥ उदीरते। ईर गतौ।

आद्युदात्तः। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। यद्वृत्तयोगादनिघातः। धना। सुपां सुलुगिति डादेशः। युक्त्वा। युजिर् योगे। अंतर्भावितण्यर्थाल्लोटि बहुलं छंदसीति विकरणस्य लुक्। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। हन्तः। हंतेर्लेटि सिप्यडागमः। हनश्च दधश्चेति चायमतीतिश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघात-प्रतिषेधः। वस्तौ। लिंगव्यत्ययः। दधः। दध धारणे। लेटि व्यत्ययेन परस्मैपदं॥

चतुर्थीमृचमाह॥

क्रत्वा मही अनुष्वधं भीम आ वावृधे शवः।
श्रिय ऋष्व उपाकयोर्नि शिप्री हरिवान्दधे
हस्तयोर्वज्रमायसं॥ ४॥

क्रत्वा। महान्। अनुऽस्वधं। भीमः। आ। ववृधे। शवः।
श्रिये। ऋष्वः। उपाकयोः। नि। शिप्री। हरिऽवान्।
दधे। हस्तयोः। वज्रं। आयसं॥ ४॥

क्रत्वा कर्मणा प्रज्ञया वा महान् सर्वाधिको भीमः शत्रूणां भयंकर इंद्रोऽनुष्वधं। स्वधेत्यन्ननाम। स्वधायां। विभक्त्यर्थेऽव्ययीभावः। सोमलक्षणस्यान्नस्य पाने सतीत्यर्थः। शव आत्मीयं बलमाववृधे। आभिमुख्येन प्रावर्धयत। तदनंतरमृष्वो

दर्शनीयः शिप्रो । शिप्रे हनू नासिके वा । तद्युक्तः हरिवान् हरिनामकाश्वोपेत इंद्र उपाकयोः । अंतिकनामैतत् । समीपवर्तिनोर्हस्तयोर्बाह्वोरायसमयोमयं वज्रं श्रिये संपदर्थं निदधे । निदधाति । स्थापयति । सोमपानेन हृष्टः प्रबल इंद्र शत्रूणां हननाय हस्ते वज्रं गृह्णातीति । तात्पर्यार्थः ॥ कृत्वा । जसादिषु छंदसो वावचनमिति नाभावस्य विकल्पितत्वादभावः । आयसं । तस्य विकार इत्यण्प्रत्ययः ॥

पंचमीमृचमाह ॥

आ प॑प्रौ पार्थि॑वं रजो॑ बद्ब॒धे रो॑च॒ना दि॒वि ।

न त्वावाँ॑ इं॒द्र कश्च॒न न जा॒तो न ज॑निष्यते॒ऽति॒ विश्वं॑

ववक्षिथ ॥ ५ ॥

आ । प॒प्रौ । पार्थि॑वं । रजः॑ । ब॒द्ब॒धे । रो॒च॒ना । दि॒वि ।

न । त्वाऽवा॑न् । इं॒द्र । कः । च॒न । न । जा॒तः । न ।

ज॒नि॒ष्य॒ते । अति॑ । विश्वं॑ । व॒व॒क्षि॒थ ॥ ५ ॥

इंद्रः स्वतेजसा प्रार्थिवं पृथिव्याः संबंधि वस्तुजातं रजोऽंतरिक्षलोकं चापप्रौ । आपूरयति । तथा दिवि द्युलोके रोचना रोचमानानि दीप्तानि नक्षत्राणि बद्बधे । बबंध । स्थापितवान् । अता हे इंद्र त्वावान् त्वत्सदृशः कश्चन न जातो नोत्पन्नोऽस्ति । न च जनिष्यते । उत्पत्स्यमानोऽपि नास्ति । तादृशस्त्वं विश्वं सर्वं रक्षितव्यं जगदतिववक्षिथ । अतिशयेन वोढुमिच्छसि । सर्वस्य जगतो निर्वाहको भवसीत्यर्थः ॥ पप्रौ । प्रा पूरणे । लिट्यात औ णलः । पा० ७. १ ३४. । इत्यौकारादेशः ।

पार्थिवं । पृथिव्या ञाञावित्यञ्प्रत्ययः । ञित्त्वादाद्युदात्तत्वं । रजः । रंजत्यस्मिन् गंधर्वादय इति रजोऽंतरिक्षं । रंज रागे । असुनि रजकरजनरजःसूपसंख्यानमिति नलोपः । बद्बधे । बध बंधने । लिटि व्यत्ययेन हलादिशेषाभावः । एकहल्मध्यगतत्वाभावादेत्वाभ्यासलोपावपि न स्तः । पादादित्वान्निघाताभावः । त्वावान् । वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । आ सर्वनाम्न इत्यात्वं । ववक्षिथ वह प्रापणे । अस्मादिच्छासनि सन्यत इतीत्वस्य सर्वं विधयश्छंदसि विकल्प्यंत इत्यभावः । सनंताल्लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः ॥

॥ इति प्रथमस्य षष्ठे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

यो अर्यो मर्तभोजनं परादर्दाति दाशुषे ।
इंद्रो अस्मभ्यं शिक्षतु वि भजा भूरि ते वसु भक्षीय तव राधसः ॥ ६ ॥

यः । अर्यः । मर्तऽभोजनं । पराऽददाति । दाशुषे ।
इंद्रः । अस्मभ्यं । शिक्षतु । वि । भज । भूरि । ते । वसु ।
भक्षीय । तव । राधसः ॥ ६ ॥

अर्यः स्वामी पालयिता य इंद्रो मर्तभोजनं सर्वैर्मनुष्यैरुपभोज्यमन्नं दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय । परादर्दाति प्रयच्छति । स इंद्रोऽस्मभ्यं शिक्षतु । तादृशमन्नं ददातु । अवशिष्टपादद्वयं प्रत्यक्षकृतं । हे इंद्र अस्मभ्यं दातुं धनं विभज । विभक्तं कुरु । यतस्ते तव वसु धनं भूरि

बहुलमसंख्यातं। अतस्तव राधसो धनस्यैकदेशं भक्षीय। भजेय। प्राप्नुयां॥ पराददाति। अभ्यस्तानामादिरित्याद्युदात्तत्वं। तिङि चोदात्तवतीति गतेरनुदात्तत्वं। दाशुषे। दाशृ दाने। दाश्वान् साह्वानिति क्वसुप्रत्ययांतो निपात्यते। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। भक्षीय। भज सेवायां। प्रार्थनायां लिङि तस्य छंदस्युभयथेत्यार्धधातुकत्वाच्छ्रबभावः। सलोपाभावश्च। एकाच इतीट्प्रतिषेधः। आगमानुदात्तत्वे प्रत्ययस्वर एव शिष्यते। पूर्वपदस्यासमानवाक्यगतत्वान्निघाताभावः। समानवाक्ये निघातयुष्मदस्मादादेशा वक्तव्या इति वचनात्॥

चातुर्विंशकेऽहनि माध्यंदिनसवने ब्राह्मणाच्छंसिनो मदे मदे हि नो ददिरिति विकल्पिकोऽनुरूपस्तृचः। होत्रकाणामिति खंडे सूत्रितं। मदे मदे हि नो ददिः सुरूपकृत्नुमूतये। आ० ७. ४.। इति॥

त्वचे प्रथमां सूक्ते सप्तमीमृचमाह॥

मदेमदे हि नो ददिर्यूथा गवामृजुक्रतुः।

सं गृभाय पुरू शतोभयाहस्त्या वसु शिशीहि राय

आ भर॥ ७॥

मदेऽमदे। हि। नः। ददिः। यूथा। गवां। ऋजुऽक्रतुः।

सं। गृभाय। पुरु। शता। उभयाहस्त्या। वसु। शिशीहि।

रायः। आ। भर॥ ७॥

मदे मदे सोमपानेन हर्षे हर्षे सति ऋतुक्रतुः सुकर्मा स इंद्रो नोऽस्मभ्यं गवां यूथा यूथानि ददिर्हि। गयूथानां दाता खलु। हे इंद्र स त्वं पुरु पुरूणि प्रभूतानि शता शतसंख्याकानि। अपरिमितानीत्यर्थः। वसु वसूनि धनान्युभयाहस्त्योभाभ्यां हस्ताभ्यां संगृभाय। अस्मभ्यं दातुं सम्यक् गृहाण। शिशीहि। अस्मांस्तीक्ष्णीकुरु। निश्चितबुद्धियुक्तान् कुर्वित्यर्थः। रायो धनानि हस्तयोः स्थितान्याभर। आहर प्रयच्छ॥ ददिः। डुदाञ् दाने। आदृगमहनजन इति किप्रत्ययः। यूथा। शेश्छंदसि बहुलमिति शेर्लोपः। गवां। सावेकाच इति प्राप्तस्य न गोश्वन्साववर्णेति प्रतिषेधः। गृभाय। ग्रह उपादाने। लोटि हौ छंदसि शायजपीति श्नाप्रत्ययस्य शायजादेशः। हृग्रहोर्भ इति भत्वं। उभयाहस्त्या। उभयहस्तशब्दादुत्तरस्य तृतीयाद्विवचनस्य सुपां सुलुगिति ड्यादेशः। अन्येषामपि दृश्यत इति पूर्वपदस्य दीर्घत्वं। समासांतोदात्तत्व उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। वसु। सुपां सुलुगिति विभक्तेर्लुक्। शिशीहि। शो तनूकरणे। बहुलं छंदसीति विकरणस्य श्लुः। आदेच इत्यात्वं। इदित्यनुवृत्तौ बहुलं छंदसीत्यभ्यासस्येत्वं। ई हल्यघोरिति धातोरीत्वं। पादादित्वान्निघाताभावः। रायः। ऊडिदमिति विभक्तेरुदात्तत्वं॥

अष्टमीमृचमाह ॥

मादयस्व सुते सचा शवसे शूर राधसे ।

विद्मा हि त्वा पुरूवसुमुप कामान्त्ससृज्महेऽथा नोऽविता भव ॥ ८ ॥

मादयस्व । सुते । सचा । शवसे । शूर । राधसे ।

विद्म । हि । त्वा । पुरुऽवसुं । उप । कामान् ।

ससृज्महे । अथ । नः । अविता । भव ॥ ८ ॥

हे शूर शौर्यवन्निंद्र सुते सोमेऽभिषुते सत्यागत्य सचास्माकं सखा सन् मादयस्व । तेन सोमेन तृप्तो भव । किमर्थं । शवसे बलार्थं राधसेऽस्माकं धनार्थं च । त्वा त्वां पुरूवसुं बहुधनं विद्म हि । वयं जानीमः खलु । अतोऽस्मदीयान् कामान् मात्रा गवा वत्सानिव त्वय्युपससृज्महे हि । त्वया खल्वेकीकुर्मः । अथानंतरं नोऽस्माकमविताभिलषितफलप्रदानेन रक्षिता भव ॥ मादयस्व । मदतृप्तियोगे । चुरादिरात्मनेपदी । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते । ससृज्महे । सृज विसर्गे । बहुलं छंदसीति विकरणस्य श्लुः । प्रत्ययाद्युदात्तत्वं । अत्रापिशब्दानुषंगाच्छंदस्यनेकमपि साकांक्षं । पा० ८. १. ३५. । इति निघातप्रतिषेधः ॥

नवमीमृचमाह ॥

एते त इंद्र जंतवो विश्वं पुष्यंति वार्यं ।

अंतर्हि ख्यो जनानामर्यो वेदो अदाशुषां तेषां नो वेद आ भर ॥ ९ ॥

एते । ते । इंद्र । जंतवः । विश्वं पुष्यंति । वार्यं ।
अंतः । हि । ख्यः । जनानां । अर्यः । वेदः । अदाशुषां ।
तेषां । नः । वेदः । आ । भर ॥ ९ ॥

हे इंद्र ते तव स्वभूता एते जंतवो यजमानलक्षणा जना विश्वं सर्वं वार्यं सर्वैः संभजनीयं हविः पुष्यंति। वर्धयंति। अदाशुषां हविषामदातॄणां जनानामंतर्मध्ये विद्यमानं वेदो धनमर्यः सर्वेषां स्वामी त्वं ख्यो हि। पश्यसि हि। जानासी-त्यर्थः। तेषामयजमानानां वेदो धनं नोऽस्मभ्यमाभर। आहर। प्रयच्छेति यावत्। अजयमानेषु विद्यमानं धनंयागानुपयुक्तत्वा-द्व्यर्थमेव भवेत्। अतस्तस्य धनस्य सार्थकत्वाय तदीयं धन-मपहृत्य यजमानेभ्यः प्रयच्छेति तात्पर्यार्थः॥ ख्यः। ख्या प्रकथने। अयं दर्शनार्थोऽपि वर्तमाने छांदसो लुङ्। अस्यति-वक्तीत्यादिना च्लेरङादेशः। आतो लोप इटि चेत्याकारलोपः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। हि चेति निघात-प्रतिषेधः॥

॥ इति प्रथमस्य षष्टे द्वितीयो वर्गः ॥

उपो ष्विति षडृचं नवमं सूक्तं गोतमस्यार्षमैंद्रं। अंत्या जगती। आद्याः पंक्तयः। अनुक्रांतं च। उपो षु षड् जगत्यं-तमिति। सूक्तविनियोगो लैंगिकः। षोडशिशस्त्र आद्या सुसंदृ-शमित्यादिके द्वे ऋचौ च विनियुज्यंते। अथ षाडशीति खंडे सूत्रितं। उपो षु शृणुही गिरः सुसंदृशं त्वा वयं मघवन्निस्येका द्वे च पंक्ती। आ० ६. २.। इति॥

तत्र प्रथमामृचमाह ॥

उपो षु शृ॑णुही गिरो मघ॑वन्मात॑था इव ।
यदा न॑: सूनृतावतः कर आदर्थयांस इद्योजा न्विंद्र ते हरी॑ ॥ १ ॥

उपो इति॑ । सु । शृणुहि । गिर॑: । मघ॑ऽवन् । मा ।
अत॑थाःऽइव ।
यदा । न॑: । सूनृता॑ऽवतः । कर॑: । आ॑त् । अर्थयांसे । इत् ।
योज॑ । नु । इंद्र । ते । हरी इति॑ ॥ १ ॥

हे मघवन् धनवन्निंद्र गिरोऽस्मदीया स्तुतीरुपो उपैव सु शृणुहि । उपगत्य सम्यक् शृणु । अतथा इव । पूर्वं यथाविधस्त्वं तद्विपरीतो मा भूः । अस्मासु पूर्वं यथानुग्रहबुद्धियुक्तस्तथाविध एव भवेत्यर्थः । अपि च नोऽस्मान्सूनृतावतः । प्रियसत्यात्मिका वाक सूनृता । तया स्तुतिरूपया वाचा युक्तान्यदा करः । करोषि । आत् अनंतरं त्वमप्यर्थयास इत् । अर्थयस एव । याचसे एव । न तदास्से । अस्माभिः प्रयुक्ताः स्तुतीस्त्वमपि स्वीकरोषीत्यर्थः । अतो हे इंद्र ते हरी त्वदीयावश्वौ नु क्षिप्रं योज । रथे योजय ॥ शृणुहि । उतश्च प्रत्ययाच्छंदसि वावचनमिति वचनादुतश्च प्रत्ययादिति हेर्लुगभावः । अतथा इव । तथेवाचरति तथाति । सर्वप्रातिपदिकेभ्य इत्येक इति क्विप् । तथातेरप्रत्ययः । न तथा इव अतथा इव । अव्ययपूर्वपदप्रकृतिस्वरत्वं । करः । डुकृञ् करणे । लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः । नन्वङः सति शिष्टत्वात्

चित्स्वरेणांतोदात्तेन भवितव्यं । तर्हि लङि व्यत्ययेन शप् । ननु डुकृञ् करण इति भूवादौ पठ्यते । अतो व्यत्ययः कस्मात् क्रियत इति चेत् नैवं । यस्मादस्य धातोस्तत्र पाठोऽनर्थः । तथा हि । कः करत्करतीत्यत्र यदाऽस्तुन्यासकारहरदत्तौ व्यत्ययेन शबिति तस्मादस्य धातोर्भूवादौ पाठो नास्तीति गम्यते । किंच यद्यर्थं पठ्यत करदित्येवमादिरूपसिद्ध्यर्थं कृमृदृरुहिभ्यश्छंदसीति करातेरङ्विधानमनर्थकं स्यात् । अस्माल्लङि शप्यस्य रूपसिद्धेः । लुङ्लङोरर्थभेदाल्लुङ्येतद्रूपसिद्धये कर्तव्यमङ्विधानमिति चेत् न । छंदसि लुङ्लङ्लिट इति लुङादीनामेकत्र विधानेनार्थभेदाभावादित्यनेन प्रकारेणास्याभिधातुवृत्तावयं धातुर्निराकृतः । अतो व्यत्ययेनेति सिद्धं । अर्थयासि । अर्थ याचञायां । चुरादिरात्मनेपदी । लेट्याडागमः । योजा । युजिर् योगे । ण्यंताल्लोटि छंदस्युभयथेति शप आर्धधातुकत्वात्सेरनिटीति णिलोपः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं ॥

द्वितीयामृचमाह ॥

अक्षन्नमीमदंत ह्यव प्रिया अधूषत ।

अस्तोषत स्वभानवो विप्रा नविष्ठया मती योजा न्विंद्र ते हरी ॥ २ ॥

अक्षन् । अमीमदंत । हि । अव । प्रियाः । अधूषत । अस्तोषत । स्वऽभानवः । विप्राः । नविष्ठया । मती । योज । नु । इंद्र । ते । हरी । इति ॥ २ ॥

हे इंद्र त्वया दत्तान्यन्नान्यद्गन्। यजमाना भुक्तवंतः। भुक्त्वा चामीमदंत हि। तृप्ताश्चासन्। प्रियाः स्वकीयास्तनूरवाधूषत। अकंपयन्। अतिशयितरसास्वादनेन वक्तुमशक्तवंतः शरीराण्यकंपयन्। तदनंतरं स्वभानवः स्वायत्तदीप्तयो विप्रा मेधाविनस्ते नविष्ठया नवितृतमया मती मत्या स्तुत्यास्तोषत्। अस्तुवन्। अन्यत्पूर्ववद्योज्यं ॥ अक्षन्। अदेर्लुङि लुङ्सनोर्घस्लृ। पा॰ २. ४. ३७.। इति घस्लादेशः। मंत्रे घसेत्यादिना च्लेर्लुक्। गमहनेत्यादिनोपधालोपः। खरि चेति चर्त्वं। शासिवसिघसीनां चेति षत्वं। अडागम उदात्तः। अमीमदंत। मद तृप्तियोगे। चुरादिरात्मनेपदी। लुङि चङि णिलोपोपधाह्रस्वत्वद्विर्भावसन्वद्भावेत्वदीर्घाः। अधूषत। धूञ् कंपने। लुङि सिचि व्यत्ययेन गुणाभावः। यद्वा छंदस्युभयथेति सिचः सार्वधातुकत्वेन ङित्त्वात् क्ङिति चेति प्रतिषेधः। अथवा धू विधूनने। तौदादिकः। कुटादिः। अस्मात्कर्मणि लुङि गाङ्कुटादिभ्य इति सिचो ङित्त्वाद्गुणाभावः। नविष्ठया। णु स्तुतौ। कारणभूताया अपि स्तुतेः स्वव्यापारकर्तृत्वात्तृच्। तदंतात् तुश्छंदसीतीष्ठन्प्रत्ययः। तुरिष्ठेमेयःस्विति तृलोपः। मती। सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं। मंत्रे वृषेषपचमनेति क्तिन उदात्त्वं ॥

महापितृयज्ञे सुसंदृशमित्येषाह्वनीयोपस्थाने विनियुक्ता। सूत्रितं च। आहवनीयं सुसंदृशं त्वेति चैतया। आ॰ २. १९.। इति ॥

तामितां सूक्ते तृतीयामृचमाह॥

सुसंदृशं त्वा वयं मघवन्वंदिषीमहि।

प्र नूनं पूर्णवंधुरः स्तुतो याहि वशाँ अनु योजा न्विंद्र ते

हरी॥३॥

सुऽसंदृशं। त्वा। वयं। मघऽवन्। वंदिषीमहि।

प्र। नूनं। पूर्णऽवंधुरः। स्तुतः। याहि। वशान्। अनु।

योज। नु। इंद्र। ते। हरी इति॥३॥

हे मघवन्निंद्र सुसंदृशं सुष्ठुनुग्रहदृष्ट्या सर्वस्य द्रष्टारं त्वा त्वां वयं वंदिषीमहि। स्तवामहि। स्तुतिकर्तारो भूयास्मेत्याशास्महे। अस्माभिर्वंदिभिः स्तुतस्त्वं पूर्णवंधुरः स्तोतृभ्यो देयैर्धनैः पुरितेन रथेन युक्तः सन् वशान् कामयमानानन्यान्यजमानान्प्रति नूनं प्रयाहि। अवश्यं प्रतिष्ठस्व। योजेत्यादि पूर्ववत्॥ वंदिषीमहि। वदि अभिवादनस्तुत्योः। आशीर्लिङ्। लिङाशिषि। पा० ३. ४. ११६.। इति तस्यार्धधातुकत्वेन सार्वधातुकस्वराभावे प्रत्ययाद्युदात्तत्वं। मघवन्नित्यस्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वे सति पादादित्वान्निघाताभावः॥

चतुर्थीमृचमाह॥

स घा तं वृषणं रथमधि तिष्ठाति गोविदं।

यः पात्रं हारियोजनं पूर्णमिंद्र चिकेतति योजा न्विंद्र ते

हरी॥४॥

सः । घ । तं । वृषणं । रथं । अधि । तिष्ठाति । गोऽविदं ।

यः । पात्रं । हारिऽयोजनं । पूर्णं । इंद्र । चिकेतति । योज ।

नु । इंद्र । ते हरी इति ॥ ४ ॥

स घ स खल्विंद्रो वृषणं कामाभिवर्षकं गोविदं गवां लंभयितारं तं रथमधितिष्ठाति । इंद्रस्त्वं रथेऽधितिष्ठतु । आरूढो भवतु । हे इंद्र यो रथो हारियोजनमेतन्नामकं धानामिश्रितं पूर्णं सोमेन पूर्णं पात्रं चिकेतति ज्ञापयति ते रथमधितिष्ठेति पूर्वेणान्वयः । अधिष्ठाय च त्वदीयावश्वौ योजय । घा । ऋचितुनुघेति दीर्घः । रथं । अधिशीङ्स्थासां कर्म । पा॰ १. ४. ४६. । इत्यधिकरणस्य कर्मसंज्ञा । तिष्ठाति । लिङर्थे लेट्याडागमः । चिकेतति । कित ज्ञाने । लेट्यडागमः । जुहोत्यादित्याच्छपः श्लुः । बहुलं छंदसीति वचनाद्भ्यस्त्यस्येति वचनाद्भ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधो न भवति ॥

पंचमीमृचमाह ॥

युक्तस्ते अस्तु दक्षिण उत सव्यः शतक्रतो ।

तेन जायामुप प्रियां मंदानो याह्यंधसो योजा न्विंद्र ते

हरी ॥ ५ ॥

युक्तः । ते । अस्तु । दक्षिणः । उत । सव्यः । शतक्रतो इति

शतऽक्रतो ।

तेन॑ । जा॒यां । उप॑ । प्रि॒यां । म॒न्दा॒नः । या॒हि॒ । अन्ध॑सः ।

योज॑ । नु । इ॒न्द्र॒ । ते॒ । हरी॒ इति॑ ॥ ५ ॥

हे शतक्रतो बहुकर्मवन्निंद्र ते त्वदीये रथे दक्षिणो दक्षिणपार्श्वस्थोऽश्वो युक्तोऽस्तु । उत अपि च सव्यो वामपार्श्वस्थोऽपि युक्तोऽस्तु । तेन रथेनांधसः सोमलक्षणस्यान्नस्य पानेन मंदानो मत्तस्त्वं प्रियां प्रीणयित्रीं जायामुपयाहि । सा यत्र वर्तते तत्र गच्छेत्यर्थः । तदर्थं हे इंद्र त्वदीयावश्वौ रथे क्षिप्रं योजय । अनयोत्तरया च पीतसोमस्येंद्रस्य स्वगृहं प्रति प्रयाणं प्रतिपाद्यते ॥ मंदानः मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । लिटः कानच् । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः । अंधसः । अद भक्षणे । अदेर्नुम् धश्चेत्यसुन् धातोर्नुमागमो धकारांतादेशश्च ॥

अंत्येष्वहःसु हारियोजनस्य युनज्मीत्येषा याज्या । सूचितं च । युनज्मि ते ब्रह्मणा केशिना हरी इति याज्यानुवाक्ये अंत्येष्वहःस्विति ॥

तामेतां षष्ठीमृचमाह ॥

यु॒नज्मि॑ ते॒ ब्रह्म॑णा के॒शिना॒ हरी॒ उप॒ प्र या॑हि दधि॒षे गभ॑स्त्योः ।

उत्त्वा॑ सु॒तासो॑ रभ॒सा अ॑मन्दिषुः पूष॒ण्वान्व॑ज्रि॒न्त्सम् पत्न्या॑मदः ॥ ६ ॥

युनज्मि । ते । ब्रह्मणा । केशिना । हरी इति । उप । प्र । याहि । दधिषे । गभस्त्योः ।

उत् । त्वा । सुतासः । रभसाः । अमंदिषुः । पूषण्ऽवान् । वज्रिन् । सं । ऊं इति । पत्न्या । अमदः ॥ ६ ॥

हे इंद्र केशिना केशयुक्तौ शिखावंतौ ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्ररूपेण मंत्रेण युनज्मि । रथे संयोजयामि । तेन रथेनोप प्रयाहि । त्वद्गृहमुपगच्छ । गभस्त्योः । बाहुनामैतत् । बाह्वोरश्वबंधकान् रश्मीन्दधिषे । धारयस्व । त्वा त्वां सुतासो यज्ञेऽभिषुताः सोमा रभसा वेगवंतः । तीव्राः चिप्रं मदकारिण इत्यर्थः । उदमंदिषुः । उत्कृष्टमदयुक्तमकार्षुः । हे वज्रिन् अतस्त्वं स्वगृहं गत्वा पूषण्वान् । अत्र पूषन्शब्द पुष्टौ वर्तते । पुष्टिर्वै पूषा । पुष्टिमेवावरुंध इति श्रुतेः । सोमपानजनितया पुष्ट्या युक्तः सन् पत्न्या स्वभार्यया सह समु अमदः । सम्यगेव तृप्तो भव ॥ केशिना । केशशब्दान्मत्वर्थीय इनिः । सुपां सुलुगिति विभक्तेराकारः । रभसाः । अर्शआदित्वादच् । अमंदिषुः । व्यत्ययेन परस्मैपदं । पूषण्वान् । पुष पुष्टौ । श्वन्नुक्षन्नित्यादौ पूषन्निति निपात्यते । तच्चात्र भावसाधनं द्रष्टव्यं । पूषास्यास्तीति पूषण्वान् । मादुपधाया इति मतुपो वत्वं । नलोपेऽनो नुट् । पा० ८ २. १६. । इति नुट् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । अमदः । मदी हर्षे । छंदसि लुङ्लङ्लिट इति प्रार्थनायां लङ् । श्यनि प्राप्ते व्यत्ययेन शप् ॥ ॥ इति प्रथमस्य षष्ठे तृतीयो वर्गः ॥

अश्वावतीति षड्टचं दशमं सूक्तं गोतमस्यार्षमैंद्रं जागतं । तथा चानुक्रांतं । अश्वावति जागतमिति । अतिरात्रे तृतीये पर्याये ब्राह्मणाच्छंसिशस्त्र इदं सूक्तं । सूत्रितं च । अश्वावति प्रथमा पीब्रिं सुष्व इयमिं सत्यामिति याज्ये । आ० ६. ४. । इति ॥

तत्र प्रथमामृचमाह ॥

अश्वावति प्रथमो गोषु गच्छति सुप्रावीरिंद्र मर्त्यस्तवो-

तिभिः ।

तमित्पृणक्षि वसुना भवीयसा सिंधुमापो यथाभितो

विचेतसः ॥ १ ॥

अश्वऽवति । प्रथमः । गोषु । गच्छति । सुप्रऽअवीः । इंद्र ।

मर्त्यः । तव । ऊतिऽभिः ।

तं । इत् । पृणक्षि । वसुना । भवीयसा । सिंधुं । आपः ।

यथा । अभितः । विऽचेतसः ॥ १ ॥

हे इंद्र यो मर्त्यो मनुष्यस्तवोतिभिस्त्वदीयै रक्षणैः सुप्रावीः सुष्ठु प्ररक्षितो भवति स मर्त्योऽश्वावति बहुभिरश्वैर्युक्ते गृहे वर्तमानो गोषु प्राप्तव्येषु प्रथमो गच्छति । सर्वेभ्यो यजमानेभ्यः पूर्वमेव गोमान् भवतीत्यर्थः । त्वं तमित् तमेव पुरुषं भवीयसा बहुतरेण भवितृतमेन वा शतसहस्रादिसंख्यायुक्तेन वसुना धनेन पृणक्षि । संपृक्तं संपूर्णं करोषि । तत्र दृष्टांतः । विचे-तसो विशिष्टज्ञानहेतुभूता आपोयथाभितः सर्वासु दिक्षु सिंधुं

समुद्रं पूरयंति तद्वत्॥ अभ्रावति। मंत्रे सोमाश्वेति मतौ दीर्घत्वं। सुप्रावीः। अवितृस्तृतंत्रिभ्य ईरित्यवतेरीकारप्रत्ययः। ऊतिभिः। ऊतियूतीत्यादिना क्तिन उदात्तत्वं। पृक्षि। पृचौ संपर्के। रौधादिकः। भवीयसा बहुशब्दादीयसुनि बहोर्लोपो भू च बहोरिति बहुशब्दस्य भूभावः। ईयसुन ईकारलोपस्य। अत्र तु छांदसत्वादीकारलोपो न क्रियते। भूभावश्च क्रियते। अथवा भविष्यच्छब्दाच्छंदसीतीयसुन्। तुरिष्ठेमेयःस्विति टिलोपः॥

अपोनप्त्रीये होत्रकशस्त्रेऽग्निः पूर्यमाणा आपो न देवीरित्येषा-वतान्या। सूत्रितं च। आपो न देवीरुप यंति होत्रियमिति समाप्य। आ० ५. १.। इति। ब्राह्मणं च भवति। आपो न देवीरुप यंति होत्रियमिति होतृचमसेऽवनीयमानास्वन्वाहेति॥

तामेतां द्वितीयामृचमाह॥

आपो न देवीरुप यंति होत्रियमवः पश्यंति विततं यथा रजः।
प्राचैर्देवासः प्र णयंति देवयुं ब्रह्मप्रियं जोषयंते वरा इव॥ २॥

आपः। न। देवीः। उप। यंति। होत्रियं। अवः। पश्यंति। विऽततं। यथा। रजः।
प्राचैः। देवासः। प्र। नयंति। देवऽयुं। ब्रह्मऽप्रियं। जोषयंते। वराःऽइव॥ २॥

होत्रियं होतुः स्वभूतं चमसं देवीर्देव्यो द्योतमाना आपो न यथाप उपयंति। उपगच्छंति। तद्वदुपरि वर्तमाना देवा एतमेव चमसमवोऽवस्तात्पश्यंति। होतृचमसेऽस्माकं सोमाभिषवायापः पूरिता इति तेषां दृष्टिरप्यस्मिन् संलग्नाभूत्। तत्र दृष्टांतः। विततं विस्तीर्णं रजो ज्योतिः सूर्यसंबंधि यथा निरंतरमवस्तात्पतति तद्वत्। देवयुं देवान् कामयमानमेतं चमसं प्राचैः प्राचीनं यद्वा प्रांचनैः प्रगमनैरुत्तरवेद्यभिमुखं होमकाले प्रणयंति। होमार्थं प्रणीतं ब्रह्मप्रियं ब्रह्मणा सोमलक्षणेनान्नेन प्रीतं। संतृप्तं पूरितमित्यर्थः। जोषयंते। सर्वे देवास्तं चमसं सेवंते। वरा इव कन्यकां। यथा वरा ममेयं भविष्यति ममेयं भविष्यतीति कन्यकां सेवंते। एवं देवा अपि ममायं सोमो ममायं सोम इत्यस्य पार्श्वे वर्तंत इत्यर्थः। एवमपोनप्त्रीयविनियोगानुसारेण योजितं मंत्रस्यानुष्ठेयार्थप्रकाशकत्वात्॥ यदा तु रात्रिपर्यायेऽस्या विनियोगस्तदा त्वेवं व्याख्येयं। हे इंद्र देव्य आपो यथा निम्नदेशमुपगच्छंति। एवं देवास्त्वदीयं स्तोत्रं शुश्रूषमाणा होत्रियं होतृसंबंधि धिष्ण्यस्थानमुपगच्छंति। उपगत्य चावस्तात्पश्यंति विततं ज्योतिरिव। देवयुं देवानात्मन इच्छंतमेतं शंसितारमागताः सर्वे देवाः प्राचीनं प्रणयंति। अग्रतो धारयंति। ब्रह्मप्रियं स्तोत्रप्रियं त्वां शंसंतं वराः कन्यका इव सेवंते॥ होत्रियं। होतृशब्दात्तस्येदमर्थे घप्रत्ययः। अवः। पूर्वाधरावराणामसि पुरधवश्चैषामित्यसिप्रत्ययांतोदात्तः। प्राचैः। उच्चैर्नीचैरितिवदव्ययं। यद्वा। प्रपूर्वादंचतेर्घञर्थे कविधानं स्थास्नापाव्यधिहनियुध्यर्थमिति परिगणनस्योपलक्षणार्थत्वाद्भावे कप्रत्ययः।

अनिदितामिति नलोपः । जोषयंते । जुषी प्रीतिसेवनयोः । स्वात्मनः प्रयोज्यत्वाद्धेतुमिति णिच् ॥

प्रवर्ग्याभिष्टवेऽधि द्वयोरित्येषा । सृष्टोदकमिति खंडे सूत्रितं । अधि द्वयोरदधा उक्थ्यं वचः शुक्रं ते अन्यद्यजतं ते अन्यत् । आ० ४. ६ । इति ॥ हविर्धानप्रवर्तनेऽप्येषा । सूत्रितं च । यमे इव यतमाने यदैतमधि द्वयोरदधा उक्थ्यं वच इत्यर्धर्चं आरमेत् । आ० ४. ९. । इति ॥

तामेतां सूक्ते तृतीयामृचमाह ॥

अधि द्वयोरदधा उक्थ्यं१ वचो यतस्रुचा मिथुना या संपर्यतः ।

असंयत्तो व्रते ते क्षेति पुष्यति भद्रा शक्तिर्यजमानाय सुन्वते ॥ ३ ॥

अधि । द्वयोः । अदधाः । उक्थ्यं । वचः । यतऽस्रुचा । मिथुना । या । सपर्यतः ।

असंऽयत्तः । व्रते । ते । क्षेति । पुष्यति । भद्रा । शक्तिः । यजमानाय । सुन्वते ॥ ३ ॥

हे इंद्र द्वयोर्हविर्धानयोरुक्थ्यं । उक्थ्यं शस्त्रं । तद्योग्यं वचो युजे वामित्यादिमंत्ररूपं वचनमध्यदधाः । निहितवानसि । ननु हविर्धानयोर्द्वयोः कथमेकमेव वचोऽभिनिधीयत इत्याशंक्य ब्राह्मणेनैवं व्याख्यातं । अधि द्वयोरदधा उक्थ्यं वच इति

द्वयोर्ह्येतत्तृतीयं छदिरधिनिधीयत उक्थ्यं वच इति यदाह द्वयोर्ह्येतत्तृतीयं छदिरधिनिधीयत उक्थ्यं वच इति यदाह यज्ञियं वै कर्मोक्थ्यं वचो यज्ञमेवैतेन समर्द्धयतीति । तत्र यथा हविर्धानद्वय एकमेव तृतीयं चदिरेधिनिधीयते । एवं स्तोत्रमप्युभयोरेकं युक्तं । उक्थ्यं नाम यज्ञसंबंधि शस्त्रं तद्योग्यं वचनमपि यज्ञियं कर्म । तस्य यज्ञरूपयोर्हविर्धानयोर्यज्ञत्वसंपादनायाधिनिधानाद्यज्ञोऽपि समृद्धो भवति । कीदृशयोर्हविर्धानयोः । यतस्रुचा । यताः संबद्धाः स्रुचो ग्रहचमसादिलक्षणानि पात्राणि ययोस्ते । मिथुना युगलरूपेण वर्तमाने या ये हविर्धाने त्वां सपर्यतः पूजयतस्तयोरित्यर्थः । किंच । ईदृग्रूपहविर्धानयुक्तो यजमानोऽसंयतः शत्रुभिः सह युद्धार्थमनभिगतः सन् ते व्रते त्वदीये कर्मणि चेति । निवसति । पुष्यति च । प्रजया पशुभिश्च पुष्टो भवति च । सुन्वते तद्देवत्ये यागे सोमाभिषवं कुर्वतो यजमानस्य भद्रा कल्याणी शक्तिरुत्कृष्टं बलं भवति । एतत्सर्वं हविर्धानयोरुक्थ्यस्य वचसोऽधिनिधानेन त्वया कृतमित्यर्थः ॥ यतस्रुचा । यम उपरमे । निष्ठायामनुदात्तोपदेशेत्यादिनानुनासिकलोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । इदमादिषु त्रिषु पदेषु सुपां सुलुगिति विभक्तेराकारः । सपर्यतः । सपर पूजायां । कंड्वादिभ्यो यक् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे तस्यैव स्वरः शिष्यते । चेति । क्षि निवासगत्योः । बहुलं छंदसीति विकरणस्य लुक् । सुन्वते । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी । शतुरनुम इति विभक्तेरुदात्तत्वं ।

चतुर्थीमृचमाह ॥

आदंगिराः प्रथमं दधिरे वय इद्धाग्नयः शम्या ये सुकृत्यया ।
सर्वं पणेः समविंदंत भोजनमश्वावंतं गोमंतमा पशुं नरः ॥ ४ ॥

आत् । अंगिराः । प्रथमं । दधिरे । वयः । इद्धऽअग्नयः ।
शम्या । ये । सुऽकृत्यया ।
सर्वं । पणेः । सं । अविंदंत । भोजनं । अश्वऽवंतं । गोऽमंतं ।
आ । पशुं । नरः ॥ ४ ॥

यदा पणिभिर्गावोऽपहृतास्तदानीमंगिरा अंगिरसः प्रथमं पूर्वमग्रतो वयो हविर्लक्षणमन्नं दधिरे । इंद्रार्थं संपादितवंतः । आत् अनंतरं तादृशा येऽंगिरस इद्धाग्नयः प्रज्वलिताग्नियुक्ताः संतः सुकृत्यया शोभनकरणोपेतया शम्या कर्मणा शोभनेन यागेनेंद्रमयजन्निति शेषः । ते नरो यज्ञस्य नेतारोऽंगिरसः पणेरेतन्नाम्नोऽसुरस्य संबंधि सर्वं भोजनं धनं समविंदंत । समलभंत । कीदृशं । अश्वावंतं । अश्वयुक्तं । गोमंतं । गोभिर्युक्तं । आकारः समुच्चये । गवाश्वव्यतिरिक्तमन्यत्पशुजातं च समविंदंत ॥ अंगिराः । सुपां सुलुगिति जसः सुः । शम्या । शमीति कर्मनाम । शाम्यत्यनया क्रियया दोषजातमिति शमी । करणे घञ् । नोदात्तोपदेशस्य मांतस्यानाचमेरिति । वृद्धिप्रतिषेधः । गौरादित्वात् ङीष् । व्यत्ययेनाद्युदात्तत्वं ।

सुकृत्यया । शोभनं कृत्यं करणं यस्यां सा तथोक्ता । नञ्सु
भ्यामित्युत्तरपदांतोदात्तत्वं ।

पंचमीमृचमाह ॥

यज्ञैरथर्वा प्रथमः पथस्तते ततः सूर्यो व्रतपा वेन आजनि ।
आ गा आजदुशना काव्यः सचा यमस्य जातममृतं
यजामहे ॥ ५ ॥

यज्ञैः । अथर्वा । प्रथमः । पथः । तते । ततः । सूर्यः ।
व्रतऽपाः । वेनः । आ । अजनि ।
आ । गाः । आजत् । उशना । काव्यः । सचा । यमस्य ।
जातं । अमृतं । यजामहे ॥ ५ ॥

पणिभिरपहृतासु गोष्वथर्वैतत्संज्ञ ऋषिर्यज्ञैरिंद्रदेवत्यैर-
नुष्ठितैर्यागैः पथो गोसंबंधिनो मार्गान् प्रथमस्तते । तनुते ।
सर्वेभ्य ऋषिभ्यः पूर्वमेव कृतवानित्यर्थः । ततस्तदनंतरं व्रतपा
व्रतानां कर्मणां पालयिता वेनः कांतः सूर्यः सूर्यरूप इंद्र
आजनि । गवां प्रदर्शनायाविरभूत् । ततोऽथर्वा ता गा
आजत् । आभिमुख्येन प्राप्नोत् । तादृशस्येंद्रस्य काव्यः कवेः
पुत्र उशना भृगुः सचासुरनिरसनाय सहायोऽभूत् । यमस्या-
सुराणां नियमनार्थं जातं प्रादुर्भूतममृतं मरणरहितं तमिंद्रं
यजामहे । हविर्भिः पूजयामः ॥ पथः । शसि भस्य टेर्लोप इति
टिलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । तते । तनु
विस्तारे । बहुलं छंदसीति विकरणस्य लुक् । अनुदात्तोपदेश-

त्यादिनानुनासिकलोपः । अजनि । जनी प्रादुर्भावे । दीपजन-बुधेत्यादिना । पा० ३. १. ६१. । कर्तरि लुङि च्लेश्चिण् । आजत् । अज गतिक्षेपणयोः ॥

षष्ठीमृचमाह ॥

बर्हिर्वा यत्स्वपत्याय वृज्यतेऽर्को वा श्लोकमाघोषते दिवि ।
ग्रावा यत्र वदति कारुरुक्थ्य १ स्तस्येदिंद्रो अभिपित्वेषु रण्यति ॥ ६ ॥

बर्हिः । वा । यत् । सुऽअपत्याय । वृज्यते । अर्कः । वा । श्लोकं । आऽघोषते । दिवि ।
ग्रावा । यत्र । वदति । कारुः । उक्थ्यः । तस्य । इत् । इंद्रः । अभिऽपित्वेषु । रण्यति ॥ ६ ॥

स्वपत्याय शोभनापतनहेतुभूताय कर्मणे बर्हिर्वा यद्यदा वृज्यते । क्रियते । अध्वर्युणा यागार्थमाक्रियते । अर्को वा स्तोत्रनिष्पादको होता वा श्लोकं स्तुतिरूपां वाचं दिवि द्योतमाने यज्ञे यदाघोषते । उच्चारयति । यत्र यस्मिन्काले ग्रावाभिषवार्थं प्रवृत्त उपलो वदति शब्दं करोति । तत्र दृष्टांतः । कारुरुक्थ्यः । लुप्तोपममेतत् । उक्थस्य शस्त्रस्य शंसिता कारुः स्तोता यथाभिमतशब्दं करोति तद्वत् । तस्य पूर्वोक्तस्य सर्वस्याभिपित्वेष्वभिप्राप्तिष्विंद्रो रण्यति । रमते । यद्वा पूर्वोक्तानां बर्हिरादीनामभिप्राप्तिषु सतीष्विंद्रो रण्यति । अस्मदीयो यागो भविष्यतीति हर्षशब्दं करोति ॥ वृज्यते । वृजी वर्जने ।

अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते। निपातैर्यद्यदिहंतेति निघातप्रतिषेधः । आघोषते । घुषिर । विशब्दने । भौवादिकः । अत्रापि यदित्यस्य निपातस्यानुषंगान्निघाताभावः । रण्यति । रमु क्रीडायां । व्यत्ययेन श्यन् परस्मैपदं च । अंत्यविकारश्छांदसः । यद्वा रण शब्दार्थः । व्यत्ययेन श्यन् ॥

॥ इति प्रथमस्य षष्ठे चतुर्थो वर्गः ॥

असावीति विंशत्यृचमेकादशं सूक्तं । अत्रानुक्रम्यते । असावि विंशतिः षडनुष्टुभ औष्णिहपांक्तगायत्रत्रैष्टुभास्तृचाः प्रगाथ इति । आदितः षडनुष्टुभः सप्तम्याद्यास्तिस्र उष्णिहः । दशम्याद्यास्तिस्रः पंक्तयः । त्रयोदश्याद्यास्तिस्रो गायत्र्यः । षोडश्याद्यास्तिस्रस्त्रिष्टुभः । एकोनविंशो बृहती विंशो सतोबृहती । अनुवर्तनाद्गोतम ऋषिः । अनादेशपरिभाषयेंद्रो देवता ॥ सूक्तविनियोगो लिंगादवगंतव्यः ॥ अविकृतषोडशिशस्त्र आद्यौ तृचौ स्तोत्रियानुरूपौ । सूत्रितं च । अथ षोडश्यसावि सोम इंद्र त इति स्तोत्रियानुरूपौ । आ० ६. २. । इति । आभिप्लविकेषूक्थेषु तृतीयसवनेऽच्छावाकस्यैतावेव तृचौ वैकल्पिकौ स्तोत्रियानुरूपौ । एष्वू ष्विति खंडे सूत्रितं । असावि सोम इंद्र त इममिंद्र सुतं पिब । आ ७. ८. । इति ॥

तत्र प्रथमामृचमाह ॥

असा॑वि॒ सोम॑ इंद्र ते॒ शवि॑ष्ठ धृष्ण॒वा ग॑हि ।

आ त्वा॑ पृणक्त्विंद्रि॒यं रजः॒ सूर्यो॒ न र॒श्मिभिः॑ ॥ १ ॥

असावि। सोमः। इंद्र। ते। शविष्ठ। धृष्णो इति।

आ। गहि।

आ। त्वा। पृणक्तु। इंद्रियं। रजः। सूर्यः। न।

रश्मिऽभिः॥ १॥

हे इंद्र ते त्वदर्थं सोम असावि। अभिषुतोऽभूत्। हे शविष्ठ। अतिशयेन बलवन्। अत एव धृष्णो शत्रूणां धर्षयितरिंद्र आगहि। देवयजनदेशमागच्छ। आगतं त्वामिंद्रियं सोमपानेनोत्पन्नं प्रभूतं सामर्थ्यमापृणक्तु। आपूरयतु। रजोऽतरिक्षं रश्मिभिः किरणैः सूर्यो न। यथा सूर्यः पूरयति तद्वत्॥ शविष्ठ। शवस्विन्शब्दादिष्ठनि विन्मतोर्लुक्। टेरिति टिलोपः। पादादित्वान्निघाताभावः। गहि। गमेर्लोटि बहुलं छंदसीति शपो लुक्। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। तस्यासिद्धवदत्रा भादित्यसिद्धवत्त्वाद्धेर्लुगभावः॥

द्वितीयामृचमाह॥

इंद्रमिद्धरी वहतोऽप्रतिधृष्टशवसं।

ऋषीणां च स्तुतीरुप यज्ञं च मानुषाणां॥ २॥

इंद्रं। इत्। हरी इति। वहतः। अप्रतिधृष्टऽशवसं।

ऋषीणां। च। स्तुतीः। उप। यज्ञं। च। मानुषाणां॥ २॥

अप्रतिधृष्टशवसं केनाप्यप्रतिधर्षितबलं। अहिंसितबलमित्यर्थः। इंद्रमित्तमिंद्रमेव ऋषीणां वसिष्ठादीनां मानुषाणा-

मन्येषां च मनुष्याणां च स्तुतीर्यज्ञं च हरी अश्वावुपवहतः । समीपं प्रापयतः । यत्र यत्र स्तुवंति यत्र यत्र यजंते तत्र सर्वत्रेंद्रमश्वौ प्रापयत इत्यर्थः ॥ मानुषाणां । मनोर्जातावित्ति मनुशब्दादञ् षुगागमश्च ॥

तृतीयामृचमाह ॥

आ तिष्ठ वृत्रहन्रथं युक्ता ते ब्रह्मणा हरी ।

अर्वाचीनं सु ते मनो ग्रावा कृणोतु वग्नुना ॥ ३ ॥

आ । तिष्ठ । वृत्रऽहन् । रथं । युक्ता । ते । ब्रह्मणा ।

हरी इति ।

अर्वाचीनं । सु । ते । मनः । ग्रावा । कृणोतु । वग्नुना ॥ ३ ॥

हे वृत्रहन् शत्रूणां हंतरिंद्र रथमातिष्ठ । आरोह । यस्मात्ते हरी त्वदीयावश्वौ ब्रह्मणा स्तोत्रलक्षणेन मंत्रेण युक्ता । रथेऽस्माभिर्योजितौ । तस्मात्त्वं रथमातिष्ठ । ते मनस्त्वदीयं मनश्च ग्रावाभिषवार्थं प्रवृत्तः पाषाणो वग्नुना वचनीयेनाभिषवशब्देनार्वाचीनमस्मदभिमुखं सु कृणोतु । सुष्ठु करोतु । युक्ता । सुपां सुलुगित्याकारः । वग्नुना । वचेर्गश्च । उ० ३. ३३. । इति नुप्रत्ययो गकारश्चांतादेशः ॥

चतुर्थीमृचमाह ॥

इममिंद्र सुतं पिब ज्येष्ठममर्त्यं मदं ।

शुक्रस्य त्वाभ्यंचरन्धारा ऋतस्य सादने ॥ ४ ॥

इमं। इंद्र। सुतं। पिब। ज्येष्ठं। अमर्त्यं। मदं।
शुक्रस्य। त्वा। अभि। अक्षरन्। धाराः। ऋतस्य।
सदने ॥४॥

हे इंद्र सुतमभिषुतमिमं सोमं पिब। कीदृशं। ज्येष्ठं। अतिशयेन प्रशस्यं। मदं। मदकरं। अमर्त्यं। अमारकं। सोमपानजन्यो मदो मदांतरवन्मारको न भवतीत्यर्थः। तथा ऋतस्य यज्ञस्य संबंधिनि सदने गृहे वर्तमानाः शुक्रस्य दीप्तस्यास्य सोमस्य धारास्त्वामभ्यक्षरन्। आभिमुख्येन संचलंति। त्वां प्राप्नुवंति स्वयमेवागच्छंतीत्यर्थः॥ ज्येष्ठं। प्रशस्यशब्दादिष्ठनि ज्य चेति ज्यादेशः। अक्षरन्। क्षर संचलने। छांदसो लङ्॥

पंचमीमृचमाह ॥

इंद्राय नूनमर्चतोक्थानि च ब्रवीतन।
सुता अमत्सुरिंदवो ज्येष्ठं नमस्यता सहः॥५॥

इंद्राय। नूनं। अर्चत। उक्थानि। च। ब्रवीतन।
सुताः। अमत्सुः। इंदवः। ज्येष्ठं। नमस्यत। सहः॥५॥

हे ऋत्विजः। इंद्राय नूनं क्षिप्रमर्चत। पूजनं कुरुत। एतदेव स्पष्टीक्रियते। उक्थान्यप्रगीतमंत्रसाध्यानि स्तोत्राणि च ब्रवीतन। ब्रूत। सुता अभिषुता इंदवः सोमाश्चामत्सुः। आगतमेव तमिंद्रं मत्तं कुर्वंतु। अनंतरं ज्येष्ठं प्रशस्यतमं सहः सहस्विनं बलवंतं तमिंद्रं नमस्यत। नमस्कुरुत॥ ब्रवीतन।

ब्रवीतेर्लोटि तप्तनप्तनथनाश्चेति तनबादेशः । अमत्स्‌ः । मदी हर्षे । छांदसः प्रार्थनायां लुङ् । आगमानुशासनस्यानित्यत्वा-दिडभावः । नमस्यत । नमोवरिवश्चित्रङ इति क्यच् । सङ्गः । लुगकारेकाररेफाश्च वक्तव्याः । पा० ४. ४. १२८. २. । इति मत्वर्थीयस्य लुक् ॥

॥ इति प्रथमस्य षष्ठे पंचमो वर्गः ॥

षष्ठीमृचमाह ॥

नकिष्टद्रथीतरो हरी यदिंद्र यच्छसे ।

नकिष्ट्वानु मज्मना नकिः स्वश्व आनशे ॥ ६ ॥

नकिः । त्वत् । रथिऽतरः । हरी इति । यत् । इंद्र ।

यच्छसे ।

नकिः । त्वा । अनु । मज्मना । नकिः । सुऽअश्वः ।

आनशे ॥ ६ ॥

हे इंद्र यद्यस्मात्त्वं हरी एतत्संज्ञावश्वौ यच्छसे रथे योजयसि । तस्मात्त्वत्तोऽन्यः कश्चिद्रथीतरोऽतिशयेन रथवान् नकिः । नास्ति । अन्येषामीदृगश्वयुक्तरथाभावात् । त्वा त्वाम-नुलक्ष्य मज्मना । बलनामैतत् । बलेन सदृशोऽपि नकिः । न ह्यस्ति । स्वश्वः शोभनाश्वोऽन्योऽपि त्वां नकिरानशे । न प्राप । इंद्रस्य बलाश्वयोरसाधारणत्वादिंद्रसदृशो बलवान-श्ववान् लोके कश्चिदपि नास्तीत्यर्थः ॥ नकिष्टत् । युष्मत्तत्ततुः-ष्वंतःपादमिति षत्वं । रथीतरः । अतिशयेन रथी । तरपीत्

रयिन इतोकारांतदेश:। अवग्रहसमये छांदसं ह्रस्वत्वं। यच्छसे। यमेर्व्यत्ययेनात्मनेपदं। स्वश्व:। बहुव्रीहावाद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। आनशे। अश्नोतेर्लिट्यभ्यासा-दुत्तरस्य नुट्॥

आभिप्लविकेषूक्थ्येषु तृतीयसवने ब्राह्मणाच्छंसिनो य एक इद्विदयत इति वैकल्पिक: स्तोत्रियस्तृच:। एन्द्र याहीति खंडे सूत्रितं। सखाय आशिषामहि य एक इद्विदयते। आ० ७. ८.। इति॥ महाव्रतेऽपि निष्केवल्य औष्णिहतृचाशीतावयं तृचो विनियुक्त:। तथैव पंचमारण्यके सूत्रितं। य एक इद्विदयत आयाह्यद्रिभि: सुतमिति॥

तृचे प्रथमां सूक्ते सप्तमीमृचमाह॥

य एक इद्विदयते वसु मर्ताय दाशुषे।
ईशानो अप्रतिष्कुत इंद्रो अंग॥ ७॥

य:। एक:। इत्। विऽदयते। वसु। मर्ताय। दाशुषे।
ईशान:। अप्रतिऽस्कुत:। इंद्र:। अंग॥ ७॥

य इंद्र एक इत् एक एव दाशुषे हविर्दत्तवते मर्ताय मनुष्याय यजमानाय वसु धनं विदयते। विशेषेण ददाति। अंगेति क्षिप्रनाम। अप्रतिष्कुत: परैरप्रतिशब्दित:। प्रतिकूल-शब्दरहित इत्यर्थ:। एवंभूत: स इंद्र: क्षिप्रमीशान: सर्वस्य जगत: स्वामी भवति॥ विदयते। दय दानगतिरक्षणहिंसादानेषु। शप: पित्त्वादनुदात्तत्वं। तिङश्च लसार्वधातुकस्वरेण धातुस्वर एव शिष्यते। यद्वृत्तयोगादनिघात:। अप्रतिष्कुत:। कु शब्दे।

प्रतिकूलं कूयते शब्दयत इति प्रतिस्कुतः। पारस्करादेराकृतिगणत्वात्सुट्। सुषामादित्वात्षत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं॥

अष्टमीमृचमाह॥

कदा मर्तमराधसं पदा क्षुंपमिव स्फुरत्।

कदा नः शुश्रवद्गिर इंद्रो अंग॥ ८॥

कदा। मर्तं। अराधसं। पदा। क्षुंपंऽइव। स्फुरत्।

कदा। नः। शुश्रवत्। गिरः। इंद्रः। अंग॥ ८॥

अराधसं हविर्लक्षणेन राधसा धनेन रहितं। अयष्टारमित्यर्थः। एवंविधं मर्तं मनुष्यमिंद्रः पदा पादेन क्षुंपमिवाहिच्छत्रकमिव कदा स्फुरत्। स्फुरिष्यति। बाधिष्यति। यथाहिच्छत्रं मंडलाकारेण शयानं कश्चिदनायासेन हंति। एवमिंद्रोऽपि कदास्मच्छत्रून् हनिष्यतीत्यर्थः। स्फुरत्। स्फुरतिर्वधकर्मा। स्फुरति स्फुलतीति वधकर्मसु पठितत्वात्। नोऽस्माकं यष्टॄणां गिरः स्तुतिलक्षणा वाच इंद्रः कदा कस्मिन्कालेऽंग क्षिप्रं शुश्रवत्। श्रोष्यतीति वितर्क्यंते। अत्र निरुक्तं। क्षुंपमहिच्छत्रकं भवति यत् क्षुभ्यते। कदा मर्तमनाराधयंतं पादेन क्षुंपमिवावस्फुरिष्यति। कदा नः श्रोष्यति गिर इंद्रोऽंग। अंगेति क्षिप्रनाम। नि॰ ५. १७.। इति॥ पदा। पादशब्दस्य पद्दन्नित्यादिना पदादेशः। ऊडिदमिति विभक्तेरुदात्तत्वं। क्षुंपमिव। क्षुभ संचलने। अस्मात्कर्मणि घञि बहुलवचनाद्धातोर्नुमागमः। वर्णव्यापत्त्या भकारस्य पकारः। स्फुरत्।

स्फुर संचलने । छंदसि लुङ्लङ्लिट इति लृडर्थे लङ् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । स्रुस्रवत् । स्रु स्रवणे । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः ॥

नवमीमृचमाह ॥

यश्चिद्धि त्वा बहुभ्य आ सुतावाँ आविवासति ।
उग्रं तत्पत्यते शव इंद्रो अंग ॥ ९ ॥

यः । चित् । हि । त्वा । बहुऽभ्यः । आ । सुतऽवान् ।
आऽविवासति ।
उग्रं । तत् । पत्यते । शवः । इंद्रः । अंग ॥ ९ ॥

बहुभ्यो मनुष्येभ्यः सकाशाद्यश्चिद्धि य एव खलु यजमानः सुतावान् अभिषुतसोमयुक्तः सन् हे इंद्र त्वा त्वामाविवासति । परिचरति । विवासतिः परिचरणकर्मा । तत्तस्मै यजमानाय यदुग्रमुद्गूर्णं शवो बलमिंद्रोऽंग क्षिप्रं पत्यते । पातयति । प्रापयति ॥ तत् । सुपां सुलुगिति चतुर्थ्या लुक् । पत्यते । पत्लृ गतौ । अस्मादंतर्भावितण्यर्थाद्व्यत्ययेन श्यन् ॥

चातुर्विंशकेऽहनि माध्यंदिने सवनेऽच्छावाकस्य स्वादोरित्था विषुवत इति वैकल्पिकः स्तोत्रियस्तृचः । होत्रकाणामिति खंडे सूत्रितं । यः सत्राहा विचर्षणिः स्वादोरित्था विषूवतः । आ० ७. ४. । इति ॥ पृष्ठ्यस्य पंचमेऽहनि निष्केवल्येऽप्ययं तृचोऽनुरूपः । स्तोमे वर्धमान इति खंडे सूत्रितं । स्वादोरित्था विषवत उप नो हरिभिः सुतं । आ० ७. १२. । इति ॥

तृचे प्रथमा सूक्ते दशमीमृचमाह ॥

स्वादोरित्था विषूवतो मध्वः पिबंति गौर्यः ।
या इंद्रेण सयावरीर्वृष्णा मदंति शोभसे वस्वीरनु स्वराज्यं ॥ १० ॥

स्वादोः । इत्था । विषुऽवतः । मध्वः । पिबंति । गौर्यः ।
याः । इंद्रेण । सऽयावरीः । वृष्णा । मदंति । शोभसे ।
वस्वीः । अनु । स्वऽराज्यं ॥ १० ॥

स्वादोः स्वादुभूतस्य रसयुक्तस्येत्था विषूवत इत्यमनेन प्रकारेण सर्वयज्ञेषु व्याप्तियुक्तस्य मध्वो मधुररसस्य सोमस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । एवंविधं सोमं गौर्यो गौरवर्णा गावः पिबंति । या गावः शोभसे शोभार्थं वृष्णा कामाभिवर्षकेणेंद्रेण सयावरीः सह यांत्यो गच्छंत्यः सत्यो मदंति । हृष्टा भवंति । ता इंद्रपीतस्य सोमस्य शेषं पिबंतीत्यर्थः । वस्वीः पयःप्रदानेन निवासकारिण्यस्ता गावः स्वराज्यं स्वस्य स्वकीयस्येंद्रस्य यद्राज्यं राजत्वं तदनुलक्ष्यावस्थिता इति शेषः ॥ विषूवतः । विषॢ व्याप्तौ । अस्मादौणादिकः कुप्रत्ययः । ततो मतुप् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । अन्येषामपि दृश्यत इति संहितायां दीर्घः । व्यत्ययेन मतोर्वत्वं । मध्वः । जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । गौर्यः । षिद्गौरादिभ्यश्चेति ङीष् । जसि यणादेश उदात्तस्वरितयोर्यण

इति परस्यानुदात्तस्य स्वरितत्वं । यथावरीः । या प्रापणे । अतो मनन्निति वनिप् । वनो र चेति ङीब्रेफौ । मदंति । मदी हर्षे । श्यनि प्राप्ते व्यत्ययेन शप् । वस्वोः । वस निवासे । शृस्वृस्निहीत्यादिना वसेरुप्रत्ययः । धात्वे निदित्यनुवृत्तेराद्यु-दात्तत्वं । वोतो गुणवचनादित्यत्र गुणवचनाङ्ङीबाद्युदात्तार्थं । पा० ४. १. ४४. १. । इति वचनाद्वसुशब्दान्ङीपि यणादेशः । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । स्वराज्यं । अकर्मधारये राज्यमित्युत्तरपदाद्युदात्तत्वं ॥

॥ इति प्रथमस्य षष्ठे षष्ठो वर्गः ॥

एकादशीमृचमाह ॥

ता अस्य पृशनायुवः सोमं श्रीणंति पृश्नयः ।

प्रिया इंद्रस्य धेनवो वज्रं हिन्वंति सायकं वस्वीरनु

स्वराज्यं ॥ ११ ॥

ताः । अस्य । पृशनऽयुवः । सोमं । श्रीणंति । पृश्नयः ।

प्रियाः । इंद्रस्य । धेनवः । वज्रं । हिन्वंति । सायकं ।

वस्वीः । अनु । स्वऽराज्यं ॥ ११ ॥

ता पूर्वोक्ता अस्येंद्रस्य पृशनायुवः स्पर्शनकामाः पृश्नयो नानावर्णा गाव इंद्रेण पातव्यं सोमं पयसा श्रीणंति मिश्री-कुर्वंति । इंद्रस्य प्रियाः प्रीतिहेतुभूतास्ता धेनवः सायकं शत्रूणामंतकारकं वज्रमायुधं हिन्वंति । शत्रुषु प्रेरयंति ।

इंद्रो यथा शत्रुषु वज्रं प्रेरयति तथेंद्रस्य मदमुत्पादयंतीत्यर्थः । अन्यत्पूर्ववत् ॥ हिन्वंति । हिविः प्रीणनार्थः । इदित्वान्नुम् । सायकं । षो अंतकर्मणि । खुल्यात्वे युगागमः ॥

द्वादशीमृचमाह ॥

ता अ॑स्य॒ नम॑सा॒ सहः॑ सप॒र्यंति॒ प्रचे॑तसः ।
व्र॒तान्य॑स्य सश्चिरे पु॒रूणि॑ पू॒र्वचि॑त्तये॒ वस्वी॒रनु॑ स्व॒राज्य॑म् ॥ १२ ॥

ता । अ॒स्य॒ । नम॑सा । सहः॑ । स॒प॒र्यंति॑ । प्रऽचे॑तसः ।
व्र॒तानि॑ । अ॒स्य॒ । स॒श्चि॒रे॒ । पु॒रूणि॑ । पू॒र्वऽचि॑त्तये । वस्वीः॑ । अनु॑ । स्व॒ऽराज्य॑म् ॥ १२ ॥

प्रचेतसः प्रकृष्टज्ञानास्ता गावोऽस्येंद्रस्य सहो बलं नमसा स्वकीयेन पयोरूपेणान्नेन सपर्यंति । परिचरंति । पुरूणि बहून्यस्येंद्रस्य व्रतानि शत्रुवधादिरूपाणि वीर्यकर्माणि सश्चिरे । सेविरे । ज्ञापयंत इत्यर्थः । किमर्थं । पूर्वचित्तये । युयुत्सूनां शत्रूणां पूर्वमेव प्रज्ञापनाय । अनेन युध्यमाना वृत्रादयः सर्वे मरणं प्राप्ताः किमर्थं भवद्भिः प्राणास्त्यज्यंत इति तेषां बोधनायेत्यर्थः । अन्यत् पूर्ववत् ॥ सश्चिरे । सश्च गतौ । व्यत्ययेनात्मनेपदं । पूर्वचित्तये । चिती संज्ञाने । भावे क्तिन् । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं ॥

चातुर्विंशकेऽहनि प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्र इंद्रो दधीच इति षडहस्तोत्रियसंज्ञकस्तृचः । सूत्रितं च । आदह स्वधामन्वित्येका हे चेंद्रो दधीचो अस्थभिः । आ० ७. २ । इति ॥

तत्रे प्रथमां सूक्ते त्रयोदशीमृचमाह ॥

इंद्रो दधीचो अस्थभिर्वृत्राण्यप्रतिष्कुतः ।

जघान नवतीर्नव ॥ २३ ॥

इंद्रः । दधीचः । अस्थऽभिः । वृत्राणि । अप्रतिऽस्कुतः ।

जघान । नवतीः । नव ॥ १३ ॥

अत्र शाट्यायनिन इतिहासमाचक्षते । अथर्वणस्य दधीचो जीवतो दर्शनेनासुराः पराबभूवुः । अथ तस्मिन् स्वर्गतेऽसुरैः पूर्णा पृथिव्यभवत् । अथेंद्रस्तैरसुरैः सह योद्धुमशक्नुवंस्तमृषिमन्विच्छन् स्वर्गं गत इति शुश्राव । अथ पप्रच्छ तत्रत्यान् नेह किमस्य किंचित्परिशिष्टमंगमस्तीति । तस्मा अवोचन् अस्त्येतदाश्वं शीर्षं येन शिरसाश्विभ्यां मधुविद्यां प्राब्रवीत् । तत्तु न विद्म यत्राभवदिति । पुनरिंद्रोऽब्रवीत् । तदन्विच्छतेति । तद्धान्वैषिषुः । तच्छर्यणावत्यनुविद्याजह्रुः । शर्यणावद्ध वै नाम कुरुक्षेत्रस्य जघनार्धे सरः स्यंदते । तस्य शिरसोऽस्थिभिरिंद्रोऽसुराञ्जघानेति ॥ अप्रतिष्कुतः परैरप्रतिशब्दितः । प्रतिकूलशब्दरहित इंद्र आथर्वणस्य दधीच एतत्संज्ञकस्य ऋषेरस्थिभिरश्वशिरःसंबंधिभिरस्थिभिर्नवतीर्नव नवसंख्याका नवतीर्दशोत्तराष्टशतसंख्याकाः । तथा हि । लोकत्रयवर्तिनो देवाञ्जेतु-

मादावासुरी माया त्रिधा संपद्यते। त्रिविधातीतानागतवर्तमानकालभेदेन तत्कालवर्तिनो देवाञ्जेतुं पुनरपि प्रत्येकं त्रिगुणिता भवति। एवं नव संपद्यते। पुनरप्युत्साहादिशक्तित्रयरूपेण त्रैगुण्ये सति सप्तविंशतिः संपद्यते। पुनः सात्त्विकादिगुणत्रयभेदेन त्रैगुण्ये सत्येकोत्तराशीतिः संपद्यते। एवं चतुर्भिस्त्रिकैर्गुणितायाया मायाया दशसु दिक्षु प्रत्येकमवस्थाने सति नव नवतयः संपद्यते। एवंविधमायारूपाणि वृत्राख्यावरकाख्यसुरजातानि जघान। हतवान्॥ दधीचः। दध्यंचतीति दध्यङ्। अंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। षष्ठ्येकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तदपवादतया चाविति पूर्वपदस्यांतोदात्तत्वं प्राप्तं। अंचेश्छंदस्यसर्वनामस्थानं। पा० ६. १. १७०.। इति पुनर्विभक्त्युदात्तत्वविधानेन तद्वाध्यते। अस्थभिः। छंदस्यपि दृश्यत इत्यनजादावप्यस्थिशब्दस्यानङादेशः। स चोदात्तः॥

चतुर्दशीमृचमाह॥

इच्छन्नश्वस्य यच्छिरः पर्वतेष्वपश्रितं।

तद्विदच्छर्यणावति॥ १४॥

इच्छन्। अश्वस्य। यत्। शिरः। पर्वतेषु। अपऽश्रितं।

तत्। विदत्। शर्यणाऽवति॥ १४॥

पर्वतेषु पर्ववत्सु गिरिष्वपश्रितमपगत्य स्थितमश्वसंबंधि दधीचो यच्छिर इच्छन्निंद्रो वर्तते। शर्यणावत्येतन्नाम्नि सरसि

लच्छिरो विदत्। अज्ञासीत्। ज्ञात्वा तदाहृत्य तदीयैरस्थिभिर्वृत्राणि जघानेति पूर्वस्यामृचि संबंधः॥ इच्छन्। इषु इच्छायां। तुदादित्वाच्छप्रत्ययः। विदत्। वेत्तेर्लुङि व्यत्ययेन च्लेरङादेशः। शर्यणावति। शर्यणा नाम देशः। तेषामदूरभवं सरः शर्यणावत्। मध्वादिषु शर्यणशब्दस्य पाठान्मध्वादिभ्यश्च। पा० ४. २. ८६.। इति चातुर्थिको मतुप्। संज्ञायामिति मतुपो वत्वं। मतौ बह्वचोऽनजिरादीनामिति दीर्घः॥

अतिमूर्तिनाम्न्येकाहे कर्तव्ये पूर्वमेवैकं मासं सौर्यचांद्रमसीभ्यामिष्टिभ्यां यष्टव्यं। तत्र पूर्वपक्षे चांद्रमसीष्टिः। अत्राह गोरिति तस्यां प्रधानस्यानुवाक्या। अतिमूर्तिनेति खंडे सूचितं। अत्राह गोरमन्वत नवो नवो भवति जायमानः। आ० ९. ८.। इति॥

तामेतां सूक्ते पंचदशीमृचमाह॥

अत्राह गोरमन्वत नाम त्वष्टुरपीच्यं।

इत्था चंद्रमसो गृहे॥ १५॥

अत्र। अह। गोः। अमन्वत। नाम। त्वष्टुः। अपीच्यं।

इत्था। चंद्रमसः। गृहे॥ १५॥

अत्राहास्मिन्नेव गोर्गंतुश्चंद्रमसो गृहे मंडले त्वष्टुर्दीप्तस्यादित्यस्य संबंध्यपीच्यं रात्रावंतर्हितं स्वकीयं यन्नाम तेजस्तदादित्यस्य रश्मय इत्थेत्थमनेन प्रकारेणामन्वत। अजानन्। उदकमये स्वच्छे चंद्रबिंबे सूर्यकिरणाः प्रतिफलंति। तत्र प्रतिफलिताः किरणाः सूर्ये यादृशीं संज्ञां लभंते तादृशीं

चंद्रेऽपि वर्तमाना लभंत इत्यर्थः । एतदुक्तं भवति । यद्यप्या-
वंतर्हितं सौरं तेजस्तच्चंद्रमंडलं प्रविश्याह्नीव नैशं तमो
निवार्य सर्वं प्रकाशयति । ईदृग्भूततेजसा युक्तः सूर्यश्चंद्र एव
द्वादशादित्येष्विंद्रस्यापि परिगणितत्वात् । अतोऽहोरात्रयोः
प्रकाशक इंद्र एवेतींद्रस्तुतिः प्रतीयमानत्वादिंद्रो देवतेत्येतदुप-
पन्नं भवति । ईदृग्भूतस्य तेजस आश्रयत्वेन चंद्रमसः प्राधान्य-
विवक्षया चांद्रमस्यामिष्टौ विनियोगोऽप्युपपद्यते ॥ अत्र
निरुक्तं । अथाप्यस्यैको रश्मिश्चंद्रमसं प्रतिदीप्यते तदेतेनो-
पेक्षितव्यमादित्यतोऽस्य दीप्तिर्भवतीति । सुषुम्णः सूर्यरश्मि-
श्चंद्रमा गंधर्व इत्यपि निगमो भवति । सोऽपि गौरुच्यते ॥
अत्राह गोरमन्वतेति । नि० २. ६. । अत्राह गोः सममंस-
तादित्यरश्मयः स्वं नामापीच्यमपचितमपगतमपिहितमंतर्हितं
वा । नि० ४. २५. । इति ॥ अमन्वत । मनु अवबोधने ।
अपीच्यं । अपपूर्वाच्चिनोतेरप्रत्यादयश्च । उ० ४. ११२. । इति
निपातनाद्यत् । अत एवाभिमतरूपसिद्धिः । यद्वा । अपिपूर्वा-
दंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः ।
अपिगते निगते भवमपीच्यं । भवे छंदसीति यत् । अच इत्य-
कारलोपे चाविति दीर्घत्वं । तित्स्वरितः । अपीच्योऽप्रकाश
इति भट्टभास्करमिश्रः । इत्था । इदम्शब्दात्था हेतौ च
छंदसीति प्रकारवचने थाप्रत्ययः । यदि तत्र हेतौ शब्दो नानु-
वर्तते तदानीमिदमस्थमुः । पा० ५. ३. २४. । इति थमु-
प्रत्ययः । अव्ययादाप्सुपः । पा० २. ४. ८२. । इति सुब्लुकं
बाधित्वा सुपां सुलुगिति डादेशः । चंद्रमसः । चंद्रमाह्लादनं
मिमीते निर्मिमीत इति चंद्रमाः । चंद्रे मो डित् । उ० ४.

२२७. । इत्यसिप्रत्ययः । दासीभारादिषु पठितत्वात्पूर्वपद-प्रकृतिस्वरत्वं । पूर्वपदं च स्फायितंचोत्यादिना रक्प्रत्ययांतमंतोदात्तं ॥

॥ इति प्रथमस्य षष्ठ सप्तमो वर्गः ॥

सर्वपृष्ठायामिष्टौ कायस्य हविषः को अद्येति द्वे ऋचौ याज्यानुवाक्ये । सूत्रितं च । कायं दशमं को अद्य युंक्ते धुरि गा ऋतस्येति द्वे इति ॥

तत्र प्रथमां सूक्ते षोड़शीमृचमाह ॥

को अद्य युं॑क्ते धुरि गा ऋतस्य शिमी॑वतो भामिनी॑ दुर्हृ॑णायून् ।

आसन्नि॑षून्हृत्स्वसो॑ मयोभून्य ए॑षां भृत्यामृणधत्स जीवात् ॥ १६ ॥

कः । अद्य । युं॑क्ते । धुरि । गाः । ऋतस्य॑ । शिमी॑ऽवतः । भामिनः॑ । दुःऽहृणायून् ।

आसन्ऽइषून् । हृत्सुऽअसः॑ । मयःऽभून् । यः । एषां । भृत्यां । ऋणधत् । सः । जीवात् ॥ १६ ॥

अद्यास्मिन्कर्मणि ऋतस्य गच्छत इंद्रसंबंधिनो रथस्य धुर्यश्ववहनप्रदेशे गा गतिमतोऽश्वान् को युंक्ते । को नाम नियोक्तुं शक्नोति । न कोऽपीत्यर्थः । कीदृशानश्वान् । शमीवतः । वीर्यकर्मोपेतान् । भामिनः । तेजसा युक्तान् । दुर्हृ-

णायून्। परैदुःसहैन क्रोधेन युक्तान्। हृणीयतिः क्रुध्यतिकर्मा। आसन्निषून्। येषामासन्यास्ये सुखप्रदेशे शत्रूणां प्रहरणार्थमिषवो बाणा बद्धास्तान्। हृत्स्वसः। हृत्सु शत्रूणां हृदयेष्वस्यंति स्वकीयं पादं क्षिपंतीति हृत्स्वसः। मयोभून्। मयसः सुखस्य भावयितॄन्। स्वकीयानां सुखप्रदानित्यर्थः। यो यजमान एषामीदृशानामश्वानां भृत्यां भरणक्रियां वयवाहनक्रियामकृणवत् समर्द्धयति। स्तौतीति यावत्। स यजमानो जीवात्। जीवनवान्भवेत्॥ यद्वा क इति प्रजापतिरुच्यते। को ह वै नाम प्रजापतिरिति श्रुतेः। ऋतस्य यज्ञस्य धुरि निर्वाहे गा वेदरूपान्वाग्विशेषानद्येदानीं यंक्ते। संयोजयति। कीदृशान्। शिमीवतः। प्रतिपाद्यैः कर्मभिर्युक्तान्। भामिनः। उज्ज्वलान्। दुर्हृणायून्। हृणीयतिर्हानिकर्मा। हातुमशक्यान् वेदाध्ययनस्य नित्यत्वात्। आसन्निषून्। आसन्यास्य इषुरेषणं गमनसुच्चारणं येषां तान्। हृत्स्वसः। हृत्सु हृदयेषु दीप्यमानान् प्रकाशमानानित्यर्थः। मयोभून्। मयसोऽध्ययनप्रभवस्य सुखसाधनस्यादृष्टस्य भावयितॄन्। यो यजमान एषां वचसां भृत्यां भरणक्रियामकृणवत्। ऋद्धिमतीं करोति। स जीवात्। स एव जीवति। अन्ये जीवन्मृता इत्यर्थः॥ दुर्हृणायून्। हृणीङ् लज्जायां। कंड्वादित्वाद्यक्। बहुलवचनाद्स्मादुण्प्रत्ययः। अतो लोपे सति वर्णव्यापत्त्याकारः। मृगय्यादिर्वा द्रष्टव्यः। आसन्निषून्। पद्दन्नित्यादिनास्यशब्दस्यासन्नादेशः। इष गतावित्यस्मादिषेः किच्चेत्युप्रत्ययः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हृत्स्वसः। असु क्षेपणे। असु गतिदीप्त्यादानेषु। क्विप् चेति क्विप्।

तत्पुरुषे कृति बहुलमित्यलुक् । कृदुत्तरपदप्रकृतिस्वरत्वं । मयाभूत् । व्यत्ययेन ह्रस्वत्वं । यद्वा मितद्र्वादिभ्य उपसंख्यानं । पा० ३. २. १८०. १. । इति डुप्रत्ययः । भृत्यां । भृञ भरणे । संज्ञायां समजनिषद । पा० ३. ३. ९९. । इति क्यप् । उदात्त इत्ययनुवृत्तेः प्रत्ययस्योदात्तत्वं । ऋणधत् । ऋधु वृद्धौ । लेटि व्यत्ययेन श्नम् । लेटोऽडाटावित्याडागमः । इतश्च लोप इतीकारलोपः । जीवात् । जीव प्राणधारणे । पूर्ववल्लेट्या-डागमः ॥

सप्तदशीमृचमाह ॥

क ईंषते तुज्यते को बिभाय को मंसते संतमिंद्रं को

अंति ।

कस्तोकाय क इभायोत रायेऽधि ब्रवत्तन्वे३ को

जनाय ॥ १७ ॥

कः । ईषते । तुज्यते । कः । बिभाय । कः । मंसते । संतं ।

इंद्रं । कः । अंति ।

कः । तोकाय । कः । इभाय । उत । राये । अधि । ब्रवत् ।

तन्वे । कः । जनाय ॥ १७ ॥

अनुगृहीतरींद्र आगते सति क ईषते । भीतः सन् को निर्गच्छति । न कोऽपीत्यर्थः । कस्तुज्यते । को हिंस्यते । अत्र भिहिंस्योऽपि कश्चिन्नास्तीत्यर्थः । को यजमानो बिभाय । बिभेति । इंद्रे रक्षके सति भयमपि नोत्पद्यते । दूरे तस्य प्रवृत्तता हिंसा । अंत्यंतिके समीपे संतमस्माकं रक्षकत्वेन

वर्तमानमिंद्रं कः पुरुषो मंसते । जानाति । वयमेव जानीमो नान्य इत्यर्थः । एकः कः पूरुः । युद्धे सहायार्थमिंद्र आगते सति को यजमानस्तोकाय पुत्रायाधिब्रवत् । हे इंद्रास्मदीयं पुत्रं रक्षेत्येवंरूपमधिवचनं पक्षपातेन वचनं ब्राह्मणायाधिब्रूयादिति यथा । एवंरूपमधिवचनं को यजमानः कुर्यात् । स्वयमेवेंद्रो रक्षतीति भावः । इभाय गजाय कोऽधिब्रवत् । उत अपि च राये शत्रुभिरपक्रियमाणाय धनाय कोऽधिब्रवत् । अपक्रियमाणमस्मदीयं धनं रक्षेत्यधिवचनमपि को यजमानः कुर्यात् । न कोऽपीत्यर्थः । अपि च तन्वे स्वकीयाय शरीराय जनाय परिजनाय च कोऽधिब्रवत् । स्वशरीररक्षार्थं परिजनरक्षार्थं चेंद्रस्याधिवचनं नापेक्षितं । स्तुत्या प्रीत इंद्रः स्वयमेव रक्षतीत्यर्थः ॥ यदा तु कशब्दाभिधेयस्य प्रजापतेः संबंधिनि कर्मणि विनियोगः तदानीं परमैश्वर्ययोगादिंद्रशब्देन प्रजापतिरेवाभिधीयते । यथेंद्रा गार्हपत्यमुपतिष्ठत इति विनियोगानुसारेण कदा चनेत्यस्यामृचि विद्यमान इंद्रो गार्हपत्यपरतया नीयते तद्वत् ॥ ईषते । ईष गतिहिंसादर्शनेषु । भौवादिक आत्मनेपदी । तुज्यते । तुज हिंसायां । कर्मणि यक् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । अतिङ इति पर्युदासान्निघाताभावः । मंसते । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । अंति अंतिकस्य कादिलोपो बहुलमिति कलोपः । ब्रवत् । ब्रवीतेर्लेट्यडागमः । तन्वे तनुशब्दाच्चतुर्थ्येकवचने जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं ॥

अष्टादशीमृचमाह ॥

को अग्निमीट्टे हविषा घृतेन स्रुचा यजाता ऋतुभिर्ध्रु-
वेभिः।
कस्मै देवा आ वहानाशु होम को मंसते वीतिहोत्रः
सुदेवः ॥ १८ ॥

कः। अग्निं। ईट्टे। हविषा। घृतेन। स्रुचा। यजाते।
ऋतुऽभिः। ध्रुवेभिः।
कस्मै। देवाः। आ। वहान्। आशु। होम। कः। मंसते।
वीतिऽहोत्रः। सुऽदेवः ॥ १८ ॥

को यजमानोऽग्निमीट्टे। इंद्रार्थं हविर्निरुप्याग्निं स्तौति। इंद्राय हविर्निर्वापोऽपि सम्यक्कर्तुं न शक्यते। इंद्रस्य दुर्विज्ञानत्वात्। को वेंद्रयागार्थमग्निं स्रुचा जुह्वा ध्रुवेभिर्ध्रुवैर्नित्यैर्ऋतुभिर्वसंतादिकालैरुपलक्षितेन घृतेन हविषा यजाते। यजेत्। यद्वा ऋतवः प्रयाजदेवताः। ऋतवो वै प्रयाजा इति श्रुतेः। ताभिर्ध्रुवैः प्रकृतौ विकृतौ चानुष्ठेयतया निश्चलैर्ऋतुभिः सहाग्निमाज्यभागदेवतां घृतेन हविषा को यजेत्। न कोऽपीत्यर्थः। कस्मै यजमानाय होम ह्वातव्यं प्रशस्यं धनमाशु शीघ्रं देवा आवहान्। आवहंति। प्रयच्छंति। न कस्मा अपीत्यर्थः। इंद्र एव धनस्य दाता नान्ये देवा इतींद्रः स्तूयते। वीतिहोत्रः प्राप्तयज्ञः सुदेवः शोभनदेवताकः को यजमानो मंसते। इंद्रं सम्यक् जानाति। न कोऽपीत्यर्थः।

बहुविधेन स्तोत्रेण चिरकालोपासनेन चेंद्रः प्रत्यक्षो भवति नान्येन प्रकारेणेति तात्पर्यार्थः ॥ ईट्टे । ईड स्तुतौ । अदादित्वाच्छपो लुक् । स्तुवा । सावेकाच इति विभक्तेरुदात्तत्वं । यजाते । यजतेर्लेट्याडागमः । वैतोऽन्यत्रेत्यैकारः । वहान् । वहतेर्लेट्याडागमः । इतश्च लोप इतीकारलोपः । संयोगांतस्येति तकारलोपः । होम । ह्वयतेः कृतात्वस्यातो मनिन्निति मनिन् । ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । यद्वा । नामन् सीमन्नित्यादौ । उ० ४. १५२. । होमनशब्दो मनिन्प्रत्ययांतो निपात्यते । मंसते । मन ज्ञाने । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । वीतिहोत्रः । वी गत्यादिषु । अस्मात्कर्मणि मंत्रे वृषेत्यादिना क्तिन् स चोदात्तः । होत्रं होमः । हुयामाश्रुभसिभ्यस्त्रन्निति त्रनप्रत्ययः । वीतिः प्राप्तो होमो येन । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । सुदेवः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं ॥

एकोनविंशीमृचमाह ॥

त्वमंग प्र शंसिषो देवः शविष्ठ मर्त्यं ।

न त्वदन्यो मघवन्नस्ति मर्डितेंद्र ब्रवीमि ते वचः ॥ १९ ॥

त्वं । अंग । प्र । शंसिषः । देवः । शविष्ठ । मर्त्यं ।

न । त्वत् । अन्यः । मघऽवन् । अस्ति । मर्डिता । इंद्र ।

ब्रवीमि । ते । वचः ॥ १९ ॥

अंगेत्यभिमुखीकरणे । अंग शविष्ठ हे बलवत्तमेंद्र देवो द्योतमानस्त्वं मर्त्यं मरणधर्माणं त्वां स्तुवंतं पुरुषं प्रशंसिषः ।

सम्यगनेन स्तुतमिति प्रशंस। हे मघवन् धनवन्निंद्र त्वदन्यस्त्वत्तोऽन्यः कश्चिन्मर्डिता सुखयिता नास्ति। अतः कारणात्ते तुभ्यमिदं स्तुतिलक्षणं वचो ब्रवीमि। उच्चारयामि॥ शंसिषः। शंस स्तुतौ। लेटि सिब्बहुलमडागमः। सिब्बहुलं लेटीति विकरणश्च सिप्। तस्यार्धधातुकत्वादिडागमः। शविष्ठ। अतिशयेन शवस्वी शविष्ठः। इष्ठनि विन्मतोर्लुक्। टेरिति टिलोपः। मर्डिता। मृड सुखने। तृच इडागमः॥

विंशीमृचमाह॥

मा ते राधांसि मा त ऊतयो वसोऽस्मान्कदा चना दभन्।
विश्वा च न उपमिमीहि मानुष वसूनि चर्षणिभ्य आ॥ २०॥

मा। ते। राधांसि। मा। ते। ऊतयः। वसो इति। अस्मान्। कदा। चन। दभन्।
विश्वा। च। नः। उपऽमिमीहि। मानुष। वसूनि। चर्षणिऽभ्यः। आ॥ २०॥

हे वसो निवासयितरिंद्र ते तव संबंधीनि राध्नोत्येभिरिति राधांसि भूतान्यस्मान्कदाचन कदाचिदपि मा दभन्। मा विनाशयंतु। तथोतयो गंतारः। यद्वा धूतय इत्यत्र वर्णलोपः। धूतयः कंपयितारस्ते त्वदीया मरुतश्च मा दभन्। हे मानुष मनुष्यहितेंद्र चर्षणिभ्यो मंत्रद्रष्टृभ्यो नोऽस्मभ्यं विश्वा विश्वानि सर्वाणि वसूनि धनानि च आ उपमिमीहि। सर्वत आहृत्या-

स्मत्समीपे कुरु । सर्वत्र वर्तमानं धनमस्मभ्यं प्रयच्छेत्यर्थः ॥ कदा । किंशब्दात्सर्वैकान्यकिंयत्तदः काले देति दाप्रत्ययः । किमः क इति कादेशः । व्यत्ययेनाद्युदात्तत्वं । दभन् । दंभु दंभे । लोडर्थे छांदसे लङि बहुलं छंदसीति विकरणस्य लुक् । न माङ्योग इत्यडभावः । मिमीहि । माङ् माने शब्दे च । व्यत्ययेन परस्मैपदं । जिह्वोत्यादित्वाच्छ्लुः । भृञामिदित्यभ्या-सस्येत्वं । ईहल्यघोरितीत्वं । ई॒र्ङ्डित्त्वात् घुमास्थेतीत्वं ॥

॥ इति प्रथमस्य षष्ठेऽष्टमो वर्गः ॥

॥ इति प्रथमे मंडले त्रयोदशोऽनुवाकः ॥

चतुर्दशेऽनुवाके नव सूक्तानि । तत्र प्र ये इति द्वादशर्चं प्रथमं सूक्तं गोतमस्यार्षं । पंचमीद्वादश्यौ त्रिष्टुभौ । शिष्टा जगत्यः । मरुतो देवता । तथा चानुक्रांतं । प्र ये द्वादश मारुतं ह पंचम्यंते त्रिष्टुभाविति । हशब्दप्रयोगादिदमादीनि चत्वारि सूक्तानि मरुद्देवत्यानि ॥ अभिप्लवषडहस्य चतुर्थेऽह-न्याग्निमारुत एतत्सूक्तं मारुतनिविद्धानीयं । सूत्रितं च । प्र ये शुंभंते जनस्य गोपा इत्याग्निमारुतं । आ० ७, ७, । इति ॥

तत्र प्रथमामृचमाह ॥

प्र ये शुंभंते जनयो न सप्तयो यामन्रुद्रस्य सूनवः सुदंससः ।
रोदसी हि मरुतश्चक्रिरे वृधे मदंति वीरा विदथेषु घृष्वयः ॥ १ ॥

प्र । ये । शुंभंते । जनयः । न । सप्तयः । यामन् । रुद्रस्य ।

सूनवः । सुऽदंससः ।

रोदसी इति । हि । मरुतः । चक्रिरे । वृधे । मदंति ।

वीराः । विदथेषु । घृष्वयः ॥ १ ॥

ये मरुतो यामन् यामनि गमने निमित्तभूते सति प्रशुंभंते। प्रकर्षेण स्वकीयान्यंगान्यलंकुर्वंति । जनयो न। जाया इव । यथा योषितः स्वकीयान्यंगान्यलंकुर्वंति तद्वत् । कीदृशा मरुतः। सप्तयः। सर्पणशीलाः। रुद्रस्य सूनवः। रोदयति सर्वमंतकाल इति रुद्रः परमेश्वरः। तस्य पुत्राः। सुदंससः। शोभनकर्माणः। एतदेवोपपादयति। हि यस्मान्मरुतो रोदसी द्यावापृथिव्यौ वृधे वृष्टिप्रदानादिना वर्धनाय चक्रिरे कृतवंतः। अतः सुदंसस इत्यर्थः। वीरा विशेषेण शत्रुक्षेपणशीलाः। घृष्वयः। घर्षणशीलाः। महीरुहशिलोच्चयादेर्भंजका इत्यर्थः। एवंभूतास्ते मरुतो विदथेषु। विदंत्येषु यष्टव्यतया देवानिति विदथा यज्ञाः। तेषु मदंति। सोमपानेन तृप्यंति॥ शुंभंते। शुभ शुंभ दीप्तौ। भौवादिकः। जनयः जायंत आस्वपत्यानीति जनयो जायाः। इन् सर्वधातुभ्य इतीन्प्रत्ययः। यामन्। या प्रापणे। कृत्यल्युटो बहुलमिति बहुलवचनादातो मनिन्निति भावे मनिन्। सुपां सुलुगिति सप्तम्या लुक्। सुदंससः। दंस इति कर्मनाम। शोभनं दंसो येषां। सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं। चक्रिरे। हि चेति निघातप्रतिषेधः। वृधे। वृधु। वृद्धौ। संपदादिलक्षणो भावे क्विप्। सावेकाच

इति विभक्त्युदात्तत्वं । मदंति । मदी हर्षे । छंदसि प्रा(मे) व्यत्ययेन शप् । पादादित्वान्निघाताभावः । विदथेषु । विद ज्ञाने । रुदिविदिभ्यां ङिदित्यथप्रत्ययः । धृष्णवः । धृषु संहर्षे त्रसिगृधिधृषीत्यादिना क्निप्रत्ययांतो निपात्यते ॥

द्वितीयामृचमाह ॥

त उ॑क्षितासो॑ महिमान॑माशत दिवि रु॒द्रासो॒ अधि॑

चक्रिरे सदः॑ ।

अर्चं॑तो अ॒र्कं ज॒नयं॑त इंद्रि॒यमधि॒ श्रियो॑ दधिरे

पृश्नि॑मातरः ॥ २ ॥

ते । उ॒क्षि॒तासः॑ । म॒हि॒मानं॑ । आ॒श॒त । दि॒वि । रु॒द्रासः॑ ।

अधि॑ । च॒क्रि॒रे । सदः॑ ।

अर्चं॑तः । अ॒र्कं । ज॒नयं॑तः । इं॒द्रि॒यं । अधि॑ । श्रियः॑ । द॒धि॒रे ।

पृश्नि॑ऽमातरः ॥ २ ॥

ये पूर्वोक्तगुणविशिष्टास्ते मरुत उक्षितासो देवैरभिषिक्ताः संतो महिमानं महत्त्वमाशत । आप्नुवन् । रुद्रासो रुद्रस्य पुत्राः । उपचाराज्जन्ये जनकशब्दः । ते रुद्रपुत्रा मरुतो दिवि द्योतमाने नभसि सदः सदनं स्थानमधिचक्रिरे । अधिकं सर्वोत्कृष्टं कृतवंतः । अर्कमर्चनीयमिंद्रमर्चंतः पूजयंत इंद्रियमिंद्रस्य लिंगं वीर्यं जनयंतः । प्रहर भगवो जहि वीरयस्वेत्येवंरूपेण वाक्येनोत्पादयंतः । पृश्निमातरः पृश्निर्नानारूपाया भूमेः पुत्रा मरुतः श्रिय ऐश्वर्याण्यधिदधिरे । आधिक्येना-

धारयन् ॥ उक्षितासः । उक्ष सेचने । कर्मणि निष्ठा । आज्जसेरसुक् । महिमानं । महच्छब्दात् पृथ्वादिलक्षण इमनिच् । टेरिति टिलोपः । आशत । अशू व्याप्तौ । लङि बहुलं छंदसीति विकरणस्य लुक् । इंद्रियं । इंद्रियमिंद्रलिंगमिंद्रदृष्टमिति घच्प्रत्ययांतो निपात्यते । पृश्निमातरः । प्राश्नुते सर्वाणि रूपाणीति पृश्निर्भूमिः । श्रुयते च । इयं वै पृश्निः । घृणिपृश्निरित्यादौ निपातनादभिमतरूपसिद्धिः । पृश्निर्माता येषां ते तथोक्ताः नद्यृतश्छंदसि । पा॰ ५. ४. १५८. । इति समासांतस्य कपः प्रतिषेधः ॥

तृतीयामृचमाह ॥

गोमा॑तरो॒ यच्छु॒भय॑न्ते अ॒ञ्जिभि॑स्त॒नूषु॑ शु॒भ्रा द॑धिरे वि॒रुक्म॑तः ।
बाध॑न्ते॒ विश्व॑मभिमा॒तिन॒मप॒ वर्त्मा॑न्येषा॒मनु॑ रीयते घृ॒तं ॥३॥

गोऽमा॑तरः । यत् । शु॒भय॑न्ते । अ॒ञ्जिऽभिः॑ । त॒नूषु॑ । शु॒भ्राः । द॒धि॒रे॒ । वि॒रुक्म॑तः ।
बाध॑न्ते । विश्व॑म् । अ॒भि॒ऽमा॒तिन॑म् । अप॑ । वर्त्मा॑नि । ए॒षा॒म् । अनु॑ । री॒य॒ते॒ । घृ॒तम् ॥ ३ ॥

गोमातरः । गोरूपा भूमिर्माता येषां ते मरुत अंजिभी रूपाभिव्यंजकैराभरणैर्यदा शुभयंते । स्वकीयान्यंगानि शोभायुक्तानि कुर्वंति । तदानीं शुभ्रा दीप्ता मरुतस्तनूषु स्वकीयेषु शरीरेषु विरुक्मतो विशेषेण रोचमानानलंकारान्दधिरे । धार-

यंति । अपि च विश्वं सर्वमभिमातिनं शत्रुमपबाधंते । हिंसंति । एषां मरुतां वर्त्मानि मार्गाननुसृत्य घृतं क्षरणशीलमुदकं रीयते । स्रवति । यत्र मरुतो गच्छंति वृष्ट्युदकमपि तदनुसारेण तत्र गच्छतीत्यर्थः ॥ शुभयंते । संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः । अंजिभिः । अंजू व्यक्तिम्रक्षणकांतिगतिषु । खनिकष्यंज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्चेतीप्रत्ययः । शुभ्राः । शुभ दीप्तौ । स्फायितंचीत्यादिना रक् । विरुक्मतः । विशिष्टा रुक् विरुक् । तद्वंतो विरुक्मतः । मतुप्प्रत्ययस्ययादित्वेन पदत्वात्कुत्वं । भत्वात् जशत्वाभावः । रीयते । रीङ् स्रवणे । दैवादिकः ॥

चतुर्थीमृचमाह ॥

वि ये भ्राजंते सुमखास ऋष्टिभिः प्रच्यावयंतो अच्युता चिदोजसा ।
मनोजुवो यन्मरुतो रथेष्वा वृषव्रातासः पृषतीरयुग्ध्वं ॥४॥

वि । ये । भ्राजंते । सुऽमखासः । ऋष्टिऽभिः । प्रऽच्यवयंतः । अच्युता । चित् । ओजसा ।
मनःऽजुवः । यत् । मरुतः । रथेषु । आ । वृषऽव्रातासः । पृषतीः । अयुग्ध्वं ॥ ४ ॥

सुमखासः शोभनयज्ञा ये मरुत ऋष्टिभिरायुधैर्विभ्राजंते विशेषेण दीप्यंते । ते मरुतोऽच्युता चित् च्यावयितुमशक्यानि दृढानि पर्वतादीन्यप्योजसा स्वकीयेन बलेन प्रच्यावयंतः

मूर्द्धा । दिवः । नाभिः । अग्निः । पृथिव्याः । अथ ।
अभवत् । अरतिः । रोदस्योः ।
तं । त्वा । देवासः । अजनयंत । देवं । वैश्वानर । ज्योतिः ।
इत् । आर्याय ॥ २ ॥

अयमग्निर्दिवो द्युलोकस्य मूर्द्धा शिरोवत्प्रधानभूतो भवति। पृथिव्या भूमेश्च नाभिः संनाहकः। रक्षक इत्यर्थः। अथानंतरं रोदस्योर्द्यावापृथिव्योरयमरतिरधिपतिरभवत्। हे वैश्वानर तं तादृशं देवं दानादिगुणयुक्तं त्वा त्वां देवासः सर्वे देवा आर्याय विदुषे मनवे यजमानाय वा ज्योतिरित् ज्योतीरूपमेवाजनयंत। उदपादयन्॥ मूर्तमस्मिन्धीयत इति मूर्द्धा। नि० ७. २७.। श्वन्नुक्षन्नित्यादौ निपातनाद्रूपसिद्धिः। पृथिव्याः। पृथिवीशब्दः षिद्गौरादिभ्यश्चेति ङीष्प्रत्ययांतोऽंतोदात्तः। अजनयंत। जनी जृष क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं॥

तृतीयामृचमाह ॥

आ सूर्ये न रश्मयो ध्रुवासो वैश्वानरे दधिरेऽग्ना वसूनि ।
या पर्वतेष्वोषधीष्वप्सु या मानुषेष्वसि तस्य राजा ॥ ३ ॥

आ । सूर्ये । न । रश्मयः । ध्रुवासः । वैश्वानरे । दधिरे ।
अग्ना । वसूनि ।
या । पर्वतेषु । ओषधीषु । अप्ऽसु । या । मानुषेषु । असि ।
तस्य । राजा ॥ ३ ॥

अग्ना वैश्वानरेऽग्नौ वसूनि धनान्यादधिरे। आहितानि स्थापितानि बभूवुः। तत्र दृष्टांतः। ध्रुवासो निश्चला रश्मयः किरणाः सूर्ये न यथा सूर्ये आधीयंते तद्वत्। अतस्त्वं पर्वतादिषु

यानि धनानि विद्यंते तस्य धनजातस्य राजासि । अधिपति-र्भवसि ॥ अग्ना । सुपां सुलुगिति विभक्तेर्डादेशः । या । ग्रेश्छंदसि बहुलमिति ग्रेर्लोपः । ओषधीषु । उष दाहे । ओषः पाकः । भावे घञ् । ञित्वादाद्युदात्तत्वं । ओष आसु धीयत इत्योषधयः । कर्मण्यधिकरणे चेति किप्रत्ययः । दासीभारा-दिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं । सप्तमीबहुवचन ओषधेश्च विभक्तावप्रथमायां । पा० ६. ३. १३२. । इति दीर्घः । अप्सु । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

चतुर्थीमृचमाह ॥

बृहती इव सूनवे रोदसी गिरो होता मनुष्यो३न दक्षः ।
स्वर्वते सत्यशुष्माय पूर्वीर्वैश्वानराय नृतमाय यह्वीः ॥ ४ ॥
बृहती इवेति बृहती॒ऽइव । सूनवे । रोदसी इति । गिरः ।
होता । मनुष्यः । न । दक्षः ।
स्वःऽवते । सत्यऽशुष्माय । पूर्वीः । वैश्वानराय । नृऽतमाय ।
यह्वीः ॥ ४ ॥

रोदसी द्यावापृथिव्यौ सूनवे स्वपुत्राय वैश्वानराय बृहती इव प्रभूते इवाभूतां । वैश्वानरस्य द्यावापृथिव्योः पुत्रत्वं मंत्रांतरे स्पष्टमवगम्यते । उभा पितरा महयन्नजायताग्निर्द्यावा-पृथिवी भूरिरेतसेति । महती वैश्वानरस्यावस्थानाय द्यावा-पृथिव्यौ विस्तृते जाते इत्यर्थः । किंच । अयं होता दक्षः समर्थः पूर्वीर्बहुविधा यह्वीर्महतीर्गिरः स्तुतीर्वैश्वानरायाग्नये प्रायुंक्तेति शेषः । कीदृशाय । स्वर्वते । शोभनगमनयुक्ताय । सत्यशुष्माय । अवितथबलाय । नृतमाय । अतिशयेन सर्वेषां नेत्रे । तत्र दृष्टांतः । मनुष्यो न । यथा मनुष्यो लौकिको बंदी दातारं

प्रकर्षेण च्यावयितारः प्रेरयितारो भवंति । उत्तरार्द्धः प्रत्यक्षकृतः । हे मरुतः । मनोजुवो मनोवद्वेगगतयो वृषव्रातासो वृष्ट्युदकसेचनसमर्थसप्तसंघात्मका यूयं रथेष्वात्मीयेषु पृषतीः । पृषत्य इति मरुद्वाहनानां संज्ञा पृषत्यो मरुतामित्युक्तत्वात् । पृषद्भिः श्वेतविंदुभिर्युक्ता मृगीर्यद्यदायुग्ध्वं । आभिमुख्येन नियुक्ता अकुरुत । तदानीं पर्वतादिकं प्रच्यवत इत्यर्थः ॥ वृषव्रातासः । सर्वे विधयश्छंदसि विकल्प्यंत इति नञ्सुभ्यामित्यस्य प्रवृत्त्यभावे बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अच्युता । शेश्छंदसि बहुलमिति शेर्लोपः । मनोजुवः । जु इति सौत्रो धातुर्गत्यर्थः । क्विब्वचीत्यादिना क्विब्दीर्घौ । अयुग्ध्वं । युजिर् । योगे । लुङि धि चेति सकारलोपः ॥

पंचमीमृचमाह ॥

प्र यद्रथेषु पृषतीरयुग्ध्वं वाजे अद्रिं मरुतो रंहयंतः ।
उतारुषस्य वि ष्यंति धाराश्चर्मेवोदभिर्व्युंदंति भूम ॥ ५ ॥

प्र । यत् । रथेषु । पृषतीः । अयुग्ध्वं । वाजे । अद्रिं ।
मरुतः । रंहयंतः ।
उत । अरुषस्य । वि । स्यंति । धाराः । चर्मऽइव ।
उदऽभिः । वि । उंदंति । भूम ॥ ५ ॥

हे मरुतः पृषतीर्यद्यथा रथेषु प्रायुग्ध्वं । प्रायूजत । किं कुर्वंतः । वाजेऽन्ने निमित्तभूते सत्यद्रिं मेघं रंहयंतः । वर्षणार्थं प्रेरयंतः । उत तदानीमरुषस्यारोचमानस्य सूर्यस्य वैद्युताग्नेर्वा

सकाशाद्दृष्ट्युदकधारा भवंतो विष्यंति। विमुंचंति। विमुक्ता-स्ताश्च धारा उदभिरुदकैश्चर्मेव परिमितमल्पं चर्म यथाप्रयत्नेन क्लेद्यते। एवं भूम सर्वां भूमिं व्युंदंति। विशेषेणार्द्रां कुर्वंति॥ रंहयंतः। रहि गतौ। विष्यंति। षो अंतकर्मणि। दैवादिकः। ओतः श्यनि। पा० ७. ३. ७१.। इत्योकारलोपः। उपसर्गा-त्सुनोतीति षत्वं। उदभिः। पद्दन्नित्यादिनोदकशब्दस्योदन्ना-देशः। व्युंदंति। उंदी क्लेदने। भूम। सुपां सुलुगिति भूमि-शब्दादुत्तरस्यामो डादेशः। छांदसं ह्रस्वत्वं॥

तृतीयसवन आ वो वहंत्विति पोतुः प्रस्थितयाज्या। सूक्तं च। आ वो वहंतु सप्तयो रघुष्यदोऽमेव नः सुहवा आ हि गंतन। आ० ५. ५.। इति॥

तामेतां सूक्ते षष्ठीमृचमाह॥

आ वो वहंतु सप्तयो रघुष्यदो रघुपत्वानः प्र जिगात बाहुभिः।

सीदता बर्हिरुरु वः सदस्कृतं मादयध्वं मरुतो मध्वो अंधसः॥ ६॥

आ। वः। वहंतु। सप्तयः। रघुऽस्यदः। रघुऽपत्वानः। प्र। जिगात। बाहुऽभिः।

सीदत। आ। बर्हिः। उरु। वः। सदः। कृतं। मादयध्वं। मरुतः। मध्वः। अंधसः॥ ६॥

हे मरुतो वो युष्मान् सप्तयः सर्पणशीला अश्वा आवहंतु। अस्मद्यज्ञं प्रापयंतु। कीदृशाः सप्तयः। रघुष्यदः। लघु शीघ्रं स्यंदमानाः। वेगेन गच्छंत इत्यर्थः। रघुपत्वानो लघु शीघ्रं पतंतो गच्छंतो यूयं बाहुभिः स्वकीयैर्हस्तैरस्मभ्यं दातव्यं धनमाहृत्य प्रजिगात। प्रकर्षेण गच्छत। हे मरुतो वो युष्माकं सदः सदनं वेदिलक्षणं स्थानमुरु विस्तीर्णं कृतं। तत्र यदास्तीर्णं बर्हिस्तदासीदत। तस्मिन्बर्हिष्युपविशत। उपविश्य च मध्वो मधुरस्यांधसः सोमलक्षणस्यान्नस्य पानेन मादयध्वं। तृप्ता भवत॥ रघुष्यदः। रघु स्यंदंत इति रघुष्यदः। स्यंदू प्रस्रवणे। क्विप् चेति क्विप्। अनिदितामिति नलोपः। कृदुत्तरपदप्रकृतिस्वरत्वं। रघुपत्वानः। पत्लृ गतौ। अन्येभ्योऽपि दृश्यंत इति वनिप्। जिगात। गा स्तुतौ। जौहोत्यादिकः। जिगातीति गतिकर्मसु पाठादत्र। गत्यर्थः। लोण्मध्यमबहुवचनस्य तप्तनप्तनथनाश्चेति तबादेशः। तस्य पित्त्वेन ङित्त्वाभावादी हल्यघोरितीत्वाभावः। सदः। अतः कृकमीति विसर्जनीयस्य सत्वं। मादयध्वं। मद तृप्तियोगे। चुरादिरात्मनेपदी।

॥ इति प्रथमस्य षष्ठे नवमो वर्गः॥

सप्तमीमृचमाह॥

तेऽवर्धंत स्वतवसो महित्वना नाकं तस्थुरुरु चक्रिरे सदः।
विष्णुर्यद्धावद्वृषणं मदच्युतं वयो न सीदन्नधि बर्हिषि प्रिये॥ ७॥

ते । अवर्धंत । स्वऽतवसः । महिऽत्वना । आ । नाकं ।

तस्थुः । उरु । चक्रिरे । सदः ।

विष्णुः । यत् । ह । आवत् । वृषणं । मदऽच्युतं । वयः ।

न । सीदन् । अधि । बर्हिषि । प्रिये ॥ ७ ॥

ते मरुतोऽवर्धयत । वृद्धिं गताः । कीदृशाः । स्वतवसः । स्वाश्रयबलाः । नान्यस्य कस्यचिद्बलमपेक्षंते । वृद्धिं प्राप्य च महित्वना महिम्ना महत्त्वेन नाकं स्वर्गमातस्थुः । आस्थितवंतः । सदः सदनं नभोलक्षणं स्थानं च स्वकीयनिवासायोरु विस्तीर्णं चक्रिरे । यत् येभ्यो मरुद्भ्यः । यदर्थं वृषणं कामाभिवर्षकं मदच्युतं मदस्य हर्षस्यासेक्तारं यज्ञं विष्णुर्हावत् । विष्णुरेवागत्य रक्षति । ते मरुतो वयो न पक्षिणो यथा शीघ्रमागच्छंति । एवं शीघ्रमागत्य बर्हिष्यध्यस्मदीये यज्ञे प्रिये प्रीतिकरे सीदन् । सीदंतु । उपविशंतु ॥ तेऽवर्धंत । स्वरितो वानुदात्ते पदादौ । पा० ८. २. ६. । इत्येकादेशस्य स्वरितत्वं । महित्वना । भावप्रत्ययादुत्तरस्याङो व्यत्ययेन नाभाव उदात्तत्वं च । यद्वा सुपां सुलुगित्याजादेशो नकारोपजनस्य । तस्थुः । नाकमातस्थुश्च सदश्च विस्तीर्णं चक्रिर इति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । यत् । सुपां सुलुगिति चतुर्थ्या लुक् । आवत् । छांदसो वर्तमाने लङ् । वृषणं । वा षपूर्वस्य निगम इत्युपधादीर्घाभावः । मदच्युतं । मदं च्योततीति मदच्युत् । च्युतिर् आसेचने । क्विप् चेति क्विप् । सीदन् । लिङर्थे लेट्यडागमः ॥

अष्टमीमृचमाह ॥

शूरा इवेद्युयुधयो न जग्मयः श्रवस्यवो न पृतनासु येतिरे ।
भयंते विश्वा भुवना मरुद्भ्यो राजान इव त्वेषसंदृशो
नरः ॥ ८ ॥

शूराःऽइव । इत् । युयुधयः । न । जग्मयः । श्रवस्यवः ।
न । पृतनासु । येतिरे ।
भयंते । विश्वा । भुवना । मरुत्ऽभ्यः । राजानःऽइव ।
त्वेषऽसंदृशः । नरः ॥ ८ ॥

इदित्येतत्समुच्चये । शूरा इवेत् शौर्योपेता युयुत्सवः पुरुषा इव च युयुधयः शत्रुभिर्युध्यमानाः पुरुषा इव च जग्मयः शीघ्रं गच्छंतो मरुतः श्रवस्यवो न अवोऽन्नमात्मन इच्छंतः पुरुषा इव पृतनासु संग्रामेषु येतिरे । प्रयतंते वृत्रादिभिर्युद्धे व्याप्रियंते । तादृशेभ्यो मरुद्भ्यो विश्वा भुवना सर्वाणि भूतजातानि भयंते । बिभ्यति । ये नरो वृष्ट्यादेर्नेतारो मरुतो राजान इव राजमाना नृपतय इव त्वेषसंदृशो दीप्तसंदर्शना उग्ररूपतया द्रष्टुमशक्या भवंति । तेभ्य इत्यर्थः ॥ युयुधयः । युध संप्रहारे । आदृगमहनजन इत्यत्रोत्सर्गश्छंदसीति वचनात्किन्प्रत्ययः । लिङ्वद्भावाद्द्विर्भावादि । कित्त्वाद्गुणाभावः । नित्त्वादाद्युदात्तत्वं । जग्मयः । तेनैव सूत्रेण किन्प्रत्ययः । गमहनेत्यादिनोपधालोपः । स्थानिवद्भावाद्द्विर्भावादि । श्रवस्यवः । श्रव इच्छति श्रवस्यति । क्याच्छंदसीत्युप्रत्ययः । येतिरे । [यती प्रयत्ने । छंदसि लुङ्लङ्लिट इति वर्तमाने]

लिट् । भयंते । ञिभी भये । बहुलं छंदसीति शपः श्लोरभावः । त्वेषमंदृशः । त्विष दीप्तौ । पचाद्यच् । दृशिर प्रेक्षणे । संपूर्वादस्मात्संपदादिलक्षणो भावे क्विप् । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

त्वष्टा यद्वज्रं सुकृतं हिरण्ययं सहस्रभृष्टिं स्वपा अवर्तयत् ।
धत्त इंद्रो नर्यपांसि कर्तवेऽहन्वृत्रं निरपामौब्जदर्णवं ॥९॥

त्वष्टा । यत् । वज्रं । सुऽकृतं । हिरण्ययं । सहस्रऽभृष्टिं ।
सुऽअपाः । अवर्तयत् ।
धत्ते । इंद्रः । नरि । अपांसि । कर्तवे । अहन् । वृत्रं ।
निः । अपां । औब्जत् । अर्णवं ॥ ९ ॥

स्वपाः शोभनकर्मा त्वष्टा विश्वनिर्माता यद्वज्रमवर्तयत् । इंद्रं प्रत्यगमयत् । दत्तवानित्यर्थः । कीदृशं । सुकृतं । सम्यक् निष्पादितं । हिरण्ययं । सुवर्णमयं । सहस्रभृष्टिं । अनेकाभिर्धाराभिर्युक्तं । तद्वज्रमिंद्रो धत्ते । धारयति । किमर्थं । नरि । अत्र नृसंबंधान्नृशब्देन संग्रामोऽभिधीयते । संग्रामेऽपांसि शत्रुहननादिलक्षणानि कर्माणि कर्तवे कर्तुं । एवं वज्रं धृत्वा तेन वज्रेन वृत्रं वृष्ट्युदकस्यावरकमर्णवमर्ण-सोदकेन युक्तं मेघमहन् । अवधीत् । अपां तेन निरुद्धा अपश्च स निरौब्जत् । निःशेषेणाधोमुखमपातयत् । प्रवृष्टा अकरो-दित्यर्थः ॥ सुकृतं । सुपूर्वात्करोतेः कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । हिरण्ययं । हिरण्यशब्दादुत्तरस्य

मयटो मकारस्य लोप ऋतव्यवास्त्वास्वास्त्वेत्यादौ निपात्यते। स्वपाः। सामनसो अलामाघसो इत्युत्तरपदाद्युदात्तत्वं। ऋतवे। तुमर्थे सेसेनिति करोतेस्तवेन्प्रत्ययः। अपां। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। ऊडिदमिति विभक्तेरुदात्तत्वं। ओजत्। उज आर्जवे। अर्णवं। अर्णसो लोपश्चेति मत्वर्थीयो वः सलोपश्च॥

दशमीमृचमाह॥

ऊर्ध्वं नुनुद्रेऽवतं त ओजसा दादृहाणं चिद्बिभिदुर्वि पर्वतं।
धमन्तो वाणं मरुतः सुदानवो मदे सोमस्य रण्यानि
चक्रिरे॥ १०॥

ऊर्ध्वं। नुनुद्रे। अवतं। ते। ओजसा। दादृहाणं। चित्।
बिभिदुः। वि। पर्वतं।
धमन्तः। वाणं। मरुतः। सुऽदानवः। मदे। सोमस्य।
रण्यानि। चक्रिरे॥ १०॥

अत्रेयमाख्यायिका। गोतम ऋषि पिपासया पीड़ितः सन् मरुत उदकं ययाचे। तदनंतरं मरुतोऽदूरस्थं कूपमुद्धृत्य यत्र स गोतम ऋषिस्तिष्ठति तां दिशं नीत्वार्षिसमीपे कूपमवस्थाप्य तत्पार्श्वे आहावं च कृत्वा तस्मिन्नाहावे कूपमुत्सिच्य तमृषिं तेनोदकेन तर्पयांचक्रुः। अयमर्थोऽनयोत्तरया च प्रतिपाद्यते॥ ते मरुतोऽवतं। अवस्तात्ततो भवतीत्यवतः कूपः। कूपनामसु चावतोऽवट इति पठितं। तमूर्ध्वमुपरि यथा भवति तथौजसा स्वकीयेन बलेन नुनुद्रे। प्रेरितवंतः।

उत्खातवंत इत्यर्थः । एवं कूपमुत्खाय ऋषेराश्रमं प्रति नयंतो मरुता मार्गमध्ये दादृहाणं प्रवृद्धं गतिनिरोधकं पर्वतं चित् पर्ववंतं शिलोच्चयमपि विबिभिदुः । विशेषेण बभंजुः । सुदानवः शोभनदानास्ते मरुतोवाणं शतसंख्याभिस्तंत्रीभिर्युक्तं वीणाविशेषं धमंतो वादयंतः सोमस्य मदे सोमपानेन हर्षे सति रण्यानि स्तुत्यानि रमणीयानि धनानि चक्रिरे । स्तोतृभ्यः कुर्वंति ॥ नुनुद्रे । णुद प्रेरणे । लिटोरयो र इति रे आदेशः । दादृहाणं । दृह दृंह वृद्धौ । लिटः कानच् । धमंतः । ध्मा शब्दाग्निसंयोगयोः । पाघ्रेत्यादिना धमादेशः । वाणं । अण रण वण शब्दार्थाः । कर्मणि घञ् । कर्षात्वत इत्यंतोदात्तत्वं । रण्यानि । रणतेर्भावे वशिरण्योरुपसंख्यानं । पा० ३. ३. ५८. । इत्यप् । ततो भावे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं ॥

एकादशीमृचमाह ॥

जिह्मं नुनुद्रेऽवतं तया दिशासिंचन्नुत्सं गोतमाय तृष्णजे ।
आ गच्छंतीमवसा चित्रभानवः कामं विप्रस्य तर्पयंत धामभिः ॥ ११ ॥

जिह्मं । नुनुद्रे । अवतं । तया । दिशा । असिंचन् । उत्सं । गोतमाय । तृष्णऽजे ।
आ । गच्छंति । ईं । अवसा । चित्रऽभानवः । कामं । विप्रस्य । तर्पयंत । धामऽभिः ॥ ११ ॥

मरुतोऽवतमुद्धृतं कूपं यस्यां दिशि ऋषिर्वसति तया दिशा जिह्मं वक्रं तिर्यंचं नुनुद्रे। प्रेरितवंतः। एवं कूपं नीत्वा ऋष्याश्रमेऽवस्थाप्य तृष्णजे तृषिताय गोतमाय ऋषये तदर्थमुत्सं जलप्रवाहं कूपादुद्धृत्यासिंचन्। आहावेऽवनयन्। एवं कृत्वेमेनं स्तोतारमृषिं चित्रभानवो विचित्रदीप्तयस्ते मरुतोऽवसेष्टयेन रक्षणेन सहागच्छंति। तत्समीपं प्राप्नुवंति। प्राप्य च विप्रस्य मेधाविनो गोतमस्य काममभिलाषं धामभिरायुषो धारकैरुदकैस्तर्पयंत। अतर्पयन॥ तया। न गोश्वन्साववर्णेति सावेकाच इति प्राप्तस्य विभक्त्युदात्तस्य प्रतिषेधः। दिशा। सावेकाच इति विभक्तेरुदात्तत्वं। तृष्णजे। ञितृष पिपासायां। स्वपितृषोर्नजिङ्। पा० ३. २. १७२.। प्रत्ययाद्युदात्तत्वं। पदकारस्य शाकल्यस्य त्वयमभिप्रायः। अन्येभ्योपि दृश्यत इति दृशिग्रहणात्केवलादपि नजिङ्प्रत्ययः। तृष्णा जाता यस्य स तथोक्तः। ङ्यापोः संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। धामभिः। दधातेरातो मनिन्निति मनिन्॥

मारुते पशौ या वः शर्मेति हविषो याज्या। प्रदानानामिति खंडे सूचितं। अरा इवेदचरमा अहेव या वः शर्म शशमानाय संति। आ० ३. ७.। इति॥

तामेतां सूक्ते द्वादशीमृचमाह ॥

या वः शर्म शशमानाय संति त्रिधातूनि दाशुषे

यच्छताधि ।

अस्मभ्यं तानि मरुतो वि यंत रयिं नो धत्त वृषणः

सुवीरं ॥ १२ ॥

या । वः । शर्म । शशमानाय । संति । त्रिऽधातूनि ।

दाशुषे । यच्छत । अधि ।

अस्मभ्यं । तानि । मरुतः । वि । यंत । रयिं । नः । धत्त ।

वृषणः । सुऽवीरं ॥ १२ ॥

हे मरुतो वो युष्माकं संबंधीनि यानि शर्म शर्माणि सुखानि गृहाणि वा । कोष्टशानि । त्रिधातूनि । पृथिव्यादिषु त्रिषु स्थानेष्ववस्थितानि । शशमानाय युष्मान् स्तुतिभिर्भजमानाय दातुं संपादितानि । पूर्वोक्तलक्षणानि शर्माणि यानि संति यानि च दाशुषे हविर्दत्तवते यजमानायाधियच्छत । अधिकं प्रयच्छथ । हे मरुतस्तानि सर्वाणि शर्माण्यस्मभ्यं वियंत । विशेषेण प्रयच्छत । किंच हे वृषणः कामानां वर्षितारो मरुतो नोऽस्मभ्यं सुवीरं शोभनैर्वीरैः पुत्रादिभिर्युक्तं रयिं धनं धत्त । दत्त ॥ या । शेश्छंदसि बहुलमिति शेर्लोपः । शर्म । सुपां सुलुगिति जसो लुक् । शशमानाय । शश प्लुतगतौ । ताच्छीलिकश्चानश् । यच्छत । छांदसे लङि

बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । यंत । यमेर्लोटि बहुलं छंदसीति शपो लुक् । तप्तनप्तनथनाश्चेति तबादेशः । अतस्तस्य पित्त्वेन ङित्त्वाभावादनुदात्तोपदेशेत्यादिनानुनासिकलोपो न भवति । सुवरः । वा षपूर्वस्य निगम इत्युपधादीर्घाभावः । सुवीरं । बहुव्रीहौ वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं ॥

॥ इति प्रथमस्य षष्ठे दशमो वर्गः ॥

मरुतो यस्येति दशर्चं द्वितीयं सूक्तं गोतमस्यार्षं गायत्रं मरुद्देवताकं । अनुक्रम्यते च । मरुतो दश गायत्रमिति ॥ व्यूढे द्वितीये छंदोम आग्निमारुते शस्त्र एतत्सूक्तं । तृतीयस्याग्रहेति खंडे सूत्रितं । मरुतो यस्य हि प्राग्नये वाचमित्याग्निमारुतं । आ० ८. ११. । इति ॥ ऐंद्रामारुत्यां प्रधानस्य हविषो मरुतो यस्येत्येषानुवाक्या । सूत्रितं च । ऐंद्रामारुतीं भेदकामा मरुतो यस्य हि क्षये । आ० २. १५. । इति ॥ एषैव वरुणप्रघासेषु मारुत्या आमिक्षाया अनुवाक्या । सूत्रितं च । मरुतो यस्य हि क्षयेऽरा इवेदचरमा अहेव । आ० २. १७ । इति ॥ तथा प्रातःसवने पोतुरेषा प्रस्थितयाज्या । सूत्रितं च । मरुतो यस्य हि क्षयेऽग्ने पत्नीरिहावह । आ० ५. ५. । इति ॥

तामेतां सूक्ते प्रथमामृचमाह ॥

मरु॑तो॒ यस्य॒ हि क्षये॑ पा॒था दि॒वो वि॑महसः ।
स सु॑गो॒पात॑मो॒ जनः॑ ॥ १ ॥

मरु॑तः । यस्य॑ । हि । क्षये॑ । पा॒थ । दि॒वः । वि॒ऽम॒ह॒सः॒ ।
सः । सु॒ऽगो॒पात॑मः । जनः॑ ॥ १ ॥

हे विमहसो विशिष्टप्रकाशा मरुतः। दिवोऽंतरिक्षलोकाद्वागत्य यस्य हि यस्य खलु यजमानस्य क्षये यज्ञगृहे पाथ। सोमं पिबथ। स जनो जातो यजमानः सुगोपातमः शोभनैः पालकैरत्यंतं युक्तो भवति॥ पाथ। पा पाने। लेटि बहुलं छंदसीति शपो लुक्। यद्वृत्तयोगादनिघातः। विमहसः। विशिष्टं महस्तेजो येषां ते तथोक्ताः। सुगोपातमः। शोभनो गोपा रक्षको यस्य स सुगोपाः। अतिशयेन सुगोपाः सुगोपातमः। तमपः पित्त्वादनुदात्तत्वे सति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वमेव शिष्यते॥

द्वितीयामृचमाह॥

यज्ञैर्वा यज्ञवाहसो विप्रस्य वा मतीनां।

मरु॑तः शृणुता हवं॥ २॥

यज्ञैः। वा। यज्ञऽवाहसः। विप्रस्य। वा। मतीनां।

मरु॑तः। शृणुत। हवं॥ २॥

हे यज्ञवाहसो यज्ञस्य वोढारो मरुतो यूयं यज्ञैर्वा। वाशब्दः समुच्चये। यज्ञैश्च यजमानस्य मतीनां स्तुतीनां संबंधीनो विप्रस्य वा यजमानस्य मेधाविनश्च हवमाह्वानं शृणुत। यज्ञवतो यजमानस्य यागरहितस्य स्तोतुश्चाह्वानं भवद्भिः श्रोतव्यं यतो भवंतो यज्ञस्य वोढारः स्तुतिप्रियाश्चेति भावः॥ यज्ञवाहसः। गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनाद्वहिहाधाञ्भ्यश्छंदसीति कारकपूर्वाद्वहतेरसुन्। णिदित्यनुवृत्तेरुपधाया वृद्धिः। मतीनां। मन ज्ञाने। अस्मात्करणे

त्तिन्। नामन्यतरस्यामिति नाम उदात्तत्वं। शृणुता। श्रुवः शृ चेति श्नुः। सति शिष्टस्य स्वरबलीयस्त्वमन्यत्र विकरणेभ्य इति वचनात्तिङ एव स्वरः शिष्यते। मरुत इत्यस्यामंत्रित-स्यामंत्रितं पूर्वमविद्यमानवदित्यविद्यमानवत्त्वेन पदादपर-त्वान्निघाताभावः। हवं। भावेऽनुपसर्गस्येति ह्वयतेरप् संप्र-सारणं च॥

तृतीयामृचमाह॥

उत वा यस्य वाजिनोऽनु विप्रमतक्षत।

स गंता गोमति व्रजे॥ ३॥

उत। वा। यस्य। वाजिनः। अनु। विप्रं। अतक्षत।

सः। गंता। गोऽमति। व्रजे॥ ३॥

उत वा अपि च यस्य यजमानस्य वाजिनो हविर्लक्षणान्नो-पेता ऋत्विजो विप्रं मेधाविनं मरुद्गणमन्वतक्षत। हविःप्रदाना-दिना तीक्ष्णीकुर्वंति। स यजमानो गोमति बहुभिर्गोभिर्युक्ते व्रजे गोष्ठे गंता गमनशीलो भवति॥ अतक्षत। तक्षू त्वक्षू तनू-करणे। छांदसो लङ्। व्यत्ययेन मध्यमः। गंता। गमेस्ताच्छी-लिकस्तृन्॥

चतुर्थीमृचमाह॥

अस्य वीरस्य बर्हिषि सुतः सोमो दिविष्टिषु।

उक्थं मदश्च शस्यते॥ ४॥

अस्य । वीरस्य॑ । बर्हिषि॑ । सुतः । सोमः॑ । दिवि॑ष्टिषु ।

उक्थं । मदः॑ । च । शस्यते ॥ ४ ॥

दिविष्टिषु यजनीयदिवसेषु बर्हिषि यज्ञे वीरस्य शत्रुक्षेपण-कुशलस्यास्य मरुद्गणस्य यागाय सोमः सुतः । ऋत्विग्भिर-भिषुतो भवति । उक्थ्यं मरुद्देवताकं शस्त्रं मदश्च । मदिधातुना युक्ता मरुतो देवाः सोमस्य मत्सन्नित्यादिका मारुती निवि-च्चास्य मरुद्गणस्य हर्षाय शस्यते । होत्रा पठ्यते ॥ अस्य । ऊडिदमिति विभक्तेरुदात्तत्वं । दिविष्टिषु । इष्टय एषणानि गमनानि दिवो द्योतमानस्य सूर्यस्य येषु दिवसेषु ते तथोक्ताः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । व्यत्ययेनोत्वाभावः ॥

पंचमीमृचमाह ॥

अस्य श्रोषंत्वा भुवो विश्वा यश्चर्षणीरभि ।

सूरं॑ चित्सस्रुषीरिषः॑ ॥ ५ ॥

अस्य । श्रोषंतु । आ । भुवः॑ । विश्वाः॑ । यः । चर्षणीः । अभि ।

सूर॑ं । चित् । सस्रुषीः॑ । इषः॑ ॥ ५ ॥

अस्य यजमानस्य स्तुतिं मरुत आ आभिमुख्येन श्रोषंतु । शृण्वंतु । यो मरुद्गणो विश्वाश्चर्षणीः सर्वान् शत्रुभूतान्मनुष्या-नभिभुवः । अभिभवति । तादृग्गणाकारा मरुतः शृण्वंत्वित्यर्थः । सूरं चित् स्तुतेः प्रेरयितारं यजमानमपीषो मरुद्भिः प्रत्तान्य-न्नानि सस्रुषीः प्राप्तानि भवंतु ॥ श्रोषंतु । श्रु श्रवणे । लोटि

सिब्बहुलं लेटीति बहुलवचनात्सिप् । भुवः । भवतेर्लेटि तिप-स्तिङां तिङो भवंतीति सिप् । लेटोऽडाटावित्यडागमः । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः । सूरं । षू प्रेरणे । सुसूधाग्टधिभ्यः क्रन्निति क्रन्प्रत्ययः । ससुषीः । सु गतौ । अस्मान्नठः क्वसुः । उगितश्चेति ङीप् । भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं ॥

॥ इति प्रथमस्य षष्ठे एकादशो वर्गः ॥

षष्ठीमृचमाह ॥

पूर्वीभिर्हि ददाशिम शरद्भिर्मरुतो वयं ।

अवोभिश्चर्षणीनां ॥ ६ ॥

पूर्वीभिः । हि । ददाशिम । शरत्ऽभिः । मरुतः । वयं ।

अवःऽभिः । चर्षणीनां ॥ ६ ॥

हे मरुतः पूर्वीभिर्बह्वीभिः शरद्भिः संवत्सरैश्चर्षणीनां सर्वसत्र द्रष्टॄणां सर्वज्ञानां भवतां संबंधिभिरवोभी रक्षणैर्युक्ताः संतो वयं ददाशिम । युस्मभ्यं हवींषि दत्तवंतः । हि यस्मादर्थे । यस्मादेवं तस्मादिदानीमप्यस्मदीयहविःस्वीकरणायागच्छतेत्यर्थः ॥ पूर्वीभिः । पुरुशब्दाद्वोतो गुणवचनादिति ङीष् । यणादेशे हलिचेति दीर्घत्वं । ददाशिम । दाशृ दाने । लिटीडागमः । हि चेति निघातप्रतिषेधः । चर्षणीनां । नामन्यतरस्यामिति नाम उदात्तत्वं ॥

सप्तमीमृचमाह ॥

सुभगः स प्रयज्यवो मरुतो अस्तु मर्त्यः ।

यस्य प्रयांसि पर्षथ ॥ ७ ॥

सुऽभगः । सः । प्रऽयज्यवः । मरुतः । अस्तु । मर्त्यः ।

यस्य । प्रयांसि । पर्षथ ॥ ७ ॥

हे प्रयज्यवः प्रकर्षेण यष्टव्या मरुतः स मर्त्यो मनुष्यो यजमानः सुभगोऽस्तु । शोभनधनो भवतु । यस्य यजमानस्य प्रयांसि हविर्लक्षणान्यन्नानि पर्षथ । आत्मनि सिंचथ । स्वीकुरुथेत्यर्थः ॥ सुभगः । भग इति धननाम । शोभनो भगो यस्य । क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं । पर्षथ । पृषु वृषु मृषु सेचने । भौवादिकः । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः ॥

अष्टमीमृचमाह ॥

शशमानस्य वा नरः स्वेदस्य सत्यशवसः ।

विदा कामस्य वेनतः ॥ ८ ॥

शशमानस्य । वा । नरः । स्वेदस्य । सत्यऽशवसः ।

विद । कामस्य । वेनतः ॥ ८ ॥

हे सत्यशवसोऽवितथबला नरो नेतारो मरुतः शशमानस्य युष्मान्स्तुतिभिः संभजमानस्य स्वेदस्य स्तावकमंत्रोच्चारणजनितेन श्रमेण स्विद्यमानगात्रस्य वेनतो । वेनतिः कांतिकर्मा । कामयमानस्य । वाशब्दः समुच्चये । एवंभूतस्य स्तोतुश्च कामस्य काममभिलाषं विद । लंभयत प्रयच्छतेत्यर्थः ॥ शशमानस्य ।

शश प्लुतगतौ । ताच्छीलिकश्चानश् । सेदस्य । ञिष्विदा गात्र-प्रक्षरणे । अंतर्भावितण्यर्थात्कर्मणि घञ् । ञित्त्वादाद्युदात्तत्वं । विदा । विद् लाभे । लोटि मध्यमपुरुषबहुवचनस्य व्यत्ययेन च्छादेशः । बहुलं छंदसीति विकरणस्य लुक् । छस्यादादेशः । लोपस्त आत्मनेपदेष्विति तलोपः । प्रत्ययाद्युदात्तत्वं । पादादित्वान्निघाताभावः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । कामस्य वृषादिषु पाठादाद्युदात्तत्वं । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥

नवमीमृचमाह ॥

यूयं तत्सत्यशवस आविष्कर्त महित्वना ।

विध्यता विद्युता रक्षः ॥ ८ ॥

यूयं । तत् । सत्यऽशवसः । आविः । कर्त । महिऽत्वना ।

विध्यत । विऽद्युता । रक्षः ॥ ८ ॥

हे सत्यशवसः सत्यबला अन्यैरप्रधृष्यबला मरुतो यूयं तद्वृत्रवधादिषु प्रसिद्धं युष्मदीयं माहात्म्यमाविष्कर्त । आविष्कुरुत । प्रकाशयत । विद्युता विद्योतमानेन महित्वना तेन महत्त्वेन माहात्म्येन रक्षोऽस्माकमुपद्रवकारिणं राक्षसादिकं विध्यत । ताडयत । नाशयतेत्यर्थः ॥ कर्त ॥ करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । तप्तनप्तनथनाश्चेति तबादेशः । गुणः । इदुदुपधस्य चाप्रत्ययस्य चेत्याविःशब्दे विसर्जनीयस्य षत्वं । महित्वना । भावप्रत्ययादुत्तरस्याङो व्यत्ययेन नाभाव उदात्तत्वं च । यद्वा सुपां सुलुगिति तृतीयाया आजादेशो ।

नकारोपजनश्च । विध्यता । व्यध ताडने । श्यनि ग्रहिज्यादिना संप्रसारणं । तस्यबन्दस्य सार्वधातुकमपिदिति ङित्त्वे सति ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति संहितायां दीर्घः ॥

दशमीमृचमाह ॥

गूहता गुह्यं तमो वि यात विश्वमत्रिणं ।

ज्योतिष्कर्ता यदुश्मसि ॥ १० ॥

गूहत । गुह्यं । तमः । वि । यात । विश्वं । अत्रिणं ।

ज्योतिः । कर्त । यत् । उश्मसि ॥ १० ॥

हे मरुतो गुह्यं गुहायां स्थितं सर्वत्र व्याप्य वर्तमानं तमोऽंधकारं गूहत । संवृतं कुरुत । यथास्माभिर्न दृश्यते तथादर्शनं प्रापयत । विनाशयतेत्यर्थः । विश्वं सर्वमत्रिणमत्तारं राक्षसादिकं वियात । विविधं यापयत । अस्मत्सकाशान्निर्गमयत । यज्ज्योतिः सूर्यादिकं वयमुश्मसि । कामयामहे । तत्कर्त । कुरुत । यद्वा गुह्यं गुहायां शरीरांतर्गतगुहारूपे हृदये भवं तमो भावरूपाज्ञानं तद्गूहत । विनाशयत । अत्रिणं पुरुषार्थस्यात्तारं कामक्रोधादिकं सर्वं विनिर्गमयत । यत्तज्ज्योतिः परतत्त्वसाक्षात्काररूपं ज्ञानं कामयामहे प्राणापानादिपंचवृत्तिरूपा हे मरुतस्तत्कर्त । कुरुत ॥ गूहता । गुहू संवरणे । शपि लघूपधगुणे ऊदुपधाया गोहः । पा० ६. ४. ८९. । इत्युपधाया ऊकारः । यात । या प्रापणे । अस्मादंतर्भावितण्यर्थाल्लोट् । अत्रिणं । अदेस्त्रिनिश्चेति त्रिनिप्रत्ययः ।

उष्मसि। वश कांतौ। इदंतो मसिः। अदादित्वाच्छपो लुक्। ग्रहिज्यादिना संप्रसारणं॥

॥ इति प्रथमस्य षष्ठे द्वादशो वर्गः॥

प्रत्वक्षस इति षड्चं तृतीयं सूक्तं गोतमस्यार्षं जागतं मारुतं। तथा चानुक्रांतं। प्रत्वक्षसः षट् जागतमिति॥ अग्निष्टोम आग्निमारुतशस्त्र इदं सूक्तं मारुतनिविद्धानं। अथ यथेतमिति खंडे सूत्रितं। प्रत्वक्षसः प्रतवसो यज्ञा यज्ञा वो अग्नये। आ॰ ५. २०.। इति॥

तत्र प्रथमामृचमाह॥

प्रत्वक्षसः प्रतवसो विरप्शिनोऽनानता अविथुरा ऋजीषिणः।

जुष्टतमासो नृतमासो अंजिभिर्व्यानज्रे के चिदुस्रा इव स्तृभिः॥ १॥

प्रऽत्वक्षसः। प्रऽतवसः। विऽरप्शिनः। अनानताः। अविथुराः। ऋजीषिणः।

जुष्टऽतमासः। नृऽतमासः। अंजिऽभिः। वि। आनज्रे। के। चित्। उस्राःऽइव। स्तृऽभिः॥ १॥

प्रत्वक्षसः शत्रूणां प्रकर्षेण तनूकर्तारः। शत्रुघातिन इत्यर्थः। यतः प्रतवसः प्रकृष्टबलोपेता अत एव विविधेन जयघोषेणोपेताः। यद्वा बहुनामैतत्। महांतो हि विविधैः शब्दैः प्रशस्यंते। अत एवानानता आनतिरहिताः। सर्वोत्कृष्टा

इत्यर्थः । अविथुरा अवियुक्ताः । सप्तगणरूपेण संघीभूता इत्यर्थः । ऋजीषिणः । तृतीयसवने ऋजीषस्याभिषवात् तत्र च मरुतः स्तूयंते इति तेषामृजीषित्वं । यद्वा ऋजीषिणः प्रार्जयितारो रसानां । जुष्टतमासोऽतिशयेन यष्टृभिः सेविताः । नृतमासोऽतिशयेन मेघादेर्नेतारः । एवंभूता मरुतः स्तृभिः स्वशरीरस्याच्छादकैरंजिभी रूपाभिव्यंजकैराभरणैर्व्यानज्रे । नभसि व्यक्ता दृश्यंते । तत्र दृष्टांतः । केचिदुस्रा इव । ये के चन सूर्यरश्मयो यथा नभसि दीप्यंते तद्वत् ॥ प्रत्वक्षसः । प्रकर्षेण त्वक्षंते तनूकुर्वंतीति प्रतक्षसः । तक्ष् त्वक्षू तनूकरणे । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेत्यस्मिन् पूर्वपदप्रकृतिस्वरत्वं च । प्रतवसः । तव इति बलनाम । प्रकृष्टं तवो येषां । बहुव्रीहौ पूर्वपदप्रकृति स्वरत्वं । विरप्शिनः । रप लप जल्प व्यक्तायां वाचि । विरपणं विरप्शः । औणादिकः शकप्रत्ययः । तद्वंतो विरप्शिनः । अनानताः । आनता अवनताः प्रह्वीभूताः । न आनता अनानताः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अविथुराः । व्यथ भयचलनयोः । व्यथेः संप्रसारणं धः किच्च । उ० १. ३९. । इत्युरचप्रत्ययः । अत्र तु बहुलवचनाद्धत्वं न क्रियते । पूर्ववत्समासस्वरौ । नित्यं मंत्र इति जुष्टशब्द आद्युदात्तः । तत आतिशायनिकस्य तमपः । पित्त्वादनुदात्तत्वे स एव स्वरः शिष्यते । आनज्रे । अंजू व्यक्तिम्रक्षणकांतिगतिषु । कर्मणि छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । अत आदेरित्यभ्यासस्यात्वं । तस्मान्नुट् द्विहलः । पा० ७. ४. ७१. । इति नुट् । व्यत्ययेनोपधादेर्लोपः । इरयो रे । स्तृभिः । स्तृञ् आच्छादने । क्विप् । आगमानुशासनस्यानित्यत्वात्तुगभावः ॥

द्वितीयामृचमाह ॥

उपह्वरेषु यदचिध्वं ययिं वय इव मरुतः केन चित्पथा ।

श्चोतंति कोशा उप वो रथेष्वा घृतमुक्षता मधुवर्ण-

मर्चते ॥ २ ॥

उपऽह्वरेषु । यत् । अचिध्वं । ययिं । वयःऽइव । मरुतः ।

केन । चित् । पथा ।

श्चोतंति । कोशाः । उप । वः । रथेषु । आ । घृतं । उक्षत ।

मधुऽवर्णं । अर्चते ॥ २ ॥

हे मरुतः । उपह्वरेषूपह्वर्तव्येषु गंतव्येष्वस्माकं संनिकृष्टेषु नभसः प्रदेशेषु यद्यदा ययिं गतिमंतं मेघमचिध्वं । वर्षणसामर्थ्येनोपचितं कुरुथ । किं कुर्वंतः । वय इव । पक्षिण इव केन चित्पथा केनचिदाकाशमार्गेण शीघ्रं गच्छंतः । नभसि शीघ्रं वर्षणार्थं प्रवर्तमानैर्मरुद्भिर्मेघा उपचीयंत इत्यर्थः । तदानीं कोशाः । मेघनामैतत् । वो युष्माकं रथेष्वासक्ता मेघाः श्चोतंति । जलं मुंचंति । यस्मादेवं तस्मात् हे मरुतो यूयमर्चते युष्मान् हविर्भिः पूजयते मह्यं यजमानाय मधुवर्णं मधुसदृशरूपं स्वच्छं घृतं वृष्ट्युदकमा समंतादुक्षत । सिंचत । अस्मदभिलषितां वृष्टिं कुरुतेत्यर्थः ॥ उपह्वरेषु । ह्वृ कौटिल्ये । उपह्वरंति कौटिल्येन तिर्यग्गच्छंत्येष्वित्युपह्वरा नभःप्रदेशाः । पुंसि संज्ञायां घः प्रायेणेत्यधिकरणे घः । अचिध्वं । चिनोतेर्वर्तमाने लङ् । बहुलं छंदसीति विकरणस्य लुक् । ययिं । या प्रापणे । आदृगमहनजन इति किप्रत्ययः । पथा । आङि भस्य टेर्लोप

इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। उच्चा। उच्छ् सेचने। लोटि तशब्दस्य ङित्त्वे सति ऋचि तुनुघेत्यादिना सांहितिको दीर्घः ॥

तृतीयामृचमाह ॥

प्रैषामज्मेषु विथुरेव रेजते भूमिर्यामेषु यद्ध युंजते शुभे।
ते क्रीळयो धुनयो भ्राजदृष्टयः स्वयं महित्वं पनयंत धूतयः ॥ ३ ॥

प्र। एषां। अज्मेषु। विथुराऽइव। रेजते। भूमिः। यामेषु। यत्। ह। युंजते। शुभे।
ते। क्रीळयः। धुनयः। भ्राजत्ऽऋष्टयः। स्वयं। महिऽत्वं। पनयंत। धूतयः ॥ ३ ॥

यद्ध यदा खल्वेते मरुतः शुभे शोभनाय वृष्ट्युदकाय युंजते। मेघान् सज्जीकुर्वंति। तदानीमज्मेषु मेघानामुत्क्षेपकेष्वेषां मरुतां संबंधिषु यामेषु मेघानां नियमनेषु सत्सु भूमिः पृथिवी प्ररेजते। प्रकर्षेण कंपते। यद्वा। यदा खलु मरुतः स्वकीयान्रथान्युंजते। अश्वैर्योजयंति। तदानीमेषां रथानां संबंधिषु पर्वतादेरुत्क्षेपकेषु यामेषु गमनेषु भूमिर्भीत्या कंपते। तत्र दृष्टांतः। विथुरेव। यथा भर्त्रा वियुक्ता जाया राजोपद्रवादिषु सत्सु निरालंबा सती कंपते तद्वत्। ते तादृशाः क्रीळयो विहारशीला धुनयश्चलनस्वभावा भ्राजदृष्टय दीप्यमानायुधा एवंभूता मरुतो धूतयः पर्वतादीन्धुन्वंतः संतो महित्वं स्वकीयं

महिमानं स्वयमेव पनयंत। व्यवहरंति। प्रकटयंतीत्यर्थः॥ अज्मेषु। अज गतिक्षेपणयोः। अर्तिस्तुसुत्यादिना विधीयमानो मन् बहुलवचनादस्मादपि द्रष्टव्यः। वलादावार्द्धधातुके विकल्प इष्यत इति वचनादजेर्व्यघञपोरिति वीभावाभावः। नित्त्वादाद्युदात्तत्वं। रेजते। रेजृ कंपने। भ्यसते रेजत इति भयवेपनयोरिति यास्कः। नि० ३. २१.। यामेषु। यम उपरमे। भावे घञ्। कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादिषु पाठादाद्युदात्तत्वं। यद्वा या प्रापण इत्यस्मादर्तिस्तुसुत्यादिना मन्प्रत्ययः। शुभे दीप्तौ। संपदादिलक्षणः कर्मणि क्विप्। सावेकाच इति विभक्तेरुदात्तत्वं। पनयंत। पन व्यवहारे। गुपूधूपविच्छीत्यायः। पा० ३. १. २८.। अस्माच्छांदसो लङ्। व्यत्ययेन ह्रस्वत्वं॥

चतुर्थीमृचमाह॥

स हि स्वसृत्पृषदश्वो युवा गणोऽया ईशानस्तविषीभिरावृतः।
असि सत्य ऋणयावाऽनेद्योऽस्या धियः प्राविताथा वृषा गणः॥ ४॥

सः। हि। स्वऽसृत्। पृषत्ऽअश्वः। युवा। गणः। अया। ईशानः। तविषीभिः। आऽवृतः।
असि। सत्यः। ऋणऽयावा। अनेद्यः। अस्याः। धियः। प्रऽअविता। अथ। वृषा। गणः॥ ४॥

स हि स खलु मरुद्गणोऽया अस्य सर्वस्य जगत ईशान ईश्वरशीलो भवति। कीदृशः। स्वसृत्। स्वयमेव सरन्। न ह्यन्यः कश्चिदस्य मरुद्गणस्य प्रेरकोऽस्ति। पृषदश्वः। पृषत्यः श्वेतबिंदंकिता मृग्योऽश्वस्थानीया यस्य स तथोक्तः। युवा। नित्यतरुणः। तविषीभिरन्येषामसाधारणैर्बलैरावृतः परिवेष्टितः। सत्यः। सत्कर्मार्हः। ऋणयावा। स्तोतृणामृणस्यापगमयिता। बहुलस्य धनस्य दातेत्यर्थः। अनेद्यः। प्रशस्यनामैतत्। सर्वैरनिंदितः। वृषा। जलानां वर्षिता। एवंभूतो मरुद्गणोऽस्या धियोऽस्मदीयस्यास्य कर्मणोऽथानंतरं प्राविताऽसि। प्रकर्षेण रक्षिता भवति॥ अया। सुपां सुलुगिति षष्ठ्या याजादेशः। हलि लोपः। पा० ७. २. ११३.। इतीदम इद्रूपस्य लोपः। ईशानः। ईश ऐश्वर्य इत्यस्मात्ताच्छीलिकश्चानश्। तस्य लसार्वधातुकत्वाभावेन चित्स्वरेणांतोदात्तत्वं। अया ईशान इत्यत्रैषा अचो दीर्घात्प्रकृतिभावः। असि। पुरुषव्यत्ययः। ऋणयावा। या प्रापण इत्यस्मादंतर्भावितण्यर्थादातो मनिन्निति वनिप्। अनेद्यः। णिदि कुत्सायां। ऋहलोर्ण्यदिति ण्यत्। आगमानुशासनस्यानित्यत्वान्नुमभावे लघूपधगुणः। नञ्समासे पूर्वपदप्रकृतिस्वरत्वं॥

पंचमीमृचमाह॥

पितुः प्रत्नस्य जन्मना वदामसि सोमस्य जिह्वा प्र जिंगाति चक्षसा।

यदीमिंद्रं शम्यृक्वाण आशतादिन्नामानि यज्ञियानि दधिरे॥ ५॥

पितुः । प्रत्नस्य॑ । जन्म॑ना । वदामसि । सोम॑स्य । जिह्वा ।

प्र । जिगाति । चक्ष॑सा ।

यत् । ई॑ । इंद्रं॑ । शमि॑ । ऋक्वा॑णः । आश॑त । आत् । इत् ।

नामा॑नि । यज्ञिया॑नि । दधिरे ॥ ५ ॥

प्रत्नस्य चिरंतनस्य पितुरस्माकं जनकस्य रहूगणस्य सकाशाद्यज्जन्म तेन वयं वदामसि । ब्रूमः । वक्ष्यमाणमस्माकं वृत्तांतं पितोपदिष्टवान् । अतो वयं ब्रूम इत्यर्थः । कोऽसौ वृत्तांत इति चेत् । उच्यते । सोमस्य यज्ञेष्वभिषुतस्य सोम द्रव्यस्य चक्षसा प्रकाशमानयाहुत्या सहिता जिह्वा स्तुतिरूपा वाक् प्रजिगाति । प्रकर्षेण गच्छति । यज्ञेषु सोमाहुतिः स्तुतिश्च प्रकृष्टः क्रियते । यस्मादीमेनमिंद्रं शमि वृत्रवधादिरूपे कर्मणि ऋक्वाणः प्रहर भगवो जहि वीरयस्वेत्येवंरूपया स्तुत्या युक्ताः संत आशत । प्राप्नुवन् । न पर्यत्याजुः । आदित एव- मिंद्रप्राप्त्यनंतरमेव यज्ञियानि यज्ञार्हाणीष्टङ् चान्याहङ् चेत्ये- वमादीनि नामानींद्रसकाशाल्लब्धा दधिरे । धृतवंतः । तस्मादेषां यज्ञे सोमाहुतिः स्तुतिश्च क्रियते ॥ शमि । शमीति कर्मनाम । सप्तम्येकवचने छांदस ईकारलोपः । ऋक्वाणः । ऋच स्तुतौ । संपदादिलक्षणो भावे क्विप् । छंदसीवनिपाविति मत्वर्थीयो वनिप् । अंत्यविकारश्छांदसः । यद्वा । अयस्मयादिषु क्वाच- दुभयं भवति । पा० १. ४. २०. १. । इत्युक्तत्वात् स सुष्टुभा स ऋक्वतेत्यादाविव पदत्वात्कुत्वं भात्वाज्जश्त्वाभावः । आशत ।

लङि बहुलं छंदसीति विकरणस्य लुक्। यज्ञियानि। यज्ञर्त्विग्भ्यां घखञाविध्यर्हार्थे घः॥

षष्ठीमृचमाह॥

श्रियसे कं भानुभिः सं मिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः।
ते वाशीमंत इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः॥ ६॥

श्रियसे। कं। भानुऽभिः। सं। मिमिक्षिरे। ते। रश्मिऽभिः। ते। ऋक्वऽभिः। सुऽखादयः।
ते। वाशीऽमंतः। इष्मिणः। अभीरवः। विद्रे। प्रियस्य। मारुतस्य। धाम्नः॥ ६॥

ते पूर्वोक्ता मरुतो भानुभिर्भानुशीलैर्दीप्यमानैः सूर्यरश्मिभिः सह कं वृष्ट्युदकं श्रियसे श्रयितुं प्राणिभिः सेवितुं संमिमिक्षिरे। सम्यक् सेढुमिच्छंति। पृथिवीं वृष्ट्युदकेन सम्यक् सेक्तुमिच्छंति। एवं वृष्टिमुत्पाद्य ते मरुत ऋक्वभिः स्तुतिमद्भिरृत्विग्भिः सह सुखादयः शोभनस्य हविषो भक्षयितारो भवंति। वाशीमंतः। वाशीति वाङ्नाम। शोभनया स्तुतिलक्षणया वाचोपेताः। इष्मिणो गतिमंतः। अभीरवो भयरहितास्ते मरुतः प्रियस्य सर्वाभिमतस्य मारुतस्य मरुत्संबंधिनो धाम्नः स्थानस्य सर्वाभिमतं मरुत्संबद्धं विशिष्टं स्थानं विद्रे।

लब्धवंतः ॥ भ्रियसे । तुमर्थं सेसेनिति कसेन्प्रत्ययः । मिमिक्षिरे । मिह सेचने । अस्मादिच्छासनंतान्नित्यमंत्र इति निषेधादामभावः । व्यत्ययेनात्मनेपदं । सुखादयः । खादृ भक्षणे । औणादिक इप्रत्ययः । शोभना खादिर्भक्षणं येषां । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । इषिणः । इष गतौ । इषियुधींधीत्यादिना मक् । ततो मत्वर्थीय इनिः । विद्रे । विद्लृ लाभे । लिटि । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति द्विर्वचनाभावः । इरयो र इतोरया रेभावः ॥

॥ इति प्रथमस्य षष्ठे त्रयोदशो वर्गः ॥

आ विद्युन्मद्भिरिति षडृचं चतुर्थं सूक्तं । अत्रानुक्रम्यते । आ विद्युन्मद्भिराद्यांत्ये प्रस्तारपंक्तौ पंचमी विराड्रूपेति । पूर्ववदृषिदेवते । आद्या षष्ठी च द्वे प्रस्तारपंक्ती । आद्यौ पादौ जागतौ तृतीयचतुर्थौ गायत्रौ यस्याः सा प्रस्तारपंक्तिः । सूत्रितं च । प्रस्तारपंक्तिः पुरत इति । अस्यायमर्थः । जागतौ गायत्रौ चेत्यनुवर्तते । यदि पुरतः पुरस्ताद्द्वौ जागतौ पादौ स्यातामंत्यौ गायत्रौ सा प्रस्तारपंक्तिरिति । एतच्चदित्येषा पंचमीविराड्रूपा । आदितस्त्रयः पादा एकादशका अंत्योऽष्टकः सा विराड्रूपेत्युच्यते ॥ विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

आ विद्युन्मद्भिर्मरुतः स्वर्कै रथेभिर्यात ऋष्टिमद्भिरश्वपर्णैः ।

आ वर्षिष्ठया न इषा वयो न पप्तता सुमायाः ॥ १ ॥

आ विद्युन्म॑त्ऽभिः । मरुतः । सुऽअर्कैः । रथेभिः । यात ।

ऋष्टिमत्ऽभिः । अश्वंऽपर्णैः ।

आ । वर्षिष्ठया । नः । इषा । वयः । न । पप्तत । सुऽमायाः ॥१॥

हे मरुतः । मितं निर्मितमंतरिक्षं प्राप्य रुवंति शब्दं कुर्वंतीति मरुतः । यद्वा । अमितं भृशं शब्दकारिणः अथवा मितं खैर्निर्मितं मेघं प्राप्य विद्युदात्मना रोचमानाः । अथवा महत्यंतरिक्षे द्रवंतीति मरुतः । ये मध्यमस्थाने देवगणाः समाम्नातास्ते सर्वे मरुत आख्यायंते । तथा चाहुः । सर्वा स्त्रो मध्यमस्थाना पुमान् वायुश्च सर्वगः । गणाश्च सर्वे मरुत इति वृद्धानुशासनमिति । पौराणिकास्त्वाचक्षते । मारीचात्कश्यपात्सप्तगणात्मका एकोनपंचाशत्संख्याका मरुतो जज्ञिर इति । एवंभूता हे मरुतो रथैभिरात्मीयै रथैरायात । अस्मदीयं यज्ञमागच्छत । कोदृशै रथैः । विद्युन्मद्भिः । विद्योतनं विद्युत् । विशिष्टदीप्तियुक्तैः । स्वर्कैः । स्वर्चनैः शोभनगमनयुक्तैः । यद्वा शोभनमर्कोऽर्चनं स्तुतिर्येषामस्ति तादृशैः । अथवा शोभनदीप्तियुक्तैः । ऋष्टिमद्भिः । ऋष्टयः । शक्तिरूपाण्यायुधानि । खड्गा इत्यन्ये । तद्वद्भिः । अश्वपर्णैः । अश्वानां पतनं गमनं येषामस्ति तादृशैः । यद्वा रंहणशीला मेघा रथाः । तैः सहांतरिक्षे वर्षणार्थमागच्छत । कोदृशैः । विद्युन्मद्भिः । विद्युत् तडित् । तद्वद्भिः । स्वर्कैः । शोभनगमनैः । ऋष्टिमद्भिः । ऋषणं गमनं । तत्स्वभाववीरयुक्तैः । अश्वपर्णैः । अश्वं व्याप्त पर्णं पतनं गमनं येषां । अंतरिक्षं व्याप्य वर्तमानैरित्यर्थः । हे

सुमायाः । मायेति कर्मणो ज्ञानस्य च नामधेयं । शोभन-कर्माणः शोभनप्रज्ञा वा मरुतः । वर्षिष्ठया प्रवृद्धतरयेषास्मभ्यं दातव्येनान्नेन सह नोऽस्मान्प्रति वयो न पक्षिण इव शीघ्र-मापप्तत । आपतत । आगच्छतेत्यर्थः । अत्र निरुक्तं । अथातो मध्यस्थाना देवगणास्तेषां मरुतः प्रथमा गामिनो भवंति । मरुतो मितराविणो वा मितरोचिनो वा महद्द्रवंतीति वेति । विद्युन्म-द्भिर्मरुतः स्वर्कैः स्वंचनैरिति स्वर्चनैरिति वा स्वर्चिभिरिति वा रथे रायात ऋष्टिमद्भिरश्वपर्णैरश्वपतनैर्वर्षिष्ठेन च नोऽन्नेन वय इवापतत सुमायाः कल्याणकर्माणो वा कल्याणप्रज्ञा वा । नि० ११. १३. । इति ॥ विद्युन्मद्भिः । यवादेराकृतिगणत्वेन विद्युच्छब्दस्य यवाद्यंतर्भावादयवादिभ्य इत्यत्रानुवृत्तेर्झयः । पा० ८. २. १०. । इति मतुपो वत्वं न प्रवर्तते । ऋष्टिमद्भिः । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । अश्वपर्णैः । अशु व्याप्तौ । अशिप्रुषीत्यादिना क्वन्प्रत्ययः । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वं । वर्षिष्ठया । वृद्धशब्दादातिशायनिक इष्टनि प्रियस्थिरेत्यादिना वर्षादेशः । पप्तत । पत गतौ । लुङि लृदित्त्वात् च्लेरङादेशः । पतः पुम् । पा० ७. ४. १९. । इति पुमागमः ॥

द्वितीयामृचमाह ॥

तेऽरुणेभिर्वरमा पिशंगैः शुभे कं यांति रथतूर्भिरश्वैः ।

रुक्मो न चित्रः स्वधितीवान्पव्या रथस्य जंघनंत

भूम ॥ २ ॥

ते । अरुणेभिः । वरं । आ । पिशंगैः । शुभे । कं ।

याति । रथतूऽभिः । अश्वैः ।

रुक्मः । न । चित्रः । स्वधितिऽवान् । पव्या । रथस्य ।

जंघनंत । भूम ॥ २ ॥

ते पूर्वोक्ता मरुतोऽरुणेभिररुणवर्णैः पिशंगैः पिंगलवर्णैरुभयवर्णोपेतै रथतुर्भी रथस्य प्रेरयितृभिरश्वैर्वरं देवानां वरीतारं कं शब्दयितारं स्तुवंतं यजमानमायांति । आगच्छंति । किमर्थं । शुभे । तस्य शोभां कर्तुं । अथवा शुभ उदकाय । वृष्ट्यर्थमित्यर्थः । तेषां मरुतां गणो रुक्मो न रोचमानं सुवर्णमिव चित्रोऽतिशयेन दर्शनीयः स्वधितीवान् । स्वधितिरिति वज्रनाम । शत्रूणां खंडकेनायुधेनोपेतः । एवंविधगणरूपास्ते मरुतो रथस्य पव्या चक्रधारया भूम भूमिं जंघनंत । अत्यर्थं घ्नंति । स्तोतृरक्षणार्थमागतानां तेषां मरुतां भारमसहमाना भूमिरतिपीड़िता बभूवेत्यर्थः ॥ वरं । व्रियंते देवा अनेनेति वरः । ग्रहवृदनिश्चौति करणेऽप् । कं । कै गै शब्दे । कायतीति कः । बहुलवचनात्कप्रत्ययः । रथतूर्भिः । तुर त्वरणे । रथं तुतुरति त्वरायुक्तं कुर्वंतीति रथतुरः । क्विप् चेति क्विप् । भिसि हलि चेति दीर्घत्वं । पव्या । पवी रथनेमिर्भवतीति यास्कः । नि० ५. ५. । पूङ् पवने । अस्मादच इतीप्रत्ययः । उदात्तयण इति विभक्तेरुदात्तत्वं । जंघनंत । हंतेर्यङंताद्वर्तमाने छांदसो लङ् । छंदस्युभयथेत्यार्धधातुकत्वादतोलोपयलोपौ ।

भूम । भूमिशब्दादुत्तरस्यामः सुपां सुलुगिति डादेशः । चांदसं ह्रस्वत्वं ॥

तृतीयामृचमाह ॥

श्रिये कं वो अधि तनूषु वाशीर्मेधा वना न कृणवंत ऊर्ध्वा ।
युष्मभ्यं कं मरुतः सुजातास्तुविद्युम्नासो धनयंते अद्रिं ॥ ३ ॥

श्रिये । कं । वः । अधि । तनूषु । वाशीः । मेधा । वना । न ।
कृणवंते । ऊर्ध्वा ।
युष्मभ्यं । कं । मरुतः । सुऽजाताः । तुविऽद्युम्नासः ।
धनयंते । अद्रिं ॥ ३ ॥

हे मरुतः । वो युष्माकं तनूषु शरीरेष्वंसप्रदेशेषु वाशीः शत्रुणामाक्रोशकमा रात्म्यमायुधं श्रिये कं । ऐश्वर्यार्थं वर्तत इति शेषः । कमित्येतत्पादपूरणं । तदुक्तं । अथापि पादपूरणाः कमीमिद्विति । तादृशा मरुतो वना न । उच्छ्रितान्वृक्षसमूहानिव मेधा मेधान्यज्ञानूर्ध्वा ऊर्ध्वान् एकाहाहीनसत्ररूपेणोच्छ्रितान्कृणवंते । यजमानैः कारयंति । हे सुजाताः शोभनजननयुक्ता मरुतः । युष्मभ्यं युष्मदर्थं कं सुखकरमद्रिं सोमाभिषवे प्रवृत्तं ग्रावाणं तुविद्युम्नासः प्रभूतधना यजमाना धनयंते । धनं कुर्वंति । युष्माकं यागाय ग्रावाभिरभिमुखं तीत्यर्थः ॥ वाशीः । शत्रुणां भयोत्पादनेनाक्रोशशब्दकरणं वाशः । ततश्छंदसीवनिपाविति मत्वर्थीय ईकारः । व्यत्ययेनाद्युदात्तत्वं । मेधा । सुपां सुलुगिति शसो डादेशः । वना । शेश्छंदसि बहुलमिति

श्लोपः । कृणवंते । कृवि हिंसाकरणयोश्च । लटि व्यत्ययेनात्मने-पदं । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । पुनरपि व्यत्ययेनांतादेशः । छंदस्युभयथेत्यार्धधातुकत्वेन कृस्याङिल्वाद्गुणेऽवादेशः । ऊर्ध्वा । पूर्ववङ्डादेशः । धनयंते । धनशब्दात्तत्करोतीति णिच् ॥

चतुर्थीमृचमाह ॥

अहानि गृध्राः पर्या व आगुरिमां धियं वार्कार्यां च देवीं ।

ब्रह्म कृण्वंतो गोतमासो अर्कैरूर्ध्वं नुनुद्र उत्सधिं पिबध्यै ॥ ४ ॥

अहानि । गृध्राः । परि । आ । वः । आ । अगुः । इमां । धियं । वार्कार्यां । च । देवीं ।

ब्रह्म । कृण्वंतः । गोतमासः । अर्कैः । ऊर्ध्वं । नुनुद्रे । उत्सऽधिं । पिबध्यै ॥ ४ ॥

तृषितैर्गोतमैः स्तुता मरुतस्तेभ्यो गोतमेभ्यो देशांतरे वर्तमानं कूपमुत्खायानीय ददुः । एतदृष्ट्वा कश्चिदृषिर्ब्रूते । हे गोतमा गृध्रा जलाभिकांक्षायुक्तान्वा युष्मानहानि शोभनो-दकोपेतानि दिनानि पर्यागुः । पर्यागतानि । परित आभि-मुख्येन प्राप्तानि । प्राप्य च वार्कार्यां वार्भिरुदकैर्निष्पाद्यां धियं ज्योतिष्टोमादिलक्षणं कर्म च देवीं द्योतमानमकुर्वन् । येष्वहस्सु ब्रह्म हविर्लक्षणमन्नमर्कैः मंत्रसाध्यैः स्तोत्रैः सह कृण्वंतो मरुद्भ्यः कुर्वंतो गोतमासो गोतमा ऋषय उत्सधिं ।

उत्सो जलप्रवाहोऽस्मिन्धीयत इत्युत्सधि कूपः। तं पिबध्यै स्वकीयपानायोर्ध्वं नुनुद्रे। नुनुदिरे। देशांतरे वर्तमानं कूपमुत्खातवंतः। एतदीयस्तोत्रैः स्तुता मरुतः कूपमुत्खातवंत इति यत्तदेव तदीयस्तोत्रकारितमित्येतेषूपचर्यंते॥ गृध्राः। गृधु अभिकांक्षायां। सुसूधागृधिभ्यः क्रन्निति क्रन्प्रत्ययः। सुपां सुपो भवंतीति शसो जस्। नित्त्वादाद्युदात्तत्वं। अगुः। एतेर्लुङीणो गा लुङीति गादेशः। आत इति झेर्जुस्। वार्कार्यां। डुकृञ् करणे। ऋहलोर्ण्यत्। वार्भिः कार्या वार्कार्या। तिचक्रादित्वादुत्तरपदांतोदात्तत्वं। नुनुद्रे। णुद प्रेरणे। इरयो रे इति रे आदेशः। उत्सधिं। कर्मण्यधिकरणे चेति दधातेरधिकरणे किप्रत्ययः। पिबध्यै। पा पाने। तुमर्थे सेसेनिति शध्यैन्प्रत्ययः। पाघ्रेत्यादिना पिबादेशः॥

पंचमीमृचमाह॥

एतत्त्यन्न योजनमचेति सस्वर्ह यन्मरुतो गोतमो वः।

पश्यन्हिरण्यचक्रानयोदंष्ट्रान्विधावतो वराहून्॥ ५॥

एतत्। त्यत्। न। योजनं। अचेति। सस्वः। ह। यत्।

मरुतः। गोतमः। वः।

पश्यन्। हिरण्यऽचक्रान्। अयःऽदंष्ट्रान्। विऽधावतः।

वराहून्॥ ५॥

हे मरुतः। एतद्योजनं। युज्यतेऽनेन देवतेति योजनमेतत्स्तसाध्यं स्तोत्रं। त्यन्न त्यत् प्रसिद्धमन्यदुतकृष्टं स्तोत्रमिवा-

चेति । सर्वैर्ज्ञायते । वो युष्मदर्थं यत् यदेतत्सूक्तरूपं स्तोत्रं गोतम ऋषिः सस्वर्ह । उच्चारितवान् खलु । किं कुर्वन् हिरण्यचक्रान् हिरण्मयचक्ररथारूढ़ान् हितरमणीयकसंयुक्तान्वायोदंष्ट्रान् । दंशतीति दंष्ट्रा चक्रधारा । अयोमयीभिश्चक्रधाराभिर्युक्तान् । यद्वा दंशनसाधना ऋष्टयो दंष्ट्राः । अयोमया ऋष्टयो येषां । तान्विधावतो विविधमितस्ततः प्रवर्तमानान्वराह्न् वरस्योत्कृष्टस्य शत्रोर्हंतृन् । यद्वा । उत्कृष्टस्य वृष्ट्युदकस्याहर्तॄन् । अथवा । उत्कृष्टानां देवतानामाह्वातॄन् वरस्य हविषा भचयितॄन्वा । एवंभूतास्मरुतः पश्यन् सम्यक् जानन् गोतमो यत्स्तोत्रं कृतवान् तदेतत्सर्वोत्कृष्टं सदस्माभिः सर्वैरुपलभ्यत इत्यर्थः । अत्र निरुक्तं । अथाप्येते माध्यमिका देवगणा वराहव उच्यंते । पश्यन्हिरण्यचक्रान् । नि० ५. ४. । इति ॥ अचेति । चिती संज्ञाने । छांदसो वर्तमाने कर्मणि लुङ् । सस्वः । स्वृ शब्दोपतापयोः । लङि तिपि बहुलं छंदसीति शपः श्लुः । गुणे हल्ड्याब्भ्य इति तल्लोपः । धातुस्वरेणांतोदात्तत्वं । वराहून् । वरशब्दोपपदादाङ्पूर्वाद्धंतेर्वा हरतेर्वा ह्वयतेर्वा जुहोतेरदनार्थाद्वा । हु इत्येतस्य निष्पत्तिरिति स्कांदस्वामी । अस्य पृषोदरादित्वादभिमतसिद्धिः ॥

षष्ठीमृचमाह ॥

एषा स्या वो मरुतोऽनुभर्त्री प्रति ष्टोभति वाघतो न वाणी ।
अस्तोभयद्वृथासामनु स्वधां गभस्त्योः ॥ ६ ॥

एषा। स्या। वः। मरुतः। अनुऽभर्त्री। प्रति। स्तोभति।
वाघतः। न। वाणी।
अस्तोभयत्। वृथा। आसां। अनु। स्वधां। गभस्त्योः॥ ६॥

हे मरुतः स्या सैषास्मदीया स्तुतिर्वो युष्माकमनुभर्त्री युष्माननुहरंती युष्मद्गुणसदृशी प्रतिष्टोभति। प्रत्येकं स्तौति। स्तोभतिः स्तुतिकर्मा। तथा वाघतो न वाणी। नशब्दः संप्रत्यर्थे। तदुक्तं यास्केन। अस्त्युपमार्थस्य संप्रत्यर्थे प्रयोगः। नि० ७. ३१.। इति। इदानीमृत्विक्संबंधिनी वागपि वृथानायासेनासामाभिर्ऋग्भिरस्तोभयत्। अस्तौत्। इदानी-मित्युक्ते कदेत्याह। गभस्त्योरस्मदीययोर्बाह्वोः स्वधां। अन्न-नामैतत्। यदा बहुविधमन्नं मरुतः स्थापयंति। तामनुलक्ष्ये-त्यर्थः॥ अनुभर्त्री। हृञ् हरणे। तृच्। ऋन्नेभ्य इति ङीप्। उदात्तयणो हल्पूर्वादिति नद्या उदात्तत्वं॥

॥ इति प्रथमस्य षष्ठे चतुर्दशो वर्गः॥

आ नो भद्रा इति दशर्चं पंचमं सूक्तं। गोतमस्यार्षं वैश्व-देवं। आदितः पंचर्चः सप्तमी च जगत्यः षष्ठी स्वस्ति न इंद्रेत्येषा विराट्स्थाना। नवकौ वैराजस्त्रैष्टुभश्चेत्युक्तलक्षण-योगात्। अष्टम्याद्यास्तिस्रस्त्रिष्टुभः। तथा चानुक्रांतं। आ नो दश वैश्वदेवं तु पंचाद्या सप्तमी च जगत्यः षष्ठी विराट्-स्थानेति॥ अग्निष्टोमे वैश्वदेवशस्त्र उत्तमावर्जमेतत्सूक्तं वैश्वदेव-निविद्धानीयं। सा तु प्रकृतौ विकृतौ च वैश्वदेवशस्त्रस्य परिधानीया। तथा च सूत्रितं। आ नो भद्राः क्रतवो यंतु

विश्वत इतिं नव वैश्वदेवं। आ० ५. १८.। इति॥ अदिति द्यौरदितिरंतरिक्षमिति परिदध्यात्सर्वत्र वैश्वदेवे। आ० ५. १८.। इति च। ब्राह्मणं च भवति। सदैव पंचजनीयया परिदध्यादिति॥ महाव्रते निष्केवल्य एतत्सूक्तं। तथा च पंचमारण्यके सूत्रितं। आनोभद्रीयं च तस्य स्थान इति॥

तत्र प्रथमामृचमाह॥

आ नो भद्राः क्रतवो यंतु विश्वतोऽदब्धासो अपरीतास उद्भिदः।

देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे॥ १॥

आ। नः। भद्राः। क्रतवः। यंतु। विश्वतः। अदब्धासः। अपरिऽइतासः। उत्ऽभिदः।

देवाः। नः। यथा। सदं। इत्। वृधे। असन्।

अप्रऽआयुवः। रक्षितारः। दिवेऽदिवे॥ १॥

नोऽस्मान् क्रतवोऽग्निष्टोमादयो महायज्ञा विश्वतः सर्वस्मादपि दिग्भागादायंतु। आगच्छंतु। कीदृशाः क्रतवः। भद्राः। समीचीनफलसाधनत्वेन कल्याणा भजनीया वा। अदब्धासः। असुरैरहिंसिताः। अपरीतासः। शत्रुभिरपरिगताः। अप्रतिरुद्धा इत्यर्थः। उद्भिदः। शत्रूणामुद्भेत्तारः। ईदृशाः क्रतवोऽस्मांस्तथागच्छंतु। अप्रायुवोऽप्रगच्छंतः स्वकीयं

रक्षितव्यमपरित्यजंतः । अत एव दिवे दिवे प्रतिदिवसं रक्षितारो रक्षां कुर्वंतः । एवंगुणविशिष्टाः सर्वे देवा नोऽस्माकं सदमित् सदैव वृधे वर्धनायासन् । भवंतु ॥ अदब्धासः । दंभु दंभे । दंभो हिंसा । निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । अपरीतासः । इण् गतौ । पूर्ववत्कर्मणि निष्ठा । उभयत्राज्जसेरसुक् । वृधे । वृधु वृद्धौ । संपदादिलक्षणो भावे क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥ असन् । अस भुवि । लेट्यडागमः । बहुलं छंदसीति शपो लुगभावः । तस्याङित्त्वात् श्नसोरल्लोप इत्यकारलोपाभावः । अप्रायुवः । इण् गतौ । अस्मात्प्रपूर्वाच्छंदसीण इत्युण्प्रत्ययः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । जसि जसादिषु छंदसि वावचनमिति गुणस्य विकल्पितत्वादभावे तन्वादित्वादुवङ् ॥

द्वितीयामृचमाह ॥

देवानां भद्रा सुमतिरृजूयतां देवानां रातिरभि नो नि वर्ततां ।
देवानां सख्यमुप सेदिमा वयं देवा न आयुः प्र तिरंतु जीवसे ॥ २ ॥

देवानां । भद्रा । सुऽमतिः । ऋजुऽयतां । देवानां । रातिः । अभि । नः । नि । वर्ततां ।
देवानां । सख्यं । उप । सेदिम । वयं । देवाः । नः । आयुः । प्र । तिरंतु । जीवसे ॥ २ ॥

भद्रा सुखयित्री भजनीया वा देवानां सुमतिः शोभना मतिरनुग्रहात्मिका बुद्धिरस्माकमस्त्विति शेषः । कीदृशानां । ऋजूयतां ऋजुमार्जवयुक्तं सम्यगनुष्ठातारं यजमानमात्मन इच्छतां । तथा देवानां रातिर्दानं नोऽस्मानाभिमुख्येन नितरां वर्ततां । तदभिमतफलप्रदानमप्यस्माकं भवत्वित्यर्थः । वयं च तेषां देवानां सख्यं सखित्वं सख्युः कर्म वोपसेदिम । प्राप्नवाम । तादृशा देवा नोऽस्माकमायुर्जीवसे जीवितुं प्रतिरंतु । बर्धयंतु ॥ भद्राः । भदि कल्याणे सुखे च । ऋज्रेंद्राग्रेत्यादौ रक्प्रत्ययांतो निपातितः । ऋजूयतां । ऋजुमात्मन इच्छति ऋजूयति । सुप आत्मनः क्यच् । तदंताल्लटः शतृ । शतुरनुम इत्यजादिविभक्तेरुदात्तत्वं । रातिः । रा दाने । मंत्रे वृषेति क्तिन उदात्तत्वं । सख्यं । सख्युर्य इति भावे कर्मणि वा यप्रत्ययः । सेदिमा । षद्लृ विशरणगत्यवसादनेषु । छंदसि लुङ्लङ्लिट इति वर्तमाने प्रार्थनायां लिट् । सत्वस्यानैमित्तिकत्वेन लिटि परत आदेशादित्वाभावादत एकहल्मध्य इत्येत्वाभ्यासलोपौ । अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं । प्रतिरंतु । प्रपूर्वस्तिरतिर्वर्धनार्थः । तथा च यास्को व्याचख्यौ । देवानां सख्यमुपसीदेम वयं देवा न आयुः प्रबर्धयंतु चिरं जीवनाय । नि० १२. ३९. । इति ॥

तृतीयामृचमाह ॥

तान्पूर्वया निविदा हूमहे वयं भगं मित्रमदितिं दक्षमस्रिधं ।
अर्यमणं वरुणं सोममश्विना सरस्वती नः सुभगा मयस्करत् ॥ ३ ॥

तान् । पूर्वया । निऽविदा । हूमहे । वयं । भगं । मित्रं ।

अदितिं । दक्षं । अस्त्रिधं ।

अर्यमणं । वरुणं । सोमं । अश्विना । सरस्वती । नः ।

सुऽभगा । मयः । करत् ॥ ३ ॥

तान्विश्वान्देवान्पूर्वया पूर्वकालीनया नित्यया निविदा वेदात्मिकया वाचा । निविदिति वाङ्नाम । यद्वा निविदा विश्वे देवाः सोमस्य मत्सन्नित्यादिकया वैश्वदेव्या निविदा वयं हूमहे । आह्वयामः । देवानिति यत्सामान्येनोक्तं तदेव विव्रियते । भगं भजनीयं द्वादशानामादित्यानामन्यतमं । मित्रं प्रमीतेस्त्रायकं । अहरभिमानिनं देवं । मैत्रं वा अहरिति श्रुतेः । अदितिमखंडनीयामदीनां वा देवमातरं । दक्षं सर्वस्य जगतो निर्माणे समर्थं प्रजापतिं । यद्वा प्राणरूपेण सर्वेषु प्राणिषु व्याप्य वर्तमानं हिरण्यगर्भं । प्राणो वै दक्ष इति श्रुतेः । अस्त्रिधं शोषणरहितं । सर्वदैकरूपेण वर्तमानं मरुद्गणं । अर्यमणं । अरीन् मंदेहादीनसुरान्यच्छति नियच्छतीत्यर्यमा सूर्यः । असौ वा आदित्योऽर्यमेति श्रुतेः । तं । वरुणं । वृणोति पापकृतः स्वकीयैः पाशैरावृणोतीति राज्यभिमानिदेवो वरुणः । श्रूयते च । वारुणी रात्रिरिति । सोमं । द्वेधात्मानं विभज्य पृथिव्यां लतारूपेण दिवि च चंद्रात्मना देवतारूपेण वर्तमानं । अश्विना । अश्ववंतौ । यद्वा सर्वं व्याप्नुवंतौ । तथा च यास्कः । अश्विनौ यद्व्यश्नुवाते सर्वं रसेनान्यो ज्योतिषान्योऽश्वैराश्विनावित्यौर्णवा-भस्तत्कावश्विनौ द्यावापृथिव्यावित्येकेऽहोरात्रावित्येके सूर्या-

चंद्रमसावित्येके राजानौ पुण्यकृतावित्यैतिहासिकाः । नि॰ १२. १. । इति । एवंभूतान् सर्वान्देवानस्मद्रक्षणार्थमाह्वयाम इति पूर्वत्र संबंधः । अस्माभिराहूता सुभगा शोभनधनोपेता सरस्वती नोऽस्मभ्यं मयः सुखं करत् । करोतु ॥ ह्वमहे । ह्वेञो लटि ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । परपूर्वत्वे हल इति दीर्घत्वं । बहुलं छंदसीति शपो लुक् । अस्रिधं । स्रिधु शोषणे । संपदादिलक्षणो भावे क्विप् । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । मयस्करत् । करोतेर्लेट्यडागमः । बहुलं छंदसीति विकरणस्य लुक् । अतः कृकमीति विसर्जनीयस्य सत्वं ॥

चतुर्थीमृचमाह ॥

तन्नो वातो मयोभु वातु भेषजं तन्माता पृथिवी तत्पिता द्यौः ।

तद्ग्रावाणः सोमसुतो मयोभुवस्तदश्विना शृणुतं धिष्ण्या युवं ॥ ४ ॥

तत् । नः । वातः । मयःऽभु । वातु । भेषजं । तत् । माता । पृथिवी । तत् । पिता । द्यौः ।

तत् । ग्रावाणः । सोमऽसुतः । मयःऽभुवः । तत् । अश्विना । शृणुतं । धिष्ण्या । युवं ॥ ४ ॥

वातो वायुस्तद्भेषजमौषधं नोऽस्मान्वातु । प्रापयतु । यद्भेषजं मयोभु मयसः सुखस्य भावयितृ । माता सर्वेषां जननी

पृथिवी भूमिरपि तद्भेषजमस्मान्प्रापयतु । पिता वृष्टिप्रदानेन सर्वेषां रक्षिता द्यौर्द्युलोकोऽपि तद्भेषजमस्मान्प्रापयतु । सोमसुतः सोमाभिषवं कृतवंतो मयोभुवो मयसो यागफलभूतस्य सुखस्य भावयितारो ग्रावाणोऽभिषवसाधनाः पाषाणाश्च तद्भेषजमस्मान्प्रापयंतु । हे धिष्ण्या धिषणा बुद्धिः । तदर्हावश्विनौ युवं युवां तद्भेषजं शृणुतं । आकर्णयतं । यद्भेषजमस्माभिर्वाय्वादिषु प्रार्थ्यते । तद्भेषजं देवानां भिषजौ युवामस्माकमनुकूलं यथा भवति तथा जानीतमित्यर्थः ॥ मयोभु । ह्रस्वो नपुंसके प्रातिपदिकस्य । पा° १. २. ४७. । इति ह्रस्वत्वं । वातु । वा गतिगंधनयोः । अंतर्भावितण्यर्थात्प्रार्थनायां लोट् । सोमसुतः । सोमे सुञः । पा° ३. २. ९०. । इति भूते क्विप् । धिष्ण्या । धिषणाशब्दादर्हार्थे छंदसि चेति यः । वर्णलोपश्छांदसः । सुपां सुलुगित्याकारः ॥

पंचमीमृचमाह ॥

तमीशा॑नं॒ जग॑तस्त॒स्थुष॒स्पतिं॑ धियंजि॒न्वमव॑से हूमहे व॒यं ।
पू॒षा नो॒ यथा॒ वेद॑सा॒मस॑द्वृ॒धे र॑क्षि॒ता पा॒युरद॑ब्धः स्व॒स्तये॑ ॥५॥

तं । ईशा॑नं । जग॑तः । त॒स्थुषः॑ । पतिं॑ । धि॒यं॒ऽजि॒न्वं ।
अव॑से । हू॒म॒हे॒ । व॒यं ।
पू॒षा । नः॒ । यथा॑ । वेद॑सां । अस॑त् । वृ॒धे । र॒क्षि॒ता ।
पा॒युः । अद॑ब्धः । स्व॒स्तये॑ ॥ ५ ॥

पूर्वार्द्धेनेंद्रः स्तूयते। अपरार्द्धेन पूषा। ईशानमैश्वर्यवंतं। अत एव जगतो जंगमस्य प्राणिजातस्य तस्थुषः स्थावरस्य च पतिं स्वामिनं धियंजिन्वं धीभिः कर्मभिः प्रीणयितव्यं। एवंभूतं तमिंद्रमवसे रक्षणाय वयं हूमहे। आह्वयामः। पूषा नोऽस्माकं वेदसां धननां वृधे वर्धनाय रक्षिता यथासत्। येन प्रकारेण भवति। तेनैव प्रकारेणादब्धः केनाप्यहिंसितः पूषा स्वस्तयेऽस्माकमविनाशाय पायुः रक्षिता भवतु॥ तस्थुषः। तिष्ठतेर्लिटः क्वसुः। षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य सत्वं। धियंजिन्वं। जिविः प्रीणनार्थः। कृत्य ल्युटो बहुलमिति बहुलवचनात्खच्। इच एकचोऽम् प्रत्ययवच्च पा॰ ६. ३. ६८.। इत्यमागमः। असत्। अस भुवि। लेट्यडागमः। बहुलं छंदसीति शपो लुगभावः। पायुः। पा रक्षणे। कृवापाजीत्युण्। स्वस्तये। सुपूर्वादस्तेर्भावे क्तिन्। छंदस्युभयथेति तस्य सार्वधातुकत्वादस्तेर्भूः। पा॰ २. ४. ५२.। इति भूभावाभाव इति वृत्तावुक्तं॥

॥ इति प्रथमस्य षष्ठे पंचदशो वर्गः॥

षष्ठीमृचमाह॥

स्वस्ति न इंद्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः।

स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो

बृहस्पतिर्दधातु॥ ६॥

स्वस्ति । नः । इंद्रः । वृद्धऽश्रवाः । स्वस्ति । नः । पूषा । विश्वऽवेदाः ।

स्वस्ति । नः । तार्क्ष्यः । अरिष्टऽनेमिः । स्वस्ति । नः । बृहस्पतिः । दधातु ॥ ६ ॥

वृद्धश्रवाः । वृद्धं प्रभूतं श्रवणं स्तोत्रं हविर्लक्षणमन्नं वा यस्य तादृश इंद्रो नोऽस्माकं स्वस्तीत्यविनाशनाम । स्वस्त्यविनाशं दधातु । विदधातु करोतु । विश्ववेदाः । विश्वानि वेत्तीति विश्ववेदाः । यद्वा विश्वानि सर्वाणि वेदांसि ज्ञानानि धनानि वा यस्य तादृशः पूषा पोषको देवो नोऽस्माकं स्वस्ति विदधातु । अरिष्टनेमिः । नेमिरित्यायुधनाम । अरिष्टोऽहिंसितो नेमिर्यस्य । यद्वा । रथचक्रस्य धारा नेमिः । यत्संबंधिनो रथस्य नेमिर्न हिंस्यते सोऽरिष्टनेमिः । एवंभूतस्तार्क्ष्यः । तृक्षस्य पुत्रो गरुत्मान् नोऽस्माकं स्वस्त्यविनाशं विदधातु । तथा बृहस्पतिर्बृहतां देवानां पालयिता नोऽस्माकं स्वस्त्यविनाशं विदधातु ॥ वृद्धश्रवाः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । विश्ववेदाः । विद ज्ञाने । विद्लृ लाभे । आभ्यामसुन्प्रत्ययांतो वेदस्शब्दः । बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं । तार्क्ष्यः । तृक्षस्यापत्यं । गर्गादिभ्यो यञ् । पा० ४. १. १०५. । ञित्वादाद्युदात्तत्वं । अरिष्टनेमिः । न रिष्टोऽरिष्टः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अरिष्टा नेमिर्यस्य स तथाक्तः । बृहस्पतिः । तद्बृहतोः करपत्योरिति सुट्तलोपौ । उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

पृषंदश्वा मरुतः पृश्निमातरः शुभंयावानो विदथेषु जग्मयः ।
अग्निजिह्वा मनवः सूरंचक्षसो विश्वे नो देवा अवसा गमन्निह ॥ ७ ॥

पृषंत्ऽअश्वाः । मरुतः । पृश्निऽमातरः । शुभंऽयावानः । विदथेषु । जग्मयः ।
अग्निऽजिह्वाः । मनवः । सूरऽचक्षसः । विश्वे । नः । देवाः । अवसा । आ । गमन् । इह ॥ ७ ॥

पृषदश्वाः । पृषद्भिः श्वेतविंदुभिर्युक्ता अश्वा येषां ते तथोक्ताः । पृश्निमातरः । पृश्निर्नानावर्णा गौर्माता येषां । शुभंयावानः । शुभं शोभनं यांति गच्छंतीति शुभंयावानः । शोभनगतय इत्यर्थः । विदथेषु यज्ञेषु जग्मयो गंतारः । अग्निजिह्वाः । अग्नेर्जिह्वायां वर्तमानाः । सर्वे हि देवाः हविःस्वीकरणायाग्नेर्जिह्वायां वर्तंते । तात्स्थ्यात्ताच्छब्द्यं । मनवः सर्वस्य मंतारः । सूरचक्षसः । सूर्यप्रकाश इव चक्षः प्रकाशा येषां त एवंभूता मरुतो मरुत्संज्ञका विश्वे देवा सर्वे देवा नोऽस्मानिहास्मिन्कालेऽवसा रक्षणेन सहागमन् । आगच्छंतु ॥ शुभंयावानः । या प्रापणे । आतो मनिन्निति वनिप् । तत्पुरुषे कृति बहुलमिति बहुलवचनाद्द्वितीयाया अप्यलुक् । गमन् ।

गमेः प्रार्थनायां लेट्यडागमः। इतश्च लोप इतीकारलोपः। बहुलं छंदसीति शपो लुक्।

अस्ति सौम्यचरुस्तृतीयसवने। तेन चरुणा देवता इष्ट्वा शेषे तस्मिन्बहु घृतमवनीय तस्मिन्वषट्कर्त्रा स्वकीया छाया द्रष्टव्या। सा यदि न दृश्येत तदानीं भद्रमित्येका पठितव्या। त्वं सोमेति खंडे तथैव सूत्रते। राज्ञा सोमने तद्वयमस्मासु धारयामसि भद्रं कर्णेभिः शृणुयाम देवा इति च। आ० ५.१९.। इति॥ महानाम्नीव्रतेऽप्येषा भूमिस्पर्शने जप्या। सूचितं चैतद्विदमिति खंडे। भद्रं कर्णेभिः शृणुयाम देवाः शं न इंद्राग्नी भवतामवोभिः आ० ८. १४.। इति॥

तामेतां सूक्तेऽष्टममृचमाह॥

भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः।
स्थिरैरंगैस्तुष्टुवांसस्तनूभिर्व्यशेम देवहितं यदायुः॥ ८॥

भद्रं। कर्णेभिः। शृणुयाम। देवाः। भद्रं। पश्येम। अक्षऽभिः। यजत्राः।
स्थिरैः। अंगैः। तुस्तुऽवांसः। तनूभिः। वि। अशेम। देवऽहितं। यत्। आयुः॥ ८॥

हे देवा दानगुणयुक्ताः सर्वे देवाः कर्णेभिरस्मदीयैः श्रोत्रैर्भद्रं भजनीयं कल्याणं वचनं शृणुयाम। युष्मत्प्रसादाच्छ्रोतुं समर्थाः स्याम। अस्माकं बाधिर्यं कदाचिदपि मा भूत्। हे यजत्रा यागेषु चरुपुरोडाशादिभिर्यष्टव्या देवा अक्षभिरक्षिभिरात्मीयैश्चक्षुर्भिर्भद्रं शोभनं पश्येम। द्रष्टुं समर्थाः स्याम। अस्माकं

दृष्टिप्रतिघातोऽपि मा भूत् । स्थिरैर्दृढैरंगैर्हस्तपादादिभिरवयवैस्तनूभिः शरीरैश्च युक्ता वयं तुष्टुवांसो युष्मान् स्तुवंतो यदायुः षोडशाधिकशतप्रमाणं विंशत्यधिकशतप्रमाणं वा देवहितं देवेन प्रजापतिना स्थापितं तद्व्यशेम । प्राप्नुयाम ॥ कर्णेभिः । बहुलं छंदसीति भिस ऐसभावः । अक्षभिः । छंदस्यपि दृश्यत इत्यनङ् स चोदात्तः । यजत्राः । अमिनक्षीत्यादिना यजेरत्रन्प्रत्ययः । तुष्टुवांसः । ष्टुञ् स्तुतौ । लिटः क्वसुः । शर्पूर्वाः खय इति तकारः शिष्यते । अशेम । अशू व्याप्तौ । लिङ्याशिष्यङ् । यदि तु तत्र परिगणनमन्यत्राप्यर्थं तदानीं लिङि व्यत्ययेन शप् । देवहितं । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

शतमिन्नु शरदो अंति देवा यत्रा नश्चक्रा जरसं तनूनां ।
पुत्रासो यत्र पितरो भवंति मा नो मध्या
रीरिषतायुर्गंतोः ॥ ९ ॥

शतं । इत् । नु । शरदः । अंति । देवाः । यत्र । नः ।
चक्र । जरसं । तनूनां ।
पुत्रासः । यत्र । पितरः । भवंति । मा । नः । मध्या ।
रिरिषत । आयुः । गंतोः ॥ ९ ॥

हे देवाः । अंत्यंतिके मनुष्याणां समीप आयुष्ट्वेन भवद्भिः कल्पिताः शरदः संवत्सराः शतमिन्नु शतं खलु । यस्मात्सृष्टिकाले मनुष्याणां शतं संवत्सरा आयुरिति युष्माभिः परिकल्पितं

तस्मान्नोऽस्माकमायुर्गंतोः कृत्स्नस्यायुषो गमनात्पूर्वं मध्या मध्ये मा रीरिषत। मा हिंसिष्ट। कोट्टशान्। नोऽस्माकं ननूतां शरीराणां जरसं जरां यत्र यस्यामवस्थायां चक्र कृतवंतो यूयं। यत्र च पुत्रासः पुत्रा पितरोऽस्माकं रचितारो भवंति। ईदृग्दशापन्नानित्यर्थः॥ अंति। अंतिकशब्दस्य कादिलोपे बहुलमिति वक्तव्यमिति कलोपः। यत्रा। ऋचि तुनुघमक्षुतङ्कुत्रोरुष्याणामिति संहितायां दीर्घः। चक्र। लिटि मध्यमबहुवचनस्य कित्त्वाद्गुणाभावे यणादेशः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। जरसं। जराया जरसन्यतरस्यां। पा० ७. २. १०१.। इति जरसादेशः। मध्या। सुपां सुलुगिति सप्तम्या डादेशः। रीरिषत। रिष रुष हिंसायां। अस्मात्संग्रतात् माङि लुङि मध्यमबहुवचने चङ्खङि णिलोपोपधाह्रस्वद्विवचनहलादिशेषसन्वद्भावेत्वदीर्घाः। छांदसः पदकालीनो ह्रस्वः। गंतोः। भावलक्षणे स्थेण्। पा० ३. ४. १६.। इति गमेस्तोसुन्प्रत्ययः॥

अदितिर्द्यौरदितिरित्येषादितिदेवताके पशौ हविषो याज्या। सूत्रितं च। अदितिर्द्यौरदितिरंतरिक्षं न ते विष्णो जायमानो न जातः। आ० ३. ८.। इति॥

तामेतां सूक्ते दशमीमृचमाह॥

अदितिर्द्यौरदितिरंतरिक्षमदितिर्माता स पिता स पुत्रः।

विश्वे देवा अदितिः पंच जना

अदितिर्जातमदितिर्जनित्वं॥ १०॥

अदितिः । द्यौः । अदितिः । अंतरिक्षं । अदितिः ।
माता । सः । पिता । सः । पुत्रः ।
विश्वे । देवाः । अदितिः । पंच । जनाः । अदितिः ।
जातं । अदितिः । जनिऽत्वं ॥ १० ॥

अदितिरदीनाखंडनीया वा पृथिवी देवमाता वा सैव द्यौर्द्योतनशीलो नाकः। ततश्च सैवांतरिक्षमंतरा द्यावापृथिव्योर्मध्ये ईक्ष्यमाणं व्योम। सैव माता निर्मात्री जगतो जननी। सैव पितोत्पादकः। ततश्च स पुत्रः। मातापित्रोर्जातः पुत्रोऽपि सैव। विश्वे देवाः सर्वेऽपि देवा अदितिरेव। पंच जना निषादपंचमाश्चत्वारो वर्णाः। यद्वा गंधर्वाः पितरो देवा असुरा रक्षांसि। तदुक्तं यास्केन। गंधर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पंचम इत्यौपमन्यवः। नि० ३. ७.। इति। ब्राह्मणे त्वेवमाम्नातं। सर्वेषां वा एतत्पंचजनानामुक्थं देवमनुष्याणां गंधर्वाप्सरसां सर्पाणां च पितृणां चेति तत्र गंधर्वाप्सरसामैक्यात्पंचजनत्वं। एवंविधाः पंच जना अप्यदितिरेव। जातं जननं प्रजानामुत्पत्तिः। साप्यदितिरेव। जनित्वं जन्माधिकरणं तदप्यदितिरेव। एवं सकलजगदात्मनादितिः स्तूयते। उक्तं च यास्केन। इत्यदितेर्विभूतिमाचष्टे। नि० ४. २३.। इति॥ अदितिः। दो अवखंडने। अस्मात्कर्मणि क्तिनि द्यतिस्यतिमास्थामि ति कितीतीत्वं। यास्कपक्षे तु दीङ् क्षय इत्यस्मात् क्तिनि व्यत्ययेन ह्रस्वत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। सःपिता। निर्दिश्यमान-

प्रतिनिर्दिश्यमानयोरैकतामापादयंति सर्वनामानि पर्यायेण तल्लिंगतामुपददत इत्युद्देश्यलिंगतया पुंलिंगत्वं। जनित्वं। जनेरौणादिकस्त्वन्प्रत्ययः॥

॥ इति प्रथमस्य षष्ठे षोडशो वर्गः॥

ऋजुनीतीति नवर्चं षष्ठं सूक्तं गोतमस्यार्षं। अत्रानुक्रम्यते। ऋजुनीति नव गायत्रमंत्यानुष्टुबिति। पूर्वत्र वैश्वदेवं त्वित्युक्तत्वात्तुह्यादिपरिभाषयेदमपि सूक्तं बहुदेवताकं। सूक्तविनियोगो लैंगिकः। चातुर्विंशकेऽहनि प्रातःसवने मैत्रावरुणस्य ऋजुनीती न इत्यषारंभणीया। चतुर्विंश इति खंडे सूत्रितं। ऋजुनीती नो वरुण इन्द्र वा विश्वतस्परि। आ० ७. २.। इति॥ अहर्गणेषु द्वितीयादिष्वहःस्वप्यषारंभणीया शंसनीया। सूचितं च। आरंभणीयाः पर्यासान्कहतोऽहरहः शस्यानीति होत्रका द्वितीयादिष्वेव। आ० ७. १.। इति॥

तामेतां सूक्ते प्रथमामृचमाह॥

ऋजुनीती नो वरु॑णो मित्रो न॑यतु विद्वान्।
अर्यमा देवैः सजोषाः॥ १॥

ऋजुऽनीती। नः। वरु॑णः। मित्रः। नयतु। विद्वान्।
अर्यमा। देवैः। सऽजोषाः॥ १॥

अहरभिमानी देवो मित्रो वरुणो रात्र्यभिमानी। मित्रश्च वरुणश्च विद्वान् नेतव्यमुत्तमं स्थानं जानन् नोऽस्मान् ऋजुनीती ऋजुनीत्या ऋजुनयनेन कौटिल्यरहितेन गमनेन नयतु। अभिमतं फलं प्रापयतु। तथा देवैरन्यैरिंद्रादिभिः सजोषाः

समानप्रीतिरर्यमाहोरात्रविभागस्य कर्ता सूर्यश्चास्मानृजुगमनी-माभिमतं स्थानं प्रापयतु ॥ ऋजुनीती । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं ॥

द्वितीयामृचमाह ॥

ते हि वस्वो वसवानास्ते अप्रमूरा महोभिः ।

व्रता रक्षंते विश्वाहा ॥ २ ॥

ते । हि । वस्वः । वसवानाः । ते । अप्रऽमूराः । महःऽभिः ।
व्रता । रक्षंते । विश्वाहा ॥ २ ॥

ते हि पूर्वोक्ता मित्रादयो वस्वो वसुनो धनस्य वसवाना वासका आच्छादयितारः । सर्वं जगद्धनेनाच्छादयंतीत्यर्थः । अतस्ते मित्रादयोऽप्रमूरा अप्रमूर्च्छिता अमूढाः प्राज्ञाः संतो महोभिरात्मीयैस्तेजोभिर्विश्वाहा सर्वाण्यहानि । अत्यंतसंयोगा-द्वितीया । सर्वेष्वप्यहस्सु व्रतानि जगन्निर्वाहरूपाणि स्वकीयानि कर्माणि रक्षंते । पालयंति ॥ वस्वः । आगमानुशासनस्यानित्य-त्वान्नुमभावे जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्पनादभावे यणादेशः । वसवानाः । वस आच्छादने । अस्मादंतर्भावितण्यर्थाल्लटः शानच् । बहुलं छंदसीति शपो लुगभावः । वर्णव्यापत्त्या मकारस्य वकारः । अप्रमूराः । मुर्छा मोहसमुच्छ्राययोः । अस्मात्संपदादिलक्षणो भावे क्विप् । राल्लोप इति छकारलोपः । प्रकृष्टा मूः प्रमूः । ततो मत्वर्थीयो रः । रो रीति रेफलोपः । न प्रमूरा अप्रमूराः । अव्ययपूर्वपदप्रकृति-स्वरत्वं । रक्षंते । रक्ष पालने । व्यत्ययेन तङ् ॥

तृतीयामृचमाह ॥

ते अस्मभ्यं शर्म यंसन्नमृता मर्त्येभ्यः ।

बाधमाना अप द्विषः ॥ ३ ॥

ते अस्मभ्यं । शर्म । यंसन् । अमृताः । मर्त्येभ्यः ।

बाधमानाः । अप । द्विषः ॥ ३ ॥

अमृता अमरणधर्माणस्ते विश्वे देवा मर्त्येभ्यो मरणधर्मेभ्योऽस्मभ्यमनुष्ठातृभ्यः शर्माभृतलक्षणं सुखं यंसन् । यच्छंतु प्रयच्छंतु । किं कुर्वंतः । द्विषोऽस्मदीयान्पापलक्षणान् शत्रूनपबाधमानाः । विनाशं प्रापयंतः ॥ यंसन् । यम उपरमे । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । अमृताः । मृतं मरणं येषां नास्तीत्यमृताः । नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं ॥

चतुर्थीमृचमाह ॥

वि नः पथः सुवितायं चियंत्विंद्रो मरुतः ।

पूषा भगो वंद्यासः ॥ ४ ॥

वि । नः । पथः । सुवितायं । चियंतु । इंद्रः । मरुतः ।

पूषा । भगः । वंद्यासः ॥ ४ ॥

वंद्यासः सर्वैर्वंदनीयाः स्तोतव्या नमस्कर्तव्या इंद्रादयो देवा नोऽस्माकं पथो मार्गान्विचियंतु । विचिन्वंतु । अशोभनेभ्यो मार्गेभ्यः सकाशात्पृथक्कुर्वंतु । किमर्थं । सुविताय । सुष्ठु प्राप्तव्याय स्वर्गादिफलाय ॥ पथः । शसि भस्य टेर्लोप इति

टिलोपः । उदात्तनिवृत्तिस्वरेण ग्रस उदात्तत्वं । सुविताय । इण् गतावित्यस्मात्कर्मणि निष्ठा । तन्वादीनां छंदसि बहुल-मुपसंख्यानमित्युवङ् । गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वे प्राप्ते सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं । चियंतु । चिञ् चयने । बहुलं छंदसीति विकरणस्य लुक् । इयङ् । पादादित्वा-न्निघाताभावः । वंद्यासः । वदि अभिवादनस्तुत्योः । ऋहलो-र्ण्यत् । ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं । आज्जसेरसुक् ॥

अप्तोर्यामि संति चत्वार्यतिरिक्तोक्थानि । तत्र चतुर्थेऽच्छा-वाकातिरिक्तोक्थ उत नो धिय इत्येषानुरूपतृचस्य वैकल्पिकी तृतीया । सूचितं च । उत नो धियो गोअग्रा इति वानुरूप-स्योत्तमा । आ० ९. ११. । इति ॥

तामितां सूक्ते पंचमीमृचमाह ॥

उत नो धियो गोअग्राः पूषन्विष्णवेवयावः ।

कर्ता नः स्वस्तिमतः ॥ ५ ॥

उत । नः । धियः । गोऽअग्राः । पूषन् । विष्णो इति ।

एवऽयावः ।

कर्त । नः । स्वस्तिऽमतः ॥ ५ ॥

हे पूषन् पोषक देव हे विष्णो व्यापनशील देव हे एवयावः । एवैर्गंतृभिरश्वैर्याति गच्छतीत्येवयावा मरुद्गणः । हे मरुद्गणः ते सर्वे यूयं नोऽस्माकं धियोऽप्तोर्यामलक्षणानि कर्माणि गोअग्राः पश्वग्राणि पशुमुखान्यस्मत्सकाशाद्भृष्टैः पशु-भिर्युक्तानि कर्त । कुरुत । अप्तोर्यामकर्मणश्च पशुप्राप्तिहेतुत्व-

आम्नायते । यस्मात्पशवः पञ्चैव अंगिरन् स एतेन यजत इति । एवंउत अपि च नोऽस्मान्स्वस्तिमतोऽविनाशिनः कुरुतः ॥ एवयावः । इण् गतौ । इणशीङ्भ्यां वन्निति वन्प्रत्ययः । अस्मिन्नुपपदे या प्रापण इत्यस्माद्दातो मनिन्क्वनिप्वनिपश्चेति वनिप् । संबुद्धौ वन उपसंख्यानं । पा० ८. ३. १. १. । इति वकारस्य रुत्वं ॥

॥ इति प्रथमस्य षष्ठे सप्तदशो वर्गः ॥

ऋत्विगाद्यर्थमाहृतं मधुपर्कं मधु वाता इति तृचेन ऋत्विगादिः प्रतिग्रहीतावेक्षेत । तथा च सूत्र्यते । मधु वाता इति तृचेनावेक्ष्य । आ० गृ० १. २४. । इति ॥

तृचे प्रथमां सूक्ते षष्ठीमृचमाह ॥

मधु वाता ऋतायते मधुं क्षरंति सिंधवः ।

माध्वीर्नः संत्वोषधीः ॥ ६ ॥

मधुं । वाताः । ऋतऽयते । मधुं । क्षरंति । सिंधवः ॥

माध्वीः । नः । संतु । ओषधीः ॥ ६ ॥

ऋतायते ऋतं यज्ञमात्मन इच्छते यजमानाय वाता वायवो मधु माधुर्योपेतं कर्मफलं क्षरंति । वर्षंति । प्रयच्छंतीत्यर्थः । तथा सिंधवः स्यंदनशीला नद्यः समुद्रा वा मधु माधुर्योपेतं स्वकीयं रसं क्षरंति । एवं नोऽस्मभ्यमोषधीः फलपाकांता ओषधयस्ताश्च माध्वीर्माधुर्योपेताः संतु । भवंतु ॥ मधु । अस्मादुत्तरस्य मत्वर्थीयस्य लुगकारेकाररेफाश्च वक्तव्या इति लुक् । ऋतायते । ऋतमात्मन इच्छति । सुप आत्मनः क्यच् । न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । अन्येषामपि

संहितायां दीर्घत्वं । क्यजंताल्लटः शतृ । शतुरनुम इति विभक्ते-रुदात्तत्वं । माध्वीः । मधोरञ् च । पा० ४. ४. १२९. । इति मत्वर्थीयोऽञ्प्रत्ययः । ऋतव्यवास्त्वेत्यादावञि यणादेशो निपात्यते । वा छंदसीति पूर्वसवर्णदीर्घत्वं । ओषधीः । ओषः पाक आसु धीयत इत्योषधयः । कर्मण्यधिकरणे चेति कि-प्रत्ययः । कृदिकारादक्तिन इति ङीप् । जसि पूर्ववत्पूर्वसवर्ण-दीर्घः । दासीभारादिषु पठितत्वात्पूर्वपदप्रकृतिस्वरत्वं । तच्च घञंतमाद्युदात्तं ॥

सप्तमीमृचमाह ॥

मधु नक्तमुतोषसो मधुमत्पार्थिवं रजः ।

मधु द्यौरस्तु नः पिता ॥ ७ ॥

मधु । नक्तं । उत । उषसः । मधुऽमत् । पार्थिवं । रजः ।

मधु । द्यौः । अस्तु । नः । पिता ॥ ७ ॥

नक्तं रात्रिर्नोऽस्माकं मधुमती माधुर्योपेतफलप्रदा भवतु । उत अपि चोषस उषःकालोपलक्षितान्यहानि च मधुमंति भवंतु । पार्थिवं रजः पृथिव्याः संबंधी लोकोऽस्माकं मधुमत् माधुर्यविशिष्टफलयुक्तो भवतु । पिता वृष्टिप्रदानेन सर्वेषां पालयिता द्यौर्द्युलोकोऽपि मधु मधुयुक्तो भवतु । पार्थिवं । पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः । रजः । रजः-शब्दो लोकवाची । लोका रजांस्युच्यंते । नि० ४. १९. । इति यास्कः । रजंत्यस्मिञ्जना इति रजः । असुनि रजकरजनरजः-सूपसंख्यानमिति रंजेर्नलोपः ॥

अष्टमीमृचमाह ॥

मधुमान्नो वनस्पतिर्मधुमाँ अस्तु सूर्यः ।

माध्वीर्गावो भवंतु नः ॥ ८ ॥

मधुऽमान् । नः । वनस्पतिः । मधुऽमान् । अस्तु । सूर्यः ।

माध्वीः । गावः । भवंतु । नः ॥ ८ ॥

नोऽस्माकं वनस्पतिर्वनानां पालयिता यूपाभिमानी देवो मधुमान् माधुर्योपितफलवानस्तु । तादृशं फलमस्मभ्यं प्रयच्छत्वित्यर्थः । सूर्यः सर्वस्य प्रेरकः सविता च मधुमानस्तु । गावोऽग्निहोत्राद्यर्था धेनवश्च नोऽस्माकं माध्वीर्माधुर्योपितेन पयसा युक्ता भवंतु ॥ वनस्पतिः । वनानां पतिर्वनस्पतिः । पारस्करादित्वात्सुट् । वनपतिशब्दावाद्युदात्तौ । उभे वनस्पत्यादिषु युगपदिति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

शं नो मित्रः शं वरुणः शं नो भवत्वर्यमा ।

शं न इंद्रो बृहस्पतिः शं नो विष्णुरुरुक्रमः ॥ ९ ॥

शं । नः । मित्रः । शं । वरुणः । शं । नः । भवतु । अर्यमा ।

शं । नः । इंद्रः । बृहस्पतिः । शं । नः । विष्णुः ।

उरुऽक्रमः ॥ ९ ॥

अहरभिमानी मित्रो देवो नोऽस्माकं शं सुखकरो भवतु । यद्वा । अस्मदीयानामुपद्रवाणां शमयिता भवतु । रात्र्य-

भिमानी वरुणश्च शं सुखकरो भवतु। अर्यमाहोरात्रयोः ख्यापयिता सूर्यश्च नोऽस्माकं शं सुखकरो भवतु। बृहस्पतिर्बृहतां देवानां पालयितेंद्रश्च नोऽस्माकं शं सुखकरो भवतु। उरुक्रमः। उरुविस्तीर्णं क्रामंति पादौ विक्षिपतीत्युरुक्रमः। विष्णुर्हि वामनावतारे पृथिव्यादीन् लोकान्पदत्रयरूपेणाक्रांतवान्। अत उरुक्रमो विष्णुश्च नोऽस्माकं शं सुखकर उपद्रवाणां शमयिता च भवतु॥ उरुक्रमः। क्रमु पादविक्षेपे। पचाद्यच्। यद्वा। उरून् क्रामतीत्युरुक्रमः। कर्मण्यण्। नोदात्तोपदेशस्य मांतस्येति वृद्धिप्रतिषेधः॥

॥ इति प्रथमस्य षष्ठेऽष्टादशो वर्गः॥

त्वं सोमेति त्रयोविंशत्यृचं सप्तमं सूक्तं गोतमस्यार्षं सोमदेवताकं। पंचम्याद्याः षोडश्यंता द्वादशर्चो गायत्र्यः। सप्तदश्युष्णिक्। शिष्टा दश त्रिष्टुभः। तथा चानुक्रांतं। त्वं सोम त्र्यधिका सौम्यं पंचम्यादि गायत्र्यो द्वादशोष्णिक् चेति। सूक्तविनियोगो लैंगिकः॥ एकादशिनस्य सौम्यस्य पशोर्वपापुरोडाशयोस्त्वं सोमेति द्वे ऋचावनुवाक्ये। सूत्रितं च। त्वं सोम प्र चिकितो मनीषेति द्वे। आ० ३. ७.। इति महापितृयज्ञ एकैकस्य हविषो द्वे द्वे आनुवाक्ये। तत्र सोमस्य पितृमतस्त्वं सोमेत्यषा प्रथमानुवाक्या। दक्षिणाग्नेरग्निमिति खंडे सूत्रितं। त्वं सोम प्र चिकितो मनीषा सोमो धेनुं। आ० २. १९.। इति॥ एषैव प्रायणीयेष्टौ सौम्यस्यानुवाक्या। तदहः प्रायणीयेष्टिरित्यत्र सूत्रितं। त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्यां। आ० ४. ३.। इति॥

तत्र प्रथमामृचमाह ॥

त्वं सो॑म॒ प्र चि॑कितो मनी॒षा त्वं रजि॑ष्ठ॒मनु॑ नेषि॒ पंथां॑ ।
तव॒ प्रणी॑ती पि॒तरो॑ न इंदो दे॒वेषु॒ रत्न॑मभजंत॒ धीराः॑ ॥ १ ॥

त्वं । सो॒म॒ । प्र । चि॒कि॒तः॒ । म॒नी॒षा । त्वं । रजि॑ष्ठं ।
अनु॑ । ने॒षि॒ । पंथां॑ ।
तव॑ । प्रऽनी॑ती । पि॒तरः॑ । नः॒ । इं॒दो॒ इति॑ । दे॒वेषु॑ ।
रत्नं॑ । अ॒भ॒जं॒त॒ । धीराः॑ ॥ १ ॥

हे सोम त्वं मनीषा मनीषयास्मदीयया बुद्ध्या प्रचिकितः । प्रकर्षेण ज्ञातोऽसि । वयं त्वां स्तुतिभिरज्ञासिष्मेत्यर्थः । अतस्त्वं रजिष्ठमृजुतममकुटिलं पंथां पंथानं कर्मफलावाप्तिहेतुभूतं मार्गमनुनेषि । अस्माननुक्रमेण प्रापयसि । किंच हे इंदो । उंदनशीलं सर्वं जगदमृतेन क्लेदयितः सोम तव प्रणीती प्रणीत्या त्वत्कर्तृकेन प्रकृष्टनयनेन धीरा धीमंतः कर्मवंतः प्रज्ञावंतो नोऽस्माकं पितरो देवेष्विंद्रादिषु रत्नं रमणीयं धनमभजंत । असेवंत प्राप्नुवन् । अतोऽस्मानपि तादृशं धनं प्रापयेत्यर्थः ॥ प्रचिकितः । कित ज्ञाने । अस्मात्कर्मणि निष्ठा । छांदसं द्विर्वचनं । यद्वा यङ्लुगंतान्निष्ठा । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणो यङ्लुकोरित्यभ्यासस्य गुणाभावः । यद्वा । छंदस्युभयथेति निष्ठायाः सार्वधातुकसंज्ञायां शप् । जुहोत्यादित्वात्तस्य श्लुः । श्लाविति द्विर्वचनं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । मनीषा । सुपां सुलुगिति तृतीयाया डादेशः ।

रजिष्ठं । ऋजुशब्दादिष्ठनि विभाषर्जोश्छंदसीति रत्वं । टेरिति टिलोपः । नेषि । नयतेर्लटि बहुलं छंदसीति शपो लुक् । पंथां । पथिमथ्यृभुक्षामात् । पा० ७. १. ८५. । इत्यसावपि व्यत्ययेनात्वं । पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं । प्रणीती । तादौ चेति गतेः प्रकृतिस्वरत्वं । सुपां सुलुगिति तृतीयायाः पूर्वसवर्णदीर्घत्वं ॥

अग्निष्टोमे मरुत्वतीये त्वं सोम क्रतुभिरित्येषा धाय्या । सूत्रितं च । अग्निर्नेता त्वं सोम क्रतुभिः पिन्वंत्यप इति धाय्याः । आ० ५. ४. । इति ॥

तामितां सूक्ते द्वितीयामृचमाह ॥

त्वं सोम क्रतुभिः सुक्रतुर्भूस्त्वं दक्षैः सुदक्षो विश्ववेदाः ।
त्वं वृषा वृषत्वेभिर्महित्वा द्युम्नेभिर्द्युम्न्यभवो नृचक्षाः ॥२॥

त्वं । सोम । क्रतुऽभिः । सुऽक्रतुः । भूः । त्वं । दक्षैः ।
सुऽदक्षः । विश्वऽवेदाः ।
त्वं । वृषा । वृषऽत्वेभिः । महिऽत्वा । द्युम्नेभिः । द्युम्नी ।
अभवः । नृऽचक्षाः ॥ २ ॥

हे सोम त्वं क्रतुभिस्त्वत्संबंधिभिरग्निष्टोमादिकर्मभिरात्मीयैर्ज्ञानैर्वा सुक्रतुः शोभनकर्मा शोभनप्रज्ञो वा भूः । भवसि । तथा विश्ववेदाः सर्वधनस्त्वं दक्षैरात्मीयैर्बलैः सुदक्षः शोभनबलो भवसि । तथा त्वं वृषत्वेभिर्वृषत्वैः कामाभिवर्षणैर्महित्वा महत्त्वेन माहात्म्येन च वृषा कामानां वर्षिता महांश्च भवसि ।

तथा त्वं नृचक्षा नृणां यज्ञस्य नेतॄणां यजमानानामभिमतफलस्य दर्शयिता सन् द्युम्नेभिर्द्युम्नैस्तैर्दत्तैर्हविर्लक्षणैरन्नैर्द्युम्नप्रभवः। प्रभूतान्नो भवसि॥ सुक्रतुः। बहुव्रीहौ क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। सुदक्षः। दक्ष वृद्धौ। दक्ष्यतेऽनेनेति दक्षो बलं। करणे घञ्। ञित्त्वादाद्युदात्तत्वं। सुशब्देन बहुव्रीहावाद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं। विश्ववेदाः। विश्वानि वेदांसि यस्यासौ। बहुव्रीहौ विश्वं संज्ञायामिति पूर्वपदांतोदात्तत्वं। वृषत्वेभिः। वृष्णो भावो वृषत्वं। बहुलं छंदसीति भिस ऐसभावः। महित्वा। महेरौणादिक इन्प्रत्ययः। भावप्रत्ययांतात्सुपां सुलुगिति विभक्तेराकारः॥

तृतीयामृचमाह॥

राज्ञो नु ते वरु॑णस्य व्रतानि॑ बृहद्ग॑भीरं तव॑ सोम धाम॑।

शुचिष्ट्वम॑सि प्रियो न मित्रो दक्षाय्यो॑ अर्यमेवा॑सि

सोम॥ ३॥

राज्ञः॑। नु। ते। वरु॑णस्य। व्रतानि॑। बृहत्। गभीरं॑।

तव॑। सोम। धाम॑।

शुचिः॑। त्वं। असि। प्रियः। न। मित्रः। दक्षाय्यः॑।

अर्यमाऽइ॑व। असि। सोम॥ ३॥

हे सोम राज्ञो ब्राह्मणानां स्वामिनः। सोमोऽस्माकं ब्राह्मणानां राजेति श्रुतेः। वरुणस्य यागार्थमाहृतः क्रीतो

वस्त्रेणावृतः सोमो वरुणः । वरुणोऽसि धृतव्रत इति मंत्रलिंगात् । क्रीतस्य ते नु तव संबंधीनि हि व्रतानि सर्वाण्यग्निष्टोमादीनि कर्माणि । अतः सर्वेषु यागेषु त्वमेव कारणभूतो भवसीत्यर्थः । अतस्तव धाम त्वदीयं तेजो बृहन्महद्विस्तीर्णं गभीरं गांभीर्योपेतं च । यद्वा नु इत्येतदुपमार्थे । तदुक्तं यास्केन । अत्राप्युपमार्थे भवति वृक्षस्य नु ते पुरुहूत वयाः । नि० १. ४. । इति । राज्ञो राजमानस्य वरुणस्य नु वरुणस्येव हे सोम ते तव व्रतानि कर्माणि लोकहितकारीणि । शिष्टं समानं । हे सोम त्वं शुचिः सर्वेषां शोधकोऽसि । तत्र दृष्टांतः । प्रियो न मित्रः । यथा सर्वेषामनुकूलोऽहरभिमानी मित्रो देवः शोधयिता भवति तद्वत् । तथा त्वमर्यमेवास्माभिर्ह्यमानः सूर्य इव दक्षाय्योऽसि । सर्वेषां वर्धको भवसि । यथाहनि सूर्यः प्रकाशेन सर्वं वर्धयति । एवं निशस्तमये सोमकिरणैराप्यायमानं सस्थावरजंगमात्मकं सर्वं जगद्वर्धते ॥ शुचिष्टं । युष्मत्तत्ततक्षुःष्वंतःपादमिति विसर्जनीयस्य षत्वं । दक्षाय्यः । दक्ष वृद्धौ । श्रुदक्षिस्पृहिगृहिभ्य आय्य इत्याय्यप्रत्ययः ॥

आग्रयणेष्टौ सौम्यस्य हविषा या ते धामानीति याज्या । आग्रयणं व्रीहिश्यामाकयवानामिति खंडे सूत्रितं । सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यां । आ० २. ८. । इति ॥ एषैवैकादशिनस्य सौम्यस्य पशोर्वपायां याज्या । सूत्रितं च । या ते धामानि दिवि या पृथिव्यामषाळ्हं युत्सु पृतनासु पप्रिं । आ० ३. ७. । इति ॥ प्रायणीयेष्टावप्येषैव सौम्यस्य याज्या । सूत्रितं च । त्वं सोम प्र चिकितो मनीषा या ते धामानि दिवि या पृथिव्यां । आ० ४. ३. । इति ॥

तामेतां सूक्ते चतुर्थीमृचमाह ॥

या ते धामानि दिवि या पृथिव्यां या पर्वतेष्वोषधीष्वप्सु ।
तेभिर्नो विश्वैः सुमना अहेळन्राजन्त्सोम प्रति हव्या
गृभाय ॥ ४ ॥

या । ते । धामानि । दिवि । या । पृथिव्यां । या ।
पर्वतेषु । ओषधीषु । अप्ऽसु ।
तेभिः । नः । विश्वैः । सुऽमनाः । अहेळन् । राजन् ।
सोम । प्रति । हव्या । गृभाय ॥ ४ ॥

हे सोम ते तव दिवि द्युलोके या यानि धामानि तेजांसि वर्तंते । तथा पृथिव्यां भूमौ यानि वर्तंते । तथा पर्वतेषु पर्वत्सु शिलोच्चयेषु यानि वर्तंते । तथा व्रीह्याद्योषधीष्वप्सु च यानि वर्तंते तेभिर्विश्वैस्तैः सर्वैस्तेजोभिर्युक्तः सुमनाः शोभनमना अहेळन्नक्रुध्यन् हे राजन् सोम राजमान सोम । एवंभूतस्त्वं हव्यास्माभिः प्रदत्तानि हवींषि प्रतिगृभाय । प्रतिगृहाण ॥ या । शेश्छंदसि बहुलमिति शेर्लोपः । पृथिव्यां । उदात्तयण इति विभक्तेरुदात्तत्वं । ओषधीषु । ओषधेश्च विभक्तावप्रथमाया मिति दीर्घः । अप्सु । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । सुमनाः । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं । गृभाय । ग्रह उपादाने । छंदसि शायजपीति हौ श्नाप्रत्ययस्य शायनादेशः ॥

पौर्णमासेष्टौ सौम्यस्याज्यभागस्य त्वं सोमेत्येषानुवाक्या ।

सूचितं च। अग्निर्वृत्राणि जंघनदिति पूर्वस्याज्यभागस्यानुवाक्या। त्वं सोमासि सत्पतिरित्युत्तरस्य। आ० १. ५.। इति। एवं यत्र यत्र वार्त्रघ्नावाज्यभागौ तत्र सर्वत्रास्या विनियोगः॥ प्रातःकालीनायामुपसदि प्रधानस्य सौम्यस्यैषैवानुवाक्या। अपराह्णिक्यामुपसदि सैव याज्या। सूत्रितं च। त्वं सोमासि सत्पतिर्गयस्फानो अमीवहा। आ० ४. ८.। इति। विपर्यासो याज्यानुवाक्यानां। आ० ४. ८.। इति च॥

तामेतां सूक्ते पंचमीमृचमाह॥

त्वं सोमासि सत्पतिस्त्वं राजोत वृत्रहा।

त्वं भद्रो असि क्रतुः॥ ५॥

त्वं। सोम। असि। सत्ऽपतिः। त्वं। राजा। उत।

वृत्रऽहा।

त्वं। भद्रः। असि। क्रतुः॥ ५॥

हे सोम त्वं सत्पतिरसि। सतां कर्मसु वर्तमानानां ब्राह्मणानामधिपतिर्भवसि। तस्मात्सोमराजानो ब्राह्मणा इति श्रुतेः। यद्वा संतः स्नानादयः पतयः पालका यस्य सोमस्य तादृशो भवसि। तथा चाम्नायते। स्नानस्राजिल्याह्वैते वा अमुष्मिन् लोके सोममरक्षन्निति। उत अपि च राजा राजमानस्त्वं वृत्रहा वृत्रस्यासुरस्य शत्रोर्वा हंतासि। भद्रः शोभनः क्रतुर्योऽयमग्निष्टोमादियागस्त्वमेव तद्रूपो भवसि। त्वत्साध्य-

स्वाद्यागानां॥ सत्पतिः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। तत्पुरुषपक्षे तु पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं॥

॥ इति प्रथमस्य षष्ठे एकोनविंशो वर्गः॥

साग्निचित्ये क्रतावग्नीषोमीयस्य पशुपुरोडाशमन्वष्टौ देवसुवां हवींषि निरुप्यंते। तत्र सोमस्य वनस्पतेर्हविषस्त्वं च सोमेत्येषानुवाक्या। अथाग्नीषोमीयेणेति खंडे सूत्रितं। त्वं च सोम नो वशो ब्रह्मा देवानां पदवीः कवीनां। आ० ४. ११.। इति॥

तामेतां षष्ठीमृचमाह॥

त्वं च॑ सोम नो॒ वशो॑ जी॒वातुं॒ न म॑रामहे।
प्रि॒यस्तो॑त्रो॒ वन॒स्पतिः॑॥ ६॥

त्वं। च। सोम। नः। वशः। जी॒वातुं॑। न। म॒रा॒म॒हे॒।
प्रि॒यऽस्तो॑त्रः। वन॒स्पतिः॑॥ ६॥

हे सोम नोऽस्माकं स्तोतॄणां जीवातुं जीवनौषधं त्वं च त्वं चेद्वशः कामयेथाः। तदानीं वयं न मरामहे। न म्रियामहे। कीदृशस्त्वं। प्रियस्तोत्रः। प्रियाणि स्तोत्राणि यस्य स तथोक्तः। बहुभिः स्तोतव्य इत्यर्थः। वनस्पतिः। वनानामोषधिवनस्पतिरूपाणां पतिः पालयितासि। सोमो वा ओषधीनां राजेति श्रुतेः॥ वशः। वश कांतौ। लेटि सिप्यडागमः। आगमानुदात्तत्वे धातुस्वरः शिष्यते। त्वं चेति चशब्दस्यणेति निपातांतरं चेदर्थ। तद्योगान्निपातैर्यद्यदिहंतेति निघातप्रतिषेधः। जीवातुं। जीव प्राणधारणे। जीवेरातुः। मरामहे। मृङ् प्राणत्यागे। व्यत्ययेन शप्॥

आयुःकामेष्ट्यां द्वितीयस्याज्यभागस्य त्वं सोम महे भगमित्येषानुवाक्या । अथ काम्या इति खंडे सूत्रितं । आ नो अग्ने सुचेतुना त्वं सोम महे भगं । आ० २. १०. । इति ॥

तामेतां सूक्ते सप्तमीमृचमाह ॥

त्वं सोम महे भगं त्वं यून ऋतायते ।

दक्षं दधासि जीवसे ॥ ७ ॥

त्वं । सोम । महे । भगं । त्वं । यूने । ऋतऽयते ।

दक्षं । दधासि । जीवसे ॥ ७ ॥

हे सोम त्वं महे महते वृद्धाय ऋतायते ऋतं यज्ञमात्मन इच्छते पुरुषाय जीवसे जीवितुं दक्षमुपभोगसमर्थं भगं धनं दधासि । विदधासि करोषि । तथा त्वं यूने तरुणाय च ऋतायते जीवितुं धनं करोषिः ॥ महे । महते । अच्छब्दलोपश्छांदसः । वृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । यूने । श्वयुवमघोनामतद्धित इति संप्रसारणं । ऋतायते । ऋतमात्मन इच्छति । सुप आत्मनः क्यच । छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । क्यजंतात्लटः शतृ । शतुरनुमो नद्यजादी इति विभक्तेरुदात्तत्वं । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः ॥

स्वस्त्ययन्यां द्वितीयस्याज्यभागस्य त्वं नः सोमेत्येषानुवाक्या । सूत्रितं च । स्वस्त्ययन्यां रक्षितवंतावग्ने रक्षा णो अंहसस्त्वं नः सोम विश्वतः । आ० २. १०. । इति ॥

तामितां सूक्तेऽष्टमीमृचमाह ॥

त्वं नः सोम विश्वतो रक्षा राजन्नघायतः ।

न रिष्येत्त्वावतः सखा ॥ ८ ॥

त्वं । नः । सोम । विश्वतः । रक्ष । राजन् । अघऽयतः ।

न । रिष्येत् । त्वाऽवतः । सखा ॥ ८ ॥

हे सोम राजन् राजनशील त्वमघायतः । अघं पापं । तद्धेतुकं दुःखमस्माकं कर्तुमिच्छता विश्वतः सर्वस्मादपि पुरुषान्नोऽस्मान्रक्ष । पालय । त्वावतस्त्वत्सदृशस्य सखा सख्यं प्राप्तः पुरुषो न रिष्येत् । नहि विनश्येत् किमु वक्तव्यं त्वत्सखा विनश्यतीति ॥ अघायतः । अघं पापं परेषामिच्छतीत्यघायन् । छंदसि परेच्छायामपीति क्यच् । अश्वाघस्यादित्यात्वं । रिष्येत् । रुष रिष हिंसायां । त्वावतः । वतुप्प्रकरणे युष्मदस्मद्भ्यां छंदसि सादृश्य उपसंख्यानमिति वतुप् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । आ सर्वनाम्न इत्यात्वं ॥

सोमप्रवहणे सोम यास्त इति तृचोऽनुवक्तव्यः । सूत्रितं च । सोम यास्ते मयोभुव इति तिस्रः । आ० ४. ४. ॥ आग्नयणे सौम्यस्य सोम यास्त इत्येषानुवाक्या । सूत्रितं च । सोम यास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यां । आ० २. ९. । इति ॥ अश्वमेधेऽपि पौष्णामिष्टौ द्वितीयस्याज्यभागस्यैषानुवाक्या । सूत्रितं च । त्वमग्ने सप्रथा असि सोम यास्ते मयोभुव इति मह्यंतौ । आ० १०. ६. । इति ॥

तामितां सूक्ते नवमीमृचमाह ॥

सोम यास्ते मयोभुवं ऊतयः संति दाशुषे ।

ताभिर्नोऽविता भव ॥ ९ ॥

सोम । याः । ते । मयःऽभुवः । ऊतयः । संति । दाशुषे ।

ताभिः । नः । अविता । भव ॥ ९ ॥

हे सोम ते तव संबंधिन्यो दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय मयोभुवो मयसः सुखस्य भावयित्री या ऊतयो रक्षाः संति विद्यंते । ताभिः रक्षाभिर्नोऽस्माकमविता रक्षिता भव ॥ मयोभुवः । अस्योतिविशेषणत्वेन स्त्रीलिंगत्वे भुवश्च । पा० ४. १. ४९. । इति ङीष् प्राप्नोति । तद्वोतो गुणवचनादित्यस्मादुत इति तपरकरणस्यानुवर्तनान्न भवति ॥

दशमीमृचमाह ॥

इमं यज्ञमिदं वचो जुजुषाण उपागहि ।

सोम त्वं नो वृधे भव ॥ १० ॥

इमं । यज्ञं । इदं । वचः । जुजुषाणः । उपऽआगहि ।

सोम । त्वं । नः । वृधे । भव ॥ १० ॥

हे सोम त्वमिममस्माभिः क्रियमाणं यज्ञमिदं वच इदानीं क्रियमाणं स्तुतिलक्षणं वचनं जुजुषाणः सेवमानः सन् उपागहि । उपागच्छ । प्राचीनवंशलक्षणं गृहं प्राप्नुहि । प्राप्य च नोऽस्माकं वृधे यज्ञस्य वर्धनाय भव ॥ जुजुषाणः । जुषी

प्रीतिसेवनयोः। छंदसि लिट्। लिटः कानच्। चित इत्यंतोदात्तत्वं। उपागहि। गमेर्लोटि बहुलं छंदसीति शपो लुक्। अनुदात्तोपदेशेत्यादिना मकारलोपः। असिद्धवदत्राभादित्यस्यासिद्धत्वाद्धेर्लुगभावः। गतिर्गतौ। पा० ८. १. ७०.। इति पूर्वस्य गतेर्निघातः॥

॥ इति प्रथमस्य षष्ठे विंशो वर्गः॥

दर्शयागे सौम्यस्याज्यभागस्य सोम गीर्भिरित्येषानुवाक्या। सूत्रितं च। अग्निः प्रत्नेन मन्मना सोम गीर्भिष्ट्वा वयं। आ० १. ५.। इति। अन्यत्रापि यत्र वृधन्वंतावाज्यभागौ तत्रैषा द्वितीयाज्यभागानुवाक्या॥

तामेतां सूक्त एकादशीमृचमाह॥

सोम॑ गी॒र्भिष्ट्वा॑ व॒यं व॒र्धया॑मो वचो॒विदः॑।

सु॒मृ॒ळी॒को न॒ आ वि॑श॥ ११॥

सोम॑। गीः॒ऽभिः। त्वा॒। व॒यं। व॒र्धया॑मः। व॒चः॒ऽविदः॑।

सु॒ऽमृ॒ळी॒कः। नः॒। आ। वि॒श॥ ११॥

हे सोम त्वा त्वां वचोविदः स्तुतिलक्षणानां वचसां वेदितारो वयमनुष्ठातारो गीर्भिः स्तुतिलक्षणैर्वचोभिर्वर्धयामः। प्रवृद्धं कुर्मः। तादृशस्त्वं च नोऽस्माकं सुमृळीकः शोभनं सुखं कुर्वन् सन् आविश। आगच्छ॥ सुमृळीकः। मृड सुखने। मृडेः कीकन्कंकनौ। उ० ४. २४.। इति भावे कीकन्प्रत्ययः। शोभनं मृडीकं यस्येति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं॥

संति पवमानेष्टयस्तिस्रः । तत्र तृतीयस्यामिष्टावुत्तरस्या-ज्यभागस्य गयस्फान इत्येषानुवाक्या । सूत्रितं च । पुष्टिमंता-वग्निना रयिमश्नवद्गयस्फानो अमीवहा । आ० २. १. । इति ॥ एषैव प्रातःकालीनोपसदि सौम्ययागस्य याज्या सायंकालीनायां त्वनुवाक्या । सूत्रितं चाथोपसदिति खंडे । त्वं सोमासि सत्प-तिर्गयस्फानो अमीवहा । आ० ४. ८. । इति ॥

तामेतां सूक्ते द्वादशीमृचमाह ॥

गयस्फानो अमीवहा वसुवित्पुष्टिवर्धनः ।

सुमित्रः सोम नो भव ॥ १२ ॥

गयऽस्फानः । अमीवऽहा । वसुऽवित् । पुष्टिऽवर्धनः ।

सुऽमित्रः । सोम । नः । भव ॥ १२ ॥

गयस्फानः । गय इति धननाम । धनस्य वर्धयिता अमी-वहा । अमीवानां रोगाणां हंता । वसुवित् । स्तोतॄणां धनस्य लंभयिता प्रापयिता । पुष्टिवर्धनः । पुष्टेः संपदो वर्धयिता । सुमित्रः । शोभनानि मित्राणि सखायो यस्य स तथोक्तः । हे सोम त्वं नोऽस्माकमेवंगुणविशिष्टो भव ॥ गयस्फानः । स्फायी वृद्धौ । अंतर्भावितण्यर्थात् ल्युटि व्यत्ययेन यलोपः । इदमादिषु चतुर्षु पदेषु कृदुत्तरपदप्रकृतिस्वरत्वं । सुमित्रः । नञ्सुभ्यामि-त्युत्तरपदांतोदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

सोम रारंधि नो हृदि गावो न यवसेष्वा ।

मर्य इव स्व ओक्ये ॥ १३ ॥

सोमं। ररंधि। नः। हृदि। गावः। न। यवसेषु। आ।

मर्यःऽइव। स्वे। ओक्ये। १३॥

हे सोम त्वं नोऽस्माकं हृदि हृदये रारंधि। रमस्व। तत्र निदर्शनद्वयमुच्यते। गावो न। यथा गावो यवसेषु शोभनतृणेष्वाभिमुख्येन रमंते। मर्य इव। यथा वा मर्यो मरणधर्मा मनुष्यः स्वे ओक्ये स्वकीय ओकसि गृहे पुत्रादिभिः सह रमते तद्वदस्माभिर्दत्तेन हविषा तृप्तः सन् अस्मास्वेवावतिष्ठस्व। नान्यत्र गच्छेति निदर्शनद्वयस्य तात्पर्यार्थः॥ रारंधि। रमु क्रीडायां। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति शपः श्लुः। छंदस्युभयथेति हेरार्द्धधातुकत्वेन ङित्वाभावादङितश्चेति हेर्धिः। अत एवाङित्वादनुनासिकलोपाभावः। सेर्ह्यपिच्चेति हेरपित्वात्तस्यैव स्वरः शिष्यते। छांदसमभ्यासदीर्घत्वं। आमंत्रितं पूर्वमविद्यमानवदिति पूर्वस्यामंत्रितस्याविद्यमानवत्त्वात्पदादपरत्वेन निघाताभावः। मर्य इव। छंदसि निष्टर्क्येत्यादौ मर्यशब्दो यत्प्रत्ययांतो निपात्यते। यतोऽनाव इत्याद्युदात्तत्वं। ओक्ये। उच समवाये। उच्यते समवेयते प्राप्यत इत्योक्यं गृहं। ऋहलोर्ण्यत्। चजोः कु घिण्यतोरिति कुत्वं। तित्स्वरितः॥

चतुर्दशीमृचमाह॥

यः सोम सख्ये तव रारणद्देव मर्त्यः।

तं दक्षः सचते कविः॥ १४॥

यः । सोम । सख्ये । तव॑ । ररण॑त् । देव । मर्त्यः॑ । तं ।

दक्षः॑ । सचते । कविः ॥ १४ ॥

हे देव द्योतमान सोम तव सख्ये त्वदीये सखित्वे निमित्तभूते सति यो मर्त्यो मरणधर्मा यजमानो रारणत् । रणति । एतत्सूक्तरूपेण स्तोत्रेण त्वां स्तौति । तं यजमानं कविः क्रांतदर्शी दक्षः सर्वकार्यसमर्थस्त्वं सचते । सेवसे । अनुगृह्णासीत्यर्थः ॥ रारणत् । रण शब्दार्थः । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः । इतश्च लोप इतीकारलोपः । छंदस्युभयथेत्यार्धधातुकत्वादभ्यनिटौति सार्वधातुके । विधीयमानस्याभ्यस्तात्युदात्तत्वस्याभावे धातुस्वरः शिष्यते । सचते । षच समवाये । पुरुषव्यत्ययः ॥

पंचदशीमृचमाह ॥

उरुष्या णो॑ अभिश॑स्तेः सोम॒ नि पा॒ह्यंह॑सः ।

सखा॑ सुशेव॑ एधि नः ॥ १५ ॥

उरुष्य । नः । अभिऽश॑स्तेः । सोम॑ । नि । पाहि । अंह॑सः ।

सखा॑ । सुऽशेवः॑ । एधि । नः ॥ १५

हे सोम त्वं नोऽस्मानभिशस्तेरभिशंसनादभिशापरूपान्निंदनादुरुष्य । रक्ष । उरुष्यती रक्षाकर्मेति यास्कः । तथांहसोऽस्मत्कृतात्पापाच्च निपाहि । नितरां पालय । एवमस्मदीयं पापं परिहृत्य सुशेवोऽस्मभ्यं दातव्येन शोभनेन सुखेन युक्तः सन्सखेधि । हितकारी भव ॥ अभिशस्तेः । शंसु स्तुतौ ।

अस्माद्भावे क्तिन् । तादौ चेति गतेः प्रकृतिस्वरत्वं । एधि । असु भुवि । लोटि सेर्हिः । तस्य ङित्त्वात् श्नसोरल्लोपः इत्यकारलोपः । घ्वसोरेद्धावभ्यासलोपश्चेति सकारस्यैत्वं । तथासिद्धवदत्राभादित्यसिद्धत्वात् हुझल्भ्यो हेर्धिरिति हेर्धिरादेशः ॥

॥ इति प्रथमस्य षष्ठ एकविंशो वर्गः ॥

आवस्तोत्र आप्यायस्व समेतु त इति तृचो विनियुक्तः । सूत्रितं च । आप्यायस्व समेतु त इति तिस्रो मृजंति त्वा दश क्षिपः । आ॰ ५. १२. । इति ॥ पत्नीसंयाजेषु सौम्यस्याप्यायस्वेत्येषानुवाक्या । सूत्रितं च । आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजाः । आ॰ १. १०. । इति ॥ चमसाप्यायनेऽप्येषा विनियुक्ता । सूत्रितं च । आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजा इति चमसानाप्योपाद्यान् । आ॰ ५. ६. । इति ॥

तामेतां सूक्ते षोडशीमृचमाह ॥

आ प्यायस्व समेतु ते विश्वतः सोम वृष्ण्यं ।

भवा वाजस्य संगथे ॥ १६ ॥

आ । प्यायस्व । सं । एतु । ते । विश्वतः । सोम । वृष्ण्यं ।

भव । वाजस्य । सम्ऽगथे ॥ १६ ॥

हे सोम त्वमाप्यायस्व । वर्धयस्व । ते तव वृष्ण्यं वृषत्वं वीर्यं सामर्थ्यं विश्वतः सर्वतः समेतु । संगच्छतां । त्वया संयुक्तं भवतु । एवंभूतस्त्वं वाजस्यान्नस्य संगथे संगमने भव । अस्माकमन्नप्रदो भवेत्यर्थः ॥ वृष्ण्यं । वृष सेचने । कनिन्युवृषीत्यादिना

कनिन् । वृष्णि भवं वृष्ण्यं । भवे छंदसीति यत् । अल्लोपोऽन इत्यकारलोपः । ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते । यतोऽनाव इत्याद्युदात्तत्वं । भवा । द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं । संगथे । प्रातृतुदिवचीत्यादिना विधीयमानस्थक्प्रत्ययो बहुलवचनाद्गमेरपि भवति । थाथादिनोत्तरपदांतोदात्तत्वं ॥

सप्तदशीमृचमाह ॥

आ प्यायस्व मदिंतम सोम विश्वेभिरंशुभिः ।
भवा नः सुश्रवस्तमः सखा वृधे ॥ १७ ॥

आ । प्यायस्व । मदिन्ऽतम । सोम । विश्वेभिः । अंशुऽभिः ।
भव । नः । सुश्रवःऽतमः । सखा । वृधे ॥ १७ ॥

हे मदिंतम । अतिशयेन मदवन् सोम विश्वेभिः सर्वैरंशुभिर्लतावयवैराप्यायस्व । आ समंताद्वृद्धो भव । स त्वं सुश्रवस्तमोऽतिशयेन शोभनान्नयुक्तः सन् नोऽस्माकं वृधे वर्धनाय सखा भव । मित्रीभव ॥ मदिंतम । मदो हर्षः । तद्वान् मदी । अतिशयेन मदी मदिंतमः । नाद्घस्येति तमपो नुट् । सुश्रवस्तमः । श्रव इत्यन्ननाम । श्रूयत इति सत इति यास्कः । शोभनं श्रवो यस्य स तथोक्तः । अतिशयेन सुश्रवाः सुश्रवस्तमः । तमपः पित्त्वादनुदात्तत्वे सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वमेव शिष्यते ॥

पत्नीसंयाजेषु सौम्यस्य सं ते पयांसीति याज्या । सूत्रितं च । सं ते पयांसि समु यंतु वाजा इह त्वष्टारमग्रियं । आ० १.

१०. । इति ॥ चमसाप्यायनेऽप्येषा । सूत्रितं च । सं ते पयांसि समु यंतु वाजा इति चमसानाप्योपद्यान् । आ० ५. ६. । इति ॥

तामेतां सूक्तेऽष्टादशीमृचमाह ॥

सं ते पयांसि समु यंतु वाजाः सं वृष्ण्यान्यभिमातिषाहः ।
आप्यायमानो अमृताय सोम दिवि श्रवांस्युत्तमानि
धिष्व ॥ १८ ॥

सं । ते । पयांसि । सं । ऊं इति । यंतु । वाजाः । सं ।
वृष्ण्यानि । अभिमातिऽसहः ।
आऽप्यायमानः । अमृताय । सोम । दिवि । श्रवांसि ।
उत्ऽतमानि । धिष्व ॥ १८ ॥

हे सोम । अभिमातिषाहोऽभिमातीनां शत्रूणां हंतुस्ते तव । एवंभूतं त्वां पयांसि अपणार्थानि क्षीराणि संयंतु । संगच्छंतां । तथा वाजा उ हविर्लक्षणान्यन्नानि च त्वां संगच्छंतां । वृष्ण्यानि वीर्याणि च संगच्छंतां । हे सोम त्वममृतायास्माकममृतत्वायामरणत्वायाप्यायमान आ समंताद्वर्धमानः सन्दिवि नभसि स्वर्गे उत्तमान्युन्नततमान्युत्कृष्टानि श्रवांस्यन्नान्यस्माभिर्भोक्तव्यानि हविर्लक्षणानि वा धिष्व । धारय ॥ ते । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । अभिमातिषाहः । षह अभिभवे । छंदसि सह इति ण्विप्रत्ययः । सुषामादित्वात् षत्वं । अमृताय । नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । उत्तमानि । उच्छब्दा-

त्साधनक्रियावचनादातिशायनिकस्तमप् । उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं । धिष्व । सुधित वसुधित नेमधित धिष्व धिषीय चेति धिभावो निपात्यते ॥

सोमप्रवहणे या ते धामानीत्येषा । सूत्रितं च । या ते धामानि हविषा यजंतीमां धियं शिक्षमाणस्य देवेति निहिते परिदध्यात् । आ ४. ४. । इति ॥ एकादशिनस्य सौम्यस्य पशोर्हविष एषैव याज्या । प्रदानानामिति खंडे सूत्रितं । अषाड्हं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजंति । आ° ३. ७. । इति ॥

तामेतां सूक्त एकोनविंशीमृचमाह ॥

या ते धामानि हविषा यजंति ता ते विश्वा परिभूरस्तु यज्ञं ।
गयस्फानः प्रतरणः सुवीरोऽवीरहा प्र चरा सोम दुर्यान् ॥ १९ ॥

या । ते । धामानि । हविषा । यजंति । ता । ते । विश्वा । परिऽभूः । अस्तु । यज्ञं ।
गयऽस्फानः । प्रऽतरणः । सुऽवीरः । अवीरऽहा । प्र । चर । सोम । दुर्यान् ॥ १९ ॥

हे सोम ते त्वदीयानि या यानि धामानि द्युप्रभृतिष्ववस्थितानि तेजांसि हविषा चरुपुरोडाशादिना यजंति । यजमानाः पूजयंति । ता ते विश्वा त्वदीयानि तानि सर्वाणि

धामानि यज्ञमस्मदीयमध्वरं परिभूरस्तु । परितो भावयितॄणि परितः प्राप्तानि संतु । यद्वा त्वदीयानां तेषां सर्वेषां धाम्नामस्मदीयो यजमानः परिभूर्यज्ञं प्रति परिग्रहीता यागेन स्वीकर्तास्तु । भवतु । परिपूर्वो भवतिः परिग्रहार्थः । तादृशैर्धामभिरुपेतस्त्वं दुर्यान् प्राचीनवंशादिलक्षणानस्मदीयान् गृहान् । गृहा वै दुर्या इति श्रुतेः । प्रचर । प्रकर्षेण गच्छ । कीदृशस्त्वं । गयस्फानः । गयस्य गृहस्य धनस्य वा वर्धयिता । प्रतरणः प्रकर्षेण दुरितात्तारयिता । सुवीरः । शोभनैर्वीरैः पुरुषैरुपेतः । अवीरहा । वीर्याज्जायंत इति वीराः पुत्राः । तेषामहंता ॥ परिभूः । भू प्राप्तौ । अस्मात्क्विप् चेति क्विप् । व्यत्ययो बहुलं । पा० ३. १. ८५. । इति लिंगवचनव्यत्ययौ । अस्तु । व्यत्यये नैकवचनं । गयस्फानः । गय इति गृहस्य धनस्य च नामधेयं । तेषां स्फायिता वर्धयिता । कृत्यल्युटो बहुलमिति कर्तरि ल्युटि छांदसो यलोपः । अवीरहा । वीराणां हंता वीरहा । न वीरहा अवीरहा ॥

महापितृयज्ञे सोमस्य पितृमतो यागे सोमो धेनुमित्येषा द्वितीयानुवाक्या । तत्र ह्येकैकस्य हविषो द्वे द्वे अनुवाक्ये समुच्चयेन विहिते । तथैव दक्षिणाग्नेरिति खंडे सूत्रितं । सोमो धेनुं सोमो अर्वंतमाशुं त्वं सोम पितृभिः संविदानः । आ० २. १९. । इति ॥

तामेतां सूक्ते विंशीमृचमाह ॥

सोमो॑ धे॒नुं सोमो॒ अर्व॑न्तमा॒शुं सोमो॑ वी॒रं क॑र्म॒ण्यं॑ ददाति ।
सा॒द॒न्यं॑ वि॒द॒थ्यं॑ स॒भेयं॑ पि॒तृ॒श्रव॑णं॒ यो ददा॑शदस्मै ॥ २० ॥

सोमः । धेनुं । सोमः । अर्वंतं । आशुं । सोमः । वीरं ।

कर्मण्यं । ददाति ।

सादन्यं । विदथ्यं । सभेयं । पितृऽश्रवणं । यः । ददाशत् ।

अस्मै ॥ २० ॥

यो यजमानो ददाशत् । सोमाय हविर्लक्षणान्यन्नानि दद्यात् । तस्मै यजमानाय सोमो धेनुं सवत्सां दोग्ध्रीं गां ददाति । तथाशुं शीघ्रगामिनमर्वंतमश्वं ददाति । प्रयच्छति । तथा वीरं पुत्रमस्मै यजमानाय ददाति । कीदृशं पुत्रं । कर्मण्यं । लौकिककर्मसु कुशलं । सादन्यं । सदनं गृहं तदर्हं । गृहकार्यकुशलमित्यर्थः । विदथ्यं । विदंत्येषु देवानिति विदथा यज्ञाः । तदर्हं । दर्शपूर्णमासादियागानुष्ठानपरमित्यर्थः । सभेयं । सभायां साधुं सकलशास्त्राभिज्ञमित्यर्थः । पितृश्रवणं । पिता श्रूयते प्रख्यायते येन पुत्रेण तादृशं ॥ कर्मण्यं । कर्मसु साधुः कर्मण्यः । तत्र साधुरिति यत् । ये चाभावकर्मणोरिति प्रकृतिभावः । तित्स्वरित एव स्वरितत्वं । एवमुत्तरत्रापि यत्प्रत्ययः । सभेयं । ढश्छंदसि । पा० ४. ४. १०६. । इति तत्र साधुरित्यर्थे ढप्रत्ययः । ददाशत् । दाशृ दाने । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः ॥

॥ इति प्रथमस्य षष्ठे द्वाविंशो वर्गः ॥

एकादशिनस्य सौम्यस्य पशोः पुरोडाशस्याषाळ्हं युत्स्वित्येषा याज्या । प्रदानानामिति खंडे सूत्रितं । अषाळ्हं युत्सु पृतनासु पप्रिं या ते धामानि हविषा यजंति । आ० ३. ७. । इति ॥

सामितामेकविंशीमृचमाह ॥

अषाढं युत्सु पृतनासु पप्रिं स्वर्षामप्सां वृजनस्य गोपां ।
भरेषुजां सुक्षितिं सुश्रवसं जयंतं त्वामनु मदेम सोम ।२१।

अषाढं । युत्ऽसु । पृतनासु । पप्रिं । स्वःऽसां ।
अप्सां । वृजनस्य । गोपां ।
भरेषुऽजां । सुऽक्षितिं । सुऽश्रवसं । जयंतं । त्वां । अनु ।
मदेम सोम ॥ २१ ॥

युत्सु युद्धेष्वषाढं शत्रुभिरनभिभवनीयं । तथा पृतनासु सेनासु पप्रिं जयस्य पूरयितारं स्वर्षां स्वर्गस्य सनितारं दातारं । अप्सामपां वृष्टिलक्षणानामुदकानां दातारं । यद्वा । अप्सां । अनक्षकं भक्षकरहितं । सर्वेषामनुग्राहकमित्यर्थः । वृजनस्य गोपां । वृज्यतेऽनेनेति वृजनं बलं । तस्य गोपां गोपयितारं रक्षितारं । भरेषुजां । भ्रियंत एषु हवींषीति भरा यागाः । तेषु प्रादुर्भवंतं । सुक्षितिं शोभननिवासस्थानं । सुश्रवसं शोभनयशस्कं । जयंतं शत्रूनभिभवंतं । हे सोम । ईदृग्भूतं त्वामनुलक्ष्य मदेम । हर्षयुक्ता भवेम ॥ अषाढं । षह अभिभवे । साढ्यै साढ्वा साढेति निगम इति निपातनात् सहिवहोरोदवर्णस्येत्योत्वाभावः । सहेः साडः स इति षत्वं । पप्रिं । पृ पालनपूरणयोः । आदृगमहनजन इति किन्प्रत्ययः । स्वर्षां । स्वः स्वर्गं सनोतीति स्वर्षाः । षणु दाने । जनसनखनेति विट् । विड्वनोरनुनासिकस्यादित्यात्वं । अप्सां । अप्-

शब्दोपपदात्सनोतेः पूर्ववद्विट्। यद्वा एना भक्तौ। रसाति भजय- तीति एसाः। क्विप् चेति क्विप्। न विद्यते रसा अस्येति बहु- व्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। भरेषुजां। जनी प्रादुर्भावे। पूर्ववद्विट् आत्वं च। मदेम। मदी हर्षे। व्यत्ययेन शप्॥

द्वाविंशीमृचमाह॥

त्वमिमा ओषधीः सोम विश्वास्त्वमपो अजनयस्त्वं गाः।
त्वमा ततंथोर्व१ंतरिक्षं त्वं ज्योतिषा वि तमो ववर्थ॥२२॥

त्वं। इमाः। ओषधीः। सोम। विश्वाः। त्वं।
अपः। अजनयः। त्वं। गाः।
त्वं। आ। ततंथ। उरु। अंतरिक्षं। त्वं। ज्योतिषा।
वि। तमः। ववर्थ॥२२॥

हे सोम त्वमिमा भूम्यां वर्तमाना विश्वाः सर्वा ओषधी- रजनयः। उत्पादितवानसि। तथा त्वमपस्तासामोषधीनां कारणभूतानि वृष्ट्युदकान्यजनयः। तथा त्वं गा सर्वान्पशूनुद- पादयः। उरु विस्तीर्णमंतरिक्षं त्वमाततंथ। विस्तारितवानसि। तस्मिन्नंतरिक्षे यत्तमोऽस्मद्दृष्टिनिरोधकमंधकारं तदपि त्वं ज्योतिषात्मीयेन प्रकाशेन विववर्थ। विवृतं विश्लिष्टं विनष्टं कृतवानसि॥ ततंथ। तनु विस्तारे। ववर्थ। वृञ् वरणे। उभयत्र लिटस्थलि बभूथाततंथ जगृभ्म ववर्थेति निगम इति निपात्यते॥

त्रयोविंशोऽध्यायः ॥

देवेन नो मनसा देव सोम रायो भागं सहसावन्नभि युध्य ।
मा त्वा तनदीशिषे वीर्यस्योभयेभ्यः प्र चिकित्सा
गविष्टौ ॥ १३ ॥

देवेन । नः । मनसा । देव । सोम । रायः । भागं ।
सहसाऽवन् । अभि । युध्य ।
मा । त्वा । आ । तनत् । ईशिषे । वीर्यस्य । उभयेभ्यः ।
प्र । चिकित्स । गोऽइष्टौ ॥ १३ ॥

हे देव द्योतमान सहसावन् बलवन् सोम देवेन मनसा द्योतमानया त्वदीयया बुद्ध्या रायो भागं धनस्यांशं नोऽस्मानभिलक्ष्य युध्य । प्रेरय । यद्वा नोऽस्माकं रायो धनस्य भागं भक्तारमपहर्तारं शत्रुमभियुध्य । आभिमुख्येन सम्यक् प्रहर । त्वा तादृशं त्वां कश्चिदपि शत्रुर्मातनत् । क्लेशेनाततं मा कार्षीत् । मा हिंसीदित्यर्थः । उभयेभ्य उभयेषां युध्यमानानां संबंधिनो वीर्यस्य बलस्य त्वमीशिषे । ईश्वरो भवसि । स त्वं गविष्टौ संग्रामे प्रचिकित्स । अस्मदीयमुपद्रवं परिहर ॥ रायः । ऊडिदमिति विभक्तेरुदात्तत्वं । भागं । भजतेः कर्मणि घञ् । कृत्यल्युटो बहुलमिति बहुलवचनात्कर्तरि वा । कर्षात्वत इत्यंतोदात्तत्वं । सहसावन् । सहःशब्दान्मतुपि छांदसः आकारोपजनः । युध्य । युध संप्रहारे । व्यत्ययेन परस्मैपदं । तनत् । तनु विस्तारे । व्यत्ययेन शप् । न माङ्योग इत्यडभावः । ईशिषे । ईशः से । पा० ७, २, ७७. । इतीडागमः । चिकित्सा ।

कित स्थाने। गुप्तिज्किद्भ्यः सन्। पा० ३. १. ५.। गविष्टौ। गवां वाणानामिष्टय एषणानि गमनानि येष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य षष्ठे त्रयोविंशो वर्गः ॥

एता उ त्या इत्यष्टादशर्चमष्टमं सूक्तं गोतमस्यार्षं। आदितस्तस्रो जगत्यः। त्रयोदश्याद्याः षडृच उष्णिहः। शिष्टा अष्टौ त्रिष्टुभः। उषा देवता। अश्विना वर्तिरित्यंत्यस्तृचोऽश्विदेवताकः। तथा चानुक्रांतं। एता उ त्या द्व्यूनोषस्यं चतुर्जगत्यादि षड् ष्णिगंतं तृचोऽंत्य आश्विन इति। सूक्तविनियोगो लैंगिकः॥ प्रातरनुवाक उषस्ये क्रतौ जागते छंदस्याश्विनशस्त्रे चैता उ त्या इति चतस्रो विनियुक्ताः। सूत्रितं च। एता उ त्या इति चतस्रो जागतं। आ० ४. १४.। इति ॥

तत्र प्रथमामृचमाह ॥

एता उ त्या उषसः केतुमक्रत पूर्वे अर्धे रजसो भानुमंजते।
निष्कृण्वाना आयुधानीव धृष्णवः प्रति गावोऽरुषीर्यंति
मातरः ॥ १ ॥

एताः। ऊं इति। त्याः। उषसः। केतुं। अक्रत। पूर्वे।
अर्धे। रजसः। भानुं। अंजते।
निःऽकृण्वानाः। आयुधानिऽइव। धृष्णवः। प्रति। गावः।
अरुषीः। यंति। मातरः ॥ १ ॥

उ इत्येतत्पादपूरणं । त्यास्ता एता उषसः प्रभातकालाभिमानिन्यो देवताः केतुमंधकारावृतस्य सर्वस्य जगतः प्रज्ञापकं प्रकाशमक्रत । अक्रुषत । कृतवत्यः । यस्मादेवं तस्मादुषसो रजसोऽंतरिक्षलोकस्य पूर्वेऽर्द्धे प्राचीनदिग्भागे भानुं प्रकाशमंजते । व्यक्तीकुर्वंति । धृष्णवो धर्षणशीला योद्धार आयुधानीव । यथायुधप्रभृतीन्यायुधानि संस्कुर्वंति । एवं निष्कृण्वानाः । स्वभासा जगत्संस्कुर्वाणाः । गावो गमनस्वभावा अरुषीरारोचमाना मातरः सूर्यप्रकाशस्य निर्मात्र्यो जगज्जनन्यो वोषसः प्रतियंति । प्रतिदिवसं गच्छंति । एवंविधा उषसोऽस्मानवंत्वित्यर्थः ॥ अत्र निरुक्तं । एतास्ता उषसः केतुमक्रुषत प्रज्ञानमेकस्या एव पूजार्थे बहुवचनं स्यात् पूर्वेऽर्द्धेऽंतरिक्षलोकस्य समंजते भानुना निष्कृण्वाना आयुधानीव धृष्णवः । निरित्येष समित्येतस्य स्थाने । एमीदेषां निष्कृतं जारिणीवेत्यपि निगमो भवति । प्रति यंति गावो गमनादरुषीरारोचनान्मातरो भासो निर्मात्र्यः । नि० १२. ७. । इति ॥ करोतेर्लुङि मंत्रे घसेति च्लेर्लुक् । निष्कृण्वानाः । कृवि हिंसाकरणयोश्च । अस्मात्ताच्छीलिकश्चानश् । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

उदपप्तन्नरुणा भानवो वृथा स्वायुजो अरुषीर्गा अयुक्षत ।

अक्रन्नुषासो वयुनानि पूर्वथा रुशंतं भानुमरुषीरशिश्रयुः ॥ २ ॥

उत्। अपप्तन्। अरुणाः। भानवः। वृथा। सुऽआयुजः।

अरुषीः। गाः। अयुक्षत।

अक्रन्। उषसः। वयुनानि। पूर्वऽथा। रुशन्तम्। भानुम्।

अरुषीः। अशिश्रयुः॥ २॥

अरुणा आरोचमाना भानव औषस्यो दीप्तयो वृथानायासेन स्वयमेवोदपप्तन्। उदगमन्। तदनंतरमुषसश्च स्वायुजः सुखेन रथे अयोक्तुं शक्या अरुषीः शुभ्रवर्णा गा पूर्वमुत्थितान् रश्मीन् ईदृशीः स्ववाहनभूताश्चतुष्पदीर्गा एव वायुक्षतः। स्वरथेऽयोजयन्। उक्तं च। अरुण्यो गाव उषसामिति। एवं गोभिर्युक्तं रथमारूढोषसः पूर्वथा पूर्वेष्वतीतेष्वहःस्विव वयुनानि सर्वेषां प्राणिनां ज्ञानान्यक्रन्। अकार्षुः। उषःकाले जाते हि सर्वे प्राणिनो ज्ञानयुक्ता भवंति। तदनंतरमरुषीरारोचमानास्ता उषसो रुशंतं। रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः। नि० २. २०.। इति यास्कः। शुभ्रवर्णं भानुं सूर्यमशिश्रयुः। असेवंत। तेन सहैकीभवंतीत्यर्थः॥ अपप्तन्। पत्लृ गतौ। लुङि लृदित्त्वात् च्लेरङादेशः। पतः पुमिति धातोः पुमागमः। अक्रन्। मंत्रे घसेत्यादिना च्लेर्लुक्। पूर्वथा। प्रत्नपूर्वविश्वेमात्थाल् छंदसि। पा० ५. ३. १११.। इतीवार्थे थाल्प्रत्ययः। अशिश्रयुः। श्रिञ सेवायां। बहुलं छंदसीति शपः श्लुः। सिजभ्यस्तविदिभ्यश्चेति झेर्जुस्। जुसि च। पा० ७. ३. ८३.। इति गुणः॥

तृतीयामृचमाह ॥

अर्चंति नारीरपसो न विष्टिभिः समानेन योजनेना

परावतः ।

इषं वहंतीः सुकृते सुदानवे विश्वेदह यजमानाय

सुन्वते ॥ ३ ॥

अर्चंति । नारीः । अपसः । न । विष्टिऽभिः । समानेन ।

योजनेन । आ । पराऽवतः ।

इषं । वहंतीः । सुऽकृते । सुऽदानवे । विश्वा । इत् । अह ।

यजमानाय । सुन्वते ॥ ३ ॥

नारीर्नेत्र्य उषसो विष्टिभिर्निवेशकैः स्वकीयैस्तेजोभिः समानेन योजनेनैकेनैव योजनेनोद्योगेन आ परावत आ दूरदेशात् आ पश्चिमदिग्भागादर्चंति । नभःप्रदेशं पूजयंति । कृत्स्नं जगद्युगपदेव व्याप्नुवंतीत्यर्थः । तत्र दृष्टांतः । अपसो न । युद्धकर्मणोपेताः पुरुषा यथा स्वकीयैरायुधैर्धाटीमुखेन सर्वं देशं व्याप्नुवंति तद्वत् । किं कुर्वत्यः । सुकृते शोभनस्य कर्मणः कर्त्रे सुन्वते सोमाभिषवं कुर्वते सुदानवे कल्याणीर्दक्षिणा ऋत्विग्भ्यो ददते यजमानाय विश्वेदह सर्वमेवेषमन्नं वहंतीरावहंत्यः । प्रयच्छंत्य इत्यर्थः ॥ नारीः । नृ नये । ऋदोरप् । नृनयोर्वृद्धिश्चेति शार्ङ्गरवादिषु पाठात् ङीन् । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । अपसः । अपस्शब्दादर्श-आदिभ्योऽजित्यच् । सुपां सुलुगिति जसः सुः । व्यत्ययेन

प्रत्ययात्पूर्वस्योदात्तत्वं। विष्टिभिः। विश प्रवे॰ । विशंति प्रविशंतीति विष्टयः किरणाः। क्तिच्क्तौ च संज्ञायामिति क्तिच्। विश्वा। सुपां सुलुगित्यमो डादेशः॥

चतुर्थीमृचमाह॥

अधि पेशांसि वपते नृतूरिवापोर्णुते वक्ष उस्रेव बर्जहं।
ज्योतिर्विश्वस्मै भुवनाय कृण्वती गावो न व्रजं व्यु१षा
आवर्तमः॥ ४॥

अधि। पेशांसि। वपते। नृतूःऽइव। अप। ऊर्णुते। वक्षः।
उस्राऽइव। बर्जहं।
ज्योतिः। विश्वस्मै। भुवनाय। कृण्वती। गावः। न।
व्रजं। वि। उषाः। आवरित्यावः। तमः॥ ४॥

उषाः पेशांसि जगतस्त्वाश्लिष्टानि कृष्णवर्णानि तमांस्यध्याधिक्येन वपते। छिनत्ति। तत्र दृष्टांतः। नृतूरिव। नृं स्तूर्वति केशेन रिक्तीकरोतीति नृतूर्नापितः। स यथा केशान्निःशेषेण छिनत्ति। एवमुषा अप्यंधकारं समूलं छिनत्तीत्यर्थः। यद्वा नृतूरिव। नृत्यंती योषिदिव। पेशांसि। रूपनामैतत् सर्वैर्दर्शनीयानि रूपाण्युषा अधिवपते। स्वात्मन्यधिकं धारयति एवं प्रथमतोऽधकारं स्वाकरणैर्निरस्य वक्षः स्वकीयमुरःप्रदेशमपोर्णुते। तमसानाच्छादितं करोति। स्वयमाविर्भवतीत्यर्थः। बर्जहं पयस उत्पत्तिस्थानं दोहनसमय उस्रा गौर्यथाविःकरोति तद्वत्। किं कुर्वती। गावो न व्रजं यथा गावः स्वकीयं गोष्ठं

स्वयमेव शीघ्रं व्याप्नुवंति । एवं स्वयमेव प्राचीं दिशं प्राप्य विश्वस्मै लोकाय ज्योतिष्कृण्वती । प्रकाशं कुर्वती । एवमुक्तेन प्रकारेणोषास्तमोऽधकारं व्याव: । विवृतमपश्लिष्टमकरोत् ॥ तूतूरिव । तुर्वी हिंसार्थः । क्विप् चेति क्विप् । राल्लोप इति वलोपः । र्वोरुपधाया इति दीर्घत्वं । यद्वा तूर्तौ गात्रविनामे । तूर्तिगृध्योः कूः । उ० १. ९१. । इति कूप्रत्ययः । वर्जहं । वृङ् संभक्तौ । वृणोते संभजते गामिति वः पयः । विच । तज्जहातीति वर्जहः । ओहाङ् त्यागे । खश्प्रकरणे वातशुनीतिलशर्धेष्वजधेट्तुदजहातिभ्य उपसंख्यानं । पा० ३. २. २८. १. । इत्यशर्धशब्दोपपदादपि कृत्यल्युटो बहुलमिति बहुलवचनात् खश् । तस्य सार्वधातुकत्वेन कर्तरि शपि जुहोत्यादित्वात् श्लुः । द्विर्वचनादि । ववयोरभेद इति वत्वं । दिवोदासादित्वात्पूर्वपदाद्युदात्तत्वं । आवः । वृङ् वरणे । लुङि मंत्रे घसेति च्लेर्लुक् । गुणे ह्रस्वाद्भ्यश्च इति लोपः । छंदस्यपि दृश्यते । पा० ६. ४. ७३. । इत्याडागमः ॥

प्रातरनुवाकस्योषस्ये क्रतौ प्रत्यर्चिरित्यष्टावनुवक्तव्याः । आश्विनशस्त्रे च । तथा च सूत्रितं । प्रत्यर्चिरित्यष्टौ व्युषा आ वा दिविजा इति षाड़ति त्रैष्टुभं । आ० ४. १४. । इति ॥

अष्टसु प्रथमां सूक्ते पंचमीमृचमाह ॥

प्रत्यर्ची रुशदस्या अदर्शि वि तिष्ठते बाधते कृष्णमभ्वं ।

स्वरुं न पेशो विदथेष्वंजञ्चित्रं दिवो दुहिता

भानुमश्रेत् ॥ ५ ॥

प्रति । अर्चिः । रुशत् । अस्याः । अदर्शि । वि । तिष्ठते ।

बाधते । कृष्णं । अभ्वं ।

स्वरुं । न । पेशः । विदथेषु । अंजन् । चित्रं । दिवः ।

दुहिता । भानुं । अश्रेत् ॥ ५ ॥

अस्या उषसो रुशद्दीप्यमानमर्चिस्तेजः प्रत्यदर्शि । सर्वैः पूर्वस्यां दिशि प्रथमतो दृश्यते । वितिष्ठते । सर्वासु दिक्षु विविधमवतिष्ठते । व्याप्नोतीत्यर्थः । सर्वा दिशो व्याप्य चाभ्वं । महन्नामैतत् । अतिशयेन विपुलं कृष्णं कृष्णवर्णमंधकारं बाधते । अपसारयति । विदथेषु यज्ञेषु स्वरुं न स्वरुनाम्ना शकलेन युक्तं यूपं यथाज्येनाध्वर्यवोऽंजन् । अंजंति । तद्वन्नर्भासि स्वकीयं पेशो रूपमुषा अनक्ति । संश्लिष्टं करोति । तदनंतरं चित्रं चायनीयं भानुं सूर्यं दिवो दुहिता द्युलोकादुत्पन्नोषा अश्रेत् । असेवत ॥ वितिष्ठते । समवप्रविभ्य इत्यात्मनेपदं । अश्रेत् । श्रिञ् सेवायां । लङि बहुलं छंदसीति शपो लुक् ॥

॥ इति प्रथमस्य षष्ठे चतुर्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

अतारिष्म तमसस्पारमस्योषा उच्छंती वयुना कृणोति ।

श्रिये छंदो न स्मयते विभाती सुप्रतीका सौमनसायाजीगः ॥ ६ ॥

अतारिष्म। तमसः। पारं। अस्य। उषाः। उच्छंती।

वयुनां। कृणोति।

श्रिये। छंदः। न। स्मयते। विऽभाती। सुऽप्रतीका।

सौमनसाय। अजीगरिति॥ ६॥

अस्य नैशस्य तमसोऽधकारस्य पारं समाप्तिप्रदेश-मतारिष्म। उत्तीर्णा अभूम। अनंतरमुच्छंती नैशं तमो वर्जयंत्युषा वयुना वयुनानि सर्वेषां प्राणिनां ज्ञानानि कृणोति। निर्मिमीते। श्रिये संपदर्थं छंदो न स्मयते। यथोप-च्छंदयिता वशीकरणे समर्थः पुरुष आढ्यसमीपं प्राप्य तत्प्रीत्यर्थं स्मयते। हसति। एवं विभाती विशिष्टप्रकाशं कुर्वंत्युषाः स्वकीयया निर्मलदीप्त्या हसंतीव दृश्यते। एवं सुप्रतीका विशिष्टप्रकाशरूपत्वेन शोभनांगी सती सौमनसाय सर्वेषां सौमनस्यायाजीगः। अंधकारं भक्षितवती॥ अतारिष्म। तृ प्लवनतरणयोः। लुङि सिचि वृद्धिः। तमसः। षष्ठ्याः पतिपुत्रेति विसर्जनीयस्य संहितायां सत्वं। स्मयते। ष्मिङ् ईषद्धसने। भौवादिकः। अजीगः। गॄ निगरणे। लङि बहुलं छंदसीति शपः श्लुः। बहुलं छंदसीत्यभ्यासस्येत्वं। तुजादि-त्वाद्दीर्घः॥

सप्तमीमृचमाह॥

भास्वती नेत्री सूनृतानां दिव स्तवे दुहिता गोतमेभिः।

प्रजावतो नृवतो अश्वबुध्यानुषो गोअग्राँ उप मासि

वाजान्॥ ७॥

भास्वती । नेत्री । सूनृतानां । दिवः । स्तवे । दुहिता । गोतमेभिः ।

प्रजाऽवतः । नृऽवतः । अश्वऽबुध्यान् । उषः । गोऽअग्रान् । उप । मासि । वाजान् ॥ ७ ॥

भास्वती तेजस्विनी । सुनृतेति वाङ्नाम ॥ सूनृतानां प्रियसत्यात्मिकानां नेत्री प्रणेत्री कारयित्री । उषसि हि जातायां मनुष्यप्रमुखाः प्राणिनः स्वस्वव्यापारायेतस्ततः शब्दं कुर्वंति । एवंभूता दिवो दुहिता द्युलोकसकाशादुत्पन्नोषा गोतमेभिर्ऋषिभिरस्माभिः स्तवे । स्तूयते । हे उषः । अस्माभिः स्तुता त्वं वाजानन्नान्युपमासि । प्रयच्छ । कीदृशान्वाजान् । प्रजावतः । प्रजाभिः पुत्रपौत्रादिभिर्युक्तान् । नृवतः । दासलक्षणैर्नृभिरुपेतान् । अश्वबुध्यान् । अश्वा बुध्या विद्यमानत्वेन बोद्धव्या येषु वाजेषु तान् । यद्वा । अश्वबुध्नान् । वर्णव्यापत्त्या यकारः । अश्वमूलान् । अश्वैर्हि राजानो धनान्यन्नानि च लभंते । अतोऽन्नानां तन्मूलत्वं । गोअग्राम् । गावोऽग्रे प्रमुखे येषां तादृशान् ॥ भास्वती । भा दीप्तौ । असुन् । ततो मतुप् । मादुपधाया इति मतुपो वत्वं । उगितश्चेति ङीप् । नेत्री । ऋन्नेभ्यो ङीप् । उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं । स्तवे । ष्टुञ् स्तुतौ । कर्मणि लङि बहुलं छंदसीति बहुलग्रहणाद्यकोऽपि लुक् । लोपस्त आत्मनेपदेष्विति तलोपः । छंदस्युभयथेत्येकारस्यार्धधातुकत्वेन ङित्वाभावाद्गुणाभावादेशौ । नृवतः । व्यत्ययेन मतोर्वत्वं । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । मासि । मा माने । आदादिकः ।

अष्टमीमृचमाह ॥

उषस्तमश्यां यशसं सुवीरं दासप्रवर्गं रयिमश्वबुध्यं ।
सुदंससा श्रवसा या विभासि वाजप्रसूता सुभगे बृहंतं ॥८॥

उषः । तं । अश्यां । यशसं । सुऽवीरं । दासऽप्रवर्गं । रयिं । अश्वऽबुध्यं ।
सुऽदंससा । श्रवसा । या । विऽभासि । वाजऽप्रसूता । सुऽभगे । बृहंतं ॥ ८ ॥

हे उषः । उषोदेवते तं रयिं धनमश्यां । प्राप्नुयां । कीदृशं । यशसं । यशसा कीर्त्या युक्तं । सर्वैः प्रशस्यमित्यर्थः । सुवीरं । शोभनैर्वीरैः पुत्रादिभिर्युक्तं । दासप्रवर्गं । प्रकृष्टो वर्गः संघः प्रवर्गः । दासानां कर्मकराणां प्रवर्गो यस्मिन् तं । अनेकैर्भृत्यैरुपेतमित्यर्थः । अश्वबुध्यं । अश्वा बुध्या बोद्धव्या येन धनेन तादृशं हे सुभगे शोभनधन उषः । सुदंससा शोभनेन कर्मणा युक्तेन श्रवसा श्रवणीयेन स्तोत्रेण प्रीता त्वं वाजप्रसूतास्मभ्यं दत्तान्ना सती बृहंतं प्रौढं या यं रयिं विभासि । विशेषेण प्रकाशयसि तमश्यामिति पूर्वेण संबंधः । अश्यां । अशू व्याप्तौ । व्यत्ययेन परस्मैपदं । बहुलं छंदसीति विकरणस्य लुक् । यशसं । अर्शआदित्वान्मत्वर्थीयोऽच् । व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं । दासप्रवर्गं । दासयत्युपक्षपयति शत्रुनिति दासो भृत्यः । दसु उपक्षये । अस्मात्संयंतात्पचाद्यच् । चित्त्वादंतोदात्तत्वं । तदेव बहुव्रीहिस्वरेण शिष्यते । सुदंससा । सोर्मनसी अलोमोषसी इति बहुव्रीहावुत्तरपदाद्युदात्तत्वं । या । सुपां सुलुगित्यमो डादेशः ॥

नवमीमृचमाह ॥

विश्वानि देवी भुवनाभिचक्ष्या प्रतीची चक्षुरुर्विया वि भाति।
विश्वं जीवं चरसे बोधयन्ती विश्वस्य वाचमविदन्मनायोः ॥९॥

विश्वानि। देवी। भुवना। अभिऽचक्ष्य। प्रतीची।
चक्षुः। उर्विया। वि। भाति।
विश्वं। जीवं। चरसे। बोधयन्ती। विश्वस्य। वाचं।
अविदत्। मनायोः ॥ ९ ॥

देवी द्योतमानोषा विश्वानि सर्वाणि भुवना भुवनानि भूतजातान्यभिचक्ष्याभिप्रकाश्य प्रकाशवंति कृत्वानंतरं प्रतीची प्रत्यङ्मुखी सती चक्षुः प्रकाशकेन तेजसोर्वियोर्वी विस्तीर्णा सती विभाति। प्रकाशते। अपि च विश्वं जीवं सर्वं प्राणिजातं चरसे चरणाय स्वस्वव्यापारेषु प्रवर्तनाय बोधयंती निद्रातः सकाशादुद्बोधयंत्युषा विश्वस्य सर्वस्य मनायोः मनसा युक्तस्य वाग्व्यवहारसमर्थस्य प्राणिजातस्य या वागस्ति तां वाचमविदत्। अलभत। अत एवोषसः सूनृतावतीति संज्ञोपपन्ना भवति॥ अभिचक्ष्या। चक्षिङ् व्यक्तायां वाचि। अयं प्रकाशनार्थोऽपि। समासेऽनञ्पूर्वे इति क्त्वाप्रत्ययस्य ल्यबादेशः। प्रतीची। प्रतिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। उर्विया। उर्वीशब्दादुत्तरस्य सोरियाडियाजीकाराणां चोपसंख्यानं। पा० ७. १. ३९. ३.। इति डियाजादेशः। आदेश-

सामर्थ्यात्तस्य लोपो न भवति । मनायीः । मन आत्मन इच्छति मनस्यति । सुप आत्मनः क्यच् । क्याच्छंदसीत्युः । वर्णव्यापत्त्या सकार आकारः । यद्वा कर्तुः क्यङ् सलोपश्चेति क्यङ् सकारलोपश्च । अकृत्सार्वधातुकयोरिति दीर्घः ॥

दशमीमृचमाह ॥

पुनःपुनर्जायमाना पुराणी समानं वर्णमभि शुंभमाना ।

श्वघ्नीव कृत्नुर्विज आमिनाना मर्तस्य देवी जरयंत्यायुः ॥१०॥

पुनःऽपुनः । जायमाना । पुराणी । समानं । वर्णं ।

अभि । शुंभमाना ।

श्वघ्नीऽइव । कृत्नुः । विजः । आऽमिनाना । मर्तस्य ।

देवी । जरयंती । आयुः ॥ १० ॥

पुनःपुनर्जायमाना प्रतिदिवसं सूर्योदयात्पूर्वं प्रादुर्भवंती चिरंतनी पुराणी । नित्येत्यर्थः । यस्मात्समानं वर्णमेकमेव रूपमभि प्राप्य शुंभमाना शोभमाना । विभिन्नेष्वपि दिवसेष्वस्या ऐकरूप्येणावस्थानान्नित्यत्वमित्यर्थः । एवंगुणविशिष्टा देवी देवनशीलैषा मर्त्यस्य मरणधर्मणः सर्वस्य प्राणिजातस्यायुर्जीवनं जरयंत्यूनयंती वर्तते । बह्वीषूषःस्वातितासु हि सर्वेषामायुर्हीयते । उषाश्च पुनः पुनर्जायमानेत्युक्तं । अतः सैवायुर्जरयति । तत्र दृष्टांतः । कृत्नुः कर्तनशीला श्वघ्नीव व्याधस्त्रीव । सा यथा विजश्चलतः पक्षिण आमिनाना पक्षादिच्छेदनेन हिंसंती तेषामायुर्जरयति तद्वत् ॥ पुराणी । पुरेत्यस्मादव्ययात् सायंचिरंप्राह्ण इत्यादिना । पा० ४. ३. २३. ।

भवार्थे त्युप्रत्ययः। पुराणप्रोक्तेषु ब्राह्मणकल्पेषु। पा॰ ४. ३. १०५.। इति निपातनात्तुडभावः। योरणादेशः। टित्वाङ्ङीप्। व्यत्ययेनांतोदात्तत्वं। शुंभमाना। शुंभ दीप्तौ। शपः पित्वादनुदात्तत्वं। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। श्वघ्नी। शुन मृगान् हतवान् श्वहा। बहुलं छंदसि। पा॰ ३. २. ८८.। इति वचनाद्ब्रह्मादिव्यतिरिक्तेऽप्युपपदे हंतेः क्विप्। ऋन्नेभ्यो ङीविति ङीप्। अल्लोपोऽन इत्यकारलोपः। हो हंतेरिति घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। कृत्नुः। कृती छेदने। औणादिकः क्नुप्रत्ययः। विजः। ओविजी भयचलनयोः। विजंति चलंतीति विजः पक्षिणः। आमिनाना। मीञ् हिंसायां। क्र्यादिकः। प्वादीनां ह्रस्व इति ह्रस्वत्वं। शानचश्चित्त्वादंतोदात्तत्वं॥

॥ इति प्रथमस्य षष्ठे पंचविंशो वर्गः॥

एकादशीमृचमाह॥

व्यूर्ण्वती दिवो अंताँ अबोध्यप स्वसारं सनुतर्युयोति।
प्रमिनती मनुष्या युगानि योषा जारस्य चक्षसा
वि भाति॥११॥

विऽऊर्ण्वती। दिवः। अंतान्। अबोधि। अप।
स्वसारं। सनुतः। युयोति।
प्रऽमिनती। मनुष्या। युगानि। योषा। जारस्य।
चक्षसा वि। भाति॥११॥

दिवो नभसोऽंतान् प्रांतान्व्युर्ण्वती विवृतान्तमसा वियुक्तान् कुर्वत्युषा अबोधि। सर्वैः प्राणिभिरज्ञायि। ज्ञाताभूत्। तदनंतरं स्वसारमुषसः प्रादुर्भावे सति स्वयमेव सरंतीं निशां सनुतः। अंतर्हितनामैतत्। अंतर्हितप्रदेशेऽपयुयोति। अपगमय्य पृथक्करोति। मनुष्या मनुष्याणां संबंधीनि युगानि कृतत्रेतादीनि प्रमिनती स्वगमनागमनाभ्यां प्रकर्षेण हिंसंती जारस्य रात्रेर्जरयितुः सूर्यस्य योषा जायोषाश्चक्षसात्मीयेन प्रकाशेन विभाति। विशेषेण प्रकाशते॥ व्यूर्ण्वती। ऊर्णुञ् आच्छादने। विपूर्वादस्माल्लटः शतृ। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। सनुतः। एतदंतोदात्तं स्वरादिषु निपातितं। अतोऽव्ययसंज्ञायामव्ययादाप्सुप इति सप्तम्या लुक्। युयोति। यु मिश्रणामिश्रयोः। बहुलं छंदसीति शपः श्लुः। मनुष्या। सुपां सुलुगिति षष्ठ्या डादेशः। युगानि। युजेः करणे कर्मणि वा घञ्। चजोः कु घिण्ण्यतोरिति कुत्वं। उञ्छादिषु कालविशेषे रथाद्युपकरणे च युगशब्दपाठात् लघूपधगुणाभावः। उञ्छादीनां चेत्यंतोदात्तत्वं। जारस्य। दारजारौ कर्तरि णिलुक् चेति घञंतो निपात्यते॥

द्वादशीमृचमाह॥

पशून्न चित्रा सुभगा प्रथाना सिंधुर्न क्षोद उर्विया व्यश्वैत्।
अमिनती दैव्यानि व्रतानि सूर्यस्य चेति रश्मिभिर्दृशाना॥१२

पशून्। न। चित्रा। सुऽभगा। प्रथाना। सिंधुः। न।
क्षोदः। उर्विया। वि। अश्वैत्।

अमिनती । दैव्यानि । व्रतानि । सूर्यस्य । चेति ।

रश्मिऽभिः । दृशाना ॥ १२ ॥

सुभगा शोभनधना चित्रा चायनीया पूजनीयोषाः पशून्न यथा पशून् गोपालकोऽरण्ये विस्तारयति तथा प्रथाना तेजांसि विस्तारयंत्युर्वियोर्वी महती । एवंभूता सा व्यश्वैत् । सर्वं जगद्व्याप्नोत् । तत्र दृष्टांतः । सिंधुर्न क्षोदः । यथा स्यंदनशीलमुदकं निम्नदेशेऽचिरादेव व्याप्नोति तद्वत् । सैवोषाः सूर्यस्य रश्मिभिः किरणैः सह दृशाना दृश्यमाना सती चेति । प्रज्ञातासीत् । किं कुर्वती । दैव्यानि देवसंबंधीनि व्रतानि दर्शपूर्णमासादीनि कर्माण्यमिनती । अहिंसती । अनुष्ठाने यजमानान्प्रवर्तयंतीत्यर्थः । उषसः प्रादुर्भावानंतरं ह्यग्निहोत्रादीनि सर्वाणि कर्माण्यनुष्ठीयंते । न रात्री न सायमस्ति देवया अजुष्टमिति श्रुतेः ॥ प्रथाना । प्रथ प्रख्याने । अस्मादंतर्भावितण्यर्थात्ताच्छीलिकश्चानश् । बहुलं छंदसीति शपो लुक् । सिंधुः । स्यंदू प्रस्रवणे । स्यंदेः संप्रसारणं धश्चेत्युप्रत्ययः । निदित्यनुवृत्तेराद्युदात्तत्वं । अश्वैत् । टुओश्वि गतिवृद्धोः । लुङ्यङ्चङोर्विकल्पितत्वात् । पा० ३. १. ४९. ५८. । च्लेः सिच् । आगमानुशासनस्यानित्यत्वादिडभावः । सिचि वृद्धिः । पा० ७. २. १. । अनिडादित्वात् ह्म्यंतक्षणेति वृद्धिप्रतिषेधाभावः । बहुलं छंदसि । पा० ७. ३. ९७. । इलोडागमाभावः । स्कोः संयोगाद्योरिति सलोपः । चेति । चिती संज्ञाने । कर्मणि लुङि बहुलं छंदस्यामाङ्योगेऽपीत्यडभावः । दृशाना । दृशेः कर्मणि लटः शानच् । बहुलं छंदसीति विकरणस्य लुक् ॥

प्रातरनुवाकस्योषस्ये क्रतावौष्णिहे छंदस्युषस्तच्चित्रमिति तृचो विनियुक्तः। आश्विनशस्त्रे च। अथोषस्य इति खंडे सूत्रितं। उषस्तच्चित्रमाभरेति तिस्र औष्णिहं। आ० ४. १४.। इति॥

तत्र प्रथमां सूक्ते त्रयोदशीमृचमाह॥

उष॒स्तच्चि॒त्रमा भ॑रा॒स्मभ्यं॑ वाजिनीवति।
येन॑ तो॒कं च॒ तन॑यं च॒ धाम॑हे॥ १३॥

उषः॑। तत्। चि॒त्रं॑ आ। भ॒र॒। अ॒स्मभ्यं॑।
वा॒जि॒नी॒ऽव॒ति॒।
येन॑। तो॒कं। च॒। तन॑यं। च॒। धाम॑हे॥ १३॥

हे वाजिनीवति। वाजो हविर्लक्षणमन्नं। तद्युक्ता क्रिया वाजिनी। तया क्रियया युक्ते उष उषोदेवतेऽस्मभ्यं चित्रं चायनीयं तद्धनमाभर। आहर प्रयच्छ। येन धनेन तोकं पुत्रं तनयं तत्पुत्रं च धामहे। दध्महे धारयामः। अत्र निरुक्तं। उषस्तच्चित्रं चायनीयं धनमाहरास्मभ्यमन्नवति येन पुत्रांश्च पौत्रांश्च दधीमहि। नि० १२. ६.। इति॥ धामहे। दधाते-र्लटि बहुलं छंदसीति शपो लुक्। व्यत्ययेनाद्युदात्तत्वं। यद्वा लोप्याडुत्तमस्य पिच्चेत्याडागमः। प्रत्ययस्य पिद्वद्भावश्च। अतः प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते। अस्मिंपक्ष एत ऐ। पा० ३. ४. ९३.। इत्यैत्वाभावो व्यत्ययेन द्रष्टव्यः। यद्वृत्तयोगादनिघातः॥

अथ चतुर्दशीमृचमाह ॥

उषो अद्येह गोमत्यश्वावति विभावरि ।

रेवदस्मे व्युच्छ सूनृतावति ॥ १४ ॥

उषः । अद्य । इह । गोऽमति अश्वऽवति । विभाऽवरि ।

रेवत् । अस्मे इति । वि । उच्छ । सूनृताऽवति ॥ १४ ॥

हे गोमति । अस्मभ्यं दातव्यैर्गोभिर्युक्ते । तथाश्वावति । अश्वैर्युक्ते । विभावरि विशिष्टप्रकाशोपेते । सूनृतावति ! प्रियसत्यात्मिका वाक् सूनृता । तादृश्या वाचा युक्ते । एवंभूते हे उष उषादेवतेऽद्येदानीं प्रभातसमय इहास्मिन्देशेऽस्मे अस्माकं रेवत् धनयुक्तं कर्म यथा भवति तथा व्युच्छ । नैशं तमो निवारय ॥ अश्वावति । मंत्रे सोमाश्वेंद्रियेति मतौ दीर्घत्वं । पादादित्वादामंत्रितस्याष्टमिकनिघाताभावः । रेवत् । रयेर्मतौ बहुलमिति संप्रसारणं । छंदसीर इति मतुपो वत्वं । रेशब्दाच्च मतुप उदात्तत्वं वक्तव्यमिति मतुप उदात्तत्वं । उच्छ । उच्छी विवासे । विवासो विसर्जनं ॥

पंचदशीमृचमाह ॥

युक्ष्वा हि वाजिनीवत्यश्वाँ अद्यारुणाँ उषः ।

अथा नो विश्वा सौभगान्या वह ॥ १५ ॥

युक्ष्व । हि । वाजिनीऽवति । अश्वान् । अद्य ।

अरुणान् । उषः ।

अथ । नः । विश्वा । सौभगानि । आ । वह ॥ १५ ॥

हे वाजिनीवति । हविर्लक्षणान्नवत्युष उषोदेवते । अरुणा-न्नरुणवर्णानश्वानश्वस्थानीयान् गोविशेषानद्यास्मिन्काले युङ्क्ष्वा हि । योजयैव । हिरवधारणे । अथानंतरं रथमारुह्य विश्वा सौभगानि सर्वाणि सौभाग्यानि नोऽस्मभ्यमावह । आनय ॥ अश्वान् । दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं । अतोऽटि नित्यमिति सानुनासिक आकारः । सौभगानि । सुभगान्मंत्र इत्युद्गात्रादिषु पाठादुद्गात्रादित्वादण् भावकर्मणोरर्थयोः प्राणि-भृज्जातिवयोवचनोद्गात्रादिभ्योऽञित्यञ्प्रत्ययः । हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धौ प्राप्तायां सर्वविधीनां छंदसि विकल्पितत्वादत्रोत्तरपदवृद्धिर्न भवतीत्युक्तं ॥

॥ इति प्रथमस्य षष्ठे षड्विंशो वर्गः ॥

प्रातरनुवाकस्याश्विने क्रतावौष्णिहे छंदस्यश्विना वर्ति-रित्ययं तृचः । आश्विनशस्त्रे च । तथा च सूत्रितं । अश्विना वर्तिरस्मदाश्विनावहे गच्छतामिति तृचौ । आ ४. १५. । इति ॥

तृचे प्रथमां सूक्ते षोडशीमृचमाह ॥

अश्विना वर्तिरस्मदा गोमद्दस्रा हिरण्यवत् ।

अर्वाग्रथं समनसा नि यच्छतं ॥ १६ ॥

अश्विना । वर्तिः । अस्मत् । आ । गोऽमत् । दस्रा ।

हिरण्यऽवत् ।

अर्वाक् । रथं । सऽमनसा । नि । यच्छतं ॥ १६ ॥

उषःसाहचर्याद्दिवस्थावश्विनाविदमादिकेन तृचेन स्तुयेते । हे अश्विना । अश्ववंतौ व्यापनशीलौ वा देवौ । दस्रा शत्रुणा-

मुपक्षपयितारौ । अस्मदस्माकं वर्तिर्वर्तनहेतुभूतं गृहमा समंताद्गोमद्बहुभिर्गोभिर्युक्तं हिरण्यवद्धितरमणीयधनयुक्तं च यथा भवति तथा समनसा समानमनस्कौ संतौ युवां युष्मदीयं रथमर्वाक् अर्वाचीनमस्मदीयगृहमभिमुखं नियच्छतं । आवर्तयतं ॥ अश्विना । सुपां सुलुगित्याकारः । वर्तिः । वर्ततेऽस्मिन्निति वर्तिर्गृहं । औणादिक इसिप्रत्ययः । अस्मत् । सुपां सुलुगिति षष्ठ्या लुक् । समनसा । समानं मनो ययोस्तौ । समानस्य छंदसीति सभावः ॥

समदशीचमृमाह ॥

याविृत्था श्लोकमा दिवो ज्योतिर्जनाय चक्रथुः ।
आ न ऊर्जं वहतमश्विना युवं ॥ १७ ॥

यौ । इत्था । श्लोकं । आ । दिवः । ज्योतिः ।
जनाय । चक्रथुः ।
आ । नः । ऊर्जं । वहतं । अश्विना । युवं ॥ १७ ॥

हे अश्विनौ यौ युवां दिवो द्युलोकात् श्लोकमुपश्लोकनीयं प्रशंसनीयं ज्योतिस्तेज इत्थेत्थमस्माभिरनुभूयमानेन प्रकारेण चक्रथुः । कृतवंतौ । केषांचिन्मतेन सूर्याचंद्रमसावश्विनावुच्येते । तदुक्तं यास्केन । तत्कावश्विनौ द्यावापृथिव्यावित्येके सूर्याचंद्रमसावित्येक इति । तथा च प्रकाशकत्वं तयोरुपपन्नं । तौ युवं युवां नोऽस्मभ्यमूर्जं बलप्रदमन्नमावहतं । आनयतं प्रयच्छतं ॥ श्लोकं । श्लोकृ संघाते । अयं स्तुत्यर्थोऽपि । कर्मणि घञ् । ञित्वादाद्युदात्तत्वं ॥

अष्टादशीमृचमाह ॥

एह देवा मयोभुवा दस्रा हिरण्यवर्तनी।

उषर्बुधो वहंतु सोमपीतये ॥ १८ ॥

आ। इह। देवा। मयःऽभुवा। दस्रा। हिरण्यवर्तनी

इति हिरण्यवर्तनी।

उषःऽबुधः। वहंतु। सोमऽपीतये ॥ १८ ॥

उषर्बुध उषसि प्रबुद्धा अश्वा इहास्मिन्यागे सोमपीतये सोमपानाय दस्रा शत्रूणामुपक्षपयितारावश्विनावावहंतु। आनयंतु। कीदृशौ। देवा। देवनशीलौ दानादिगुणयुक्तौ वा। मयोभुवा। मयस आरोग्यप्रदस्य सुखस्य भावयितारौ। अश्विनौ वै देवानां भिषजाविति श्रुतेः। हिरण्यवर्तनी। वर्ततेऽनेनेति व्युत्पत्त्या वर्तनिशब्देन रथ उच्यते। सुवर्णमयी वर्तनिर्ययोस्तौ ॥ देवेत्यादिषु त्रिषु सुपां सुलुगित्याकारः। सोमपीतये। पा पाने। भावे क्तिनि घुमास्थेतीत्वं। सोमस्य पीतिः सोमपीतिः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य षष्ठे सप्तविंशो वर्गः ॥

अग्नीषोमाविति द्वादशर्चं नवमं सूक्तं गोतमस्यार्षं। आदितस्तिस्रोऽनुष्टुभः। नवम्याद्यास्तिस्रो गायत्र्यः। अष्टमी जगती त्रिष्टुब्वा। शिष्टाः पंच त्रिष्टुभः। अग्नीषोमौ देवता। तथा चानुक्रांतं। अग्नीषोमौ द्वादशाग्नीषोमीयमाद्यास्तिस्रोऽनुष्टुभ उपांत्यास्तिस्रो गायत्र्योऽष्टमी जगती वेति॥ अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषामादितस्तिस्र ऋचः क्रमेणा-

नुवाक्याः । सूचितं च । अग्नीषोमाविमं सु मे युवमेतानि दिवि रोचनानीति द्वचौ । आ० ३. ८. । इति ॥

तत्र प्रथमामृचमाह ॥

अग्नीषोमाविमं सु मे शृणुतं वृषणा हवं ।

प्रति सूक्तानि हर्यतं भवतं दाशुषे मयः ॥ १ ॥

अग्नीषोमौ । इमं । सु । मे । शृणुतं । वृषणा । हवं ।

प्रति । सुऽउक्तानि । हर्यतं । भवतं । दाशुषे । मयः ॥ १ ॥

वृषणा वृषणौ कामानां वर्षितारौ हे अग्नीषोमौ । इममिदानीं प्रयुज्यमानं सु मदीयं हवमाह्वानं सु शृणुतं । सम्यगवगच्छतं । सूक्तानि शोभनानि स्तुतिलक्षणान्यस्माभिः कृतानि वचांसि प्रतिहर्यतं । प्रत्येकं कामयेथां । तदनंतरं दाशुषे चरुपुरोडाशादीनि दत्तवते यजमानाय मयो मयसः सुखस्य दातारौ भवतं ॥ अग्नीषोमौ । अग्निश्च सोमश्च । द्वंद्व ईदग्नेः सोमवरुणयोः । पा० ६. ३. २७. । इतीत्वं । अग्नेः स्तुत्स्तोमसोमाः । पा० ८. ३. ८२. । इति षत्वं । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरे प्राप्त आमंत्रितस्य चेत्याद्युदात्तत्वं । वृषणा । सुपां सुलुगित्याकारः । वा षपूर्वस्येति विकल्पनादुपधाया दीर्घाभावः । हवं । भावेऽनुपसर्गस्येति ह्वयतेरप् संप्रसारणं च । सूक्तानि । सुपूर्वाद्वक्तेः कर्मणि निष्ठा । सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं । हर्यतं । हर्य गतिकांत्योः । भौवादिकः ॥

यदा पौर्णमास्यामग्नीषोमावुपांशुयाजस्य देवता तदाग्नीमग्नीषोमा या अद्येति तस्यानुवाक्या । सूचितं चोक्ता देवता इति खंडे । अग्नीषोमा यो अद्य वामान्यं दिवो मातरिश्वा जभार । आ० १. ६. । इति ॥

तामितां द्वितीयामृचमाह ॥

अग्नीषोमा यो अद्य वामिदं वचः सपर्यति ।

तस्मै धत्तं सुवीर्यं गवां पोषं स्वश्व्यं ॥ २ ॥

अग्नीषोमा । यः । अद्य । वां । इदं । वचः । सपर्यति ।

तस्मै । धत्तं । सुऽवीर्यं । गवां । पोषं । सुऽअश्व्यं ॥ २ ॥

हे अग्नीषोमौ यो यजमानोऽद्यास्मिन्कर्मणि वां युवाभ्यां युष्मदर्थमिदं स्तुतिलक्षणं वचो वाक्यं सपर्यति । पूजितं करोति । तस्मै यजमानाय गवां पशूनां पोषमभिवृद्धिं धत्तं । प्रयच्छतं । कीदृशं पोषं । सुवीर्यं । शोभनेन वीर्येण सामर्थ्येनोपेतं । स्वश्व्यं । शोभनैरश्वैर्युक्तं ॥ गवां । साविकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन् साववर्णेति प्रतिषेधः ॥

तृतीयामृचमाह ॥

अग्नीषोमा य आहुतिं यो वां दाशाद्धविष्कृतिं ।

स प्रजया सुवीर्यं विश्वमायुर्व्यश्नवत् ॥ ३ ॥

अग्नीषोमा । यः । आऽहुतिं । यः । वां । दाशात् ।

हविःऽकृतिं ।

सः । प्रऽजया । सुऽवीर्यं । विश्वं । आयुः । वि ।

अश्नवत् ॥ ३ ॥

हे अग्नीषोमौ यो यजमान आहुतिमाभ्याहुतिं वां युवाभ्यां दाशात् । दद्यात् । अथवा हविष्कृतिं हविषा चरुपुरो-

हाम्रादिना कृतामाहुतिं यो यजमानो दद्यात् । स यजमानः प्रजया पुत्रपौत्रादिना युक्तं सुवीरं शोभनवीर्ययुक्तं विश्वं सर्वमायुर्जीवनं व्यश्नवत् । व्याप्नोत् ॥ आहुतिं । जुहोतेः क्तिनि ताठौ चेति गतेः प्रकृतिस्वरत्वं । दाशात् । दाशृ दाने । लेट्यडागमः । यद्वृत्तयोगादनिघातः ॥ हविष्कृतिं । हविषः कृतिः करणं यस्यामाहुतौ । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । नित्यं समासेऽनुत्तरपदस्थस्येति विसर्जनीयस्य षत्वं । अश्नवत् । अश्नोतेर्व्यत्ययेन परस्मैपदं । लेट्यडागमः ॥

चतुर्थीमृचमाह ॥

अग्नीषोमा चेति तद्वीर्यं वां यदमुष्णीतमवसं पणिं गाः ।
अवातिरतं बृसयस्य शेषोऽविन्दतं ज्योतिरेकं बहुभ्यः ॥ ४ ॥

अग्नीषोमा । चेति । तत् । वीर्यं । वां । यत् । अमुष्णीतं ।
अवसं । पणिं । गाः ।
अव । अतिरतं । बृसयस्य । शेषः । अविन्दतं । ज्योतिः ।
एकं बहुऽभ्यः ॥ ४ ॥

हे अग्नीषोमौ वां युवयोस्तद्वक्ष्यमाणं वीर्यं सामर्थ्यं चेति । अस्माभिर्ज्ञातमभूत् । यद्येन वीर्येण गा अवसं गोरूपमन्नं पणिं पणेः । विभक्तिव्यत्ययः । एतन्नाम्नोऽसुरादमुष्णीतं । अपाहार्ष्टं । तथा बृसयस्य । बृसिर्वेष्टनार्थः । बृसयति सर्वं वेष्टयतीति बृसयोऽसुरस्त्वष्टा । तस्यासुरस्य शेषोऽपत्यं । शेष इत्यपत्यनाम शिष्यते प्रयत इति यास्कः । नि० ३. २. ।

त्वष्टृसकाशादुत्पन्नं वृत्रमवातिरतं । अवाधिष्टं । अवतिरति-र्वधकर्मा । प्राणापानरूपयोर्वयोर्वेऽनवस्थानात्स मरणं प्राप्तः । तथा चाम्नायते । तस्माज्जंजभ्यमानादग्नीषोमौ निरक्रामतां प्राणापानौ वा एनं तदजहितामिति । ततो वृत्र-वधानंतरं ज्योतिर्द्योतमानं सूर्यमेकं नभसि गच्छंतं बहुभ्यो जनेभ्यो बहूनामर्थायाविंदतं । अलभेथां । एतत्सर्वं येन वीर्येण क्रियते तदस्माभिर्ज्ञातमित्यर्थः ॥ चेति । चितो संज्ञाने । लुङि चिण् भावकर्मणोरिति च्लेश्चिणादेशः । चिणो लुगिति तशब्दस्य लुक् । अमुष्णीतं । मुष स्तेये । क्र्यादिकः । अवसं । अवतेरौणादिकोऽसच् । शेषः । सुपां सुलुगिति द्वितीयायाः सुः । एकं । इण् गतौ । इण्भीकापाशल्यतिमर्चिभ्यः कन्निति कन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

अग्नीषोमीयस्य पशोर्वपापुरोडाशहविषां युवमेतानीत्याद्यास्तिस्र ऋचः क्रमेण याज्याः । सूत्रं तु पूर्वमेवोदाहृतं । आ॰ ३. ८. ॥ पौर्णमासयागेऽग्नीषोमीयस्य पुरोडाशस्य युवमेतानीत्येषा याज्या । उक्ता देवता इति खंडे सूत्रितं । युवमेतानि दिवि रोचनानींद्राग्नी अवसागतं । आ॰ १. ८. । इति ॥ तामेतां सूक्ते पंचमीमृचमाह ॥

युवमेतानि दिवि रोचनान्यग्निश्च सोम सक्रतू अधत्तं ।
युवं सिंधूंरभिशस्तेरवद्यादग्नीषोमावमुंचतं गृभीतान् ॥५॥

युवं । एतानि । दिवि । रोचनानि । अग्निः । च । सोम ।
सक्रतू इति सऽक्रतू । अधत्तं ।

युवं । सिंधून् । अभिऽशस्तेः । अवद्यात् । अग्नीषोमौ ।

अमुंचतं । गृभीतान् ॥ ५ ॥

हे सोम त्वमग्निश्च सक्रतू समानकर्माणौ संतौ युवं युवां रोचनानि रोचमानानि दीप्यमानान्येतान्यस्माभिर्निशि दृश्यमानानि ताराग्रहादीनि ज्योतींषि दिवि द्युलोकेऽधत्तं । अधारयतं । उत्तरार्द्धस्येयमाख्यायिका । इंद्रो वृत्रं हत्वा ब्रह्महत्याया भीतः सन् पृथिव्यां वृक्षेषु स्त्रीष्वप्सु च तां ब्रह्महत्यां न्यमार्जीत् तासामपां शुद्धिरग्नीषोमाभ्यां जातेति । ब्रह्महत्यांशेन पापेन गृभीतान् गृहीतानाक्रांतान् सिंधून् नदीविशेषान् हे अग्नीषोमौ युवामभिशस्तेरभिशस्यमानादभितः प्रकटितादवद्यात्तस्मात्पापादमुंचतं । मुक्तवंतौ । यद्वा वृत्र इंद्रेण हतः सन् नदीषु पपात । ततो मृतेन वृत्रशरीरेण नद्यः सर्वा दुष्टा बभूवुः । तथा च तैत्तिरीयकं । इंद्रो वृत्रमहन् सोऽपोऽभ्यम्रियत । तासां यन्मेध्यं यज्ञियं सदेवमासीत्तदपोदक्रामदिति । तेन दोषेण गृहीता नदीस्तस्माद्दोषादग्नीषोमौ मुक्तवंतौ ॥ रोचनानि । रुच दीप्तौ । अनुदात्तेतश्च हलादेरिति युच् । सिंधून् । दीर्घादटि समानपाद इति नकारस्य रुत्वं । अत्रानुनासिक इत्यनुनासिकः । गृभीतान् । हृग्रहोर्भ इति भत्वं ॥

अग्नीषोमीयस्योपांशुयाजस्यान्यं दिव इत्येषा याज्या । अग्नीषोमा यो अद्य वामित्यत्र सूत्रमुदाहृतं । आ० १. ६. ॥

तामेतां षष्ठीमृचमाह ॥

आन्यं दिवो मातरिश्वा जभारामथ्नादन्यं परि श्येनो अद्रेः ।
अग्नीषोमा ब्रह्मणा वावृधानोरुं यज्ञाय चक्रथुरु लोकं ॥ ६ ॥

आ । अन्यं । दिवः । मातरिश्वा । जभार । अमथ्नात् ।
अन्यं । परि । श्येनः । अद्रेः ।
अग्नीषोमा । ब्रह्मणा । वावृधाना । उरुं । यज्ञाय । चक्रथुः ।
ऊं इति । लोकं ॥ ६ ॥

हे अग्नीषोमौ युवयोर्मध्येऽन्यमेकमग्निं मातरिश्वा वायुर्दिवो द्युलोकादाजभार । भृगवे यजमानायाजहार । तथा च मंत्रांतरं । द्विजन्मानं रयिमिव प्रशस्तं रातिं भरद्भृगवे मातरिश्वेति । श्येनः शंसनीयगतिमान्पक्षी पक्ष्याकारा गायत्र्यन्यं सोममद्रेः परि मेरोरुपर्यवस्थितात्स्वर्गादमथ्नात् । बलादाहृतवती । एवं महानुभावौ युवां ब्रह्मणा स्तोत्रा मंत्ररूपेण स्तोत्रेण हविर्लक्षणेनान्नेन वा वावृधाना बर्धमानौ युवां यज्ञायान्येषां देवानां यागायोरुं विस्तीर्णं लोकं स्थानं चक्रथुः । कृतवंतौ । उ इत्येतत्पादपूरणं । आज्यभागदेवतयोरग्नीषोमयोरुत्तरादक्षिणाद्धयोर्हूयते । तन्मध्येऽन्यदेवत्यानि सर्वाणि हवींषि हूयंते । तन्मध्यमं स्थानमग्नीषोमकृतं । तथा च तैत्तिरीयकं । राजानौ वा एतौ देवानां यदग्नीषोमावंतरा

देवता इज्येते देवतानां विष्टत्या इति ॥ वाहुधाना । इधेर्लिटि कानच् । छांदसमभ्यासस्य दीर्घत्वं । सुपां सुलुगित्याकारः ॥

॥ इति प्रथमस्य षष्ठेऽष्टाविंशो वर्गः ॥

सप्तमीमृचमाह ॥

अग्नीषोमा हविषः प्रस्थितस्य वीतं हर्यतं वृषणा जुषेथां ।
सुशर्माणा स्ववसा हि भूतमथा धत्तं यजमानाय शं योः ॥७॥

अग्नीषोमा । हविषः । प्रऽस्थितस्य । वीतं । हर्यतं ।
वृषणा । जुषेथां ।
सुऽशर्माणा । सुऽअवसा । हि । भूतं । अथ । धत्तं ।
यजमानाय । शं । योः ॥ ७ ॥

हे अग्नीषोमौ प्रस्थितस्य होमार्थमाहवनीयसमीपं प्राप्तं हविष इदं हविर्वीतं भक्षयतं । तदनंतरं च हर्यतं । अस्मान्कामयेथां । हे वृषणा कामानां वर्षितारौ जुषेथां । अस्मदीयं परिचरणं सेवेथां । तदनंतरं सुशर्माणां शोभनसुखौ स्ववसा हि शोभनरक्षणौ च भूतं । अस्माकं भवतं । अथानंतरं हविर्दत्तवते यजमानाय शं शमनीयानां रोगाणां शमनं योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं च धत्तं । विधत्तं । कुरुतं । उक्तं च यास्केन । शमनं च रोगाणां यावनं च भयानां । नि० ४. २१. । इति ॥ हविषः । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । वीतं । वी गतिप्रजननकांत्यसनखादनेषु । यसस्तं । अदादित्वाच्छपो लुक् । वीतं च हर्यतं चेति चार्थप्रतीतेश्चादिलोपे विभाषेति प्रथमा-

यास्तिङ्विभक्तेर्निघातप्रतिषेधः । हर्यतं । पादादित्वान्निघाताभावः । जुषेथां । वृषणेत्यामंत्रितस्यामंत्रितं पूर्वमित्यविद्यमानवत्त्वे सति तिङः परत्वान्निघाताभावः । सुशर्माणा । स्ववसा । उभयत्र बहुव्रीहौ सोर्मनसो अलोमोषसो इत्युत्तरपदाद्युदात्तत्वं । भूतं । लोटि बहुलं छंदसीति शपो लुक् ॥

अष्टमीमृचमाह ॥

यो अ॒ग्नीषोमा॑ ह॒विषा॑ सप॒र्याद्दे॑व॒द्रीचा॒ मन॑सा॒ यो घृ॒तेन॑ ।
तस्य॑ व्र॒तं र॑क्षतं पा॒तमंह॑सो वि॒शे जना॑य॒ महि॒ शर्म॑
यच्छतं ॥ ८ ॥

यः । अ॒ग्नीषो॑मा । ह॒विषा॑ स॒प॒र्या॑त् । दे॒व॒द्रीचा॑ ।
मन॑सा । यः । घृ॒तेन॑ ।
तस्य॑ । व्र॒तं । र॒क्ष॒तं॒ । पा॒तं । अंह॑सः । वि॒शे । जना॑य ।
महि॑ । शर्म॑ । य॒च्छ॒त॒म् ॥ ८ ॥

यो यजमानोऽग्नीषोमौ देवद्रीचा देवानंचता देवतापरायणेन श्रद्धायुक्तेन मनसांतःकरणेन युक्तः सन् हविषा चरुपुरोडाशादिना सपर्यात् । सपर्यति परिचरति । यश्च यजमानो घृतेनाज्येनाग्नीषोमौ परिचरति । तस्य यजमानस्य व्रतं कर्म रक्षतं । अंहसः पापात्तं च यजमानं पातं । रक्षतं । विशे यागेषु प्रविशते तस्मै जनाय यजमानाय महि महत्प्रभूतं शर्म सुखं यच्छतं । दत्तं ॥ अग्नीषोमा । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । सपर्यात् । सपर पूजायां । कंड्वादिः । लेट्य-

डागमः । देवद्रीचा । देवानंचतीति देवद्यङ् । अंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । विष्वग्देवयोश्च टेरद्र्यचतौ वप्रत्यये । पा० ६. ३. ९२. । इति देवशब्दस्य टेरद्र्यादेशः । तृतीयैकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं । कृदुत्तरपदप्रकृतिस्वरत्वे प्राप्तेऽद्रिसध्र्योरंतोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थमिति वचनादद्र्यादेशोऽतोदात्तः । शिष्टे । सावेकाच इति विभक्तेरुदात्तत्वं ॥

पौर्णमासयागेऽग्नीषोमीयस्य यागस्याग्नीषोमेत्येषानुवाक्या । तथा च सूत्रितमुक्ता देवता इति खंडे । अग्नीषोमा सवेदसा युवमेतानि दिवि रोचनानि । आ० १. ६. । इति ॥

तामेतां सूक्ते नवमीमृचमाह ॥

अग्नी॑षोमा॒ सवे॑दसा॒ सहू॑ती वनतं॒ गिरः॑ ।

सं दे॑व॒त्रा ब॑भूवथुः ॥ ९ ॥

अग्नी॑षोमा । सऽवे॑दसा । सहू॑ती॒ इति॑ सऽहू॑ती । व॒न॒त॒म् ।

गिरः॑ । सम् । दे॒व॒ऽत्रा । ब॒भू॒व॒थुः॒ ॥ ९ ॥

हे अग्नीषोमौ युवां सवेदसा समानेनैकेन वेदसा हविर्लक्षणेन धनेन युक्तौ सहूती समानह्वानौ च संतौ गिरोऽस्मदीयाः स्तुतीर्वनतं । संभजेथां । देवत्रा देवेषु सर्वेषु यौ युवां संबभूवथुः । संभूतौ संभावितौ प्रशस्तौ स्थः । राजानौ वा एतौ देवानां यदग्नीषोमाविति श्रुतेः ॥ सवेदसा । समानं वेदो ययोः । समानस्य छंदसीति सभावः । वनतं । वन षण संभक्तौ । देवत्रा । देवमनुष्यपुरुषपुरुमर्त्येत्यादिना सप्तम्यर्थे त्राप्रत्ययः ॥

दशमीमृचमाह ॥

अग्नीषोमावनेन वां यो वां घृतेन दाशति।

तस्मै दीदयतं बृहत् ॥ १० ॥

अग्नीषोमौ। अनेन। वां। यः। वां। घृतेन। दाशति ॥

तस्मै। दीदयतं। बृहत् ॥ १० ॥

हे अग्नीषोमौ वां युवयोः संबंधी यो यजमानोऽनेन घृतेनोत्पवनादिभिः संस्कृतेनाज्येन युक्तं हविर्वां युवाभ्यां दाशति प्रयच्छति। तस्मै यजमानाय बृहत्प्रभूतं धनं दीदयतं। प्रकाशयतं। प्रयच्छतमित्यर्थः ॥ दाशति। दाशृ दाने। शप्तिपोः पित्त्वादनुदात्तत्वे धातुस्वरः। यद्वृत्तयोगादनिघातः। दीदयतं। दीदयतिर्दीप्तिकर्मा ॥

एकादशीमृचमाह ॥

अग्नीषोमाविमानि नो युवं हव्या जुजोषतं।

आ यातमुप नः सचा ॥ ११ ॥

अग्नीषोमौ। इमानि। नः। युवं। हव्या। जुजोषतं।

आ। यातं। उप। नः। सचा ॥ ११ ॥

हे अग्नीषोमौ युवं युवां नोऽस्मदीयानीमानि हव्या हवींषि जुजोषतं। सेवेथां। तदर्थं नोऽस्मान् सचा सह युवामुपायातं। उपागच्छतं ॥ जुजोषतं। जुषी प्रीतिसेवनयोः। लोटि व्यत्ययेन श्लुः। छांदसं द्विर्वचनं। सहा

विकरणस्य बहुलं छंदसीति श्लुः । ततो व्यत्ययेन शप् । बहुलं छंदसीति वक्तव्यमिति वचनाच्छाभ्यस्तस्याचि पितीति लघूपधगुणप्रतिषेधाभावः ॥

द्वादशीमृचमाह ॥

अग्नीषोमा पिपृतमर्वतो न आ प्यायंतामुस्रिया हव्यसूदः ।
अस्मे बलानि मघवत्सु धत्तं कृणुतं नो अध्वरं श्रुष्टिमंतं ॥१२॥

अग्नीषोमा । पिपृतं । अर्वतः । नः । आ । प्यायंतां ।
उस्रियाः । हव्यऽसूदः ।
अस्मे इति । बलानि । मघवत्ऽसु । धत्तं । कृणुतं । नः ।
अध्वरं । श्रुष्टिऽमंतं ॥ १२ ॥

हे अग्नीषोमौ नोऽस्माकमर्वतोऽश्वान्पिपृतं । पालयतं । हव्यसूदः क्षीरादिहविष उत्पादयित्र्य उस्रिया अस्मदीया गावश्चाप्यायंतां । आप्यायिताः प्रवृद्धाः संतु । मघवत्सु हविर्लक्षणधनयुक्तेष्वस्मे अस्मासु बलानि धत्तं । स्थापयतं । तथा नोऽस्माकमध्वरं यागं श्रुष्टिमंतं धनयुक्तं कृणुतं । कुरुतं ॥ पिपृतं । पृ पालनपूरणयोः पृ इत्येके । जुहोत्यादित्वाच्छपः श्लुः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । हव्यसूदः । हव्यं सूदंते क्षरंतीति हव्यसूदः । षूद क्षरणे । क्विप् चेति क्विप् । अस्मे । सुपां सुलुगिति सप्तम्याः शे आदेशः । श्रुष्टिमंतं । श्रुष्टीति धननाम । श्रु आश्वश्यते व्याप्यत इति श्रुष्टिः । पृषोदरादिः । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं ॥

॥ इति प्रथमस्य षष्ठ एकोनत्रिंशो वर्गः ॥

॥ इति प्रथमे मंडले चतुर्दशोऽनुवाकः ॥

पंचदशेऽनुवाके द्वादश सूक्तानि। तत्रेमं स्तोममिति षोडशर्चं प्रथमं सूक्तं। आंगिरसस्य कुत्सस्यार्षं। पंचदशी-षोडश्यौ त्रिष्टुभौ शिष्टा जगत्यः। अग्निर्देवता। पूर्वो देवा भवतु सुन्वतो रथ इति त्रयः पादा देवदेवत्याः। तन्नो मित्रो वरुण इत्यर्धर्चो लिंगोक्तमित्रावरुणादिषड्देवत्यः। अथवा तस्याप्यग्निरेव देवता मित्रावरुणादयस्तु निपातभाक्त्वेना-प्रधानाः। एतत्सर्वमनुक्रांतं। इमं षोडश कुत्स आग्नेयं तद्धि-त्रिष्टुबंतं पूर्वो देवास्त्रयः पादा देवास्तन्नो मित्रोऽर्धर्चो लिंगोक्त-देवतो यद्देवत्यं वा सूक्तमिति॥ प्रातरनुवाकस्याग्नेये क्रतौ जागते छंदस्येतत्सूक्तं। आश्विनशस्त्रे च। तथा च सूत्रितं। इमं स्तोममर्हते सं जागटवद्भिः। आ० ४. १३.। इति॥ आभि-प्लविके षष्ठेऽहन्याग्निमारुतेऽप्येतत्सूक्तं जातवेदस्यनिविद्धानं। सूत्रितं च। प्रयज्यव इमं स्तोममित्याग्निमारुतं। आ० ७. ७.। इति॥ तृतीयसवन इमं स्तोममित्येषाग्नीध्रः प्रस्थित-याज्या। सूत्रितं च। इमं स्तोममर्हते जातवेदस इति तार्तीयसवनिक्यः। आ० ५. ५.। इति॥

तास्मितां सूक्ते प्रथमामृचमाह॥

इमं स्तोममर्हते जातवेदसे रथमिव सं महेमा मनीषया।
भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा
वयं तव॥ १॥

इमं । स्तोमं । अर्हते । जातऽवेदसे । रथंऽइव ।

सं । महेम । मनीषया ।

भद्रा । हि । नः । प्रऽमतिः । अस्य । संऽसदि । अग्ने ।

सख्ये । मा । रिषाम । वयं । तव ॥ १ ॥

अर्हते पूज्याय जातवेदसे जातानामुत्पन्नानां वेदित्रे जातप्रज्ञाय जातधनाय वाग्नये मनीषया निशितया बुद्ध्या इममेतत्सूक्तरूपं स्तोमं स्तोत्रं रथमिव यथा तक्षा रथं संस्करोति तथा संमहेम । सम्यक् पूजितं कुर्मः । अस्याग्नेः संसदि संभजने नोऽस्माकं प्रमतिः प्रकृष्टा बुद्धिर्भद्रा हि । कल्याणी समर्था खलु । अतस्तया बुद्ध्या स्तुम इत्यर्थः । हे अग्ने तव सख्येऽस्माकं त्वया सह सखित्वे सति वयं मा रिषाम । हिंसिता न भवाम । अस्मान्रक्षेत्यर्थः ॥ अर्हते । अर्ह पूजायां । अर्हः प्रशंसायां । पा० ३. २. १३३. । इति लटः शत्रादेशः । शपः पित्त्वादनुदात्तत्वं । शतुश्चादुपदेशाल्लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । महेम । मह पूजायां । रिषाम । रिष हिंसायां । व्यत्ययेन शः । तव । युष्मदस्मदोर्ङसीत्याद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यं ।

स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव ॥ २ ॥

यस्मै । त्वं । आऽयजसे । सः । साधति । अनर्वा । क्षेति ।

दधते । सुऽवीर्यं ।

सः । तूताव । न । एनं । अश्नोति । अंहतिः । अग्ने ।

सख्ये । मा । रिषाम । वयं । तव ॥ २ ॥

यस्मै यजमानाय हे अग्ने त्वमायजसे देवानाभिमुख्येन यजसि स यजमानः साधति । स्वाभिलषितं साधयति । प्राप्नोतीत्यर्थः । किंच स यजमानोऽनर्वा शत्रुभिरप्रत्यृतः सन् क्षेति । निवसति । तथा सुवीर्यं शोभनवीर्योपेतं धनं दधते । धारयति । प्राप्नोतीत्यर्थः । धृत्वा च स यजमानस्तूताव । वर्धते । एनं यजमानमंहतिरातिर्दारिद्र्यं नाश्नोति । न प्राप्नोतीत्यर्थः । अन्यत्पूर्ववत् ॥ साधति । षिधु संराद्धौ । णिचि सिध्यतेरपारलौकिके । पा० ६. १. ४९. । इत्यात्वं । छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः । क्षेति । क्षि निवासगत्योः । बहुलं छंदसीति विकरणस्य लुक् । दधते । दध धारणे । भौवादिकः । तूताव तु इति वृद्ध्यर्थः सौत्रो धातुः । अस्माच्छांदसो लिट् । तुजादित्वादभ्यासस्य दीर्घत्वं । अश्नोति । व्यत्ययेन परस्मैपदं । अंहतिः । हंतेरंह च । उ० ४. ६३. । इत्यतिप्रत्ययः । चिदित्यनुवृत्तेरंतोदात्तत्वं ॥

तृतीयामृचमाह ॥

शकेम त्वा समिधं साधया धियस्त्वे देवा हविरदंत्याहुतं ।
त्वमादित्याँ आ वह तान्ह्यु१श्मस्यग्ने सख्ये मा रिषामा वयं तव ॥ ३ ॥

शकेम । त्वा । संऽइधं । साधय । धियः । त्वे इति । देवाः । हविः । अदंति । आऽहुतं ।
त्वं । आदित्यान् । आ । वह । तान् । हि । उश्मसि । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ ३ ॥

हे अग्ने त्वा त्वां समिधं सम्यगिद्धं कर्तुं शकेम । शक्ता भूयास्म । त्वं च धियोऽस्मदीयानि दर्शपूर्णमासादीनि कर्माणि साधय । निष्पादय । त्वया हि सर्वे यागा निष्पाद्यंते । यस्मात्त्वे त्वय्यग्नावाहुतं ऋत्विग्भिः प्रक्षिप्तं चरुपुरोडाशादिकं हविर्देवा अदंति । भक्षयंति । तस्मात्त्वं साधयेत्यर्थः । अपि च त्वमादित्यानदितेः पुत्रान् सर्वान्देवानावह । अस्मद्यज्ञार्थमानय । तान्होदानीमेव वयमुश्मसि । कामयामहे । अन्यत्पूर्ववत् ॥ शकेम । शक्ल शक्तौ । लिङ्याशिष्यङ् । अदुपदेशाल्लसार्वधातुकानुदात्तत्वेऽङ एव स्वरः शिष्यते । समिधं । ञि इंधी दीप्तौ । अस्मात्संपदादिलक्षणः कर्मणि क्विप् । त्वे । सुपां सुलुगिति सप्तम्येकवचनस्य शे आदेशः । उश्मसि । वश कांतौ । इदंतो मसिः । अदादित्वाच्छपो लुक् । ग्रहिज्येत्यादिना संप्रसारणं ॥

चतुर्थीमृचमाह ॥

भरामेध्मं कृणवामा हवींषि ते चितयंतः पर्वणापर्वणा वयं ।
जीवातवे प्रतरं साधया धियोऽग्ने सख्ये मा रिषामा
वयं तव ॥ ४ ॥

भराम । इध्मं । कृणवाम । हवींषि । ते । चितयंतः ।
पर्वणाऽपर्वणा । वयं ।
जीवातवे । प्रऽतरं । साधय । धियः । अग्ने । सख्ये । मा ।
रिषाम । वयं । तव ॥ ४ ॥

हे अग्ने त्वद्यागार्थमिध्ममिंधनसाधनमेकविंशतिदार्वात्मकं समित्समूहं भराम । संपादयाम । तदनंतरं ते तुभ्यं हवींषि चरुपुरोडाशादीन्यन्नानि वयं कृणवाम । करवाम । किं कुर्वंतः । पर्वणा पर्वणा प्रतिपच्चमावास्याभ्यां दर्शपूर्णमासाभ्यां चितयंतः । त्वां प्रज्ञापयंतः । स त्वं जीवातवेऽस्माकं जीवनौषधाय चिरकालावस्थानाय धियः कर्माण्यग्निहोत्रादीनि प्रतरं प्रकृष्टतरं साधय । निष्पादय । अन्यत्समानं ॥ चितयंतः । चिती संज्ञाने । संज्ञापूर्वकस्य विधेरनित्यत्वाल्लघूपधगुणाभावः । पर्वणा पर्वणा । नित्यवीप्सयोरिति वीप्सायां द्विर्भावः । तस्य परमाम्रेडितमिति परस्याम्रेडितसंज्ञायामनुदात्तं चेत्यनुदात्तत्वं । प्रतरं । तरवंतात्प्रशब्दात्क्रियाप्रकर्षे वर्तमानादमु च छंदसीत्यमुप्रत्ययः ॥

पंचमीमृचमाह ॥

विश्वां गोपा अंस्य चरंति जंतवो द्विपच्च यदुत चतुंष्पदक्तुभिः ।
चित्रः प्रकेत उषसो महां अस्यग्ने सख्ये मा रिषामा वयं
तवं ॥ ५ ॥

विश्वां । गोपाः । अस्य । चरंति । जंतवंः । द्विऽपत् । च । यत् ।
उत । चतुःऽपत् । अक्तुऽभिः ।
चित्रः । प्रऽकेतः । उषसंः । महान् । असि । अग्ने । सख्ये ।
मा । रिषाम । वयं । तवं ॥ ५ ॥

अस्याग्नेर्जंतवो जाता रश्मयो विश्वां सर्वेषां प्राणिनां गोपा गोपयितारो रक्षकाः संतश्चरंति । उद्गच्छंति । तदनंतरं यच्च द्विपत् द्विपात् मनुष्यादिकमस्ति । उत अपि च चतुष्पत् चतुष्पात् गवादिकं यदस्ति तदुभयमक्तुभिरंजकैरस्य रश्मिभिरक्तमाश्लिष्टमभूत् । हे अग्ने चित्रो विचित्रदीप्तियुक्तः प्रकेतः रात्रावंधकारावृतानां सर्वेषां प्रज्ञापयिता प्रदर्शयितासि उषोदेवताया अपि महान् गुणैरधिकोऽसि । भवसि । उषास्तु रात्रेश्चरमभागे प्रकाशयति । अग्निस्तु सर्वस्यां रात्रौ प्रकाशयतीति तस्य गुणाधिक्यं ॥ गोपाः । गुपू रक्षणे । गुपूधूपविच्छीत्यायप्रत्ययः । अस्मात्क्विप् । अतो लोपः । वेरपृक्तलोपाद्वलिलोपो बलीयानिति पूर्वं वलि लोपः । न चातो लोपस्य स्थानिवत्त्वं । न पदांतेत्यादिना यलोपं प्रति तन्निषेधात् । द्विपत् । द्वौ पादावस्येति बहुव्रीहौ संख्यासुपूर्वस्येति पादशब्द-

स्यांत्यलोपः समासांतः। अयस्मयादित्वेन भत्वे पादः पदिति पद्भावः। एकादेशविकृतस्यानन्यवत्त्वाद्द्वित्रिभ्यां पाद्दन्मूर्धसु इत्युत्तरपदांतोदात्तत्वं। चतुष्पात्। पूर्ववत्समासांतः पद्भावश्च। इदुदुपधस्य चाप्रत्ययस्येति विसर्जनीयस्य षत्वं। नः संख्यायाः। फि॰ २. ५.। इति चतुर्शब्द आद्युदात्तः। स एव बहुव्रीहिस्वरेण शिष्यते॥

॥ इति प्रथमस्य षष्ठे त्रिंशो वर्गः॥

षष्ठीमृचमाह॥

त्वमध्वर्युरुत होतासि पूर्व्यः प्रशास्ता पोता जनुषा पुरोहितः।
विश्वा विद्वाँ आर्त्विज्या धीर पुष्यस्यग्ने सख्ये मा रिषामा वयं तव॥ ६॥

त्वं। अध्वर्युः। उत। होता। असि। पूर्व्यः। प्रऽशास्ता। पोता। जनुषा। पुरःऽहितः।
विश्वा। विद्वान्। आर्त्विज्या। धीर। पुष्यसि। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥ ६॥

हे अग्ने त्वमध्वर्युरध्वरस्य यागस्य नेता देवान्प्रति प्रेरयिता यद्वा याग आध्वर्यवस्य कर्ता भवसि। अध्वर्यौ मनुष्ये जाठररूपेण वागिंद्रियाधिष्ठातृत्वेन वावस्थाय यागनिष्पादकोऽसि। उत अपि च पूर्व्यो मुख्यो होता देवानामाह्वाता पूर्ववद्धोतर्य-

वस्थाय हौत्रस्य कर्मणः कर्ता वासि । भवसि । मानुषो होता-मुख्यः । तदपेक्षयास्य मुख्यत्वं । तथा प्रशास्ता प्रकर्षेण शास्ता सर्वेषां शिक्षकोऽसि । यद्वा होतर्यज पोतर्यजेत्यादिना प्रैषेण शास्तीति मैत्रावरुणः प्रशास्ता । पूर्ववत्तस्मिन्नवस्थाय याग-निष्पादकोऽसि । पोता यज्ञस्य पावयिता शोधयितासि । यद्वा पोतृनामकस्यर्त्विजः पूर्ववदधिष्ठाय यागनिष्पादकोऽसि । तथा जनुषा जन्मना स्वाभाव्येन पुरोहितः पुरस्तादागामिति स्वर्गादौ हितोऽनुकूलाचरणोऽसि । यद्वा सर्वेषु कर्मसु पूर्वस्यां दिश्याह-वनीये स्थापितोऽसि । अथवा पुरोहितो ब्रह्मा देवपुरोहितस्य बृहस्पतेः प्रतिनिधित्वात् । तथा च मंत्रांतरं । बृहस्पतिर्देवानां ब्रह्माहं मनुष्याणामिति । अतस्तस्मिन्ब्रह्माणि पूर्ववदवस्थाय तद्रूपः सन्विश्वा सर्वाण्यार्त्विज्या ऋत्विजः कर्माण्याध्वर्यवादीनि विद्वान् जानंस्त्वं हे धीर प्राज्ञाग्ने पुष्यसि । न्यूनाधिकभावरा-हित्येन संपूर्णानि करोषि । अन्यत्समानं ॥ जनुषा । जनेरुसिः । पुरोहितः । दधाते कर्मणि निष्ठा । पूर्वाधरेत्यादिनासि-प्रत्ययांतः पुरस्शब्दोऽंतोदात्तः । तद्धितश्चासर्वविभक्तिरित्य-व्ययसंज्ञायां पुरोऽव्ययमिति गतित्वाद्गतिरनंतर इति पूर्वपद-प्रकृतिस्वरत्वं । आर्त्विज्या । ब्राह्मणादित्वात् ष्यञ् । ञित्त्वा-दाद्युदात्तत्वं ॥

सप्तमीमृचमाह ॥

यो विश्वतः सुप्रतीकः सदृङ्ङसि दूरे चित्सन्तळिदिवाति रोचसे ।
रात्र्याश्चिदंधो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव ॥ ७ ॥

थः। विश्वतः। सुऽप्रतीकः। सऽदृङ्। असि। दूरे। चित्।
सन्। तडित्ऽइव। अति। रोचसे।
रात्र्याः। चित्। अंधः। अति। देव। पश्यसि। अग्ने।
सख्ये। मा। रिषाम। वयं। तव ॥ ७ ॥

हे अग्ने यस्त्वं सुप्रतीकः शोभनांगः सन् विश्वतः सर्वस्मादपि सदृङ्ङसि। अन्यूनः सदृशो भवसि। स त्वं दूरे चित्सन् दूरेऽपि वर्तमानः सन् तडिदिव। अंतिकनामैतत्। अंतिके वर्तमान इवातिरोचसे। अतिशयेन दीप्यसे। तदुक्तं यास्केन। दूरेऽपि सन्नंतिक इव सन्दृश्यसे। नि० ३. ११.। इति। रात्र्याश्चित् रात्रेः संबंधिनमंधो बहुलमंधकारमपि हे देव द्योतमानाग्नेऽतिपश्यसि। अतीत्य प्रकाशयसि। अन्यत्पूर्ववत्॥ सुप्रतीकः। शोभनं प्रतीकोऽगं यस्य। क्रत्वादयश्चेत्युत्तरपदाद्युदात्तत्वं। सदृङ्। समानान्ययोश्चेति वक्तव्यं। पा० ३. २. ६०. १.। इति समानोपपदाद्दृशेः क्विन्। दृग्दृशवतुष्विति समानस्य सभावः। दृक्स्ववःस्वतवसां छंदसि। पा० ७. १. ८३.। इति नुम्। संयोगांतलोपः। क्विन्प्रत्ययस्य कुरिति कुत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। रात्र्याः। रात्रेश्चाजसौ। पा० ४. १. ३१.। इति ङीप्॥

अष्टमीमृचमाह॥

पूर्वो देवा भवतु सुन्वतो रथोऽस्माकं शंसो अभ्यस्तु दूढ्यः।
तदा जानीतोत पुष्यता वचोऽग्ने सख्ये मा रिषामा
वयं तव ॥ ८ ॥

पूर्वः। देवाः। भवतु। सुन्वतः। रथः। अस्माकं। शंसः।
अभि। अस्तु। दुःऽध्यः।

तत्। आ। जानीत। उत। पुष्यत। वचः। अग्ने।
सख्ये। मा। रिषाम। वयं। तव॥ ८॥

हे देवा अग्न्यवयवभूताः सर्वे देवाः सुन्वतः सोमाभिषवं कुर्वतो यजमानस्य रथः पूर्वं अन्येषामयजमानानां रथिभ्यो मुख्यो भवतु। अपि चास्माकं शंसः शंसनीयमभिशापरूपं पापं दूढ्यो दुर्धियः पापबुद्धीनस्मदनिष्टाचरणपराञ्छत्रून भ्यस्तु। अभिभवतु। तान्बाधतां। तदिदं मद्वाक्यं हे देवा आजानीत। आभिमुख्येनावगच्छत। उत अपि च तद्वचोऽस्मदीयं वचनं तदर्थाचरणेन पुष्यत। प्रवर्धयत। हे सर्वदेवात्मकाग्ने सख्य इत्यादि पूर्ववत्॥ सुन्वतः। शतुरनुम इति विभक्तेरुदात्तत्वं। शंसः। शंस्यते कीर्त्यत इति शंसोऽभिशापः। कर्मणि घञ्। ञित्त्वादाद्युदात्तत्वं। दूढ्यः। दुष्टं ध्यायंतीति दुर्धियः। ध्यै चिंतायामित्यस्मात् क्विप् चेति क्विप्। दृशिग्रहणानुवृत्तेस्तस्य च विध्यंतरोपसंग्रहार्थत्वात्संप्रसारणं। पृषोदरादिषु ध्यै चेति पाठाद्दुरो रेफस्योत्वं। उत्तरपदादेष्टुत्वं च॥

नवमीमृचमाह॥

वधैर्दुःशंसाँ अप दूढ्यो जहि दूरे वा ये अंति वा के चिदत्रिणः।
अथा यज्ञाय गृणते सुगं कृध्यग्ने सख्ये मा रिषामा वयं तव॥ ९॥

वधैः। दुःऽशंसान्। अप॑। दुःऽध्यः। जहि। दूरे। वा।
ये। अंति॑। वा। के। चित्। अत्रिणः।
अथ॑। यज्ञाय॑। गृणते। सुऽगं। कृधि। अग्ने॑। सख्ये॑।
मा। रिषाम। वयं॑। तव॑॥ ९॥

हे अग्ने त्वं वधैर्हननसाधनैरायुधैर्दुःशंसान्दुःखेन कीर्तनीयान्दूढ्यो दुर्धियः पापबुद्धीनपजहि। वधं प्रापय। ये केचित् ये केचन दूरे विप्रकृष्टदेशे वांतिके समीपदेशे वा वर्तमाना अत्रिणोऽत्तारो राक्षसादयो विद्यंते तान्दुर्धियोऽपजहीत्यर्थः। अथानंतरं यज्ञाय यज्ञपतये गृणते त्वां स्तुवते यजमानाय सुगं शोभनं मार्गं कृधि। कुरु। अन्यत्पूर्ववत्॥ वधैः। हनश्च वध इति हंतेः करणेऽप् वधादेशश्च। स चादंतोऽंतोदात्तः। तस्यातो लोपे सत्युदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं। दुःशंसान्। ईषद्दुःसुष्विति कर्मणि खल्। लितीति प्रत्ययात्पूर्वस्योदात्तत्वं। जहि। लोटि हिः। हंतेर्ज इति जादेशः। तस्यासिद्धवदत्रा भादित्यसिद्धत्वाद्धेर्लुगभावः। अंति। अंतिकस्य कादिलोपो बहुलमिति कलोपः। अत्रिणः। अदेस्त्रिनि चेति त्रिनिप्रत्ययः। इकारो नकारपरित्राणार्थः। गृणते। शतुरनुम इति विभक्तेरुदात्तत्वं। सुगं। सुदुरोरधिकरण इति गमेर्डः। कृधि। श्रुशृणुपृकृवृभ्यश्छंदसीति हेर्धिः। बहुलं छंदसीति विकरणस्य लुक्॥

दशमीमृचमाह ॥

यदयुक्था अरुषा रोहिता रथे वातजूता वृषभस्येव ते रवः ।

आदिन्वसि वनिनो धूमकेतुनाग्ने सख्ये मा रिषामा वयं तव ॥ १० ॥

यत् । अयुक्थाः । अरुषा । रोहिता । रथे । वातऽजूता । वृषभस्यऽइव । ते । रवः ।

आत् । इन्वसि । वनिनः । धूमऽकेतुना । अग्ने । सख्ये । मा । रिषाम । वयं । तव ॥ १० ॥

हे अग्ने । अरुषा रोचमानौ रोहिता लोहितवर्णौ । रोहित इत्यग्नेरश्वस्याख्या । रोहितोऽग्नेरिति दर्शनात् । रोहितेन त्वाग्निर्देवतानागमयत्विति मंत्रवर्णाच्च । एते वै देवाश्वा इति हि तत्र व्याख्यातं । वातजूतौ । वातस्य वायोर्जूतं जवो वेग इव ययोस्तौ । ईदृशावश्वौ रथे यद्यदायुक्थाः । अयोजयः । तदानीं वनानि दहतस्तव रवः शब्दो वृषभस्येव दृप्तस्य महोक्षस्य शब्द इव गंभीरो भवति । आदनंतरं वनिनो वनसंबद्धान्वृक्षान्धूमकेतुना । धूमः केतुः प्रज्ञापको यस्य तादृशेन रश्मिनेन्वसि । व्याप्नोषि । अन्यत्पूर्ववत् ॥ अयुक्थाः । [युजिर् योगे । लुङि झलो झलीति सकारस्य लोपः । अरुषेत्यादि-

द्विवचनेषु सुपां सुलुगित्याकारः। रवः। रु शब्दे। ऋदोरबिति भाविऽप्। इन्वसि। इवि व्याप्तौ। भौवादिकः। इदित्त्वान्नुम्॥

॥ इति प्रथमस्य षष्ठ एकत्रिंशो वर्गः॥

एकादशीमृचमाह॥

अध॑ स्व॒नादु॒त बि॑भ्युः प॒तत्रि॑णो द्र॒प्सा यत्ते॑ यव॒सादो॒
व्यस्थि॑रन्।
सु॒गं तत्ते॑ ताव॒केभ्यो॒ र॒थेभ्योऽग्ने॑ स॒ख्ये मा रि॑षामा
व॒यं तव॑॥ ११॥

अध॑। स्व॒नात्। उ॒त। बि॒भ्युः। प॒तत्रि॑णः। द्र॒प्साः। यत्।
ते॒। य॒व॒स॒ऽअदः॑। वि। अस्थि॑रन्।
सु॒ऽगं। तत्। ते॒। ता॒व॒केभ्यः॑। र॒थेभ्यः॑। अग्ने॑। स॒ख्ये॑।
मा। रि॒षा॒म॒। व॒यं। तव॑॥ ११॥

हे अग्ने। अध दग्धुं वनप्रवेशानंतरं स्वनात्त्वदीयात्पूर्वोक्तगंभीरशब्दात्। उतशब्दोऽप्यर्थः। पतत्रिणः पक्षिणोऽपि विभ्युः। विभ्यति भयं प्राप्नुवंति। उत्पतनेन देशांतरं गंतुं समर्थाः पक्षिणोऽपि यदा भयं प्राप्नुवंति किमु वक्तव्यमन्येषां तत्रत्यानां वृकादीनां भीतिर्जायत इति। अतस्त्वयि वनं प्रविशति सर्वे प्राणिनो भयं प्राप्नुवंतीत्यर्थः। तादृशस्य ते तव द्रप्सा ज्वालैकदेशा यवसादो यवसानामरण्ये वर्तमानानां तृणानामत्तारः संतो यद्यदा व्यस्थिरन्। विविधमवतिष्ठंते। तत्तदा ते तव सर्वमरण्यं सुगं सुखेन गंतुं शक्यं। अतस्ताव-

केभ्यस्त्वदीयेभ्यो रथेभ्यश्च तदरण्यं सुगं भवति । पूर्वं प्रवृत्तै-र्ज्वालाग्रैस्तृणादिषु दग्धेषु खलु त्वदीया रथाः प्रतिबंधमंतरेण पश्चाद्गच्छंतीति भावः । अन्यत्समानं ॥ बिभ्युः । ञिभी भये । छांदसो लिट् । एरनेकाच इति यण् । व्यस्थिरन् । समवप्रविभ्य इति तिष्ठतेरात्मनेपदं । लुङि व्यत्ययेन चस्य रन् । घ्वसोरि-च्चेतीत्वं । ह्रस्वादंगादिति सलोपः । तावकेभ्यः । तवकममका-वेकवचन इति युष्मदस्तवकादेशः ॥

द्वादशीमृचमाह ॥

अयं मित्रस्य वरु॑णस्य धाय॑सेऽवयातां म॒रुतां हेळो॒ अद्भु॑तः ।
मृळा सु नो भूत्वे॑षां मनः पुनरग्ने॑ सख्ये मा रि॑षामा
वयं॑ तव॑ ॥ १२ ॥

अयं॑ । मित्रस्य॑ । वरु॑णस्य । धाय॑से । अवऽयातां ।
म॒रुतां॑ । हेळ॑ः । अद्भु॑तः ।
मृळ । सु । नः । भूतु॑ । एषां । मनः॑ । पुनः॑ । अग्ने॑ ।
सख्ये॑ । मा । रिषाम । वयं॑ । तव॑ ॥ १२ ॥

अयमग्नेः स्तोता मित्रस्याहरभिमानिनो देवस्य वरुणस्य रात्र्यभिमानिनश्च संबंधिने धायसे धारणायावस्थापनाय भवतु । मित्रावरुणाविममग्नेः स्तोतारं धारयतामित्यर्थः । अवयाताम-वस्ताद्गच्छतां स्वर्गलोकस्याधस्तादंतरिक्षे वर्तमानानां मरुता-मेतत्संज्ञानां देवानां हेळः क्रोधोऽद्भुतो महान्भवति ।

अद्भुत इत्येतन्महन्नाम। तस्मात्क्रोधादिममग्नेः स्तोतारं मित्रावरुणौ रक्षतामिति शेषः। अपि च नोऽस्मान् हे अग्ने सु मृड़। सुष्टु मृडय। सुखय। एषां मरुतां मनश्च पुनर्भूतु। पुनरपि प्रसन्नं भवतु। अन्यत्समानं॥ धायसे। वहिहाधाञ्भ्यश्छंदसीति भावेऽसुन्। णिदित्यनुवृत्तेरातो युक् चिण्कृतोरिति युक्। अवयातां। या प्रापणे। अस्मादवपूर्वाल्लटः शतृ। शतुरनुम इति विभक्तेरुदात्तत्वं। मृड़ा। मृड सुखने। छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः। द्व्यचोऽतस्तिङ इति संहितायां दीर्घत्वं। भूतु। बहुलं छंदसीति शपो लुक्॥

त्रयोदशीमृचमाह॥

देवो देवानांमसि मित्रो अद्भुतो वसुर्वसूनामसि
चारुरध्वरे।
शर्मन्त्स्याम तवं सप्रथस्तमेऽग्ने सख्ये मा रिषामा
वयं तवं॥ १३॥

देवः। देवानां। असि। मित्रः। अद्भुतः। वसुः। वसूनां।
असि। चारुः। अध्वरे।
शर्मन्। स्याम। तवं। सप्रथःऽतमे। अग्ने। सख्ये।
मा। रिषाम। वयं। तवं॥ १३॥

हे अग्ने देवो द्योतमानस्त्वं देवानां सर्वेषामद्भुतो महान्मित्रोऽसि। प्रौढः सखा भवसि। तथा चारुः शोभनस्त्वमध्वरे

यज्ञे वसूनां सर्वेषां धनानां वसुरसि। निवासयिता भवसि। अतोऽस्माकं वसूनि देहीत्यर्थः। किंच संप्रथस्तमे सर्वतः पृथुतमेऽतिशयेन विस्तीर्णे तव त्वत्संबंधिनि शर्मणि यज्ञगृहे स्याम। प्रवर्तमाना भवेम। अन्यत्पूर्ववत्॥ शर्मन्। सुपां सुलुगिति सप्तम्या लुक्॥

चतुर्दशीमृचमाह॥

तत्ते भद्रं यत्समिद्धः स्वे दमे सोमाहुतो जरसे मृळयत्तमः।
दधासि रत्नं द्रविणं च दाशुषेऽग्ने सख्ये मा रिषामा
वयं तव॥ १४॥

तत्। ते। भद्रं। यत्। सम्ऽइद्धः। स्वे। दमे। सोमऽआहुतः। जरसे। मृळयत्ऽतमः।
दधासि। रत्नं। द्रविणं। च। दाशुषे। अग्ने। सख्ये। मा। रिषाम। वयं। तव॥ १४॥

हे अग्ने ते त्वत्संबंधि तत्खलु भद्रं भजनीयं। प्रशस्तमित्यर्थः। किं पुनस्तत्। स्वे दमे स्वकीय उत्तरवेदिलक्षणे निवासस्थाने। तस्यैष स्वो लोको यदुत्तरवेदीनाभिरिति श्रुतेः। तस्यामुत्तरवेद्यां समिद्धः सम्यक् इद्धः प्रज्वलितः सोमाहुतो हुतेन सोमरसेन संतर्पितः सन् जरसे। ऋत्विग्भिः स्तूयत इति यदस्ति तद्भद्रमित्यर्थः। एवं प्रशस्तस्त्वं मृळयत्तमोऽतिशयेनास्माकं सुखयिता भूत्वा रत्नं रमणीयं कर्मफलं वा द्रविणं धनं च दाशुषे हविर्दत्तवते यजमानाय दधासि। प्रयच्छसि।

अन्यत्समानं ॥ समिद्धः । ञिइंधी दीप्तौ । कर्मणि निष्ठा । श्वीदितो निष्ठायामितीट्प्रतिषेधः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सोमाहुतः । सोमेनाहुतः । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । जरसे । जरतिः स्तुतिकर्मा । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । यद्वृत्तयोगादनिघातः । दधासि । अनुदात्ते चेत्यभ्यस्तस्याद्युदात्तत्वं ॥

पंचदशीमृचमाह ॥

यस्मै त्वं सुद्रविणो ददाशोऽनागास्त्वमदिते सर्वताता ।

यं भद्रेण शवसा चोदयासि प्रजावता राधसा ते स्याम ॥१५॥

यस्मै । त्वं । सुऽद्रविणः । ददाशः । अनागाःऽत्वं ।

अदिते । सर्वऽताता ।

यं । भद्रेण । शवसा । चोदयासि । प्रजाऽवता । राधसा ।

ते । स्याम ॥ १५ ॥

हे सुद्रविणः शोभनधनादितेऽखंडनीयाग्ने सर्वताता सर्वासु कर्मततिषु । यद्वा सर्वेषु यज्ञेषु वर्तमानाय यस्मै यजमानायानागास्त्वमपापत्वं पापराहित्येन कर्मार्हतां त्वं ददाशः । प्रयच्छसि । स यजमानः समृद्धो भवति । यं च यजमानं भद्रेण भजनीयेन कल्याणेन शवसा बलेन चोदयासि । संयोजयसि । सोऽपि समृद्धो भवति । वयं च स्तोतारः प्रजावता प्रजाभिः पुत्रपौत्रैर्युक्तेन ते राधसा त्वया दत्तेन धनेन युक्ताः स्याम । भवेम ॥ सुद्रविणः । शोभनानि द्रविणानि धनानि यस्य । द्रु गतौ । द्रुदक्षिभ्यामिनन् । द्रविणशब्दस्यांते सकारोपजन

श्छांदसः । ददाशः । दाशृ दाने । लेट्यडागमः । बहुलं छंदसीति शपः श्लुः । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सर्वताता । सर्वदेवात्तातिलिति स्वार्थे तातिल्प्रत्ययः । यास्कपक्षे तु सर्वा स्तुतयो येषु यागेष्विति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वर्णव्यापत्त्यात्वं । उभयत्रापि सुपां सुलुगिति सप्तम्या डादेशः । चोदयासि । चुद प्रेरणे । लेट्यडागमः ॥

षोड़शीमृचमाह ॥

स त्वमग्ने सौभगत्वस्य विद्वानस्माकमायुः प्र तिरेह देव ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ १६ ॥

सः । त्वं । अग्ने । सौभगऽत्वस्य । विद्वान् । अस्माकं । आयुः । प्र । तिर । इह । देव ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ १६ ॥

हे देव दानादिगुणयुक्ताग्ने स पूर्वोक्तगुणविशिष्टस्त्वं सौभगत्वस्य सुभगत्वं सौभाग्यं विद्वान् जानन् इहास्मिन्कर्मण्यस्माकमायुः प्रतिर । प्रबर्धय । पपूर्वस्तिरतिर्वर्धनार्थः । त्वया प्रवर्धितं नोऽस्माकं तदायुर्मित्रादयः षट् देवता मामहंतां । पूजयंतां । रक्षंत्वित्यर्थः । मित्रः प्रमीतेस्त्राता । वरुणोऽवशिष्टानां निवारयिता । अदितिरदीनाखंडनीया वा देवमाता । सिंधुः स्यंदनशीलोदकात्मा देवता । पृथिवी प्रथिता भूदेवता ।

उतेति समुच्चये। द्यौः प्रकाशमाना द्युलोकात्मा देवता। एतास्त्र सर्वा अग्निना प्रवर्धितमायुरस्मभ्यं मंहतामिति पूर्वत्रान्वयः॥ सौभगत्वस्य। सुभगस्य भावः सौभगं। सुभगान्मन्त्र इत्युद्गात्रादिषु पाठादञ्विध्यञ्। पुनरपि भावप्रत्ययोत्पत्तिश्छांदसी। मामहंतां। मह पूजायां। भौवादिकः। लोटि बहुलं छंदसीति शपः श्लुः। तुजादित्वादभ्यासस्य दीर्घत्वं॥

॥ इति प्रथमस्य षष्ठे द्वात्रिंशो वर्गः॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन्।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वर॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके षष्ठोऽध्यायः समाप्तः॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

प्रथमे मंडले पंचदशेऽनुवाके प्रथमं सूक्तं व्याख्यातं। द्वे विरूपे इत्येकादशर्चं द्वितीयं सूक्तं। अत्रानुक्रम्यते। द्वे एकादशौषसाय वाग्नय इति। ऋषिश्चान्यस्मादिति परिभाषया कुत्सस्यानुवृत्तेरांगिरसः कुत्स ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। उषसि प्रातःकाले हविर्भाग्योऽग्निरस्ति स देवता। यद्वाग्नेयं तदिति पूर्वोक्तत्वात्तुह्यादिपरिभाषयेदमादीनि पंच सूक्तानि केवलाग्निदेवत्यानि। अतोऽस्य सूक्तस्यौषसगुणविशिष्टोऽग्निः शुद्धोऽग्निर्वा देवतेति वाशब्दार्थः। प्रातरनुवाकस्याग्नेये क्रतौ त्रैष्टुभे छंदसीदमादिके द्वे सूक्ते। तथा च सूत्रितमथैतस्या इति खंडे। द्वे विरूपे इति सूक्ते। आ० ४. १३.। इति॥ आश्विनशस्त्रे चैते प्रातरनुवाकन्यायेन तस्यैव समाम्नायस्येत्यतिदिष्टत्वात् ॥

तत्र प्रथमामृचमाह ॥

द्वे विरू॑पे चरतः॒ स्वर्थे॑ अ॒न्यान्या॑ व॒त्समुप॑ धापयेते ।
हरि॑र॒न्यस्यां॒ भव॑ति स्व॒धावा॑ञ्छु॒क्रो अ॒न्यस्यां॑ ददृशे
सु॒वर्चाः॑ ॥ १ ॥

द्वे इति॑ । विरू॑पे॒ इति॒ विऽरू॑पे । च॒र॒तः॒ । स्वर्थे॒ इति॑

सुऽअर्थे। अन्याऽअन्या। वत्सं। उपं।

धापयेते इति।

हरिः। अन्यस्यां। भवति। स्वधाऽवान्। शुक्रः।

अन्यस्यां। ददृशे। सुऽवर्चाः॥ १॥

स्वर्थे स्वरणे शोभनगमनागमने। यद्वा। अर्थः प्रयोजनं। शोभनप्रयोजनोपेते विरूपे विषमरूपे शुक्लकृष्णतया नानारूपे द्वे अहोरात्रे चरतः। पुनःपुनः पर्यावर्तेते। ते चाहोरात्रे अग्नेः सूर्यस्य च जनन्यौ। तत्र रात्रेः पुत्रः सूर्यः। स हि गर्भवद्रात्रावंतर्हितः सन् तस्याश्चरमभागादुत्पद्यते। अह्नः पुत्रोऽग्निः। स हि तत्र विद्यमानोऽपि प्रकाशराहित्येनासत्कल्पः सन् तस्मादह्नः सकाशान्निर्मुक्तः प्रकाशमानं स्वात्मानं लभते। अनयोरेतयोः पुत्रत्वं च तैत्तिरीयैराम्नायते। तयोरेतौ वत्सावग्निश्चादित्यश्च। रात्रेर्वत्सः श्वेत आदित्यः। अह्नोऽग्निस्ताम्रोऽरुण इति। ते चाहोरात्रे वत्सं स्वं स्वं पुत्रमन्यान्या परस्परव्यतिहारेणोपधापयेते। स्वकीयं रसं पाययतः। यद्रात्र्या कर्तव्यं स्वपुत्रस्यादित्यस्य रसस्य पायनं तदहः करोति। यदह्ना कर्तव्यं स्वपुत्रस्याग्ने रसस्य पायनं तद्रात्रिः करोति। एतच्च सायंप्रातःकालीनाहुत्यभिप्रायं। श्रूयते च। तस्मा अग्नये सायं हूयते सूर्याय प्रातरिति। यस्मादेवं तस्मादन्यस्यां स्वजनन्या अन्यस्यामहरात्मिकायामग्नेर्जनन्यां हरी रसहरणशील आदित्यः स्वधावान् हविर्लक्षणान्नवान्भवति। शुक्रो निर्मलदीप्तिरग्निः स्वजनन्या अन्यस्यां रात्रावादित्यस्य जनन्यां सुवर्चाः शोभन-

दीप्तियुक्तः सन्दृदृशे । दृश्यते ॥ स्वर्थं । ऋ गतौ । उषिकुषि-गार्तिभ्यस्थन्निति भावे कर्मणि वा थन्प्रत्ययः । नित्वादाद्यु-दात्तत्वं । शोभनऽर्थो ययोस्ते । आद्युदात्तं । द्व्यच् छंदसीत्यु-त्तरपदाद्युदात्तत्वं । अन्यान्या । कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं । समासवच्च बहुलमिति द्विर्भावः । बहुल-ग्रहणात्समासवद्भावाभावे तस्य परमाम्रेडितमिति परस्याम्रे-डितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं । धापयेते । धेट् पाने । आदेच इत्यात्वं । ततो हेतुमति णिच् । अर्तिह्रीत्यादिना धातोः पुगागमः । तत्र हि लक्षणप्रतिपदोक्तपरिभाषा नास्तीति ज्ञापितं शाच्छासाह्वाव्येति कृतात्वानां निर्देशेन । स हि युक्प्राप्तिख्यापनार्थः । यदि तत्र लक्षणप्रतिपदोक्तपरिभाषया युक् न प्राप्नोति सोऽनर्थकः स्यात् । तस्माद्ध्यापयतीत्यादाविव धापयेते इत्यत्रापि पुगागमः सिद्धः । निगरणचलनार्थेभ्यश्च । पा० १. ३. ८७. । इति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानं । पा० १. ३. ८९. १. । इति प्रतिषेधादात्मनेपदं । हरिः । हृञ् हरणे । औणादिक इन्प्रत्ययः । ञ्नित्यादिर्नित्य-मित्याद्युदात्तत्वं । भवति । एकान्याभ्यां समर्थाभ्यां । पा० ८. १. ६५. । इति प्रथमायास्तिङ्विभक्तेर्निघातप्रतिषेधः । ददृशे । दृशेश्छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । सुवर्चाः । शोभनं वर्चस्तेजो यस्य । सोर्मनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं ॥

द्वितीयामृचमाह ॥

दशेमं त्वष्टुर्जनयंत गर्भमतंद्रासो युवतयो विभृत्रं ।

तिग्मानीकं स्वयंशसं जनेषु विरोचमानं परि षीं नयंति ॥२॥

दश । इमं । त्वष्टुः । जनयंत । गर्भं । अतंद्रासः । युवतयः ।

विऽभृत्रं ।

तिग्मऽअनीकं । स्वऽयंशसं । जनेषु । विऽरोचमानं ।

परि । सीं । नयंति ॥ २ ॥

अतंद्रासः स्वकार्ये जगतः पोषणेऽनलसाः । आलस्यरहिता जागरूका इत्यर्थः । युवतयो नित्यतरुण्यः । जरामरणरहिता इत्यर्थः । एवंभूता दश प्राच्याद्या दशसंख्याका दिशो गर्भं मेघेषु गर्भरूपेणांतर्वर्तमानं त्वष्टुर्दीप्तान्मध्यमाद्वायोः सकाशाज्जनयंत । वैद्युतमग्निमुत्पादयंति । यद्वा दशसंख्याका अंगुलयस्त्वष्टुर्दीप्तस्य वायोर्गर्भं स्वकारणभूते वायौ गर्भरूपेण वर्तमानं । अग्नेर्हि वायुः कारणं वायोरग्निरिति श्रुतिः । एवंभूतमिममग्निमरण्योः सकाशाज्जनयंत । उत्पादयंति । कीदृश्योऽंगुलयः । अतंद्रासः पुनःपुनः कर्मकरणे आलस्यरहिताः । युवतयः । अपृथक्कृत्य वर्तमानाः । एकस्मिन्पाणौ संहत्यावस्थिता इत्यर्थः । कीदृशमग्निं । विभृत्रं । सर्वेषु भूतेषु विहृतं । जाठररूपेण विभज्य वर्तमानमित्यर्थः । तिग्मानीकं । तीक्ष्णतेजसं । अत एव हि वैद्युताग्निदर्शने दृष्टिः प्रतिहन्यते । स्वयशसं । स्वायत्तयशस्कं । अतिशयेन यशस्विनमित्यर्थः । जनेषु जनपदेषु सर्वदेशेषु विरोचमानं विशेषेण दीप्यमानं ।

बहूनामुपकारकमित्यर्थः। एवंभूतं सोमिनमग्निं परि परितः सर्वतो नयंति। स्वस्वोपकाराय सर्वे जनाः स्वकीयं देशं प्रापयंति॥ त्वष्टुः। त्विष दीप्तौ। नप्तृनेष्टृत्वष्टृ इत्यादिना। उ॰ २.९१.। उणादिषु तृनंतो निपातितः। अतो निच्चा-दाद्युदात्तत्वं। विभृत्रं। हृञ हरणे। अस्मात्कर्मणि निष्ठा। छांदसो रेफोपजनः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। हृग्रहोर्भ इति भत्वं। यद्वा। औणादिकः क्रप्रत्ययः। तिग्मा-नीकं। तिज निशाने। युजिरुचितिजां कुत्वं च। उ॰ १.१४४.। इति मक्। अन प्राणने। अनिहृशिभ्यां चेतीकन्। तिग्मं तीक्ष्णमनीकं यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। परि षीं। पूर्वपदादिति षत्वं॥

तृतीयामृचमाह॥

त्रीणि जाना परि भूषंत्यस्य समुद्र एकं दिव्येकमप्सु।
पूर्वामनु प्र दिशं पार्थिवानामृतून्प्रशासद्वि दधावनुष्ठु॥३॥

त्रीणि। जाना। परि। भूषंति। अस्य। समुद्रे। एकं।
दिवि। एकं। अप्ऽसु।
पूर्वां। अनु। प्र। दिशं। पार्थिवानां। ऋतून्। प्रऽशासत्।
वि। दधौ। अनुष्टु॥३॥

अस्याग्नेस्त्रीणि त्रिसंख्याकानि जाना जननानि जन्मानि परि भूषंति। परितः सर्वतोऽलंकुर्वंति। यद्वा परीत्येष समित्येतस्य स्थाने। अस्याग्नेस्त्रीणि जन्मानि संभवंति।

समुद्रेऽब्धौ वडवानलरूपेणैक जन्म। दिवि द्युलोक आदित्यात्मनैकं। अप्सु। आप इत्यंतरिक्षनाम। अंतरिक्षे वैद्युताग्निरूपेणैक। एवमग्निस्त्रेधात्मानं विभज्य त्रिषु स्थानेषु वर्तत इत्यर्थः। तत्रादित्यात्मना वर्तमानः सोऽग्निरृतूनवसंताद्यान् षडृतून्प्रशासत् प्रकर्षेण विभक्ततया ज्ञापयन्पार्थिवानां पृथिव्याः संबंधिनां सर्वेषां प्राणिनां पूर्वां प्राचीं प्रदिशं प्रकृष्टां ककुभं। अनुष्ठित्येतदव्ययं सम्यक्शब्दसमानार्थं सुष्ठिति यथा। सम्यगनुक्रमेण विदधौ। कृतवान्। स्वतो भेदरहितयोरखंडयोर्दिक्कालयोः प्राच्यादिभेदो वसंतादिभेदश्च सूर्यगत्या निष्पाद्यते। अतः सूर्य एव तयोः कर्तेत्यर्थः॥ जाना। जनी प्रादुर्भावे। वश्च। कर्षात्वत इत्यंतोदात्तत्वे प्राप्ते वृषादेराकृतिगणत्वादाद्युदात्तत्वं। श्नेश्छंदसि बहुलमिति श्नेर्लोपः। भूषति। भूष अलंकारे। भौवादिकः। यद्वा भवतेर्लेटि सिब्बहुलं लेटीति सिप्। आगमानुशासनस्यानित्यत्वादिडभावः संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावश्च। दिवि। अप्सु। ऊडिदंपदाद्यप्पुम्रैद्युभ्य इति विभक्तेरुदात्तत्वं। पार्थिवानां। पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः। प्रशासत्। शासु अनुशिष्टौ। अस्माल्लटः शतृ। जक्षित्यादयः षडित्यभ्यस्तसंज्ञायां नाभ्यस्ताच्छतुरिति नुम्प्रतिषेधः। कृदुत्तरपदप्रकृतिस्वरत्वं। अनुष्ठु। अपदुःसुषु स्थः। उ० १. २५,। इति विधीयमानः कुप्रत्ययो बहुलवचनात्तिष्ठतेरनुपूर्वादपि भवति॥

चतुर्थीमृचमाह ॥

क इमं वो निण्यमा चिकेत वत्सो मातृर्जनयत स्वधाभिः ।
बह्वीनां गर्भो अपसामुपस्थान्महान्कविर्निश्चरति
स्वधावान् ॥ ४ ॥

कः । इमं । वः । निण्यं । आ । चिकेत । वत्सः । मातृः ।
जनयत । स्वधाभिः ।
बह्वीनां । गर्भः । अपसां । उपऽस्थात् । महान् । कविः ।
निः । चरति । स्वधाऽवान् ॥ ४ ॥

हे ऋत्विग्यजमाना निण्यं । निर्णीतांतर्हितनामैतत् । अबादिषु गर्भरूपेणांतर्हितं । तथा च मंत्रांतरं । गर्भो यो अपां गर्भो वनानां गर्भश्च स्थातां गर्भश्चरथामिति । एवंभूतमिममग्निं वो युष्माकं मध्ये क आचिकेत । को जानाति । न कोऽपीत्यर्थः । सोऽयमग्निर्वत्सो मेघस्थानामपां वैद्युताग्निरूपेण पुत्रस्थानीयः सन् मातृस्तस्य मातृस्थानीयानि वृष्ट्युदकानि स्वधाभिर्हविर्लक्षणैरन्नैर्जनयत । उत्पादयति । तथा च स्मर्यते । अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति । अपि च बह्वीनां मेघस्थानामपां गर्भो वैद्युतरूपेण गर्भस्थानीयः सोऽग्निरपसामुपस्थात् समुद्रान्निश्चरति । औषसाग्निरूपेणादित्यः सन्निर्गच्छति । कीदृशः । महान् । तेजसा प्रौढः । कविः । क्रांतदर्शी । स्वधावान् । हविर्लक्षणान्नवान् । एक एवाग्नि-

र्वीमनिष्पादकलक्षणेन पार्थिवरूपेण वैद्युतात्मनौषधरूपेणादित्यात्मना च विभज्य वर्तत इत्यर्थः ॥ चिकेत । कित ज्ञाने । छांदसो लिट् । जनयत । जनी जृष क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं । पूर्ववच्छांदसो लङ् । बह्वीनां । नित्यं छंदसि । पा० ४. १. ४६. । इति बहुशब्दाङ्ङीष् । ह्रस्वान्छंदसि बहुलमिति नाम उदात्तत्वं । अपसां । आप्लृ व्याप्तौ । आपः कर्माख्यायां ह्रस्वश्च नुट् चेति बहुलवचनादकर्माख्यायामप्याप्नोतेरसिप्रत्ययो ह्रस्वश्च । उपस्थात् । उपतिष्ठंत्यापोऽत्रेत्युपस्थः । आतश्चोपसर्ग इति कृत्यल्युटो बहुलमिति बहुलवचनादधिकरणे कप्रत्ययः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं ॥

पंचमीमृचमाह ॥

आविष्ट्यो वर्धते चारुरासु जिह्मानामूर्ध्वः स्वयशा उपस्थे ।

उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रति जोषयेते ॥ ५ ॥

आविःऽत्यः । वर्धते । चारुः । आसु । जिह्मानां । ऊर्ध्वः ।

स्वऽयशाः । उपऽस्थे ।

उभे इति । त्वष्टुः । बिभ्यतुः । जायमानात् । प्रतीची इति ।

सिंहं । प्रति । जोषयेते इति ॥ ५ ॥

आसु मेघस्थास्वप्सु वैद्युतात्मना वर्तमानोऽग्निश्चारुः शोभनदीप्तिः सन् आविष्ट्यो वर्धते । आविर्भूतः प्रकाशमानो वृद्धिं प्राप्नोति । किं कुर्वन् । जिह्मानां कुटिलानां मेघेषु तिर्यग-

वस्थितानां तासामपामुपस्थ उत्संगे स्वयशाः स्वायत्तयशस्कोऽग्निरूर्ध्वं ऊर्ध्वज्वलनः सन् । स्वकारणभूतास्वप्सु तिर्यगवस्थितास्वपि स्वयमूर्ध्वं ज्वलन्नित्यर्थः । तदुक्तं वैशेषिकैः । अग्नेरूर्ध्वज्वलनं वायोस्तिर्यक्पवनं । अणुमनसोराद्यं कर्मेत्यन्यदृष्टकारितानीति । अपि च । उभे द्यावापृथिव्यौ त्वष्टुर्दीप्ताज्जायमानादुत्पद्यमानात्तस्मादग्नेर्बिभ्यतुः । भयं प्रापतुः । तदनंतरमुत्पन्नं सिंहं सहनशीलमभिभवनशीलं तमग्निं प्रतीची प्रत्यंचंतौ प्रतिगच्छंत्यावाभिमुख्येन प्राप्नुवंत्यौ जोषयेते । सेवेते । यास्कस्त्वाह । आविरावेदनात्तत्त्या वर्धते चारुरासु चारु चरतेर्जिह्मं जिहीतेरूर्ध्वं उच्छ्रितो भवति स्वयशा आत्मयशा उपस्थ उपस्थान उभे त्वष्टुर्बिभ्यतुर्जायमानात्प्रतीची सिंहं प्रतिजोषयेते द्यावापृथिव्याविति वाहोरात्रे इति वारणी इति वापि चैते प्रत्यक्ते सिंहं सहनं प्रत्यासेवेते । नि० ८. १५. । इति ॥ आविष्ट्यः । आविःशब्दाच्छंदसि । पा० ४. २. १०४. ६. । इति शैषिकस्त्यप् । ह्रस्वात्तादौ तद्धिते । पा० ८. ३. १०१. । इति षत्वं । आसु । इदमोऽन्वादेश इत्यशादेशोऽनुदात्तः । विभक्तिश्च सुप्त्वादनुदात्तेति सर्वानुदात्तत्वं । न गोऽश्वन्साविति विभक्तेरुदात्तत्वं शंकनीयं । अंतोदात्तादिदंशब्दाद्धि तद्विधीयते । प्रतीची । प्रतिपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । अंचतेश्चोपसंख्यानमिति ङीप् । अच इत्याकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं । वा छंदसीति पूर्वसवर्णदीर्घः । जोषयेते । जुषी प्रीतिसेवनयोः । स्वार्थे णिच् ॥

॥ इति प्रथमस्य सप्तमे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

उभे भद्रे जोषयेते न मेने गावो न वाश्रा उप तस्थुरेवैः ।
स दक्षाणां दक्षपतिर्बभूवांजंति यं दक्षिणतो हविर्भिः ॥६॥

उभे इति । भद्रे इति । जोषयेते इति । न । मेने इति ।
गावः । न । वाश्राः । उप । तस्थुः । एवैः ।
सः । दक्षाणां । दक्षऽपतिः । बभूव । अंजंति । यं ।
दक्षिणतः । हविःऽभिः ॥ ६ ॥

उभे अहश्च रात्रिश्च । यद्वा । उभे द्यावापृथिव्यौ । अरणी वा । भद्रे भजनीये शोभनांग्यौ मेने स्त्रियौ जोषयेते न । सेवेते इव । यथा शोभने स्त्रियौ चामरहस्ते राजानमुभयतः सेवेते । एवं द्यावापृथिव्यावेनमग्निमुभयतः सेवेते इत्यर्थः । अपि च वाश्रा हंभारवं कुर्वत्यो गावो न गावो यथैवैः स्वकीयैश्चरित्रैरादरातिशयेन स्वकीयान्वत्सानुपतस्थुः । संगच्छंते । तथेममग्निं द्यावापृथिव्यावुपस्थिते भवतः । पूर्व सेवनमात्रमुक्तं । इदानीं पुनर्गोनिदर्शनेन तत्रैवादरातिशयो द्योत्यते । अतः सोऽग्निर्दक्षाणां सर्वेषां बलानां दक्षपतिर्बलाधिपतिर्बभूव । आसीत् । बलानां मध्ये यदतिशयितं बलं तस्याधिपतिर्बभूवेत्यर्थः । यमग्निं दक्षिणत आहवनीयस्य दक्षिणभागेऽवस्थिता ऋत्विजो हविर्भिश्चरुपुरोडाशादिभिरंजंति । आर्द्रीकुर्वंति तर्पयंति । सोऽग्निरिति पूर्वेणान्वयः ॥ वाश्राः । वाशृ शब्दे । स्फायितंचीत्यादिना रक् । एवैः । इण् गतौ । इणशीङ्भ्यां वन्निति भावे वन्प्रत्ययः ॥

सप्तमीमृचमाह ॥

उद्यंयमीति सवितेव बाहू उभे सिचौ यतते भीम

ऋंजन्।

उच्छुक्रमत्कमजति सिमस्मान्नवा मातृभ्यो वसना

जहाति ॥ ७ ॥

उत्। यंयमीति। सविताऽइंव। बाहू इति। उभे इति।

सिचौ। यतते। भीमः। ऋंजन्।

उत्। शुक्रं। अत्कं। अजति। सिमस्मात्। नवा।

मातृऽभ्यः। वसना। जहाति ॥ ७ ॥

सवितेव सर्वस्य प्रेरक आदित्यो यथा बाहू बाहुस्थानीया-न्रश्मीनुन्नमयति। तथायमौषसोऽग्निः स्वकीयानि तेजांस्युद्यंय-मीति। भृशमुद्यतान्यूर्ध्वाभिमुखानि करोति। तदनंतरं भीमः सर्वेषां भयंकरोऽग्निरुभे सिचावुभे द्यावापृथिव्यौ ऋंजन् प्रसाधयन् स्वतेजसालंकुर्वन्यतते स्वव्यापारे प्रयतते। तदनंतरं सिमस्मात्सर्वस्माद्भूतजाताच्छुक्रं दीप्तमत्कं सारभूतं रसमुदजते। ऊर्ध्वं रश्मिभिरादत्ते। अपि च मातृभ्यः स्वमातृस्थानीयेभ्यो वृष्ट्युदकेभ्यः सकाशान्नवा नवानि प्रत्यग्राणि वसना सर्वस्य जगत आच्छादकानि तेजांसि जहाति। उन्नमयति ॥ यंयमीति। यम उपरमे। अस्माद्यङ्लुकि नुगतोऽनुनासिकांतस्य। पा० ७. ४. ८५.। इत्यभ्यासस्य नुगागमः। एतच्चानुस्वारेण लक्षणार्थं। सिचौ। षिच क्षरणे। सिंचतः फलेन संयोजयत

इति सिचौ द्यावापृथिव्यौ। क्षिप् चेति क्षिप्। यतते। यती प्रयत्ने। अतकं। अत सातत्यगमने। इण्भीकापाशल्यति-मर्चिभ्यः कन्निति कन्। निस्वादाद्युदात्तत्वं। सिमस्मात्। सिमशब्दः सर्वशब्दपर्यायः। नवा वसना। उभयत्र शेश्छंदसि बहुलमिति शेर्लोपः। जहाति। ओहाक् त्यागे। जौहो-त्यादिकः॥

अष्टमीमृचमाह॥

त्वेषं रूपं कृणुत उत्तरं यत्संपृंचानः सदने गोभिरद्भिः।
कविर्बुध्नं परि मर्मृज्यते धीः सा देवताता समितिर्बभूव॥८॥

त्वेषं। रूपं। कृणुते। उत्ऽतरं। यत्। संऽपृंचानः।
सदने। गोभिः। अत्ऽभिः।
कविः। बुध्नं। परि। मर्मृज्यते। धीः। सा। देवऽताता।
संऽइतिः। बभूव॥८॥

सदनेऽंतरिक्षे गोभिर्गंतृभिरद्भिर्मेघस्थाभिः सह संपृंचानो वैद्युतरूपेण संयुक्तः सन् त्वेषं दीप्तं सर्वैर्द्रष्टुमशक्यमुत्तर-मुत्कृष्टतरं रूपं वैद्युतं प्रकाशं यद्यदा कृणुते करोति। तदानीं कविः क्रांतदर्शी धीः सर्वेषां धारकः सोऽग्निर्बुध्नं सर्वस्योदकस्य मूलं मूलभूतमंतरिक्षं परि मर्मृज्यते। परितो मार्ष्टि स्वतेज-साच्छादयति। तस्याग्नेः सा देवताता। देवेन देवनशीले-नाग्निना तता विस्तारिता दीप्तिरस्माभिः स्तुता सती समितिर्बभूव। तेजसां संहतिर्भवति॥ संपृंचानः। पृची

संपर्क। रौधादिकः। अस्माल्लटः शानच्। श्नसोरल्लोप इत्यकार-लोपः। सीदंत्यस्मिन् गंधर्वादय इति सदनमंतरिक्षं। अधिकरणे ल्युट्। मर्मृज्यते। मृजूष् शुद्धौ। अस्माद्यङि मर्मृज्यते मर्मृज्यमानास इति चोपसंख्यानं। पा० ७. ४. ९१. १.। इति निपातनादभ्यासस्यस्य रुगागमः। देवताता। देवैन तता देवताता। तनोतेः कर्मणि निष्ठा। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। व्यत्ययेनात्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं ॥

नवमीमृचमाह ॥

उरु ते ज्रयः पर्येति बुध्नं विरोचमानं महिषस्य धाम।

विश्वेभिरग्ने स्वयशोभिरिद्धोऽदब्धेभिः पायुभिः

पाह्यस्मान् ॥ ९ ॥

उरु। ते। ज्रयः। परि। एति। बुध्नं। विऽरोचमानं।

महिषस्य। धाम।

विश्वेभिः। अग्ने। स्वयशःऽभिः। इद्धः। अदब्धेभिः।

पायुऽभिः। पाहि। अस्मान् ॥ ९ ॥

महिषस्य महतस्ते तव ज्रयो राक्षसादीनामभिभावुकं विरोचमानं विशेषेण दीप्यमानमुरु विस्तीर्णं धाम तेजो बुध्नमपां मूलभूतमंतरिक्षं पर्येति। परितो व्याप्नोति। हे अग्ने। इद्धोऽस्माभिः प्रज्वलितः सन् विश्वेभिः सर्वैः स्वयशोभिः स्वकीयैरात्मीयैस्तेजोभिरस्मान्पाहि। रक्ष। कीदृशैः। अद-

ब्धेभिः। राक्षसादिभिरहिंसितैः। पायुभिः। पालनशक्तैः॥ जयः। जि ज्रि अभिभवे। असुन्। अदब्धेभिः। दंभु दंभे। निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। अनिदितामिति नलोपः। झषस्तथोर्धोऽध इति धत्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। बहुलं छंदसीति भिस ऐसभावः॥

दशमीमृचमाह॥

धन्वन्स्रोतः कृणुते गातुमूर्मिं शुक्रैरूर्मिभिरभि नक्षति क्षां।

विश्वा सनानि जठरेषु धत्तेऽन्तर्नवासु चरति प्रसूषु॥ १०॥

धन्वन्। स्रोतः। कृणुते। गातुं। ऊर्मिं। शुक्रैः। ऊर्मिऽभिः।

अभि। नक्षति। क्षां।

विश्वा। सनानि। जठरेषु। धत्ते। अंतः। नवासु।

चरति। प्रऽसूषु॥ १०॥

धन्वन् नभसि गातुं गमनशीलमूर्मिमुदकसंघमयमग्निः स्रोतः कृणुते। स्रोतसा प्रवाहरूपेण युक्तं करोति। शुक्रैर्निर्मलैरूर्मिभिस्तैर्जलसंघैः क्षां भूमिमभिनक्षति। अभिव्याप्नोति। स्वतेजोभिरंतरिक्षे जलसंघमुत्पाद्य तेन सर्वां भूमिमभिवर्षतीत्यर्थः। पश्चाद्विश्वा सर्वाणि सनानि। अन्ननामैतत्। सर्वाण्यन्नानि जठरेषु धत्ते। अवस्थापयति। तदर्थं नवासु वृष्ट्यनंतरमुत्पन्नासु प्रसूषु सर्वेषामन्नानां प्रसवित्रीष्वोषधीषु पाकार्थमंतश्चरति। मध्ये वर्तते। अंतरवस्थितेन भौमाग्निना सर्वा ओषधयः पच्यंते॥ धन्वन्। रिवि रवि धवि गत्यर्थाः।

इदित्त्वान्नुम् । कनिन्युवृषीत्यादिना कनिन् । सुपां सुलुगिति सप्तम्या लुक् । धन्वांतरिक्षं धन्वंत्यस्मादाप इति यास्कः । नि० ५. ५. । नित्त्वादाद्युदात्तत्वं । गातुं । गाङ् गतौ । कमिमनिजनीत्यादिना तुप्रत्ययः । ऊर्मिं । अर्तेरूच्चेति मिप्रत्ययः । नक्षति । नक्ष गतौ ॥

एकादशीमृचमाह ॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे
वि भाहि ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी
उत द्यौः ॥ ११ ॥

एव । नः । अग्ने । सम्ऽइधा । वृधानः । रेवत् । पावक ।
श्रवसे । वि । भाहि ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः ।
पृथिवी । उत । द्यौः ॥ ११ ॥

हे पावक शोधकाग्ने समिधास्माभिर्दत्तेन समिदादिद्रव्येण । एवैवमुक्तप्रकारेण वृधानो वर्धमानः सन् रेवत् रयिमते धनयुक्ताय नोऽस्माकं श्रवसेऽन्नाय विभाहि । विशेषेण दीप्यस्व । अस्माकं तादृशमन्नं प्रयच्छेत्यर्थः । नोऽस्माकं तदन्नं मित्रादयो ममहंतां । पूजयंतां । रक्षंत्वित्यर्थः । उतशब्दः समुच्चये । पृथिवी च द्यौश्चेत्यर्थः ॥ एवा । निपातस्य चेति संहितायां दीर्घः । वृधानः । वृधेरंतर्भावितण्यर्थात्ताच्छीलिकश्चानश् । बहुलं छंदसीति शपो लुक् । चानशः सार्वधातुकत्वेन ङित्त्वा-

लघूपधगुणाभावः। लसार्वधातुकत्वाभावेनानुदात्तत्वाभावे चित्स्वर एव शिष्यते। रेवत्। रयिशब्दान्मतुप्। रयेर्मती बहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रेशब्दाच्चेति मतुप उदात्तत्वं। सुपां सुलुगिति चतुर्थ्या लुक्॥

॥ इति प्रथमस्य सप्तमे द्वितीयो वर्गः॥

स प्रत्नथेति नवर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभं। द्रविणोदस्त्वगुणविशिष्टोऽग्निः शुद्धाग्निर्वा देवता। तथा चानुक्रांतं। स प्रत्नथा नव द्रविणोदस इति॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तः सूक्तविनियोगः। व्यूढस्य दशरात्रस्य षष्ठेऽहन्याग्निमारुत इदं सूक्तं जातवेदस्यनिविद्धानं। व्यूढ़्हस्येदिति खंडे सूत्रितं। स प्रत्नथेत्याग्निमारुतं। आ० ८. ८.। इति। स प्रत्नथा सहसा जायमान इति जातवेदस्यं समानोदर्कमित्यादि ब्राह्मणं॥ महापितृयज्ञे स्विष्टकृत्स्थानीयस्य कव्यवाहनस्य स प्रत्नथेत्येषा याज्या। दक्षिणाग्निरिति खंडे सूत्रितं। स प्रत्नथा सहसा जायमान इत्यग्निः स्विष्टकृत्कव्यवाहनः। आ० २. १९.। इति॥

तामेतां सूक्ते प्रथमामृचमाह॥

स प्रत्नथा सहसा जायमानः सद्यः काव्यानि बड़धत्त विश्वा।
आपश्च मित्रं धिषणा च साधन्देवा अग्निं धारयन्द्रविणोदां॥ १॥

सः । प्रत्नऽथा । सहसा । जायमानः । सद्यः । काव्यानि ।
वट् । अधत्त । विश्वा ।
आपः । च । मित्रं । धिषणा । च । साधन् । देवाः ।
अग्निं । धारयन् । द्रविणःऽदां ॥ १ ॥

सहसा बलेन जायमानो निर्मथनेनोत्पद्यमानः सोऽग्निः सद्यस्तदानीमुत्पत्त्यनंतरमेव प्रत्नथा प्रत्न इव चिरंतन इव विश्वा विश्वानि सर्वाणि काव्यानि कवेः क्रांतदर्शिनः प्रगल्भस्य कर्माणि वट् सत्यमधत्त । अधारयत् । पूर्वं विद्यमान इवाग्नि-रुत्पत्तिसमकालमेव स्वकीयं हविर्वहनादिकं सर्वं कार्यमकरो-दित्यर्थः । इममग्निं वैद्युतरूपेण वर्तमानं मेघेष्ववस्थिता आपश्च धिषणा च या माध्यमिका वाक् सा च मित्रं सखिभूतं साधन् । साधयंति । कुर्वंति । तमिमं द्रविणोदां द्रविणस्य धनस्य दातारमग्निं देवा ऋत्विजो धारयन् । गार्हपत्यादिरूपेण धारयंति । यद्वा देवा एवेंद्रादय इममग्निं द्रविणोदां हवि-र्लक्षणस्य धनस्य दातारं कृत्वा दूत्ये धारयन् । धारयंति ॥ प्रत्नथा । प्रत्नपूर्वविश्वेमात्थाल् छंदसीतीवार्थे थाल्प्रत्ययः । काव्यानि । कवेः कर्म काव्यं । गुणवचनब्राह्मणादिभ्य इति ष्यञ् । ञित्वादाद्युदात्तत्वं । साधन् । षिधु संराद्धौ । षो सिध्यतेरपारलौकिक इत्यात्वं । लेट्यडागमः । इतश्च लोप इतोकारलोपः । छंदस्युभयथेति शप आर्द्धधातुकत्वाद्धेरनिटीति णिलोपः । द्रविणोदां । द्रविणानि ददातीति द्रविणोदाः । द्रु

गतौ। इदन्निभ्यामिनन्। छांदसः पूर्वपदस्य लुक्। अन्येभ्योऽपि दृश्यंत इति ददातेर्विच्। सकारांतं त्वसुनि कृते निष्पद्यते॥

द्वितीयामृचमाह॥

स पूर्व्या निविदा कव्यतायोरिमाः प्रजा अजनयन्मनूनां।

विवस्वता चक्षसा द्यामपश्च देवा अग्निं धारयन्द्रविणोदां॥२॥

सः। पूर्व्या। निऽविदा। कव्यता। आयोः। इमाः। प्रऽजाः।

अजनयत्। मनूनां।

विवस्वता। चक्षसा। द्यां। अपः। च। देवाः। अग्निं।

धारयन्। द्रविणःऽदां॥२॥

सोऽग्निः पूर्व्या प्रथमयाग्निर्देवेद्ध इत्यादिकया निविदा कव्यता गुणिनिष्ठगुणाभिधानलक्षणां स्तुतिं कुर्वतायोर्मनोः संबंधिनोक्षणेन च स्तूयमानः सोऽग्निर्मनूनां संबंधिनीरिमाः प्रजा अजनयत्। उदपादयत्। मनुना स्तुतः सन् मानवीः सर्वाः प्रजा अजनयदित्यर्थः। तथा विवस्वता विवासनवता विशेषेणाच्छादयता चक्षसालोकेन तेजसा द्यां द्युलोकमपश्चांतरिक्षं च व्याप्नोतीति शेषः। अन्यत्समानं॥ कव्यता। कु शब्दे। अचो यदिति भावे यत्। कव्यं कवनं स्तुतिं करोति। तत्करोतीति णिच्। तदंतात् क्विप्। बहुलमन्यत्रापि संज्ञाच्छंदसोरिति णिलुक्। तत्तस्तुक्। धातुस्वरेणांतोदात्तत्वं। आयोः। इण् गतौ। छंदसीण इत्युणप्रत्ययः॥

तृतीयामृचमाह ॥

तमीड़त प्रथमं यज्ञसाधं विश आरीराहुतमृंजसानं ।

ऊर्जः पुत्रं भरतं सृप्रदानुं देवा अग्निं धारयन्द्रविणोदां ॥३॥

तं । ईड़त । प्रथमं । यज्ञऽसाधं । विशः । आरीः ।

आऽहुतं । ऋंजसानं ।

ऊर्जः । पुत्रं । भरतं । सृप्रऽदानुं । देवाः । अग्निं ।

धारयन् । द्रविणःऽदां ॥ ३ ॥

हे विशः सर्वे मनुष्याः । आरीरग्निं स्वामिनं गच्छंत्यो यूयं तमग्निमीड़त । स्तुध्वं । कीदृशं । प्रथमं । सर्वेषु देवेषु मुख्यं । यज्ञसाधं । यज्ञस्य दर्शपूर्णमासादेः साधकं निष्पादकं । आहुतं । हविर्भिस्तर्पितं । ऋंजसानं । स्तोत्रैः प्रसाध्यमानं । ऊर्जोऽन्नस्य पुत्रं । भुक्तेनान्नेन जाठराग्नेर्वर्धनादग्नेरन्नपुत्रत्वं । भरतं । हविषां भर्तारं । यद्वा प्राणरूपेण सर्वासां प्रजानां भर्तारं । श्रूयते च । एष प्राणो भूत्वा प्रजा बिभर्ति तस्मादेष भरत इति । सृप्रदानुं । सर्पणशीलदानयुक्तं । अविच्छेदेन धनानि प्रयच्छंतमित्यर्थः । देवा इत्यादि गतं ॥ ईड़त । ईड स्तुतौ । लोटि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति लुगभावः । यज्ञसाधं । यज्ञं साधयतीति यज्ञसात् । साधयतेः क्विप् । णेरनिटीति णिलोपः । आरीः । ऋ गतौ । सृंचिसृती- त्यादिना । पा० ३. १. २२. १. । यङ् । यङोऽचि चेति चशब्देन बहुलग्रहणानुकर्षणादनैमित्तिको लुक् । प्रत्ययलक्षणेन

द्विर्भावः । उरदत्वहलादिशेषौ । रुग्रिकौ च लुकीति रुक् । यङ्लुगंतादौणादिकः क्रिप्रत्ययः । यणादेशे रो रीति रेफलोपः । ढ्रलोपे पूर्वस्येति दीर्घत्वं । ऋदिकारादक्तिन इति ङीष् । जसि वा छंदसीति पूर्वसवर्णदीर्घत्वं । व्यत्ययेनाद्युदात्तत्वं । ऋंजसानं । ऋंजतिः प्रसाधनकर्मा । ऋंजिवृधिमंदिसहिभ्यः किदिति कर्मण्यसानच् । भरतं । भृञ् भरणे । भृमृदशीत्यादिनातच् । स्तृप्रदानुं । स्तृ गतौ । स्फायितंचीत्यादिना रक् । स्तृप्रो दानुर्दानं यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

चतुर्थीमृचमाह ॥

स मातरिश्वा पुरुवारपुष्टिर्विदद्गातुं तनयाय स्वर्वित् ।
विश्वां गोपा जनिता रोदस्योर्देवा अग्निं
धारयन्द्रविणोदां ॥ ४ ॥

सः । मातरिश्वा पुरुवारऽपुष्टिः । विदत् । गातुं ।
तनयाय । स्वःऽवित् ।
विश्वां । गोपाः । जनिता । रोदस्योः । देवाः । अग्निं ।
धारयन् । द्रविणःऽदां ॥ ४ ॥

सोऽग्निस्तनयायास्मदीयाय पुत्राय गातुमनुष्ठानमार्गं विदत् । लंभयतु । कीदृशः । मातरिश्वा । मातरि सर्वस्य जगतो निर्मातर्यंतरिक्षे श्वसन्वर्तमानः । पुरुवारपुष्टिः । पुरुभिर्बहुभिर्वारा वरणीया पुष्टिरभिवृद्धिर्यस्य स तथोक्तः । स्वर्वित् ।

स्वः स्वर्गस्य यागद्वारेण लंभयिता। विशां सर्वासां प्रजानां गोपा गोपायिता रक्षिता। रोदस्योर्द्यावापृथिव्योर्जनिता जनयितोत्पादयिता। देवा इत्यादि गतं॥ मातरिश्वा। श्वन्नुक्षन्नित्यादौ मातृशब्दोपपदात् श्वस प्राणन इत्यस्मात् कनिन्प्रत्ययांतो निपात्यते। विदत्। विद्लृ लाभे। अस्मादंतर्भावितण्यर्थाच्छांदसो लुङ्। लृदित्वात् च्लेरङादेशः। पादादित्वान्निघाताभावः। जनिता। जनिता मंत्रे। पा० ६. ४. ५३. । इति तृचि णिलोपो निपात्यते॥

पंचमीमृचमाह॥

नक्तोषासा वर्णमामेम्यांने धापयेते शिशुमेकं समीची।
द्यावाक्षामा रुक्मो अंतर्वि भाति देवा अग्निं
धारयन्द्रविणोदां॥ ५॥

नक्तोषसा। वर्णं। आमेम्यांने इत्याऽमेम्यांने। धापयेते इति। शिशुं। एकं। समीची इति सम्ऽईची।
द्यावाक्षामा। रुक्मः। अंतः। वि। भाति। देवाः।
अग्निं। धारयन्। द्रविणःऽदां॥ ५॥

नक्तोषासा रात्रिरहश्च वर्णं स्वकीयं स्वरूपमामेम्याने परस्परं पुनःपुनर्हिंसंत्यौ समीची संगते संश्लिष्टे। एवंभूते अहःस्त्रियावेकं शिशुमङ्गः पुत्रमग्निं धापयेते। हवींषि पाययेते। रुक्मो रोचमानः सोऽग्निर्द्यावाक्षामा द्यावापृथिव्योरंतर्मध्ये

विभाति। विशेषेण प्रकाशते। अन्यत्पूर्ववत्॥ नक्तोषासा। नक्तेति रात्रिनाम। नक्तोषाश्च नक्तोषसा। सुपां सुलुगिति विभक्तेराकारः। अन्येषामपीति सांहितिकमुपधादीर्घत्वं। देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं। आमेम्याने। मीङ् हिंसायां। अस्माद्यङ्लुगंताद्व्यत्ययेन शानच्। अदादिवच्चेति वचनाच्छपो लुक्। एरनेकाच इति यण्। अभ्यस्तानामादिरित्याद्युदात्तत्वं। कृदुत्तरपदप्रकृतिस्वरत्वं। धापयेते। धेट् पाने। अस्माण्ण्यंतान्निगरणचलनेति प्राप्तस्य परस्मैपदस्य पादिषु धेट उपसंख्यानमिति वचनात् न पादम्याङ्यम। पा० १. ३. ८९.। इति प्रतिषेधः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे णिच एव स्वरः शिष्यते। पादादित्वान्निघाताभावः। समीची। संपूर्वादंचतेर्ऋत्विगित्यादिना क्विन्। अनिदितामिति नलोपः। समः समीति सम्यादेशः। अंचतेश्चोपसंख्यानमिति ङीप्। अच इत्यकारलोपे चाविति दीर्घत्वं। उदात्तनिवृत्तिस्वरेण ङीप उदात्तत्वं। परकारस्य त्वयमभिप्रायः। उद ईदिति विधीयमानमीत्वं सम उत्तरस्याप्यंचतेर्व्यत्ययेन भवतीति। वा छंदसीति पूर्वसवर्णदीर्घत्वं। द्यावाक्षामा। दिवो द्यावेति द्यावादेशः। देवताद्वंद्वे चेति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं॥

॥ इति प्रथमस्य सप्तमे तृतीयो वर्गः॥

षष्ठीमृचमाह॥

रायो बुध्नः संगमनो वसूनां यज्ञस्य केतुर्मन्मसाधनो वेः।

अमृतत्वं रक्षमाणास एनं देवा अग्निं धारयन्द्रविणोदां॥६॥

रायः । बुध्नः । संऽगमनः । वसूनां । यज्ञस्य । केतुः ।
मन्मऽसाधनः । वेरिति । वेः ।
अमृतऽत्वं । रक्षमाणासः । एनं । देवाः । अग्निं । धारयन् ।
द्रविणःऽदां ॥ ६ ॥

योऽग्नि रायो धनस्य बुध्नो मूलभूतः । आहुतिद्वारा सर्वेषां धननां कारणत्वात् । वसूनां निवासहेतूनां धनानां संगमनः संगमयिता । स्तोतॄणां प्रापयिता । यज्ञस्य दर्शपूर्णमासादेः केतुः केतयिता ज्ञापयिता । वेरात्मानमभिगच्छतः पुरुषस्य मन्मसाधनो मननीयस्याभिलषितस्य साधयिता । अमृतत्वं स्वकीयामरणत्वं रक्षमाणासः पालयंतो देवा एनं धनस्य दातारमग्निं धारयंति ॥ रायः । ऊडिदमिति विभक्तेरुदात्तत्वं । संगमनः । नंद्यादिलक्षणो ल्युः । वेः । वी गत्यादिषु । अस्मादौणादिक इप्रत्ययः । टिलोपश्च ॥

सप्तमीमृचमाह ॥

नू च पुरा च सदनं रयीणां जातस्य च जायमानस्य च क्षां ।
सतश्च गोपां भवतश्च भूरेर्देवा अग्निं धारयन्द्रविणोदां ॥७॥

नु । च । पुरा । च । सदनं । रयीणां । जातस्य । च ।
जायमानस्य । च । क्षां ।
सतः । च । गोपां । भवतः । च भूरेः । देवाः । अग्निं ।
धारयन् । द्रविणःऽदां ॥ ७ ॥

नू चेति निपातसमुदाय अद्येत्यस्यार्थे । नू चिदिति निपातः पुराणनवयोर्नू च । नि० ४. १७. । इति यास्कः । नू चाद्यास्मिन्काले पुरा च रयीणां सर्वेषां धनानां सदनमावासस्थानं जातस्योत्पन्नस्य कार्यजातस्य जायमानस्योत्पद्यमानस्य च क्षां निवासयितारं । सतश्च सर्वत्र विद्यमानस्वभावस्य नित्यस्य चाकाशादेर्भवतश्च सद्भावं प्राप्नुवतो भूरेरसंख्यातस्यान्यस्य च भूतजातस्य गोपां गोपायितारं रक्षितारं द्रविणोदां धनप्रदं । एवंगुणविशिष्टमग्निं देवा धारयन् । हविर्वोढृत्वेन धारयंति ॥ नू च । ऋचि तुनुघेति दीर्घः । रयीणां । नामन्यतरस्यामिति नाम उदात्तत्वं । क्षां । क्षि निवासगत्योः । अस्मात्सिच् । छंदस्युभयथेति । वर्ण्यंतात्क्विप् । णेरनिटीति णिलोपः । वेरपृक्तलोपाद्वलि लोपो बलीयानिति पूर्वं लोपो व्योर्वलीति यलोपः । न च णिलोपस्य स्थानिवत्त्वं । न पदांतद्विर्वचनवरेयलोपेति प्रतिषेधात् । यद्वा क्षे जै खै क्षयै । अस्मात्क्विप् । आदेच इत्यात्वं । सतः । अस्तेः शतर्यदादित्वाच्छपो लुक् । श्नसोरल्लोप इत्यकारलोपः । शतुरनुम इति विभक्तेरुदात्तत्वं ॥

अष्टमीमृचमाह ॥

द्रविणोदा द्रविणसस्तुरस्य द्रविणोदाः सनरस्य प्र यंसत् ।

द्रविणोदा वीरवतीमिषं नो द्रविणोदा रासते दीर्घमायुः ॥८॥

द्रविणःऽदाः । द्रविणसः । तुरस्य । द्रविणःऽदाः ।

सनरस्य । प्र । यंसत् ।

द्रविणःऽदाः । वीरऽवतीं । इषं । नः । द्रविणःऽदाः ।
रासते । दीर्घं । आयुः ॥ ८ ॥

द्रविणोदा द्रविणस्य धनस्य बलस्य वा दाताग्निस्तुरस्य त्वरमाणस्य चलतो जंगमस्य द्रविणसो बलस्य धनस्य वैकदेशं प्रयंसत् । अस्मभ्यं प्रयच्छतु । तथा द्रविणोदाः सनरस्य सननीयस्य संभजनीयस्य स्थावररूपस्य धनस्यैकदेशं प्रयच्छतु । अपि च द्रविणोदा वीरवतीं वीरैः पुत्रादिभिर्युक्तामिषमन्नं नोऽस्मभ्यं प्रयच्छतु । तथा द्रविणोदा दीर्घमायुरस्मभ्यं रासते । प्रयच्छतु ॥ तुरस्य । तुर त्वरणे । इगुपधलक्षणः कः । सनरस्य । षन षण संभक्तौ । कदरादयश्च । उ॰ ५. ४. । इत्यरन्प्रत्ययः । यंसत् । यम उपरमे । लेटयडागमः । सिब्बहुलं लेटीति सिप् । रासते । रा दाने । पूर्ववल्लेटि सिप् । व्यत्ययेनात्मनेपदं ॥

नवमीमृचमाह ॥

एवा नो अग्ने समिधा वृधानो रेवत्पावक श्रवसे
वि भाहि ।
तन्नो मित्रो वरुणो मामहन्तामदितिः सिंधुः पृथिवी
उत द्यौः ॥ ९ ॥

एव । नः । अग्ने । सम्ऽइधा । वृधानः । रेवत् । पावक ।
श्रवसे । वि । भाहि ।

तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः।
सिंधुः। पृथिवी। उत। द्यौः॥ ८॥

व्याख्यातेयं पूर्वसूक्ते। अक्षरार्थस्तु हे शोधकाग्ने। एवमस्माभिर्दत्तेन समिदादिद्रव्येण वृधानो वर्धमानः सन् नोऽस्माकं धनयुक्तायान्नाय विशेषेण प्रकाशस्व। अस्माकं तदन्नं मित्रादयो मामहंतां। पूजयंतां। रक्षंत्वित्यर्थः। तथा सिंधुरब्देवता द्यावापृथिव्यौ च मामहंतां॥

॥ इति प्रथमस्य सप्तमे चतुर्थो वर्गः॥

अप न इत्यष्टर्चं चतुर्थं सूक्तं कुत्सस्यार्षं गायत्रं। शुचिगुणकोऽग्निः शुद्धोऽग्निर्वा देवता। तथा चानुक्रांतं। अप नोऽष्टौ शुचये गायत्रमिति। विनियोगो लैंगिकः॥ अत्रेदमाख्यानं। दीर्घजिह्वो नाम राक्षसी सर्वान्यज्ञान्बबाधे। तां हंतुमिंद्रोऽशक्तः सन् सर्वस्य मित्रभूतं कुत्समब्रवीदेषा त्वया हंतव्येति। स चावधीत्। तं वागभ्यवदत् अनुचितमिदं त्वया चरितं यत्त्वं सर्वेषां मित्रभूतः सन् क्रूरमकार्षीरिति। तमृषिं शोकः प्राप्नोत्। स ऋषिरनेन सूक्तेनाग्निं स्तुत्वा शोकमपागमयत्। तथा च तांड्यकं। दीर्घजिह्वी नाम राक्षसी यज्ञानवलिहंत्यचरत्। तामिंद्रः कया च मायया हंतुं नाशंसत्। अथ ह सुमित्रः कुत्सः कल्याण आस। तमब्रवीदित्यादि। तस्मादेतत्सूक्तं शुगपनयनाय विनियोज्यं। अत एव हि सूत्रकारेण भारद्वाजेन दशमेऽहनि कर्तव्ये शांतिकर्मणि यजुर्वेदे पठितमेतत्सूक्तं विनियुज्यते। नव च स्रुचाहुतीरप नः शोशुचदघमिति॥

तत्र प्रथमामृचमाह ॥

अप॑ नः॒ शोशु॑चद॒घमग्ने॑ शुशु॒ग्ध्या र॒यिं । अप॑ नः॒ शोशु॑चद॒घं ॥ १ ॥

अप॑ । नः॒ । शोशु॑चत् । अ॒घं । अग्ने॑ । शु॒शु॒ग्धि । आ । र॒यिं । अप॑ । नः॒ । शोशु॑चत् । अ॒घं ॥ १ ॥

हे अग्ने नोऽस्माकमघं पापमपशोशुचत् । अस्मत्तो निर्गत्यास्मदीयं शत्रुं शोचयतु । यद्वा । अस्मदीयं पापं शोशुचत् । शोकग्रस्तं सद्विनश्यतु । अपि चास्माकं रयिं धनमा समन्ताच्छुशुग्धि । प्रकाशय । उक्तार्थमपि वाक्यमादरातिशयद्योतनाय पुनः पठ्यते । अवश्यमस्माकमघं विनश्यत्विति ॥ शोशुचत् । शुच शोके । अस्माद्यङ्लुगंताल्लेट्यडागमः । अदादिवच्चेति वचनाच्छपो लुक् । अभ्यस्तानामादिरित्याद्युदात्तत्वं । अघं शोशुचद्रयिं शुशुग्धि चेति चार्थप्रतीतेश्चादिलोपे विभाषेति निघातप्रतिषेधः । शुशुग्धि । शुच दीप्तौ । लोटि बहुलं छंदसीति शपः श्लुः । हुझल्भ्यो हेर्धिः । चोः कुरिति कुत्वं ॥

द्वितीयामृचमाह ॥

सु॒क्षे॒त्रि॒या सु॑गातु॒या व॑सू॒या च॑ यजामहे । अप॑ नः॒ शोशु॑चद॒घं ॥ २ ॥

सु॒ऽक्षे॒त्रि॒या । सु॒गा॒तु॒ऽया । व॒सु॒ऽया । च॒ । य॒जा॒म॒हे॒ । अप॑ । नः॒ । शोशु॑चत् । अ॒घं ॥ २ ॥

सुचेत्रिया शोभनचेत्रेच्छया सुगातुया शोभनमार्गेच्छया वसूया च धनेच्छया निमित्तभूतया च यजामहे। अग्निं हविर्भिः पूजयामहे। यद्वा। सुचेत्रिया देवयजनलक्षणशोभन-देशसंबंधिना हविषाग्निं यजामहे। नोऽस्माकमघमपशो-शुचत्। विनश्यतु॥ सुचेत्रिया। शोभनं चेत्रं सुचेत्रं। तदिच्छ-येच्छा सुचेत्रिया। सुप आत्मनः क्यच्। न छंदस्यपुत्रस्येतीत्व-दीर्घयोर्निषेधः। व्यत्ययेनेत्वं। क्यजंतात् अ प्रत्ययादिति भावे-ऽकारप्रत्ययः। ततष्टाप्। सुपां सुलुगिति तृतीयाया लुक्। एवमुत्तरत्रापि। यद्वा शोभनं चेत्रमस्यास्तीति सुचेत्रं। इयाडि-याजीकाराणामुपसंख्यानमिति तृतीयाया डियाजादेशः॥

तृतीयामृचमाह॥

प्र यद्भंदिष्ठ एषां प्रास्माकासश्च सूरयः। अप नः

शोशुचदघं॥ ३॥

प्र। यत्। भंदिष्ठः। एषां। प्र। अस्माकासः। च।

सूरयः। अप। नः। शोशुचत्। अघं॥ ३॥

यद्यथैषां स्तोतृणां मध्येऽयं कुत्सः प्रभंदिष्ठः प्रकर्षेण स्तोतृ-तमः। एवमस्माकासोऽस्माकीनाः सूरयः स्तोतारश्च प्रकर्षेण स्तोतृतमा भवंति। अन्यत्समानं॥ भंदिष्ठः। भंदतिः स्तुति-कर्मा। भदि कल्याणे सुखे चेति तु धातुः। अस्मात्तृजंतात्तु-श्छंदसीतीष्ठन्। तुरिष्ठेमेयःस्विति तृलोपः। अस्माकासः। अस्माकं संबंधिनोऽस्माकाः। तस्मिन्नणि च युष्माकास्माका-वित्यस्माकादेशः। छांदसोऽणप्रत्ययस्य लोपः। संज्ञापूर्वकस्य

बिधेरनित्यत्वाद्वृद्ध्यभावः । आज्जसेरसुक् । स्थानिवदादेशोऽपि मकारात्परस्याकारस्योदात्तत्वं । यद्वा षष्ठीबहुवचने ऽस्मार्क-शब्दस्य मध्योदात्तस्य दृष्टत्वात्स एवाचार्येणातिदिश्यते ॥

चतुर्थीमृचमाह ॥

प्र यत्ते अग्ने सूरयो जायेमहि प्र ते वयं । अप नः शोशुचदघं ॥ ४ ॥

प्र । यत् । ते । अग्ने । सूरयः । जायेमहि । प्र । ते । वयं । अप । नः । शोशुचत् । अघं ॥ ४ ॥

हे अग्ने यद्यस्मात्ते तव सूरयः स्तोतारः प्रजायंते । पुत्र-पौत्रादिरूपेण बहुविधा भवंति । ततो वयं च ते तव स्तोतारः संतः प्रजायेमहि । पुत्रपौत्रादिभिरुपेता भवेम ॥ जायेमहि । प्रार्थनायां लिङ् । श्यनि ज्ञाजनोर्जेति जादेशः । अदुपदेशाल्ल-सार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं ॥

पंचमीमृचमाह ॥

प्र यदग्नेः सहस्वतो विश्वतो यंति भानवः । अप नः शोशुचदघं ॥ ५ ॥

प्र । यत् । अग्नेः । सहस्वतः । विश्वतः । यंति । भानवः । अप । नः । शोशुचत् । अघं ॥ ५ ॥

सहस्वतः सहनवतः शत्रूनभिभवतोऽग्नेर्भानवो दीप्तयो विश्वतः सर्वतः सर्वस्मादपि प्रदेशात्प्रयंति । प्रकर्षेणोद्गच्छंति ।

अघमस्मादेवं तस्मात्तेनाग्नितेजसास्मदीयमघं नश्यतु ॥ यंति । इणो यण् । पा० ६. ४. ८१. । इति यणादेशः ॥

षष्ठीमृचमाह ॥

त्वं हि विश्वतोमुख विश्वतः परिभूरसि । अप नः शोशुचदघं ॥ ६ ॥

त्वं । हि । विश्वतःऽमुख । विश्वतः । परिऽभूः । असि । अप । नः । शोशुचत् । अघं ॥ ६ ॥

हे अग्ने त्वं हि त्वं खलु विश्वतोमुखः सर्वतोज्वालः । तव मुखस्थानीयानां ज्वालानां न कुत्रापि प्रतिहतिरस्ति । अतो हे विश्वतोमुखाग्ने विश्वतः सर्वतः सर्वस्मादप्युपद्रवजातात्परिभूरसि । अस्माकं परिग्रहीता भव । रक्षको भवेत्यर्थः । अन्यत्समानं ॥

सप्तमीमृचमाह ॥

द्विषो नो विश्वतोमुखाति नावेव पारय । अप नः शोशुचदघं ॥ ७ ॥

द्विषः । नः । विश्वतःऽमुख । अति । नावाऽइव । पारय । अप । नः । शोशुचत् । अघं ॥ ७ ॥

हे विश्वतोमुख सर्वतोमुखाग्ने नावेव नावा नदीमिव द्विषः शत्रूनोऽस्मानतिपारय । अतिक्रमय्य शत्रुरहितं प्रदेशं प्रापय ॥

नावाऽइव । सावेकाच इति विभक्तेरुदात्तत्वं । पारय । पार कर्मसमाप्तौ ॥

अष्टमीमृचमाह ॥

स नः सिंधुमिव नावयाति पर्षा स्वस्तये । अप नः शोशुचदघं ॥ ८ ॥

सः । नः । सिंधुंऽइव । नावया । अति । पर्ष । स्वस्तये । अप । नः । शोशुचत् । अघं ॥ ८ ॥

पूर्वोक्त एवार्थः पुनरपि दार्ढ्याय प्रार्थ्यते । हे अग्ने स त्वं नोऽस्मान्नावया नावा सिंधुमिव नदीमिव स्वस्तये क्षेमार्थमतिपर्ष । शत्रूनतिक्रमय्य पालय । शत्रुरहित प्रदेशमस्मान्प्रापयेत्यर्थः । त्वत्प्रसादान्नोऽस्माकमघं पापं चापशोशुचत् । अस्मत्तोऽपक्रम्यास्मच्छत्रूः शोकयुक्तो भवतु ॥ नावया । आङ्याजयारामुपसंख्यानमिति तृतीयाया अयारादेशः । उपोत्तमं रिति । पा० ६. १. २१७. । इत्यकारस्योदात्तत्वं । पर्ष । पॄ पालनपूरणयोः । लोटि बहुलं छंदसीति शपः श्लोरभावः । सिब्बहुलं लेटीति बहुलवचनात्सिप् । गुणः । द्व्यचोऽतस्तिङ इति दीर्घत्वं ॥

॥ इति प्रथमस्य सप्तमे पंचमो वर्गः ॥

वैश्वानरस्येति तृचं पंचमं सूक्तं कुत्सस्यार्षं त्रैष्टुभं । वैश्वानरगुणकोऽग्निः शुद्धाग्निर्वा देवता । तथा चानुक्रांतं । वैश्वानरस्य तृचं वैश्वानरीयमिति । व्यूढस्य चतुर्थेऽहन्याग्निमारुत इदं सूक्तं वैश्वानरीयनिविद्धानं । व्यूढ़ इत्येदिति खंडे सूत्रितं । वैश्वानरस्य सुमतौ क ई व्यक्ताः । आ० ८. ८. । इति ॥

तत्र प्रथमामृचमाह ॥

वैश्वानरस्य सुमतौ स्याम राजा हि कं भुवनानामभिश्रीः ।
इतो जातो विश्वमिदं वि चष्टे वैश्वानरो यतते सूर्येण ॥१॥

वैश्वानरस्य । सुऽमतौ । स्याम । राजा । हि । कं ।
भुवनानां । अभिऽश्रीः ।
इतः । जातः । विश्वं । इदं । वि । चष्टे । वैश्वानरः ।
यतते । सूर्येण ॥ १ ॥

वैश्वानरस्य विश्वेषां नराणां लोकांतरनेतृत्वेन स्वामित्वेन वा संबंधिनोऽग्नेः सुमतौ शोभनायामनुग्रहात्मिकायां बुद्धौ स्याम । अनुग्राह्यत्वेन वर्तमाना भवेम । हि कमित्येतद्वि-शब्दार्थं । स हि वैश्वानरोऽभिश्रीरभिश्रयणीय आभिमुख्येन सेवितव्यः सन्भुवनानां सर्वेषां भूतजातानां राजा स्वामी भवति । यो वैश्वानरोऽग्निरितोऽस्मादरणिद्वयाज्जातमात्र एवेदं सर्वं जगद्विचष्टे । विशेषेण पश्यति । प्रातरुद्यता सूर्येण च यतते । संयतते संगच्छते । उद्यंतं वावादित्यमग्निरनुसमारो-हतीति तैत्तिरीयकं । यद्वा पार्थिवस्याग्नेस्तेजांस्युद्गच्छंति । सूर्यकिरणास्त्वाधोमुखं प्रसरंति । तयोः संगमनं दृष्ट्वा वैश्वानरो यतते सूर्येणेत्यृषिर्ब्रूते । तथा च यास्कः । अमुतोऽमुष्य रश्मयः प्रादुर्भवंतीतोऽस्यार्चिषः । तयोर्भासोः संसंगं दृष्ट्वैवमवक्ष्यत् । नि० ७. २३. । इति । एवंभूतस्य महानुभावस्य वैश्वानरस्य सुमतौ स्यामेति संबंधः ॥ वैश्वानरस्य । विश्वेषां नराणां

संबंधी। नरे संज्ञायामिति पूर्वपदस्य दीर्घत्वं। तस्येदमित्यण्। सुमती। शोभना मतिः सुमतिः। तादौ चेति गतेः प्रकृतिस्वरे प्राप्ते मन्क्तिन्नित्यादिनोत्तरपदांतोदात्तत्वं। ननु तत्र कारकादित्यनुवृत्तेर्गतेरुत्तरस्य क्तिनो न प्राप्नोति। एवं। तर्हि मतिर्मननं। भावे क्तिन्। शोभनं मननं यस्यां बुद्धौ सा सुमतिः। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। चष्टे। चक्षिङ् व्यक्तायां वाचि। अयं पश्यतिकर्मा च। अदादित्वाच्छपो लुक्। स्कोः संयोगाद्योरिति कलोपः। यतते। यती प्रयत्ने॥

चातुर्मास्यान्वारंभणीया वैश्वानरपार्जन्या। तस्यां वैश्वानरस्य हविषः पृष्टो दिवीति याज्या। चातुर्मास्यानीति खंडे सूत्रितं। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पर्जन्याय प्रगायत। आ० २. १४.। इति

तामेतां द्वितीयामृचमाह॥

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा

ओषधीरा विवेश।

वैश्वानरः सहसा पृष्टो अग्निः स नो दिवा स रिषः पातु

नक्तं॥ २॥

पृष्टः। दिवि। पृष्टः। अग्निः। पृथिव्यां। पृष्टः। विश्वाः।

ओषधीः। आ। विवेश।

वैश्वानरः। सहसा। पृष्टः। अग्निः। सः। नः। दिवा।

सः। रिषः। पातु नक्तं॥ २॥

अयं वैश्वानरोऽग्निर्दिवि द्युलोक आदित्यात्मना पृष्टः संस्पृष्टः । यद्वा निषिक्तो निहितो वर्तते । तथा पृथिव्यां भूमौ गार्हपत्यादिरूपेण पृष्टः संस्पृष्टो निहितो वा । तथा विश्वाः सर्वा ओषधीः पृष्टः संस्पृष्टः सोऽग्निराविवेश । पाकार्थमंतः प्रविष्टवान् । अंतःप्रविष्टेन पार्थिवेनाग्निना हि सर्वा ओषधयः पच्यंते । सहसा परेषामसाधारणेन बलेन पृष्टः संस्पृष्टो वैश्वानरो नोऽस्मान्दिवाह्नि रिषो हिंसतः शत्रोः पातु । रक्षतु । तथा स वैश्वानरो नक्तं रात्रावप्यस्मान्हिंसकात्पातु ॥ पृष्टः । स्पृश संस्पर्शने । छांदसः सकारलोपः । यद्वा पृषु सेचने । निष्ठायां यस्य विभाषेतीट्प्रतिषेधः । दिवि । ऊडिदमिति विभक्तेरुदात्तत्वं । पृथिव्यां । उदात्तयण इति विभक्तिरुदात्ता । रिषः । रिष हिंसायां । क्विप् चेति क्विप् । सावेकाच इति पंचम्या उदात्तत्वं ॥

तृतीयामृचमाह ॥

वैश्वानर तव तत्सत्यमस्त्वस्मान्रायो मघवान सचंतां ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ३ ॥

वैश्वानर । तव । तत् । सत्यं । अस्तु । अस्मान् । रायः । मघऽवानः । सचंतां ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ३ ॥

हे वैश्वानर तव तत्त्वदीयं तदस्माभिः क्रियमाणं कर्म सत्यमस्तु । अवितथफलं भवतु । ततोऽस्मान्मघवानो मघवंतो धनवंतो रायो धनवद्गतिप्रियाः पुत्राः सचंतां । सेवंतां । एवं यदस्माभिः प्रार्थितं नोऽस्मदीयं तत् मित्रोऽहरभिमानी देवो वरुणो रात्र्यभिमानी । अदितिरदीना देवमाता सिंधुः स्यंदनशीलोदकाभिमानी देवः । उतशब्दः समुच्चये । एते सर्वे मित्रादयो मामहंतां । पूजयंतां । पालयंतामित्यर्थः ॥

॥ इति प्रथमस्य सप्तमे षष्ठो वर्गः ॥

जातवेदस इत्येकर्चं षष्ठं सूक्तं मरीचिपुत्रस्य कश्यपस्यार्षं त्रैष्टुभं । जातवेदोगुणकोऽग्निः शुद्धाग्निर्वा देवता । तथा चानुक्रांतं । जातवेदस एका जातवेदस्यमेतदादीन्येकभूयांसि सूक्तसहस्रमेतत्तु कश्यपार्षमिति ॥ अहर्गणेषु द्वितीयादिष्वहः-स्वाग्निमारुते जातवेदस्यनिविद्धानात्पूर्वमेषा शंसनीया । सूचितं च । जातवेदसे सुनवाम सोममित्याग्निमारुते जात-वेदस्यानां । आ० ७. १. । इति ॥

तामेतां प्रथमामृचमाह ॥

जातवेदसे सुनवाम सोममरातीयतो नि दहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिंधुं
दुरितात्यग्निः ॥ १ ॥

जातऽवेदसे । सुनवाम । सोमं । अरातिऽयतः । नि ।
दहाति । वेदः ।

सः । नः । पर्षत् । अति । दुःऽगानि । विश्वा । नावाऽइव ।
सिंधुं । दुःऽइता । अति । अग्निः ॥ १ ॥

जातवेदसे जातानामुत्पत्तिमतां सर्वेषां वेदित्रे । यद्वा जातैः सर्वैः प्राणिभिर्ज्ञायमानाय जातधनाय जातप्रज्ञाय वाग्नये लतारूपं सोमं सुनवाम । अभिषुणुयाम । जातवेदोगुणकमग्निं यष्टुं सोमाभिषवं करवामेत्यर्थः । सोऽग्निररातीयतोऽरातिं शत्रुमिवास्मानाचरतः शत्रोर्वेदो धनं निदहाति । नितरां दहतु भस्मीकरोतु । अपि च सोऽग्निर्नोऽस्मान्विश्वा विश्वानि सर्वाणि दुर्गाणि दुर्गमनानि भोक्तुमशक्यानि दुःखान्यतिपर्षत् । अतिपारयतु । अतिक्रमय्य दुःखरहितं सुखं प्रापयतु । तत्र दृष्टांतः । नावेव सिंधुं । यथा कश्चित्कर्णधारो ग्राहादिभिर्दुष्टसत्वैराकुलितां नदीं नावा तारयति । तद्वत् । तथा दुरिता दुरितानि दुःखहेतुभूतानि पापान्यस्मानग्निरतिपारयतु । दुःखनिमित्तात्पापादप्यस्मानुत्तारयत्वित्यर्थः । अत्र निरुक्तं । जातवेदाः कस्मात् जातानि वेद जातानि वैनं विदुर्जाते जाते विद्यत इति वा जातवित्तो वा जातधनो जातविद्यो वा जातप्रज्ञानो यत्तज्जातः पशूनविंदतेति तज्जातवेदसो जातवेदस्त्वमिति हि ब्राह्मणमित्यादि । नि० ७. १९. ॥ जातवेदसे । जातानि वेत्तीति जातवेदाः । गतिकारकयोरपि पूर्वपदप्रकृतिस्वरत्वं चेति वचनात्कारकपूर्वाद्वेत्तेरसुन् पूर्वपदप्रकृतिस्वरत्वं च । अरातीयतः । न विद्यते रातिर्दानं यस्येत्यरातिः शत्रुः । तमिवास्मानाचरति । उपमानादाचारे । पा० ३. १. १०. । उपमानभूतात्कर्मणः क्यच् । क्यजंतात्लटः

ग्रहे । यतुरनुम इति ङस उदात्तत्वं । दहाति । दह भस्मी-करणे । लेट्यडागमः । विद्यते लभ्यत इति वेदो धनं । विद्लृ लाभे । औणादिकः कर्मण्यसुन् । पर्षत् । पृ पालनपूरणयोः । अस्मादंतर्भावितण्यर्थाल्लेट्यडागमः । सिब्बहुलं लेटीति सिप् । दुर्गाणि । दुःखेन गम्यत एष्विति सुदुरोरधिकरण इति गमेर्डः ॥

॥ इति प्रथमस्य सप्तमे सप्तमो वर्गः ॥

स यो वृषेत्येकोनविंशत्यृचं सप्तमं सूक्तं । अत्रानुक्रम्यते । स यो वृषैकोना वार्षागिरा ऋज्राश्वांबरीषसहदेवभयमान-सुराधस इति । वृषागिरो महाराजस्य पुत्रभूता ऋज्राश्वादयः पंच राजर्षयः सहेदं सूक्तं ददृशुः । अतस्तेऽस्य सूक्तस्य ऋषयः । उक्तं ह्यार्षानुक्रमण्यां । सूक्तं स यो वृषेत्येतत्पंच वार्षागिरा विदुः । नियुक्ता नामधेयैः स्वैरपि चैतत्त्र्यदित्यृचीति । अनादेश-परिभाषया त्रिष्टुप् । इंद्रो देवता ॥ दशरात्रस्य षष्ठेऽहनि मरुत्वतीयं इदं सूक्तं । तथा च सूत्रितं । यं त्वं रथमिंद्र स यो वृषेंद्र मरुत्व इति तिस्र इति मरुत्वतीयं । आ० ८. १. । इति ॥

तत्र प्रथमामृचमाह ॥

स यो वृषा वृष्ण्येभिः समोका महो दिवः पृथिव्याश्च सम्राट् ।

सतीनसत्वा हव्यो भरेषु मरुत्वान्नो भवत्विंद्र ऊती ॥ १ ॥

सः । यः । वृषा । वृष्ण्येभिः । संऽओकाः । महः । दिवः । पृथिव्याः । च । संऽराट् ।

सतीनऽसंत्वा । हव्यः । भरेषु । मरुत्वान् । नः । भवतु ।

इंद्रः । ऊती ॥ १ ॥

य इंद्रो वृषा कामानां वर्षिता वृष्ण्येभिर्वृष्णि भवैर्वीर्यैः समोकाः सम्यक् समवेतः संगतः । महो महतो दिवो द्युलोकस्य पृथिव्याः प्रथितायाः भूमेश्च सम्राडीश्वरः । सतीनसत्वा । सतीनमित्युदकनाम । उदकस्य सत्वा सादयिता । गमयिता । भरेषु संग्रामेषु हव्यः सर्वैः स्तोतृभिराह्वातव्यः । एवंभूतो मरुत्वान्मरुद्भिर्युक्तः स इंद्रो नोऽस्माकमूती ऊतये रक्षणाय भवतु ॥ वृष्ण्येभिः । वृषन्शब्दाद्भवे छंदसीति यत् । अल्लोपोऽन इत्यकारलोपः । ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न भवति । महः । मह पूजायां । क्विप् । यद्वा महच्छब्देऽच्छब्दलोपः । सावेकाच इति विभक्तेरुदात्तत्वं । सम्राट् । मो राजि समः क्वाविति राजतौ क्विवंत उत्तरपदे समो मकारस्य मकारादेशः । मकारस्य च मकारवचनमनुस्वारबाधनार्थं । सतीनसत्वा । षद्लृ विशरणगत्यवसादनेषु । मेघेषु निषीदतीति सतीनं वृष्ट्युदकं । औणादिक ईनप्रत्ययस्तकारांतादेशश्च । यद्वा सती माध्यमिका वाक् । सा इना ईश्वरा यस्य तत्सतीनं । व्यत्ययेन पुंवद्भावाभावः । तत्सत्वा । सदेरंतर्भावितण्यर्थात् ईरसद्योस्तुट् चेत्यौणादिको वनिप् तुडागमश्च । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । मरुत्वान् । झय इति मतुपो वत्वं । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । सुपां सुलुगिति चतुर्थ्याः पूर्वसवर्णदीर्घः ॥

द्वितीयामृचमाह ॥

यस्यानाप्तः सूर्यस्येव यामो भरेभरे वृत्रहा शुष्मो अस्ति।

वृषंतमः सखिभिः स्वेभिरेवैर्मरुत्वान्नो भवत्विंद्र ऊती ॥२॥

यस्य। अनाप्तः। सूर्यस्यऽइव। यामः। भरेऽभरे।
वृत्रऽहा। शुष्मः। अस्ति।

वृषन्ऽतमः। सखिऽभिः। स्वेभिः। एवैः। मरुत्वान्।

नः। भवतु। इंद्रः। ऊती ॥ २ ॥

यस्येंद्रस्य यामो गतिरनाप्तः परैरप्राप्ता सूर्यस्येव। यथा सूर्यस्य गतिरन्येन प्राप्तुं शक्यते तद्वत्। स्वेभिरात्मीयैरेवैर्गमनशीलैः सखिभिर्मित्रभूतैर्मरुद्भिः सह वृषंतमोऽतिशयेन कामानां वर्षिता। भरे भरे सर्वेषु संग्रामेषु वृत्रहा शत्रूणां हंता शुष्मः सर्वेषामसुराणां शोषकः। एवंभूतो य इंद्रोऽस्ति विद्यते स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु। यामः। या प्रापणे। अर्तिस्तुस्वित्यादिना भावे मन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। शुष्मः। शुष शोषणे। इषियुधींधिदसिश्याधूसूभ्यो मक्। इति मन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। अस्ति। यद्वृत्तयोगादनिघातः। वृषंतमः। वृषन्शब्दादुत्तरस्य तमपो नाद्घस्येति नुट्। एवैः। इण् गतौ। इण्शीङ्भ्यां वन्॥

तृतीयामृचमाह ॥

दिवो न यस्य रेतसो दुघानाः पंथासो यंति शवसापरीताः।

तरद्द्वेषाः सासहिः पौंस्येभिर्मरुत्वान्नो भवत्विंद्र ऊती ॥ ३ ॥

दिवः । न । यस्य॑ । रेतसः । दुघा॑नाः । पंथा॑सः । यंति॑ ।

शव॑सा । अप॑रिऽइताः ।

तरत्ऽद्वेषाः । ससहिः । पौंस्ये॑भिः । मरुत्वा॑न् । नः । भवतु ।

इंद्रः । ऊती ॥ ३ ॥

यस्येंद्रस्य पंथासो रश्मयो रेतसो वृष्ट्युदकानि दुघाना दुहंतः प्रवर्षंतो यंति । निर्गच्छंति । द्युलोकादितस्ततः प्रसरंति । तत्र दृष्टांतः । दिवो न । यथा द्योतमानस्य सूर्यस्य किरणा वृष्टिं कुर्वंतो नभःस्थलान्निर्गच्छंति तद्वत् । कीदृशा रश्मयः । शवसा बलेन सहिताः । अपरीताः । परैरनभिगताः । दुःप्रापा इत्यर्थः । सोऽयमिंद्रस्तरद्द्वेषा द्वेषांसि शत्रूंस्तरन् । जितशत्रुक इत्यर्थः । पौंस्येभिर्बलैः सासहिः शत्रूणामभिभविता । एवंभूतो मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु ॥ रेतसः । रेत इत्युदकनाम । रीयते गच्छतीति रेतः । री गतिरेषणयोः । स्रुरीभ्यां तुट् चेत्यसुन् तुडागमश्च । शसो व्यत्ययेन ङसादेशः । दुघानाः । दुह प्रपूरणे । कर्तरि लटः शानच् । अदादित्वाच्छपो लुक् । व्यत्ययेन घत्वं । वृषादेराकृतिगणत्वादाद्युदात्तत्वं । पंथासः । पतंतीति पंथानो रश्मयः । पतेश्च चेतीनिप्रत्ययः । थकारांतादेशश्च । जसि पथिमथ्यृभुक्षामादिति व्यत्ययेनात्वं । आज्जसेरसुक् । यद्वा पंथान इत्यत्र वर्णव्यापत्त्या नकारस्य सकारः । पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं । सासहिः । षह अभिभवे । उत्सर्गश्छंदसीति वचनादाद्दृगमहन इति किप्रत्ययः लिड्वद्भावाद्द्विर्वचनं ॥

चतुर्थीमृचमाह ॥

सो अंगिरोभिरंगिरस्तमो भूदृषा वृषभिः सखिभिः सखा सन् ।
ऋग्मिभिर्ऋग्मी गातुभिर्ज्येष्ठो मरुत्वान्नो भवत्विंद्र ऊती ॥ ४ ॥

सः । अंगिरःऽभिः । अंगिरःऽतमः । भूत् । वृषा । वृषऽभिः । सखिऽभिः । सखा । सन् ।
ऋग्मिऽभिः । ऋग्मी । गातुऽभिः । ज्येष्ठः । मरुत्वान् । नः । भवतु । इंद्रः । ऊती ॥ ४ ॥

स इंद्रोऽंगिरोभिः। अंगंति गच्छंतीत्यंगिरसो गंतारः। तेभ्योऽप्यंगिरस्तमोऽभूत्। अतिशयेन गंता भवति। वृषभिर्वृषा वर्षितृभ्योऽप्यतिशयेन वर्षिता। सखिभिः समानख्यानेभ्यो मित्रभूतेभ्योऽपि सखातिशयेन हितकारी। एवंभूतः सन् ऋग्मिभिरर्चनीयेभ्योऽपि ऋग्मयर्चनीयो भवति। गातुभिर्गातव्येभ्यः स्तोतव्येभ्योऽपि ज्येष्ठोऽतिशयेन स्तोतव्यः। एवंगुणविशिष्टो मरुत्वानिंद्रो रक्षणाय भवतु॥ अंगिरोभिः। अगि रगि लगि गत्यर्थाः। अंगिरा अप्सराः। उ० ४. २३५. २३६.। इत्यौणादिकोऽसुन्प्रत्ययो निपात्यते। इदमादिषु सर्वत्र पंचम्यर्थे तृतीया। ऋग्मिभिः। ऋच स्तुतौ। संपदादिलक्षणो भावे क्विप्। मत्वर्थीयो मिनिः। पदत्वात्कुत्वं जश्त्वं च। गातुभिः। गा स्तुतौ। कमिमनिजनीत्यादिना कर्मणि तुप्रत्ययः॥

पंचमीमृचमाह ॥

स सूनुभिर्न रुद्रेभिर्ऋभ्वा नृषाह्यै सासह्वाँ अमित्रान् ।

सनीळेभिः श्रवस्यानि तूर्वन्मरुत्वान्नो भवत्विंद्र ऊती ॥ ५ ॥

सः । सूनुऽभिः । न । रुद्रेभिः । ऋभ्वा । नृऽसह्यै ।

ससह्वान् । अमित्रान् ।

सऽनीळेभिः । श्रवस्यानि । तूर्वन् । मरुत्वान् । नः ।

नः । भवतु । इंद्रः । ऊती ॥ ५ ॥

सूनुभिर्न पुत्रैरिव रुद्रेभी रुद्रपुत्रैर्मरुद्भिर्युक्त ऋभ्वा महान् । एवंभूतः स इंद्रो नृषाह्ये नृभिः पुरुषैः सोढव्ये संग्रामेऽमित्रान् शत्रून् सासह्वानभिभूतवान् । अपि च सनीळेभिः समान-निलयैर्मरुद्भिः सह श्रवस्यानि । श्रव इत्यन्ननाम । तद्धेतु-भूतान्युदकानि तूर्वन् मेघात्प्रच्यावयन् मरुत्वानिंद्रोऽस्माकं रक्षणाय भवतु ॥ नृषाह्ये षह मर्षणे । शकिसहोश्चेति कर्मणि यत् । अन्येषामपि दृश्यत इति संहितायां धात्वकारस्य दीर्घत्वं । यतोऽनाव इत्याद्युदात्तत्वे क्रदुत्तरपदप्रकृतिस्वरत्वं । सासह्वान् । षह अभिभवे । लिटः क्वसुः । अभ्यासदीर्घत्वं छांदसं । अमित्रान् । मित्राख्येषु न संतीत्यमित्राः । नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । सनीळेभिः समानं नीळं येषां ते सनीळाः । समानस्य छंदसीति सभावः ॥

॥ इति प्रथमस्य सप्तमेऽष्टमो वर्गः ॥

षष्ठीमृचमाह ॥

स मन्युमीः समदनस्य कर्तास्माकेभिर्नृभिः सूर्यं सनत् ।
अस्मिन्नहन्त्सत्पतिः पुरुहूतो मरुत्वान्नो भवत्विंद्र ऊती ॥६॥

सः । मन्युऽमीः । सऽमदनस्य । कर्ता । अस्माकेभिः ।
नृऽभिः । सूर्यं । सनत् ।
अस्मिन् । अहन् । सत्ऽपतिः । पुरुऽहूतः । मरुत्वान् ।
नः । भवतु । इंद्रः । ऊती ॥ ६ ॥

असुभिरपहृतासु गोषु तैः सह युद्धार्थं विनिर्गता ऋज्राश्वादयोऽनेन सूक्तेनेंद्रमस्तुवन् । स इंद्रो मन्युमीः । मन्योः कोपस्य निर्माता । यद्वा । अभिमन्यमानस्य शत्रोर्हिंसकः । अपि च । समदनस्य संग्रामस्य कर्ता । सत्पतिः सतां पालयिता । पुरुहूतो बहुभिर्यजमानैराहूतः । एवंगुणविशिष्टः स अस्मिन्नहन् अस्मिन्दिवसेऽस्माकेभिरस्माकैरस्मदीयैर्नृभिः पुरुषैः सूर्यं सूर्यप्रकाशं सनत् । संभक्तं करोतु । शत्रुपुरुषैस्तु दृष्टिनिरोधकमंधकारं संयोजयतु । स च मरुत्वानिंद्रोऽस्माकं रक्षणाय भवतु ॥ मन्युमीः । मन्युं मिनातीति मन्युमीः । मीञ् हिंसायां । क्विप् । समदनस्य । सह माद्यंत्यस्मिन्निति समदनः संग्रामः । मदी हर्षे । अधिकरणे ल्युट् । सहस्य सः संज्ञायां । पा० ६. ३. ७८. । इति सभावः । अस्माकेभिः । तस्मिन्निणि च युष्माकास्माकावित्यस्मच्छब्दस्यास्माकादेशः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः । बहुलं छंदसीति

भिस ऐसभावः ॥ स्वरस्तु प्रास्माकासश्च सूरयः । ऋ० १.६७.३. । इत्यत्रोक्तः । सनत् । वन षण संभक्तौ । लेट्यडागमः । अहन् । सुपां सुलुगिति सप्तम्या लुक् । सत्पतिः । पत्यावैश्वर्य इति पूर्वपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

तमूतयो रणयञ्छूरसातौ तं क्षेमस्य क्षितयः कृण्वत त्रां ।
स विश्वस्य करुणस्येश एको मरुत्वान्नो भवत्विंद्र ऊती ॥७॥

तं । ऊतयः । रणयन् । शूरऽसातौ । तं । क्षेमस्य ।
क्षितयः । कृण्वत । त्रां ।
सः । विश्वस्य । करुणस्य । ईशे । एकः । मरुत्वान् । नः ।
भवतु । इंद्रः । ऊती ॥ ७ ॥

तमिंद्रं शूरसातौ शूरैर्वीरपुरुषैः संभजनीये संग्राम ऊतयो गंतारो मरुतो रणयन् । रमयंति । यद्वा प्रहर भगवो जहि वीरयस्वेत्येवंरूपं शब्दमिंद्रमुद्दिश्य कुर्वंति । अपि च क्षितयो मनुष्यास्तमिंद्रं क्षेमस्य रक्षणीयस्य सर्वस्य धनस्य त्रां त्रातारं कृण्वत । कुर्वंति । देवतांतरादस्य कोऽतिशय इति चेत् उच्यते । स इंद्रो विश्वस्य सर्वस्य करुणस्याभिमतफलनिष्पादनरूपस्य कर्मण एकोऽसहाय एवेशे । ईष्टे । अन्यत्पूर्ववत् ॥ ऊतयः । अवतेर्गत्यर्थात् कृत्यल्युटो बहुलमिति कर्तरि क्तिन् । तितुत्रेतीट्प्रतिषेधः । ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट् । ऊतियूतीत्यादिना क्तिन उदात्तत्वं । यद्वा कर्तरि

क्विप्। रणयन्। रमतेर्हेतुमण्णिजंताद्वर्तमाने छांदसो लङ्। अंत्यविकारश्छांदसः। यद्वा। रण शब्दार्थः। अस्माण्णिजंतात्पूर्ववल्लङ्। त्रां। त्रैङ् पालने। त्रायत इति त्राः। क्विप् चेति चशब्देन दृशिग्रहणानुकर्षणान्निरुपपदादपि क्विप्। करुणस्य। डुकृञ् करणे। कृवृदारिभ्य उनन्निति भाव उनन्। व्यत्ययेन प्रत्ययाद्युदात्तत्वं। ईशे। ईश ऐश्वर्ये। लोपस्त आत्मनेपदेष्विति तलोपः ॥

अष्टमीमृचमाह ॥

तमंप्सं॑त॒ शव॑स उत्स॒वेषु॒ नरो॒ नर॒मव॑से॒ तं धना॑य ।
सो अं॒धे चि॒त्तम॑सि॒ ज्योति॑र्विद॒न्मरु॑त्वान्नो भव॒त्विंद्र॑
ऊ॒ती ॥ ८ ॥

तं। अप्सं॑त। शव॑सः। उ॒त्ऽसवेषु॑। नरः॑। नरं॑। अव॑से। तं। धना॑य।
सः। अं॒धे। चि॒त्। तम॑सि। ज्योतिः॑। वि॒दत्। म॒रुत्वा॑न्। नः॒। भ॒वतु॒। इं॒द्रः। ऊ॒ती ॥ ८ ॥

नरो नेतारः स्तोतारः शवसो बलस्य संबंधिषूत्सवेषु संग्रामेषु नरं जयस्य नेतारं तमिंद्रमप्संत। आप्नुवंति। किमर्थं। अवसे। अन्नार्थं रक्षणार्थं वा। तथा धनाय। धनार्थं च तमिंद्रं प्राप्नुवंति। यस्मात्स इंद्रस्तमसि दृष्टिप्रतिबंधकेऽधे चित् आध्यानरहिते चित्तव्यामोहकरेऽपि संग्रामे ज्योतिर्विजयलक्षणं प्रकाशं विदत्। लंभयति। तस्मात्तमेव प्राप्नुवंतीत्यर्थः। अन्यत्समानं ॥ अप्संत। आप्ल व्याप्तौ। लङि

व्यत्ययेनात्मनेपदं। व्यत्ययेन क्तप्रत्ययः। व्यत्ययेन धातोर्ह्र-स्वत्वं। विदत्। विदॢ लाभे। छंदसि लुङ्लङ्लिट इति वर्तमाने छांदसो लुङ्। ऌदित्वाच्चेरङादेशः। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः॥

नवमीमृचमाह॥

स सव्येन यमति व्राधतश्चित्स दक्षिणे संगृभीता कृतानि।
स कीरिणा चित्सनिता धनानि मरुत्वान्नो भवत्विंद्र

ऊती॥९॥

सः। सव्येन। यमति। व्राधतः। चित्। सः। दक्षिणे।
संऽगृभीता। कृतानि।
सः। कीरिणा। चित्। सनिता। धनानि। मरुत्वान्।
नः। भवतु। इंद्रः। ऊती॥९॥

स इंद्रः सव्येन वामहस्तेनैकहस्तेन व्राधतश्चित् हिंसतो महतः शत्रूनपि यमति। नियमयति। तथा स इंद्रो दक्षिणे दक्षिणपार्श्वस्थेन हस्तेनैकेन यजमानैः कृतानि हवींषि संगृभीता। संगृह्णाति। अपि च स इंद्रः कीरिणा चित् कीर्तयित्रा स्तोत्रा च स्तुतः सन्धनानि सनिता प्रदानशीलो भवति। हविःप्रदातॄणामिव स्तोतॄणामपि धनं प्रयच्छतीत्यर्थः। शिष्टं स्पष्टं॥ यमति। यम उपरमे। णिच्यमंतत्वान्मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं। छंदस्युभयथेति शप आर्द्धधातुकत्वात् णेर-निटीति णिलोपः। व्राधतः। वृधु वृद्धौ। अस्मादतिप्रत्यय

औणादिक आमागमश्च । वृषादित्वादाद्युदात्तत्वं । संभक्ता ।
ग्रह उपादाने । लिङि बहुलं छंदसीति विकरणस्य लुक् ।
लिङः सलोप इति सलोपः । ग्रहिज्यादिना संप्रसारणं ।
हृग्रहोर्भ इति भत्वं । ह्रचोऽतस्तिङ इति दीर्घः । सनिता ।
षणु दाने । ताच्छीलिकस्तृन् । धनानि । न लोकाव्ययेति
षष्ठीप्रतिषेधः ॥

दशमीमृचमाह ॥

स ग्रामे॑भिः सनि॑ता स रथे॑भिर्वि॒दे विश्वा॑भिः कृ॒ष्टिभि॒र्न्व१॒॑द्य ।
स पौंस्ये॑भिरभि॒भूरश॑स्ती॒र्म॒रुत्वा॑न्नो भवत्विंद्र॑ ऊ॒ती ॥ १० ॥

सः । ग्रामे॑भिः । सनि॑ता । सः । रथे॑भिः । वि॒दे । विश्वा॑भिः ।
कृ॒ष्टिऽभिः॑ । नु । अ॒द्य ।
सः । पौंस्ये॑भिः । अ॒भि॒ऽभूः । अश॑स्तीः । म॒रुत्वा॑न् । नः ।
भ॒व॒तु । इंद्रः॑ । ऊ॒ती ॥ १० ॥

स इंद्रो ग्रामेभिर्मरुत्संघैः सह सनिता फलानां प्रदाता
भवति । स चाद्यास्मिन्नहनि नु क्षिप्रं विश्वाभिः कृष्टिभिः
सर्वैर्मनुष्यै रथेभिरिंद्रसंबंधिभी रथैः कारणभूतैर्विदे । विज्ञायते ।
अपि च स इंद्रः पौंस्येभिः स्वकीयैर्बलैरशस्तीरशंसनीयान्
शत्रूनभिभूः । अभिभवन्वर्तते । मरुत्वान्स इंद्रो नोऽस्माकं
रक्षणाय भवतु ॥ ग्रामेभिः । बहुलं छंदसीति भिस ऐसभावः ।
ग्रामादीनां च । फि० २. १५. । इत्याद्युदात्तत्वं । विदे ।

विद ज्ञाने । कर्मणि लट् । बहुलं छंदसीति विकरणस्य लुक् । लोपस्त आत्मनेपदेष्विति तलोपः ॥

॥ इति प्रथमस्य सप्तमे नवमो वर्गः ॥

एकादशीमृचमाह ॥

स जामिभिर्यत्समजाति मीळ्हेऽजामिभिर्वा पुरुहूत एवैः ।
अपां तोकस्य तनयस्य जेषे मरुत्वान्नो भवत्विंद्र ऊती ॥११॥

सः । जामिऽभिः । यत् । संऽअजाति । मीळ्हे ।
अजामिऽभिः । वा । पुरुऽहूतः । एवैः ।
अपां । तोकस्य । तनयस्य । जेषे । मरुत्वान् । नः ।
भवतु । इंद्रः । ऊती ॥ ११ ॥

पुरुहूतो बहुभिर्यजमानैराहूतः स इंद्रो मीळ्हे संग्रामे । मीळ्हमिति धननाम । तद्धेतुत्वात्संग्रामोऽपि मीळ्हशब्देनोच्यते । जामिभिर्बंधुभिरजामिभिर्वा बांधवरहितैर्वैवैर्युद्धार्थं मरुद्भिः सह यद्यदा समजाति संगच्छते । तेषामुभयविधानामपामिंद्रं प्राप्नुवतां पुरुषाणां तोकस्य पुत्रस्य तनयस्य तत्पुत्रस्य च जेषे जयप्राप्तये स इंद्रो भवति । किमु वक्तव्यमस्माकं स्तोतॄणां जयो भवतीति । अन्यत्समानं ॥ समजाति । अज गतिक्षेपणयोः । लेट्याडागमः । जेषे । जि जये । औणादिकः सप्रत्ययः । चतुर्थ्यर्थे सप्तमी । यद्वा । जेषृ णेषृ प्रेषृ गतौ । क्विप् चेति क्विप् । सावेकाच इति विभक्तेरुदात्तत्वं ॥

द्वादशीमृचमाह ॥

स वं॑ज्रभृद्द॑स्यु॒हा भी॒म उ॒ग्रः स॒हस्र॑चेताः श॒तनी॑थ ऋभ्वा॑ ।

च॒म्री॒षो न शव॑सा पांच॑जन्यो म॒रुत्वा॑न्नो भव॒त्विंद्र॑

ऊ॒ती ॥ १२ ॥

सः । व॒ज्र॒ऽभृत् । द॒स्यु॒ऽहा । भी॒मः । उ॒ग्रः । स॒हस्र॑ऽचेताः ।

श॒त॒ऽनी॑थः । ऋभ्वा॑ ।

च॒म्री॒षः । न । शव॑सा । पांच॑ऽजन्यः । म॒रुत्वा॑न् । नः ।

भ॒व॒तु । इंद्रः॑ । ऊ॒ती ॥ १२ ॥

स इंद्रो वज्रभृत् अन्यैर्भर्तुमशक्यस्य वज्रस्य भर्ता । दस्युहा दस्यूनामुपक्षपयितॄणामसुराणां हंता । भीमः सर्वेषां भयहेतुः । उग्र उद्गूर्णतेजाः । सहस्रचेता बहुविधज्ञानः । सर्वज्ञ इत्यर्थः । शतनीथ । बहुस्तुतिर्बहुविधप्रापणो वा । ऋभ्वा । उरु भासमानो महान्वा । चम्रीषो न चम्वां चमसे रसात्मनावस्थितः सोम इव शवसा बलेन पांचजन्यः । गंधर्वा अप्सरसो देवा असुरा रक्षांसि पंच जनाः । निषादपंचमास्त्वारो वर्णा वा । तेषु रक्षकत्वेन भवः । एवंभूतः स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु ॥ दस्युहा । बहुलं छंदसीति हंतेः क्विप् । भीमः । ञिभी भये । भीमादयोऽपादान इत्यपादाने भियः षुग्वेति मक् । शतनीथः । णीञ् प्रापणे । हनिकुषिनीरमिकाशिभ्यः क्थन्निति क्थन्प्रत्ययः । चम्रीषः । इष गतौ । चम्वामिष्यति गच्छतीति चम्रीषः । इगुपधलक्षण. कप्रत्ययः ।

वर्णव्यापत्त्या रेफो दीर्घश्च । यद्वा चमेरौणादिक ईषन्प्रत्ययः । पूर्ववद्रेफः । पांचजन्यः । भवार्थे बहिर्देवपंचजनेभ्यश्चेति वक्तव्यं । पा० ४. ३. ५८. ३. । इति ञ्यप्रत्ययः । ञित्वादाद्युदात्तत्वं ॥

त्रयोदशीमृचमाह ॥

तस्य॒ वज्रः॑ क्रंदति॒ स्मत्स्व॒र्षा दि॒वो न त्वे॒षो र॒वथः॒ शिमी॑वान् ।
तं स॑चंते स॒नय॒स्तं धना॑नि म॒रुत्वा॑न्नो भवत्विंद्र॑ ऊ॒ती ॥ १३ ॥

तस्य॑ । वज्रः॑ । क्रंदति । स्मत् । स्वः॒ऽसाः । दि॒वः । न । त्वे॒षः । र॒वथः॑ । शिमी॑ऽवान् ।
तं । स॒चं॒ते॒ । स॒नयः॑ । तं । धना॑नि । म॒रुत्वा॑न् । नः॒ । भवतु । इंद्रः॑ । ऊ॒ती ॥ १३ ॥

तस्येंद्रस्य वज्रः कुलिशः स्मत भृशं क्रंदति । शत्रून् आक्रंदयति । रोदयतीत्यर्थः । य इंद्रः स्वर्षाः शोभनस्योदकस्य दाता । दिवो न दिवः संबंधी सूर्य इव त्वेषो दीप्तः । रवथः शब्दस्य गर्जनलक्षणस्य कर्ता । शिमीवान् । शिमीति कर्मनाम । लोकानुग्राहकेन कर्मणा युक्तः । तमिंद्रं सनयो धनस्य दानानि सचंते । सेवंते । तथा तं धनानि च सेवंते । स मरुत्वानिंद्रो नोऽस्माकं रक्षणाय भवतु ॥ क्रंदति । कदि क्रदि क्लदि आह्वाने रोदने च । छंदस्युभयथेति शप आर्द्धधातुकत्वात्सेरनिटीति णिलोपः । स्वर्षाः । सुपूर्वाद्दर्तेर्विच् । सुष्ठु अर्तिं गच्छतीति

स्वरदकं । तत्सनोतीति स्वर्षाः । षणु दाने । जनसनखन-क्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं । सनोतेरन इति षत्वं । त्वेषः । त्विष दीप्तौ । पचाद्यच् । रथः । रु शब्दे । शीङ्शपिरुगमिवंचिजीविप्राणिभ्योऽथ इत्यथप्रत्ययः । गुणावादेशौ । सनयः । सनोतेर्भाव औणादिक इप्रत्ययः ॥

चतुर्दशीमृचमाह ॥

यस्याजस्रं शवसा मानमुक्थं परिभुजद्रोदसी विश्वतः सीं ।
स पारिषत्क्रतुभिर्मंदसानो मरुत्वान्नो भवत्विंद्र ऊती ॥१४॥

यस्य । अजस्रं । शवसा । मानं । उक्थं । परिऽभुजत् ।
रोदसी इति । विश्वतः । सीं ।
सः पारिषत् । क्रतुऽभिः । मंदसानः । मरुत्वान् । नः ।
भवतु । इंद्रः । ऊती ॥ १४ ॥

यस्येंद्रस्योक्थं प्रशस्यं शवसा मानं बलेन सर्वस्य परिच्छेदकं सर्वेषां बलस्योपमानभूतं वा रोदसी द्यावापृथिव्यौ विश्वतः सीमजस्रमनवरतं परिभुजत् परितः सर्वतो भुनक्ति पालयति । स इंद्रः क्रतुभिरस्माभिः कृतैर्यागैर्मंदसानो मोदमानः सन्पारिषत् । अस्मान्दुरितात्पारयतु ॥ उक्थं । वच परिभाषणे । पातृतुदिवचीत्यादिना कर्मणि थक् । वचिस्वपीत्यादिना संप्रसारणं । परिभुजत् । भुज पालनाभ्यवहारयोः । लेट्य-डागमः । व्यत्ययेन शः । पारिषत् । पार तीर कर्मसमाप्तौ । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । तस्यार्धधातुकत्वादिट् ।

व्यत्ययेन णिलोपः । मंदसानः । मदि स्तुतिमोदमदस्वप्नकांतिगतिषु । ऋंजिवृद्धिमंदिसहिभ्यः किदित्यसानच्प्रत्ययः ॥

पंचदशीमृचमाह ॥

न यस्य॑ दे॒वा दे॒वता॒ न मर्ता॒ आप॑श्च॒न शव॑सो॒ अंत॑मा॒पुः ।
स प्र॒रिक्वा॒ त्वक्ष॑सा॒ क्ष्मो दि॒वश्च॑ म॒रुत्वा॑न्नो भवत्विंद्र॑ ऊ॒ती ॥१५॥

न । यस्य॑ । दे॒वाः । दे॒वता॑ । न । मर्ताः॑ । आपः॑ । च॒न ।
शव॑सः । अंत॑म् । आ॒पुः ।

सः । प्र॒ऽरिक्वा॑ । त्वक्ष॑सा । क्ष्मः । दि॒वः । च॒ । म॒रुत्वा॑न् । नः॒ ।
भ॒व॒तु॒ । इंद्रः॑ । ऊ॒ती ॥ १५ ॥

देवता देवस्य दानादिगुणयुक्तस्य यस्येंद्रस्य शवसो बलस्यांतमवसानं देवा वस्वाद्या देवगणा नापुः । नानशिरे । तथा मर्ता मनुष्या आपश्चनापोऽपि न प्रापुः । स तादृश इंद्रस्त्वक्षसा शत्रूणां तनूकर्त्रात्मीयेन बलेन क्ष्मः पृथिव्या दिवश्च स्वर्गस्य च प्ररिक्वा प्रकर्षेण रेचको भवति । लोकद्वयादप्यस्य बलमतिरिच्यत इत्यर्थः । मरुद्भिर्युक्तः स इंद्रो नोऽस्माकमूती ऊतये रक्षणाय भवतु ॥ देवता देव एव देवता । देवात्तलिति स्वार्थे तल् । सुपां सुलुगिति षष्ठ्या लुक् । मर्ताः । मृङ् प्राणत्यागे । असिहसीत्यादिना तन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । प्ररिक्वा । रिचिर् विरेचने । अन्येभ्योऽपि दृश्यंत इति क्वनिप् । अंत्यविकारश्छांदसः । त्वक्षसा । तक्ष् त्वक्ष् तनूकरणे । असुन् । नित्त्वादाद्युदात्तत्वं । क्ष्मः । क्ष्मेति पृथिवीनाम । आतो धातोरित्यत्रात इति योगविभागादिष्टसिद्धिरित्यभिधानात् ङसि

भसंज्ञायामाकारलोपः । यद्वा ध्मायी विधूनने । अस्मात्क्विप् चेति क्विप् । वेरपृक्तलोपात्पूर्वं वलि लोपः । अन्यत्समानं । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं ॥

॥ इति प्रथमस्य सप्तमे दशमो वर्गः ॥

षोडशीमृचमाह ॥

रोहिच्छ्यावा सुमदंशुर्ललामीर्द्युक्षा राय ऋज्राश्वस्य ।
वृषण्वन्तं बिभ्रती धूर्षु रथं मन्द्रा चिकेत नाहुषीषु विक्षु ॥ १६ ॥

रोहित् । श्यावा । सुमत्ऽअंशुः । ललामीः । द्युक्षा ।
राये । ऋज्रऽअश्वस्य ।
वृषण्ऽवन्तं । बिभ्रती । धूःऽसु । रथं । मन्द्रा । चिकेत ।
नाहुषीषु । विक्षु ॥ १६ ॥

रोहित् रोहितवर्णा श्यावा श्यामवर्णा । उभयोः पार्श्वयोरुभयविधवर्णयुक्तेत्यर्थः । सुमदंशुः । सुमत् स्वतः प्रांशुः । उक्तं च यास्केन । सुमत् स्वयमित्यर्थः । नि० ६. २२. । इति । आतदीर्घावयवा । ललामीः पुङ्ग्वती । अश्वभूषणयुक्ता वा । द्युक्षा दिवि द्युलोके कृतनिवासा ऋज्राश्वस्यैतत्संज्ञस्य राजर्षे राये धनार्थं वृषण्वन्तं वृष्णा सेक्त्रेन्द्रेण युक्तं रथं धूर्षु युगसंबंधिषु वहनप्रदेशेषु बिभ्रती वहन्ती मन्द्रा सर्वेषामाह्लादकर्यश्वपङ्क्तिर्नाहुषीषु । नहुषा मनुष्याः । तत्संबंधिनीषु सेनालक्षणासु प्रजासु चिकेत । ज्ञायते । ईदृश्याश्वपंक्त्या युक्त इन्द्रः संग्रामेष्वनु-

र्य्याऽऽहकतया प्रादुर्भवतीत्यर्थः ॥ ललामीः । ललामशब्दाच्छंदसी वनिपाविति मत्वर्थीय इकारः । अद्य तत्वात्सुलोपाभावः । युचा । चि निवासगत्योः । औणादिको डप्रत्ययः । ततष्टाप् । ऋज्राश्वस्य ऋज गतिस्थानार्जनोपार्जनेषु । ऋजेंद्रेत्यादिना रक्प्रत्ययांतो निपातितः । ऋज्रा गतिमंतोऽश्वा यस्य । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । वृषण्वंतं । अनो नुडिति मतुपो नुट् । चिकेत । कित ज्ञाने । छंदसि लुङ्लङ्लिट इति वर्तमाने कर्मणि लिट् । व्यत्ययेन तिप् ॥

सप्तदशीमृचमाह ॥

एतत्यत्त इंद्र वृष्ण उक्थं वार्षागिरा अभि गृणंति राधः ।

ऋज्राश्वः प्रष्टिभिरंबरीषः सहदेवो भयमानः सुराधाः ॥ १७ ॥

एतत् । त्यत् । ते । इंद्र । वृष्णे । उक्थं । वार्षागिराः ।

अभि । गृणंति । राधः ।

ऋज्रऽअश्वः । प्रष्टिऽभिः । अंबरीषः । सहऽदेवः । भयमानः ।

सुऽराधाः ॥ १७ ॥

हे इंद्र वृष्णः कामानां वर्षितुस्ते तव त्यत्तदेतदुक्थं स्तोत्रं राधः संराधकं त्वत्प्रीतिहेतुं वार्षागिरा वृषागिरो राज्ञः पुत्रा ऋज्राश्वादयोऽभिगृणंति । आभिमुख्येन वदंति । वार्षागिरा इत्येतद्विवृणोति । ऋज्राश्व एतत्संज्ञो राजर्षिः प्रष्टिभिः पार्श्वस्थैरन्यैऋषिभिः सहेंद्रमस्तौत् । के ते पार्श्वस्थाः । अंबरीषादयस्त्वारो राजर्षयः ॥ वार्षागिराः । तस्यापत्यमित्यण्-

प्रत्ययः। गृणंति। गॄ शब्दे। प्वादीनां ह्रस्व इति ह्रस्वत्वं। राधः। राध साध संसिद्धौ। राध्नोति समृद्धो भवत्यनेनेति राधः। करणेऽसुन्। ऋज्राश्वः। ऋज्रा गतिमंतोऽश्वा यस्य स तथोक्तः। अंबरीषः। अबि शब्दे। औणादिकोऽरीषन्प्रत्ययः। उ॰ ४. २९.। सहदेवः। देवैः सह वर्तत इति सहदेवः। वोपसर्जनस्येति विकल्पनात्सभावाभावः। भयमानः। ञिभी भये। अस्मादंतर्भावितण्यर्थाद्व्यत्ययेन शानच्। बहुलं छंदसीति शपः श्लाभावः। अदुपदेशाल्लसार्वधातुकानुदात्तत्वे धातुस्वर एव शिष्यते। सुराधाः। राध इति धननाम। शोभनं राधो यस्य। सोमनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं॥

अष्टादशीमृचमाह॥

दस्यूञ्छिम्यूँश्च पुरुहूत एवैर्हत्वा पृथिव्यां शर्वा नि बर्हीत्।
सनत्क्षेत्रं सखिभिः श्वित्न्येभिः सनत्सूर्यं सनदपः सुवज्रः॥ १८॥

दस्यून्। शिम्यून्। च। पुरुऽहूतः। एवैः। हत्वा। पृथिव्यां। शर्वा। नि। बर्हीत्।
सनत्। क्षेत्रं। सखिऽभिः। श्वित्न्येभिः। सनत्। सूर्यं। सनत्। अपः। सुऽवज्रः॥ १८॥

पुरुहूतो बहुभिर्यजमानैराहूत इंद्र एवैर्गमनशीलैर्मरुद्भिर्युक्तः सन् पृथिव्यां भूमौ वर्तमानान्दस्यूनुपक्षपयितॄञ्छत्रून्

शिम्यूंश्च शमयितृन्वधकारिणो राचसादींश्च हत्वा प्रहृत्य तदनंतरं शर्वा हिंसकेन वज्रेण निबर्हीत्। अवधीत्। निबर्हयति बधकर्मा। एवं शत्रून्निरस्य श्वित्न्येभिः श्वेतवर्णैरलंकारेण शोभांगैः सखिभिर्मित्रभूतैर्मरुद्भिः सह चेत्रं शत्रूणां स्वभूतां भूमिं सनत्। समभाचीत्। तथा वृत्रेण तिरोहितं सूर्यं तस्य वृत्रस्य हननेन सनत्। अभजत। प्राप्तवानित्यर्थः। तथा सुवज्रः शोभनवज्रयुक्त इंद्रो वृत्रेण निरुद्धा अपो वृष्ट्युदकानि सनत्। समभजत॥ दस्यून्। दसु उपचये। यजिमनिशुंधिदसिजनिभ्यो युः। वृषादित्वादाद्युदात्तत्वं। शिम्यून्। शमु उपशमे। शमयति सर्वं तिरस्करोतीति राचसादिः शिम्युः। औणादिको युन्प्रत्ययः। वर्णव्यापत्त्याकारस्येत्वं। शर्वा। शृ हिंसायां। अन्येभ्योऽपि दृश्यंत इति वनिप्। सुपां सुलुगिति तृतीयाया डादेशः। सनत्। वन षण संभक्तौ। लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। श्वित्न्येभिः। श्विता वर्णे। औणादिको नक्प्रत्ययः। श्वित्नं शुक्लवर्णमर्हतीति श्वित्न्याः। छंदसि चेति यः। सुवज्रः। आद्युदात्तं द्व्यच्छंदसीत्युत्तरपदाद्युदात्तत्वं॥

एकोनविंशीमृचमाह॥

विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृता सनुयाम वाजं।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी
उत द्यौः॥ १९॥

विश्वाहा । इंद्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः ।
सनुयाम । वाजं ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः ।
सिंधुः । पृथिवी । उत । द्यौः ॥ १९ ॥

विश्वाहा सर्वकालीनोऽस्माकमिंद्रोऽधिवक्तास्तु । अधिवचनं पक्षपातेन वचनं । यथोक्तं ब्राह्मणायाधिब्रूयादिति । सर्वदास्माकमिंद्रः पक्षपातवचनयुक्तो भवतु । वयं चापरिह्वृता अकुटिलगतयः संतो वाजं हविर्लक्षणमन्नं सनुयाम । संभजामहे । यदनेन सूक्तेनास्माभिः प्रार्थितं तन्मित्रादयो मामहंतां । पूजितं कुर्वंतु ॥ विश्वाहा । विश्वान्यहानि विश्वाहानि । अत्यंतसंयोगे द्वितीया । शेश्छंदसि बहुलमिति शेर्लोपः । उपधादीर्घत्वं नलोपः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । अपरिह्वृताः । ह्वृ कौटिल्ये । निष्ठायामपरिह्वृताश्च । पा० ७. २. ३२. । इति निपातनात् क्रुभावाभावः । अव्ययपूर्वपदप्रकृतिस्वरत्वं । सनुयाम । षणु दाने । लिङि तनादित्वादुप्रत्ययः । वन षण संभक्ताविवत्यस्माद्दा व्यत्ययेनोप्रत्ययः ॥

॥ इति प्रथमस्य सप्तम एकादशो वर्गः ॥

प्र मंदिन इत्येकादशर्चमष्टमं सूक्तमांगिरसस्य कुत्सस्यार्षं । अष्टम्याद्यास्तिस्रस्त्रिष्टुभः शिष्टाः सप्त जगत्यः । इंद्रो देवता । तथा चानुक्रांतं । प्र मंदिन एकादश कुत्सस्तुस्त्रिष्टुबंतमाद्या गर्भस्त्राविण्युपनिषत् ॥ दशरात्रस्य नवमेऽहनि मरुत्वतीय

एतत्सूक्तं । विश्वजित् इति खंडे सूचितं । प्र मंदिन इमा उ त्वेति मरुत्वतीयं । आ० ८. ७. । इति ॥

तत्र प्रथमामृचमाह ॥

प्र मंदिने पितुमदर्चता वचो यः कृष्णगर्भा निरहन्नृ-
जिश्वना ।
अवस्यवो वृषणं वज्रदक्षिणं मरुत्वंतं सख्याय हवामहे ॥१॥

प्र । मंदिने । पितुऽमत् । अर्चत । वचः । यः । कृष्णऽगर्भाः ।
निःऽअहन् । ऋजिश्वना ।
अवस्यवः । वृषणं । वज्रऽदक्षिणं । मरुत्वंतं । सख्याय ।
हवामहे ॥ १ ॥

हे ऋत्विजः । मंदिने स्तुतिमते स्तोतव्यायेंद्राय पितुमद्वचो हविर्लक्षणेनान्नेनोपेतं स्तुतिलक्षणं वचनं प्रार्चत । प्रकर्षेणोच्चारयत । य इंद्र ऋजिश्वनैतत्संज्ञकेन राज्ञा सख्या सहितः सन् कृष्णगर्भाः । कृष्णो नाम कश्चिदसुरः । तेन निषिक्तगर्भास्तदीया भार्या निरहन् । अवधीत् । कृष्णमसुरं हत्वा पुत्राणामप्यनुत्पत्त्यर्थं गर्भिणीस्तस्य भार्या अप्यवधीदित्यर्थः । अवस्यवो रक्षणेच्छवो वयं वृषणं कामानां वर्षितारं वज्रदक्षिणं वज्रयुक्तेन दक्षिणहस्तेनोपेतं तं मरुत्वंतमिंद्रं सख्याय सख्युः कर्मणे हवामहे । आह्वयामहे ॥ मंदिने । मदि स्तुति मोदमदस्वप्नकांतिगतिषु । औणादिक इनिप्रत्ययः । तदुक्तं यास्केन । मंदी मंदयतेः स्तुतिकर्मण इति । पितुमत् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । कृष्णगर्भाः । कृष्णेन

निषिक्ता गर्भा यासु तास्तथोक्ताः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। अवस्यवः। अवेरौणादिको भाविऽसुन्। अव इच्छत्यवस्यति। सुप आत्मनः क्यच्। क्याच्छंदसीत्युप्रत्ययः। वृषणं। वा षपूर्वस्य निगम इति विकल्पनादुपधादीर्घाभावः। सख्याय। सख्युः कर्म सख्यं। सख्युर्य इति यप्रत्ययः। हवामहे। ह्वेञो लटि बहुलं छंदसीति संप्रसारणं॥

द्वितीयामृचमाह॥

यो व्यंसं जाहृषाणेन मन्युना यः शंबरं यो

अहन्पिप्रुमव्रतं।

इंद्रो यः शुष्णमशुषं न्यावृणङ्मरुत्वंतं सख्याय

हवामहे॥ २॥

यः। विऽअंसं। जहृषाणेन। मन्युना। यः। शंबरं।।

यः। अहन्। पिप्रुं। अव्रतं।

इंद्रः। यः। शुष्णं। अशुषं। नि। अवृणक्। मरुत्वंतं।

सख्याय। हवामहे॥ २॥

य इंद्रो जहृषाणेन प्रवृद्धेन मन्युना क्रोधेन व्यंसं विगतभुजं वृत्रमहन्। अवधीत्। अपि च य इंद्रः शंबरमेतत्संज्ञमसुरं चावधीत्। तथाव्रतं व्रतस्य यागादेः कर्मणो विरोधिनं पिप्रुमेतत्संज्ञमसुरं च य इंद्रोऽवधीत्। किंच य इंद्रोऽशुषं शोषणरहितं शुष्णं सर्वस्य जगतः शोषकमेतत्संज्ञमसुरं न्यवृणक्। न्यवर्जयत्। समूलं हतवानित्यर्थः। तं मरुत्व-

तमिंद्रं सख्यायाह्वयामहे ॥ व्यंसं । विगतोऽंसो यस्मात् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । यण उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । जाहृषाणेन । हृष तुष्टौ । अत्र सुब्रर्थः । छंदसि लिट् । लिटः कानज्वेति तस्य कानजादेशः । अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं । चित्त्वादंतोदात्तत्वं । अशुषं । शुष शोषणे । इगुपधलक्षणः कः । शुषाः शोषका न संत्यस्येत्यशुषः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । अवृणक् । वृजी वर्जने । रौधादिकः ॥

तृतीयामृचमाह ॥

यस्य द्यावापृथिवी पौंस्यं महद्यस्य व्रते वरुणो
यस्य सूर्यः ।
यस्येंद्रस्य सिंधवः सश्चति व्रतं मरुत्वंतं सख्याय
हवामहे ॥ ३ ॥

यस्य । द्यावापृथिवी इति । पौंस्यं । महत् । यस्य ।
व्रते । वरुणः । यस्य । सूर्यः ।
यस्य । इंद्रस्य । सिंधवः । सश्चति । व्रतं । मरुत्वंतं ।
सख्याय । हवामहे ॥ ३ ॥

यस्येंद्रस्य महद्विपुलं पौंस्यं बलं द्यावापृथिवी द्यावापृथिव्यावनुवर्तते । यस्य चेंद्रस्य व्रते नियमनरूपे कर्मणि वरुणो वर्तते । वरुणोऽपींद्रस्य नियमनं नातिक्रामतीत्यर्थः । अपि च । सूर्योऽपि यस्येंद्रस्य व्रते वर्तते । तथा यस्येंद्रस्य व्रतं कर्म सिंधवो नद्यः सश्चति । वचनव्यत्ययः । गच्छंति । सश्चति-

गच्छतिकर्मा । इंद्रेणानुशिष्टाः प्रवहंतीत्यर्थः । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ द्यावापृथिवी । द्यौश्च पृथिवी च द्यावापृथिव्यौ । दिवो द्यावेति द्यावादेशः । स चाद्युदात्तो निपातितः । पृथिवीशब्दो ङीष्प्रत्ययांतोऽंतोदात्तः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । वा छंदसीति पूर्वसवर्णदीर्घः ॥

चतुर्थीमृचमाह ॥

यो अश्वा॑नां॒ यो गवां॒ गोप॑ति॒र्वशी॒ य आ॑रि॒तः

कर्म॑णिकर्मणि॒ स्थिरः ।

वी॒ळोश्चि॒दिंद्रो॒ यो अस॑न्वतो व॒धो म॒रुत्वं॑तं॒ स॒ख्याय॑

हवामहे ॥ ४ ॥

यः । अश्वा॑नां । यः । गवां॑ । गोऽप॑तिः । व॒शी । यः ।

आ॒रि॒तः । कर्म॑णिऽकर्मणि । स्थि॒रः ।

वी॒ळोः । चि॒त् । इंद्रः॑ । यः । अस॑न्वतः । व॒धः । म॒रुत्वं॑तं ।

स॒ख्याय॑ । ह॒वा॒म॒हे॒ ॥ ४ ॥

य इंद्रोऽश्वानां पतिरधिपतिः । तथा य इंद्रो गोपतिः । न केवलमेकस्या गोः किंतु सर्वासामित्याह गवामिति । सर्वासां गवामधिपतिर्भवति । वशी । अपराधीनः । स्वतंत्र इत्यर्थः । अपि च य इंद्रः कर्मणि कर्मणि सर्वेषु कर्मसु स्थिरो नैश्चल्येनावतिष्ठमान आरितः स्तुतिभिः प्रत्यृतः प्राप्तो भवति । आरितः प्रत्यृतः स्तोमानिति निरुक्तं । नि० ५. १५. । यश्चेंद्रोऽसुन्वतः सुन्वतां यागानुष्ठातॄणां विरोधिनो विळोश्चित्

वृत्रस्यापि शत्रोर्वधो हंता तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ गवां । न गोश्वन्साववर्णेति विभक्तेरुदात्तत्वस्य प्रतिषेधः । गोपतिः । पत्यावैश्वर्ये इति पूर्वपदप्रकृतिस्वरत्वं । आरितः । ऋ गतौ । अस्मात्संप्रतान्निष्ठा । आगमानुशासनस्यानित्यत्वा-त्पुगागमाभावः । यद्वा । सूचिसूत्रिमूत्र्यट्यर्त्यशूर्णोतीनामिति विहितस्य यङो यङोऽचि चेत्यत्र चशब्देन बहुलग्रहणानु-कर्षणादनैमित्तिके लुकि प्रत्ययलक्षणेन सन्यङोरिति ऋ इत्येतस्य द्विर्वचनं उरदत्वहलादिशेषयोः सतो रुग्रिकौ च लुकीति रुक् । ततो निष्ठायां छांदस इडागमः । ऋकारस्य यणादेशः । रो रीत्यभ्यासरेफलोपः । ढ्रलोपे पूर्वस्य दीर्घोऽण इति दीर्घत्वं । बधः । कृत्यल्युटो बहुलमिति बहुलवचनात् हनश्च बध इति कर्तर्यप् बधादेशश्च । स चादंतः । अतो लोप उदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं ॥

पंचमीमृचमाह ॥

यो विश्वस्य जगतः प्राणतस्पतिर्यो ब्रह्मणे प्रथमो
 गा अविंदत् ।
इंद्रो यो दस्यूँरधराँ अवातिरन्मरुत्वंतं सख्याय
 हवामहे ॥ ५ ॥

यः । विश्वस्य । जगतः । प्राणतः । पतिः । यः । ब्रह्मणे ।
 प्रथमः । गाः । अविंदत् ।

इंद्रः । यः । दस्यू॑न् । अध॑रान् । अव॒ऽअति॑रत् । म॒रुत्व॑न्तं ।

स॒ख्याय॑ । ह॒वा॒म॒हे॒ ॥ ५ ॥

य इंद्रो विश्वस्य जगतो गच्छतः प्राणतः प्रश्वसतः प्राणिजातस्य पतिः स्वामी यश्च ब्रह्मणे ब्राह्मणजातिभ्योऽ॑गिरोभ्यः प्रथमोऽन्येभ्यो देवेभ्यः पूर्वभावी सन् पणिभिरपहृता गा अविंदत् । अलभत । अन्येभ्यो देवभ्यः पूर्वमेव तैरसुरैर्युद्ध्वा गाः स्वयमलभतेत्यर्थः । अपि च । इंद्रो दस्यूनुपक्षपयितृनसुरानधरान्निकृष्टान्कृत्वावातिरत् । अवधीत् । अवतिरतिर्वधकर्मा । तं मरुत्वंतमिंद्रं सख्याय ह्वयामहे ॥ जगतः । गम्लृ सृप्लृ गतौ । वर्तमाने पृषद्बृहन्महज्जगच्छतृवच्चेत्यतिप्रत्ययांतो निपातितो जगच्छब्द आद्युदात्तः । प्राणतः । श्वस प्राणने । अन च । अस्माल्लटः शतृ । अदादित्वाच्छपो लुक् । शतुरनुम इति विभक्तेरुदात्तत्वं । षष्ठ्याः पतिपुत्रे ति विसर्जनीयस्य सत्वं ॥

षष्ठीमृचमाह ॥

यः शूरे॑भि॒र्हव्यो॒ यश्च॑ भी॒रुभि॒र्यो धाव॑द्भि॒र्हूय॑ते॒ यश्च॒

जि॒ग्युभिः॑ ।

इंद्रं॒ यं विश्वा॒ भुव॑ना॒भि सं॒द॒धुर्म॒रुत्व॑न्तं स॒ख्याय॑

ह॒वा॒म॒हे॒ ॥ ६ ॥

यः । शूरे॑भिः । हव्यः॑ । यः । च॒ । भी॒रुऽभिः॑ । यः ।

धाव॑त्ऽभिः । हू॒यते॑ । यः । च॒ । जि॒ग्युऽभिः॑ ।

इंद्रं । यं । विश्वा । भुवना । अभि । सम्ऽदधुः । मरुत्वंतं ।

सख्याय । हवामहे ॥ ६ ॥

यं इंद्रः शूरेभिः शौर्योपेतैः पुरुषैर्हव्यो योद्धुमाह्वातव्यः । यश्च भीरुभिर्भयशीलैः कातरैः पुरुषैः सहायार्थमाह्वातव्यः । अपि च । यं इंद्रो धावद्भिः पराजयेन पलायमानैर्हूयते रक्षार्थमाह्वयते । यश्च जिग्युभिः प्राप्तजयैराह्वयते । यं चेंद्रं विश्वा भुवना सर्वाणि भूतजातानि स्वेषु स्वेषु कार्येष्वभिसंदधुः । आभिमुख्येन स्थापयंति । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ शूरेभिः । बहुलं छंदसीति भिस ऐसभावः । हव्यः । ह्वयतेरचो यदिति ह्व इत्यनुवृत्तौ बहुलं छंदसीति संप्रसारणं । गुणे धातोस्तन्निमित्तस्यैवेत्यवादेशः । भीरुभिः । भियः क्रुक्लुकनौ । उ० २. ३२. । इति क्रुप्रत्ययः । धावद्भिः । सृ गतौ । सर्तेर्वे-गितायां शपि पाघ्रेत्यादिना धावादेशः । शपः पित्वादनु-दात्तत्वं । शतुश्च लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । जिग्युभिः । जि जये । लिटः क्वसुः । द्विर्वचने सन्लिटोर्जेरित्य-भ्यासादुत्तरस्य जकारस्य कुत्वं । भिस्ययस्मयादित्वेन भत्वाद्वसोः संप्रसारणमिति संप्रसारणं । छांदसोऽत्यलोपः ॥

॥ इति प्रथमस्य सप्तमे द्वादशो वर्गः ॥

सप्तमीमृचमाह ॥

रुद्राणामिति प्रदिशा विचक्षणो रुद्रेभिर्योषा तनुते

पृथु ज्रयः ।

इंद्रं मनीषा अभ्यर्चति श्रुतं मरुत्वंतं सख्याय हवामहे ॥ ७॥

रुद्राणां । एति । प्रऽदिशा । विऽचक्षणः । रुद्रेभिः ।

योषा । तनुते । पृथु । ज्रयः ।

इंद्रं । मनीषा । अभि । अर्चति । श्रुतं । मरुत्वंतं ।

सख्याय । हवामहे ॥ ७ ॥

विचक्षणः सूर्यात्मना प्रकाशमान इंद्रो रुद्राणां रुद्रपुत्राणामध्यात्मं प्राणरूपेण वर्तमानानां मरुतां । यद्वा रोदयितॄणां प्राणानां । प्राणा हि शरीरान्निर्गताः संतो बंधुजनानादयंति । प्रदिशा प्रदेशनेन मनुष्येभ्यः प्रदानेन सहैति । अंतरिक्षे गच्छति । तथा चाम्नायते । योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेतीति । अपि च रुद्रेभिरधिभूतं वर्तमाने रुद्रपुत्रैर्मरुद्भिर्योषा माध्यमिका वाक् पृथु विस्तीर्णं ज्रयो वेगं तनुते । विस्तारयति । प्रसंगादत्र मरुतां स्तुतिः । मरुद्भिः सह वर्तमानं श्रुतं प्रख्यातं सूर्यात्मानमिंद्रं मनीषा स्तुतिलक्षणा वाक् अभ्यर्चति । आभिमुख्येन स्तौति । तं मरुत्वंतमिंद्रं सख्यायाह्वयामहे ॥ प्रदिशा । दिश अतिसर्जने । संपदादिलक्षणो भावे क्विप् । ज्रयः । जि ज्रि अभिभवे । ज्रीयतेऽभिभूयतेऽनेनेति ज्रयो वेगः । करणेऽसुन् । मनीषा । ईषा अक्षादित्वात्प्रकृतिभावः ॥

अष्टमीमृचमाह ॥

यद्वा मरुत्वः परमे सधस्थे यद्वावमे वृजने मादयासे ।

ऋत आ याह्यध्वरं नो अच्छा त्वाया हविश्चकमा

सत्यराधः ॥ ८ ॥

यत् । वा । मरुत्वः । परमे । सधऽस्थे । यत् । वा ।

अवमे । वृजने । मादयासे ।

अतः । आ । याहि । अध्वरं । नः । अच्छ । त्वाऽया ।

हविः । चकृम । सत्यऽराधः ॥ ८ ॥

हे मरुत्वः । मरुद्भिर्युक्तेंद्र परमे उत्कृष्टे सधस्थे सहस्थाने गृहे यद्वा यदि वा मादयासे तृप्तो वर्तसे । यद्वा यदि वावमेऽर्वाचीने वृजने । वृज्यते रिक्तीक्रियतेऽस्मिन्ननिर्मित वृजनं गृहं । तस्मिन्मादयासे । अतोऽस्मादुभयविधात्स्थानान्नोऽस्माकमध्वरं यज्ञमच्छाभिमुख्येनायाहि । आगच्छ । हे सत्यराधः सत्यधन त्वाया त्वत्कामनया वयं हविश्चकृम । कृतवंतः ॥ मरुत्वः । मतुवसो रुरिति संबुद्धौ नकारस्य रुत्वं । सधस्थे । सुपि स्थ इति कप्रत्यय । सध मादस्थयोश्छंदसीति सहस्य सधादेशः । मादयासे । मद तृप्तियोगे । चुरादिरात्मनेपदी । लेट्यडागमः । त्वाया । त्वामात्मन इच्छति । सुप आत्मनः क्यच् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । व्यत्ययेन इकारस्यात्वं । अ प्रत्ययादित्यकारप्रत्ययः । सुपां सुलुगिति तृतीयाया लुक् ॥

नवमीमृचमाह ॥

त्वायेंद्र सोमं सुषुमा सुदक्ष त्वाया हविश्चकृमा ब्रह्मवाहः ।

अधा नियुत्वः सगणो मरुद्भिरस्मिन्यज्ञे बर्हिषि

मादयस्व ॥ ९ ॥

त्वाऽया । इंद्र । सोमं । सुसुम । सुऽदक्ष । त्वाऽया ।

हविः । चकृम । ब्रह्मऽवाहः ।

अध । नियुत्वः । सऽगणः । मरुत्ऽभिः । अस्मिन् ।

यज्ञे । बर्हिषि । मादयस्व ॥ ९ ॥

हे सुदक्ष शोभनबलेंद्र त्वाया त्वत्कामनया सोमं सुषुम । अभिषुतवंतो वयं । हे ब्रह्मवाहः । ब्रह्मणा मंत्ररूपेण स्तोत्रेणोह्यमान प्राप्यमाणेंद्र त्वाया त्वत्कामनयाहवनीये पुरोडाशलक्षणं हविश्चकृम । कृतवंतः । हे नियुत्वः । नियुतोऽश्वाः । तद्वन्निंद्र । अधानंतरं मरुद्भिः सप्तगणरूपैरेतत्संज्ञैर्देवैः सगणो गणसहितः सन्नस्मिन्वर्तमाने यज्ञे बर्हिष्यास्तीर्णे दर्भे उपविश्य मादयस्व । तृप्तो भव ॥ सुषुम । षुञ् अभिषवे । लिटि क्रादिनियमप्राप्तस्येटोऽनित्यमागमशासनमिति वचनादभावः ॥

दशमीमृचमाह ॥

मादयस्व हरिभिर्ये त इंद्र वि ष्यस्व शिप्रे वि

सृजस्व धेने ।

आ त्वा सुशिप्र हरयो वहंतूशन्हव्यानि प्रति

नो जुषस्व ॥ १० ॥

मादयस्व । हरिऽभिः । ये । ते । इंद्र । वि । स्यस्व ।

शिप्रे इति । वि । सृजस्व । धेने इति ।

आ । त्वा । सुऽशिप्र । हरयः । वहंतु । उशन् । हव्यानि ।

प्रति । नः । जुषस्व ॥ १० ॥

हे इंद्र हरिभिरश्वैः सह मादयस्व । तृप्तो भव । ये ते तव स्वभूताः । तदर्थं शिप्रे हनू संहते विष्यस्व । सोमपानार्थं विवृते कुरु । तथा धेने पानसाधनभूते जिह्वोपजिह्विके विसृजस्व । सोमपानार्थं विश्लिष्टे कुरु । हे सुशिप्र । शिप्रे हनू नासिके वा । शोभनशिप्रेंद्र त्वा त्वां हरयोऽश्वा आवहंतु । अस्मदीयं यज्ञं प्रापयंतु । त्वं चोशन् अस्मान्कामयमानो नोऽस्माकं हव्यानि हवींषि प्रतिजुषस्व । प्रत्येकं सेवस्व । मोदाः सिद्धाः ॥ विष्यस्व । षो अंतकर्मणि । व्यत्ययेनात्मनेपदं । दिवादित्वात् श्यन् । ओतः श्यनीत्योकारलोपः । उपसर्गात्सुनोतीति षत्वं ॥

एकादशीमृचमाह ॥

मरुत्स्तोत्रस्य वृजनस्य गोपा वयमिंद्रेण सनुयाम वाजं ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी

उत द्यौः ॥ ११ ॥

मरुत्ऽस्तोत्रस्य । वृजनस्य । गोपाः । वयं । इंद्रेण ।

सनुयाम । वाजं ।

तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः।

सिंधुः। पृथिवी। उत। द्यौः॥ ११॥

मरुत्स्तोत्रस्य मरुद्भिः सह स्तोत्रं यस्य स मरुत्स्तोत्रः। तस्य वृजनस्य शत्रूणां छेत्तुरिंद्रस्य संबंधिनो गोपा गोपायनीया रक्षणीया वयं तेनेंद्रेण वाजमन्नं सनुयाम। लभेमहि। यदेतदस्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयो द्यावापृथिव्यौ च मामहंतां। पूजितं कुर्वंतु॥ वृजनस्य। वृजी वर्जने। कृपृवृजिमंदिनिधाञ्भ्यः क्युरिति क्युप्रत्ययः॥

॥ इति प्रथमस्य सप्तमे त्रयोदशो वर्गः॥

इमां त इत्येकादशर्चं नवमं सूक्तं कुत्सस्यार्षमैंद्रं। अंत्या त्रिष्टुप् शिष्टा दश जगत्यः। तथा चानुक्रांतं। इमां तेऽंत्या त्रिष्टुबिति। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

इमां ते धियं प्र भरे महो महीमस्य स्तोत्रे धिषणा यत्त आनजे।

तमुत्सवे च प्रसवे च सासहिमिंद्रं देवासः शवसामदन्ननु॥१॥

इमां। ते। धियं। प्र। भरे। महः। महीं। अस्य।

स्तोत्रे। धिषणा। यत्। ते। आनजे।

तं। उत्ऽसवे। च। प्रऽसवे। च। ससहिं। इंद्रं।

देवासः। शवसा। अमदन्। अनु॥ १॥

हे इंद्र मह्नो महतस्ते तवेमामिदानीं क्रियमाणां महीं महतीं अत्यंतोत्कृष्टां धियं स्तुतिं प्रभरे। प्रकर्षेण संपादयामि। ते तव धिषणा त्वदीया बुद्धिरस्य मम स्तोत्रे स्तुतौ यद्यस्मादानजे। अक्ता संश्लिष्टासीत्। तस्मात्तव प्रियां स्तुतिं करोमीत्यर्थः। उत्तरार्द्धर्चः परोक्षकृतः। सासहिं प्रवृणामभिभवितारं पूर्वोक्तं तमिंद्रं देवासः कर्मसु दीव्यंत ऋत्विजः शवसा स्तुतिभिः कीर्तनबलेनान्वमदन्। अनुक्रमेण हर्षं प्रापयन्। किमर्थं। उत्सवे च। उत्सवार्थमभिवृद्ध्यर्थं। प्रसवे च। धनानां वृष्ट्युदकानां वोत्पत्त्यर्थं च॥ आनजे। अंजू व्यक्तिम्रक्षणकांतिगतिषु। अस्मात्कर्मणि लिट्। द्विर्वचनहलादिशेषौ। अत आदेरित्यभ्यासस्यात्वं। तस्मान्नुट् द्विहल इति नुट्। व्यत्ययेनोपधानकारलोपः। उत्सवे। प्रसवे। षू प्रेरणे। ऋदोरबिति भावेऽप्। निमित्तात्कर्मसंयोगे। पा० २. ३. ३६. ३.। इति सप्तमी। थाथादिनोत्तरपदांतोदात्तत्वं। सासहिं। षह अभिभवे। आदृगमहन इत्यत्रोत्सर्गश्छंदसीति वचनात्किप्रत्ययः। लिड्वद्भावाद्द्विर्वचनं। अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं। अमदन्। मदी हर्षे। हेतुमति णिच्। मदी हर्षग्लपनयोरिति घटादिषु पाठान्मितां ह्रस्व इति ह्रस्वत्वं। छंदस्युभयथेत्यार्द्धधातुकत्वात्सेरनिटीति णिलोपः॥

द्वितीयामृचमाह॥

अस्य श्रवो नद्यः सप्त बिभ्रति द्यावाक्षामा पृथिवी
दर्शतं वपुः।
अस्मे सूर्याचंद्रमसाभिचक्षे श्रद्धे कमिंद्र चरतो वितर्तुरं॥२॥

अस्य । श्रवः । नद्यः । सप्त । बिभ्रति । द्यावाक्षामा ।
पृथिवी । दर्शतं । वपुः ।
अस्मे इति । सूर्याचंद्रमसा । अभिऽचक्षे । श्रद्धे । कं ।
इंद्र । चरतः । विऽतर्तुरं ॥ २ ॥

अस्येंद्रस्य श्रवो यशः कीर्तिः सप्त इमं मे गंग इत्यस्यामृचि प्राधान्येन प्रतिपादिता गंगाद्याः सप्तसंख्याका नद्यो बिभ्रति । धारयंति । वृत्रहननेनेंद्रस्य यद्दृष्टिः प्रदातृत्वं तत्प्रभूतजलोपेता नद्यः प्रकटयंतीत्यर्थः । अपि च द्यावाक्षामा द्यावापृथिव्यौ । पृथिवीत्यंतरिक्षनाम । अंतरिक्षं चास्य सूर्यात्मना वर्तमानस्येंद्रस्य दर्शतं सर्वैः प्राणिभिर्दर्शनीयं वपुः । रूपनामैतत् । प्रकाशात्मकं रूपं धारयंति । किंच हे इंद्र । अस्मे अस्माकमभिचक्षे द्रष्टव्यानां पदार्थानामाभिमुख्येन प्रकाशनार्थं श्रद्धे कं श्रद्धार्थं । चक्षुषा दृष्टे हि वस्तुनीदं सत्यमिति श्रद्धोत्पद्यते । कमित्येतत्पादपूरणं । तदुभयार्थं सूर्याचंद्रमसौ वितर्तुरं परस्परव्यतिहारेण तरणं पुनःपुनर्गमनं यथा भवति तथा चरतः । वर्तेते । त्वमेव तद्रूपः सन्वर्तस इत्यर्थः ॥ अस्य । ऊडिदमिति विभक्तेरुदात्तत्वं । द्यावाक्षामा । द्यौश्च क्षामा च । दिवो द्यावेति द्यावादेशः । सुपां सुलुगिति विभक्तेर्डादेशः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । दर्शतं । भृमृदृशीत्यादिनातच् । सूर्याचंद्रमसा सूर्यश्च चंद्रमाश्च । देवताद्वंद्वे चेति पूर्वपदस्यानङादेशः । सुपां सुलुगिति विभक्तेराकारः । चंद्रमस्शब्दो दासीभारादित्वात्पूर्वपदप्रकृतिस्वरेण मध्योदात्तः ।

अतो देवताद्वंद्वे चेति प्राप्तस्योभयपदप्रकृतिस्वरस्य नोत्तरपदेऽनुदात्तादावपृथिवीति प्रतिषेधः। अभिचक्षे। चक्षिः प्रकाशनार्थत्वात्संपदादिलक्षणो भावे क्विप्। तादर्थ्ये चतुर्थी। अद्धे। दृशिग्रहणाद्दधातेर्भावे किच्। चतुर्थ्येकवचन आतो धातोरित्याकारलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। वितर्तुरं। तरतेर्यङ्लुगंतादौणादिकोऽच्। बहुलं छंदसीत्युत्वं॥

तृतीयामृचमाह॥

तं स्मा रथं मघवन्प्राव सातये जैत्रं यं ते अनुमदाम संगमे।

आजा न इंद्र मनसा पुरुष्टुत त्वायद्भ्यो मघवञ्छर्म यच्छ नः॥ ३॥

तं। स्म। रथं। मघऽवन्। प्र। अव। सातये। जैत्रं। यं। ते। अनुऽमदाम। संऽगमे।

आजा। नः। इंद्र। मनसा। पुरुऽस्तुत। त्वायत्ऽभ्यः। मघऽवन्। शर्म। यच्छ। नः॥ ३॥

हे मघवन् धनवन्निंद्र सातयेऽस्माकं धनलाभाय तं स्म तमेव रथं प्राव। प्रेरय वर्तय। नोऽस्माकं मनसा बुद्ध्या पुरुष्टुत बहुशः स्तुतेंद्र ते तव स्वभूतं जैत्रं जयशीलं यं रथं संगमे शत्रुभिः सह संगमने आजा युद्धे सत्यनुमदाम। वयमनुक्रमेण स्तुमः। अपि च हे मघवन् त्वायद्भ्यस्त्वां कामयमानेभ्यो नोऽस्मभ्यं शर्म सुखं यच्छ। देहि॥ अव। अव रक्षणगति-

क्तांतीत्युक्तत्वादत्रतिरत्र गत्यर्थः । संगमे । अहेहर्ट्निरित्यिगमश्चेति कर्मण्यप् । थाथादिनोत्तरपदांतोदात्तत्वं । आजा । सुपां सुलुगिति सप्तम्या डादेशः । त्वायद्भिः । सुप आत्मनः क्यच् । प्रत्ययोत्तरपदयोश्चेति मपर्यंतस्य त्वादेशः । व्यत्ययेन दकारस्यात्वं । क्यजंताल्लटः शतृ । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे सति क्यचा सहैकादेश एकादेश उदात्तेनेति तस्योदात्तत्वं ॥

चतुर्थीमृचमाह ॥

वयं जयेम त्वया युजा वृतमस्माकमंशमुदवा भरेभरे ।
अस्मभ्यमिंद्र वरिवः सुगं कृधि प्र शत्रूणां मघवन्वृष्ण्या रुज ॥ ४ ॥

वयं । जयेम । त्वया । युजा । वृतं । अस्माकं । अंशं । उत् । अव । भरेऽभरे ।
अस्मभ्यं । इंद्र । वरिवः । सुऽगं । कृधि । प्र । शत्रूणां । मघऽवन् । वृष्ण्या । रुज ॥ ४ ॥

हे इंद्र युजास्माभियुक्तेन सहायभूतेन त्वया वृतमावृण्वंतं शत्रुं वयं स्तोतारो जयेम । अभिभवेम । अपि च भरे भरे संग्रामे संग्रामेऽस्माकमंशमस्मदीयं भागमुदव । शत्रुकृतपीडापरिहारेणोत्कृष्टं रक्ष । तथा हे इंद्र वरिवो धनमस्मभ्यं सुगं सुगमं सुप्रापं कृधि । कुरु । तथा हे मघवन् शत्रूणामस्मदुपद्रवकारिणां वृष्ण्या वृष्ण्यानि वीर्याणि प्ररुज । प्रभंग्धि । बाधस्वेत्यर्थः ॥ वृतं । वृञ् वरणे । क्विप् चेति क्विप् । तुगागमः ।

सुगं । सुदुरोरधिकरण इति गमेर्डप्रत्ययः । क्षधि । श्रुशृणु- पृकृवृभ्य इति हेर्धिः । रुज । रुजो भंगे । तौदादिकः ॥

पंचमीमृचमाह ॥

नाना हि त्वा हवमाना जना इमे धनानां धर्तरवसा विपन्यवः ।
अस्माकं स्मा रथमा तिष्ठ सातये जैत्रं हींद्र निभृतं मनस्तव ॥ ५ ॥

नाना । हि । त्वा । हवमानाः । जनाः । इमे । धनानां । धर्तः । अवसा । विपन्यवः ।
अस्माकं । स्म । रथं । आ । तिष्ठ । सातये । जैत्रं । हि । इंद्र । निऽभृतं । मनः । तव ॥ ५ ॥

हे धनानां धर्तः । गोहिरण्यादिरूपाणां द्रव्याणां धारयितरिंद्र । विपन्यवः । स्तोतृनामैतत् । स्तोतार इमे जना अवसा रक्षणेन हेतुना त्वा हवमानास्त्वामाह्वयंतो नाना हि । विभिन्नाः खलु । तेषां मध्येऽस्माकं स्मास्माकमेव सातये धनदानाय रथमातिष्ठ । आरोह । हे इंद्र निभृतमव्याकुलं तव मनश्चित्तं जैत्रं हि । जयशीलं खलु । शत्रूञ्जित्वास्मभ्यं धनं दातुं समर्थमित्यर्थः ॥ सातये । षणु दाने । क्तिनि जनसनखनां सञ्झलोरित्यात्वं ॥

॥ इति प्रथमस्य सप्तमे चतुर्दशो वर्गः ॥

षष्ठीमृचमाह ॥

गोजिता बाहू अमितक्रतुः सिमः कर्मन्कर्मञ्छतमूतिः

खजंकरः।

अकल्प इंद्रः प्रतिमानमोजसाथा जना वि ह्वयंते

सिषासवः ॥ ६ ॥

गोऽजिता। बाहू इति। अमितऽक्रतुः। सिमः।

कर्मन्ऽकर्मन्। शतम्ऽऊतिः। खजम्ऽकरः।

अकल्पः। इंद्रः। प्रतिऽमानं। ओजसा। अथ। जनाः।

वि। ह्वयंते। सिसासवः॥ ६ ॥

हे इंद्र तव बाहू हस्तौ गोजिता जयेन गवां लंभयितारौ। त्वं चामितक्रतुः। अपरिच्छिन्नज्ञानः। सिमः। श्रेष्ठः। तथा च शाट्यायनकं। सिम इति वै श्रेष्ठमाचक्षत इति। यद्वा सिमः शत्रूणां बंधकः। कर्मन्कर्मन् स्तोतॄणां कर्मणि कर्मण्युपस्थिते शतमूतिः। बहुविधरक्षणोपेतः। खजंकरः। खजति मथ्नाति पुरुषानिति खजः संग्रामः। तस्य कर्ता। अकल्पः। कल्पेनान्येन रहितः। स्वतंत्र इत्यर्थः। ओजसा सर्वेषां प्राणिनां यदोजो बलमस्ति तेन सर्वेण प्रतिमानं प्रतिनिधित्वेन मीयमानः। यस्मादेवंगुणविशिष्ट इंद्रोऽयातः कारणात्सिषासवो धनं लब्धुकामा जना विह्वयंते। विविधमाह्वयंति॥ गोजिता। गा जयत इति गोजितौ। सुपां सुलुगिति विभक्ते-

शाकारः । सिमः । षिञ् बंधने । अस्मादौणादिको मक् । खजंकरः । खज मंथने । पचाद्यच् । चेर्मप्रियमद्रेऽण् च । पा० ३. २. ४४. । इति चशब्दस्यानुक्तसमुच्चयार्थत्वात् खजशब्दोपपदादपि करोतेः खच् । अरुर्द्विषदजंतस्येति मुम् । कृदुत्तरपदप्रकृतिस्वरत्वं । अकल्पः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सिषासवः । वन षण संभक्तौ । सनि सनीवंतर्धेति विकल्पनादिड्भावः । जनसनखनां सञ्झलोरित्यात्वं । द्विर्वचनादि । सनाशंसभिक्ष उरित्युप्रत्ययः । सति शिष्टत्वात्तस्यैव स्वरः श्रिष्यते ॥

सप्तमीमृचमाह ॥

उत्ते शतान्मघवन्नुच्च भूयस उत्सहस्राद्रिरिचे कृष्टिषु श्रवः ।
अमात्रं त्वा धिषणा तित्विषे मह्यधा वृत्राणि जिघ्नसे
पुरंदर ॥ ७ ॥

उत् । ते । शतात् । मघऽवन् । उत् । च । भूयसः । उत् ।
सहस्रात् । रिरिचे । कृष्टिषु । श्रवः ।
अमात्रं । त्वा । धिषणा । तित्विषे । मही । अध ।
वृत्राणि । जिघ्नसे । पुरंऽदर ॥ ७ ॥

हे मघवन् धनवन्निंद्र कृष्टिषु मनुष्येषु त्वया दीयमानं श्रवो यदन्नमस्ति तच्छतात् शतसंख्याकादन्नादुद्रिरिचे । उद्रिक्तमधिकं भवति । अपि च भूयसः शतसंख्याकादपि बहुतरादन्नादुद्रिरिचे । अधिकं भवति । किं बहुना । सहस्रात्सहस्रसंख्याकादप्युद्रिरिचे । त्वया दत्तं तदन्नमक्षयमित्यर्थः । अपि च ।

अमावं मानवेयत्तया रहितं। परिगणितुमशक्यैः सर्वैर्गुणैरधिकं त्वां मह्नो महती धिषणास्मदीया स्तुतिलक्षणा वाक् तित्विषे। दीपयति। त्वत्संबंधिनो गुणान्प्रकाशयति। हे पुरंदर शत्रूणां पुरां दारयितरिंद्र। अध स्तुत्यनंतरं वृत्राख्यावरकान् शत्रूञ्जिघ्नसे। हंसि विनाशयसि॥ रिरिचे। रिचिर् विरेचने। कर्मणि लिट्। तित्विषे। त्विष दीप्तौ। जिघ्नसे। हंतेर्लेटि व्यत्ययेनात्मनेपदं। लेटोऽडाटावित्यडागमः। बहुलं छंदसीति शपः श्लुः। गमहनेत्यादिनोपधालोपः। स्थानिवद्भावाद्द्विर्वचनादि। बहुलं छंदसीत्यभ्यासस्येत्वं। पुरंदर। पूःसर्वयोर्दारिसहोः। पा॰ ३. २. ४१.। इति खच्। खचि ह्रस्वः। पा॰ ६. ४. ९४.। इति ह्रस्वत्वं। वाचंयमपुरंदरौ च। पा॰ ६. ३. ६९.। इति निपातनादम्॥

अष्टमीमृचमाह॥

त्रिविष्टिधातु प्रतिमानमोजसस्तिस्रो भूमीर्नृपते त्रीणि रोचना।
अतीदं विश्वं भुवनं ववक्षिथाशत्रुरिंद्र जनुषा सनादसि॥ ८॥

त्रिविष्टिऽधातु। प्रतिऽमानं। ओजसः। तिस्रः। भूमीः। नृऽपते। त्रीणि। रोचना।
अति। इदं। विश्वं। भुवनं। ववक्षिथ। अशत्रुः। इंद्र। जनुषा। सनात्। असि॥ ८॥

हे नृपते नृणां पालयितरिंद्र त्वमोजसः सर्वेषां प्राणिनां बलस्य प्रतिमानं प्रतिनिधिरसि । कीदृशं प्रतिमानं । त्रिविष्टिधातु । धातुशब्दो रज्जुभागवचनः । यथा त्रिधातु पंचधातु वा शुल्वं करोतीति । यथा त्रिविष्टिस्त्रिगुणिता रज्जुर्द्रढीयसी । एवमिंद्रोऽपि दृढ इत्यर्थः । किंच त्वं तिस्रो भूमीस्त्रीन् लोकान् त्रीणि रोचना त्रीणि तेजांसि । दिव्यादित्याख्यमंतरिक्षे वैद्युतरूपमग्निं पृथिव्यामाहवनीयादिरूपेण वर्तमानं पार्थिवमग्निं । एवं त्रीन् लोकान् त्रीणि तेजांसि चातिवर्वाचिथ । अतिशयेन ववक्षिथ । अतिशयेन वोढुमिच्छसि । अपि च । इदं विश्वं सर्वं भुवनं भूतजातं चातिवोढुमिच्छसि । सर्वस्य जगतः पालनेन त्वमेव सर्वेषां निर्वाहको भवसीत्यर्थः । यस्मादेवं इंद्र त्वं सनाच्चिरकालादारभ्य जनुषा जन्मना जन्मप्रभृत्यशत्रुः सपत्नरहितोऽसि ॥ त्रिविष्टिधातु । त्रिधा त्रिप्रकारेण विष्टया प्रवेशनेन विधीयते क्रियत इति त्रिविष्टिधातुस्त्रिगुणिता रज्जुः । विशिर्भावे क्तिन् । धातुः । सितनिगमिमसीत्यादिना कर्मणि तुन्प्रत्ययः । कृदुत्तरपदप्रकृतिस्वरत्वं । दृढरज्जुवाचकः शब्दस्तद्गतं दार्ढ्यं लक्षयित्वा तद्वति प्रतिमाने वर्तते । यथा माणवकेऽग्निशब्दः । तिस्रः । शसि त्रिचतुरोः स्त्रियामिति तिसृआदेशोऽंतोदात्तः । अचि र ऋत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । ववक्षिथ । वह प्रापण इत्यस्मादिच्छासनि ढत्वकत्वषत्वानि । सन्यत इतीत्वाभावश्छांदसः । छांदसे लिट्यमंत्र इति निषेधादाम्प्रत्ययाभावः । जनुषा । जनेरुसिः ॥

नवमोऽर्धर्चमाह ॥

त्वां देवेषु प्रथमं हवामहे त्वं बभूथ पृतनासु सासहिः।
सेमं नः कारुमुपमन्युमुद्भिदमिंद्रः कृणोतु प्रसवे
रथं पुरः ॥ ९ ॥
त्वां। देवेषु। प्रथमं। हवामहे। त्वं। बभूथ।
पृतनासु। ससहिः।
सः। इमं। नः। कारुं। उपऽमन्युं। उत्ऽभिदं। इंद्रः।
कृणोतु। प्रऽसवे। रथं। पुरः ॥ ९ ॥

हे इंद्र देवेषु प्रथमं श्रेष्ठं त्वां हवामहे। यागार्थमा-ह्वयामहे। तथा त्वं पृतनासु संग्रामेषु सासहिर्बभूथ। शत्रूणा-मभिभवितासि। उत्तरार्धः परोक्षकृतः। स इंद्रो नोऽस्माकं कारुं स्तुतीनां कर्तारमुपमन्युमुपमंतारं सर्वज्ञमुद्भिदं शत्रूणा-मुद्भेत्तारमिममेवंगुणविशिष्टं पुत्रं कृणोतु। करोतु। अपि च प्रसवे युद्धोत्पत्तावस्मदीयं रथं पुरोऽन्येभ्यो रथेभ्यः पुरस्तो वर्तमानं करोतु। यद्वा कारुमित्यादीनि रथविशेषणानि। कारुं युद्धस्य कर्तारमुपमन्युमुपगतेन प्राप्तेन मन्युना क्रोधेन युक्तमुद्भिदं मार्गेऽवस्थितानां वृक्षादीनामुद्भेत्तारमतिशयेन भेत्तारं ॥ बभूथ। बभूथाततंथ जगृभ्म ववर्थेति निगम इति निपातनादिडभावः। स इमं। सोऽचिलोपे चेत्पादपूरणमिति सुलोपः। प्रसवे। षूङ् प्राणिप्रसवे। ऋदोरप्। थाथादिनो-त्तरपदांतोदात्तत्वं ॥

दशमीमृचमाह ॥

त्वं जिगेथ न धना रुरोधिथार्भेष्वाजा मघवन्महत्सु च ।

त्वामुग्रमवसे सं शिशीमस्यथा न इंद्र हवनेषु चोदय ॥१०॥

त्वं । जिगेथ । न । धना । रुरोधिथ । अर्भेषु । आजा ।

मघऽवन् । महत्ऽसु । च ।

त्वां । उग्रं । अवसे । सं । शिशीमसि । अथ । नः ।

इंद्र । हवनेषु । चोदय ॥ १० ॥

हे इंद्र त्वं जिगेथ । शत्रूञ्जयसि । तथा धना शत्रुभ्यो-ऽपहृतानि धनानि न रुरोधिथ । नावरुणत्सि । स्तोतृभ्यः प्रयच्छसीत्यर्थः । हे मघवन् धनविन्निंद्र । अर्भेष्वल्पेष्वाजा आजिषु संग्रामेषु महत्सु च प्रौढेषु संग्रामेषु चावसेऽस्माकं रक्षणार्थमुग्रमुद्गूर्णमधिकबलं त्वां संशिशीमसि । स्तोत्रैस्ती-क्ष्णीकुर्मः । अथानंतरं हे इंद्र त्वं हवनेषु युद्धार्थमाह्वानेषु सत्स्वागत्य नोऽस्मांश्चोदय । संग्रामेषु प्रेरय । जयं प्रापयेत्यर्थः ॥ जिगेथ । जि जये । लिटि थलि क्रादिनियमात्प्राप्तस्येटोऽचस्ता-स्वत्थल्यनिटो नित्यं । पा० ७. २. ६१. । इति प्रतिषेधः । सन्लिटोर्जेरित्यभ्यासादुत्तरस्य जकारस्य कुत्वं । रुरोधिथ । क्रादिनियमादिट् । आजा । सुपां सुलुगिति सप्तमीबहुवचनस्य डादेशः । शिशीमसि । शो तनूकरणे । बहुलं छंदसीति विकरणस्य श्लुः । आदेच इत्यात्वं । द्विर्वचने बहुलं छंदसीत्य-भ्यासस्येत्वं । ई हल्यघोरितीकारांतादेशः । इदंतो मसिः ॥

एकादशीमृचमाह ॥

विश्वाहेंद्रो अधिवक्ता नो अस्त्वपरिह्वृताः सनुयाम वाजं ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी

उत द्यौः ॥ ११ ॥

विश्वाहा । इंद्रः । अधिऽवक्ता । नः । अस्तु । अपरिऽह्वृताः ।

सनुयाम । वाजं ।

तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः ।

सिंधुः । पृथिवी । उत । द्यौः ॥ ११ ॥

व्याख्यातेयं रोहिच्छ्यावेति वर्गे । इंद्रः सर्वेष्वहःस्वस्माकं पक्षपातेन वक्ता भवतु । वयं चाकुटिलगतयः संत इंद्रेण दत्तमन्नं लभामहे । यदस्माभिः प्रार्थितमस्मदीयं तन्मित्रादयः पूजितं कुर्वंतु ॥

॥ इति प्रथमस्य सप्तमे पंचदशो वर्गः ॥

तत्त इत्यष्टर्चं दशमं सूक्तं कुत्सस्यार्षमैंद्रं त्रैष्टुभं । तथा चानुक्रांतं ॥ तत्तेऽष्टाविति । तृतीये छंदोमे निष्केवल्य इदं सूक्तं निविद्धानं । विश्वजित इति खंडे सूत्रितं । तत्त इंद्रियमिति निष्केवल्यं । आ० ८. ७. । इति ॥

तत्र प्रथमामृचमाह ॥

तत्त इंद्रियं परमं पराचैरधारयंत कवयः पुरेदं ।

क्षमेदमन्यद्दिव्य१न्यदस्य समी पृच्यते समनेव केतुः ॥ १ ॥

तत्। ते। इंद्रियं। परमं। पराचैः। अधारयंत।

कवयः। पुरा। इदं।

क्षमा। इदं। अन्यत्। दिवि। अन्यत्। अस्य। सं।

ईमिति। पृच्यते। समनाऽइव। केतुः॥ १॥

हे इंद्र ते त्वदीयं परममुत्कृष्टं तत्प्रसिद्धमिदं वर्तमान-मिंद्रियं बलं पुरा पूर्वस्मिन्काले कवयः क्रांतदर्शिनः स्तोतारः पराचैः पराचीनं पराङ्मुखं। यद्वा पराचैः परांचनैः परागमनै-र्युक्तं। यद्वा। अभिमुखमेवाधारयंत। धृतवंतः। अपि च। अस्येंद्रस्यान्यदेकमिदमग्न्याख्यं ज्योतिः क्षमा क्षमायां भूमौ वर्तते। अन्यदप्येकं सूर्याख्यं दिवि द्युलोके। ईं तदिदमुभय-विधमिंद्रस्य ज्योतिः संपृच्यते। परस्परं संयुज्यते। रात्रावादि-त्याग्निना संयुक्तो भवति। अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूरान्नक्तं ददृश इति श्रुतेः। अहनि त्वग्निः सूर्येण संगच्छते। उद्यंतं वावादित्यमग्निरनुसमारोहति। तस्माद्धूम एवाग्नेर्दिवा ददृश इति श्रुतेः। अनयोः परस्परसंगमने दृष्टांतः। समनेव केतुः। समनशब्दः संग्रामवाची। यथा समने संग्रामे युध्यमानयोरुभयोः केतुर्ध्वजो ध्वजांतरेण संयुज्यते तद्वत्॥ इंद्रियं। इंद्रस्य लिंगं बलं। इंद्रियमिंद्रलिंगमिति घच्-प्रत्ययांतो निपात्यते। पराचैः। अव्ययमेतत् उच्चैर्नीचैरिति यथा। यास्कस्त्वाह। पराचैः परांचनैः। नि० ११. २५.। इति। क्षमा। सुपां सुलुगिति सप्तम्या लुक्। ईं। ईमो मलोपः सांहितिकश्छांदसः। समनेव। षम ष्टम अवैक्लव्ये।

अन्येभ्योऽपि दृश्यते। पा० ३. ३. १३०.। इति युच्। सुपां सुलुगिति समस्या आकारः। इवेन विभक्त्यलोपः पूर्वपदप्रकृतिस्वरत्वं चेति समासः॥

द्वितीयामृचमाह॥

स धारयत्पृथिवीं पप्रथच्च वज्रेण हत्वा निरपः ससर्ज।
अहन्नहिमभिनद्रौहिणं व्यहन्व्यंसं मघवा शचीभिः॥ २॥

सः। धारयत्। पृथिवीं। पप्रथत्। च। वज्रेण। हत्वा।
निः। अपः ससर्ज।
अहन्। अहिं। अभिनत्। रौहिणं। वि। अहन्।
विऽअंसं। मघऽवा। शचीभिः॥ २॥

स इंद्रः पृथिवीमसुरैः पीडितां भूमिं धारयत्। धृतवान्। पीडाराहित्येन स्थितामकरोदित्यर्थः। तदनंतरं पप्रथच्च। भूमिं विस्तीर्णामकरोत्। अपि च वज्रेणायुधेन हंतव्यान्वलादीन्हत्वापो ऽवृष्ट्युदकानि निःससर्ज। मेघान्निर्गमयामास। एतदेव स्पष्टीक्रियते। अहिमंतरिक्षे वर्तमानं मेघमहन्। वज्रेण वर्षणार्थमताडयत्। [रौहिणं। रौहिणो नाम कश्चिदसुरः। तं च व्यभिनत्। विदारयत्। अपि च। मघवा धनवानिंद्रः शचीभिरात्मीयैर्युद्धकर्मभिर्व्यंसं विगतभुजं वृत्रासुरमहन्। अवधीत्॥ पप्रथत्। पृथुं करोति प्रथयति। तत्करोतीति णिच्। णाविष्ठवत्प्रातिपदिकस्य कार्यमिति वचनाद्र ऋतो हलादेर्लघोरिति ऋकारस्य रत्वं। टेरिति टिलोपः। नच

स्थानिवद्भावाद्द्वित्वाभावः । प्रथयतेर्लुङि चङि णिलोपः । द्विर्वचनेऽचीति णिलोपस्य स्थानिवत्त्वं न पदांतेत्यादिना स्वरविधिं प्रति तन्निषेधात् । पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः ॥

तृतीयामृचमाह ॥

स जातूभर्मा श्रद्दधान ओजः पुरो विभिंदन्नचरद्वि दासीः ।
विद्वान्वज्रिन्दस्यवे हेतिमस्यार्यं सहो वर्धया द्युम्नमिंद्र ॥ ३ ॥

सः । जातूऽभर्मा । श्रत्ऽदधानः । ओजः । पुरः ।
विऽभिंदन् । अचरत् । वि । दासीः ।
विद्वान् । वज्रिन् । दस्यवे । हेतिं । अस्य । आर्यं । सहः ।
वर्धय । द्युम्नं । इंद्र ॥ ३ ॥

जातूभर्मा । जातू इत्यशनिनामाचष्टे । भर्मायुधं । अशनिरूपमायुधं यस्य स तथोक्तः । यद्वा । जातानां प्रजानां भर्ता । ओज ओजसा बलेन निष्पाद्यं कार्यं श्रद्दधानः । आदरातिशयेन कामयमानः । एवंभूतः स इंद्रो दासीर्दस्युसंबंधीनि पुरः पुराणि विभिंदन् विनाशयन्व्यचरत् । विविधमगच्छत् । हे वज्रिन्वज्रवन्निंद्र विद्वान् स्तुतीर्विजानंस्त्वमस्य स्तोतुर्दस्यव उपक्षयकारिणे शत्रवे हेतिमायुधं विसृजेति शेषः । अपि च हे इंद्र । आर्यं सहः । आर्या विद्वांसः स्तोतारः । तदीयं बलं वर्धय । अतिवृद्धं कुरु । तथा द्युम्नं तदीयं यशश्च प्रवर्धय ॥ जातूभर्मा । जनी प्रादुर्भावे । अन्येष्वपि दृश्यत इति दृशि-

ग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्केवलादपि उप्रत्ययः। जांस्तूर्वतीति जातूः। तुर्वीः हिंसार्थः। क्विपि राल्लोप इति वलोपः। भ्रियत इति भर्म। अन्येभ्योऽपि दृश्यंत इति मनिन्। जातूर्भर्मं यस्य। छांदसो रेफलोपः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। पचांतरे तु जनेर्निष्ठा। जनसनखनामित्यात्वं। जातं सर्वं भर्म भर्तव्यं येन। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। वर्णव्यापत्त्याकारस्य चोकारः॥

चतुर्थीमृचमाह॥

तदूचुषे मानुषेमा युगानि कीर्तेन्यं मघवा नाम बिभ्रत्।
उपप्रयन्दस्युहत्याय वज्री यद्ध सूनुः श्रवसे नाम दधे॥ ४॥

तत्। ऊचुषे। मानुषा। इमा। युगानि। कीर्तेन्यं।
मघऽवा। नाम। बिभ्रत्।
उपऽप्रयन्। दस्युऽहत्याय। वज्री। यत्। ह। सूनुः।
श्रवसे। नाम। दधे॥ ४॥

नाम शत्रूणां नामकं तदिंद्रस्य बलमूचुषे उक्तवते स्तुतवे यजमानाय कीर्तेन्यं कीर्तनीयं स्तुत्यं। नामकं तद्बलं बिभ्रत् धारयन्मघवा धनवानिंद्रो मानुषा मनुष्याणां संबंधीनीमानि दृश्यमानानि युगान्यहोरात्रसंघनिष्पाद्यानि कृतत्रेतादीनि सूर्यात्मना निष्पादयतीति शेषः। किं पुनस्तन्नाम। दस्युहत्याय दस्यूनां वृत्रादीनां हननायोपप्रयन् शत्रुसमीपाभिर्गच्छन् वज्री वज्रवान्सूनुः शत्रूणां प्रेरयितेंद्रो यद्ध यत्खलु नाम शत्रूणां नामकं श्रवसे जयलक्षणाय यशसे दधे धृतवान्॥ ऊचुषे।

ब्रूञ् व्यक्तायां वाचि। ब्रूवो वचिः। लिटः क्वसुः। वचिस्व-पीत्यादिना संप्रसारणं। चतुर्थ्येकवचने भसंज्ञायां वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। क्वसुप्रत्ययाद्युदात्तत्वं। कीर्तेन्यं। कृत संशब्दने। कृत्यार्थे तवैकेनिति केन्यप्रत्ययः। मघवा। मघशब्दाच्छंदसोवनिपाविति मत्वर्थीयो वनिप्। बिभ्रत्। डुभृञ् धारणपोषणयोः। शतरि जुहोत्यादित्वाच्छपः श्लुः। भृञामिदित्यभ्यासस्येत्वं। नाभ्य-स्ताच्छतुरिति नुमागमप्रतिषेधः। अभ्यस्तानामादिरित्याद्यु-दात्तत्वं॥

पंचमीमृचमाह॥

तदस्येदं पश्यता भूरि पुष्टं श्रदिंद्रस्य धत्तन वीर्याय।

स गा अविंदत्सो अविंदद्श्वान्त्स ओषधीः सो अपः

स वनानि॥ ५॥

तत्। अस्य। इदं। पश्यत। भूरि। पुष्टं। श्रत्। इंद्रस्य।

धत्तन। वीर्याय।

सः। गाः। अविंदत्। सः। अविंदत्। अश्वान्। सः।

ओषधीः। सः। अपः। सः। वनानि॥ ५॥

हे ऋत्विग्यजमानलक्षणा जनाः। अस्येंद्रस्य तदिदं वीर्यं पुष्टं प्रवृद्धं। अत एव भूरि विस्तीर्णं पश्यत। आलोकयत। तस्मै वीर्याय श्रत् धत्तन। बहुमानं कुरुत। किं पुनस्तद्वीर्य-मिति चेत् उच्यते। स इंद्रः पणिभिरपहृता गा येन वीर्येणा-

विंदत् अलभत । तथा तैरपहृतामश्वान्स इंद्रो येनाविंदत् । अपि च स इंद्र ओषधीरोषध्युपलक्षितां सर्वां भूमिं येन वीर्येणालभत । तथा वृत्रेण निरुद्धा अपो वृष्ट्युदकानि स इंद्रो येनालभत । तथा वनानि वननीयानि संभजनीयानि धनानि स इंद्रो येन वीर्येण प्राप्नोत् ॥ धत्तन । तप्तनप्तनथनाश्चेति तस्य तनादेशः । अविंदत् । विद्लृ लाभे । शे मुचादीनामिति नुम् ॥

॥ इति प्रथमस्य सप्तमे षोड़शो वर्गः ॥

षष्ठीमृचमाह ॥

भूरिकर्मणे वृषभाय वृष्णे सत्यशुंष्माय सुनवाम सोमं ।
य आदृत्या परिपंथीव शूरोऽयंज्वनो विभजन्नेति वेदः ॥६॥

भूरिऽकर्मणे । वृषभायं । वृष्णे । सत्यऽशुंष्माय । सुनवाम ।
सोमं ।
यः । आऽदृत्यं । परिपंथीऽइंव । शूरंः । अयंज्वनः ।
विऽभजंन् । एतिं । वेदंः ॥ ६ ॥

भूरिकर्मणे बहुविधेन शत्रुवधादिरूपेण कर्मणा युक्ताय वृषभाय वृषभवत्सर्वेषु देवेषु श्रेष्ठाय वृष्णे सेचनसमर्थाय सत्यशुष्मायावितथबलायेंद्राय तदर्थं सोमं सुनवाम । होमार्थं रसरूपं करवाम । शूरः शौर्योपेतो य इंद्र आदृत्य धनविषयमादरं कृत्वायज्वनोऽयजमानस्य वेदो धनं विभजन् । तस्मादयजमानाद्विभक्तं कुर्वन्नपहरन्नेति । यजमानेभ्यस्तद्धनं दातुं गच्छति । तत्र दृष्टांतः । परिपंथीव । यथा मार्गनिरोधकश्चौरो गच्छतां पुरुषपुरुषाणां धनं बलात्कारेणापहृत्य गच्छति ।

तद्वत् ॥ आदृत्य । दृङ् आदरे । समासेऽनञ्पूर्वे क्त्वो ल्यप् । तस्य स्थानिवद्भावेन कृत्त्वे सति ह्रस्वस्य पिति कृतीति तुक् । परिपंथी । छंदसि परिपंथिपरिपरिणौ पर्यवस्थातरीतीनिप्रत्ययांतो निपात्यते ॥

सप्तमीमृचमाह ॥

तदिंद्र प्रेव वीर्यं चकर्थ यत्ससंतं वज्रेणाबोधयोऽहिं ।

अनु त्वा पत्नीर्हृषितं वयश्च विश्वे देवासो अमदन्ननु त्वा ॥८॥

तत् । इंद्र । प्रऽइव । वीर्यं । चकर्थ । यत् । ससंतं ।

वज्रेण । अबोधयः । अहिं ।

अनु । त्वा । पत्नीः । हृषितं । वयः । च । विश्वे । देवासः ।

अमदन् । अनु । त्वा ॥ ७ ॥

हे इंद्र तद्वीर्यं वीरकर्म प्रेव चकर्थ । प्रख्यातमिवाकार्षीः । किं पुनस्तद्वीर्यं । ससंतं स्वपंतं मदोन्मत्तमहिं वृत्रं वज्रेण कुलिशेन यद्येन वीर्येण त्वमबोधयः । प्रबुद्धः सन्मया सह युद्धं करोत्विति हृषितं तादृशस्य वृत्रस्य हननेन प्राप्तहर्षं त्वामनु पश्चात्पत्नीर्देवपत्न्य अमदन् । हर्षं प्राप्ताः । अपि च वयश्च गमनशीला मरुतोऽपि तथा विश्वे देवासोऽन्ये च सर्वे देवास्त्वामनु पश्चादमदन् । अमाद्यन् ॥ ससंतं । षस स्वप्ने । अदादित्वाच्छपो लुक् । पत्नीः । वा छंदसीति पूर्वसवर्णदीर्घत्वं । अमदन् । मदी हर्षे । व्यत्ययेन शप् ॥

अष्टमीमृचमाह ॥

शुष्णं पिप्रुं कुयवं वृत्रमिंद्र यदावधीर्वि पुरः शंबरस्य ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी
उत द्यौः ॥ ८ ॥

शुष्णं । पिप्रुं । कुयवं । वृत्रं । इंद्र । यदा । अवधीः ।
वि । पुरः । शंबरस्य ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः ।
सिंधुः । पृथिवी । उत । द्यौः ॥ ८ ॥

हे इंद्र त्वं शुष्णादींस्त्वतुरोऽसुरान्यद्यदावधीः । हतवानसि । तदानीं शंबरस्यासुरस्य पुरो नगराणि विदारितवानसि । असुराणां मुख्येषु हतेष्वन्यान्यप्यसुरपुराणि विदीर्णान्यासन्नि-त्यर्थः । यदनेन सूक्तेन प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां । पूजितं कुर्वंतु ॥ शुष्णं । शुष शोषणे । अंतर्भावितण्यर्थात् तृषिशुषिरसिभ्यः कित्चेति नप्रत्ययः । निदित्यनुवृत्तेराद्यु-दात्तत्वं । पिप्रुं । पृ पालनपूरणयोः । पृ इत्येके । औणादिकः कुप्रत्ययः । छंदस्युभयथेति तस्य सार्वधातुकत्वे सति शप् । जुहोत्यादित्वात् श्लुः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं । कुयवं । यवो यवनं मिश्रणं । कुत्सित यवनमस्य । बहुव्रीहौ पूर्वपद-प्रकृतिस्वरत्वं । शंबरस्य । शमयतीति शंब आयुधं । शमेर्वन् । उ० ४, ९६. । ततो मत्वर्थीयो रप्रत्ययः ॥

॥ इति प्रथमस्य सप्तमे सप्तदशो वर्गः ॥

योनिरिति नवर्चमेकादशं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्रं । योनिर्नवेत्यनुक्रांतं । सूक्तविनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

योनिष्ट इंद्र निषदे अकारि तमा नि षीद स्वानो नार्वा ।
विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे ॥ १ ॥

योनिः । ते । इंद्र । निऽसदे । अकारि । तं । आ । नि । सीद । स्वानः । न । अर्वा ।
विऽमुच्य । वयः । अवऽसाय । अश्वान् । दोषा । वस्तोः । वहीयसः । प्रऽपित्वे ॥ १ ॥

हे इंद्र योनिर्वेद्याख्यं स्थानं ते तव निषदे निषदनायोपवेशनायाकारि । कृतमस्माभिः प्रकल्पितमभूत् । तं योनिमानिषीद । शीघ्रमागत्य तत्रोपविश । शीघ्रागमने दृष्टांतः । स्वानो नार्वा । अर्वेत्यश्वनाम । यथाश्वः स्वानो हेषाशब्दं कुर्वन् स्वकीयं स्थानं शीघ्रमागच्छति तद्वत् । किं कृत्वा । वयोऽश्वबंधनार्थान् रश्मीन्विमुच्य । रथाद्विश्लिष्य । तथाश्वान् रथे योजितांश्च तुरगानवसाय विमुच्य । अत्र निरुक्तं । अवसायाश्वानिति स्यतिरुपसृष्टो विमोचने । नि० १. १७. । इति । कीदृशानश्वान् । प्रपित्वे । यागकाले प्राप्ते । प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते । नि० ३. २०. । इति यास्कः । दोषा रात्रौ वस्तोरहनि च वहीयसः । आदरातिशयेन वोढ़्न् ॥ निषदे । सदेः संपदादिलक्षणो भावे क्विप् । स्वानः । स्वमु स्वन ध्वन शब्दे । बहुलवचनात्कर्तरि घञ् । कर्षात्वत इत्यंतोदात्तत्वं ।

वयः। वियंति रथेन सह संगच्छंत इति विशब्देन रश्मय उच्यंते। वी गत्यादिषु। औणादिक इप्रत्ययः। टिलोपश्च। द्वितीयार्थे प्रथमा। अवसाय। षो अंतकर्मणि। आदेच इत्यात्वं। समासेऽनञ्पूर्वे इति क्त्वो ल्यबादेशः। वहीयसः। वह प्रापणे। तृजंताद्वोढृशब्दात्तुश्छंदसीतीयसुन्। तुरिष्ठेमेयः-स्विति तृलोपे कर्तव्ये ढत्वधत्वष्टुत्वढलोपानामसिद्धत्वात्तदाश्रितस्यौत्वस्याप्यभावे तृलोप एव क्रियते॥

द्वितीयामृचमाह॥

आ त्ये नर इंद्रमूतये गुर्नू चित्तान्त्सद्यो अध्वनो जगम्यात्।
देवासो मन्युं दासस्य श्चम्नन्ते न आ वक्षन्त्सुविताय वर्णं॥ २॥

आ इति। त्ये। नरः। इंद्रं। ऊतये। गुः। नु। चित्। तान्। सद्यः। अध्वनः। जगम्यात्।
देवासः। मन्युं। दासस्य। श्चम्नन्। ते। नः। आ। वक्षन्। सुविताय। वर्णं॥ २॥

त्ये ते नरो यज्ञस्य नेतारो यजमाना ऊतये रक्षणायेंद्रं। ओ आ उ इत्येतन्निपातद्वयसमुदाय आकारार्थः। आगुः। आगच्छंति। स चेंद्र आगतांस्तान् नू चित्क्षिप्रं सद्यस्तदानीमेवाध्वनोऽनुष्ठानमार्गाञ्जगम्यात्। गमयतु। प्रापयतु। देवासः सर्वे देवा दासस्योपक्षपयितुरसुरस्य मन्युं क्रोधं श्चम्नन्।

भक्षयंतु । हिंसंत्वित्यर्थः । अपि च ते देवा नोऽस्माकं सुवितायं सुष्टु प्राप्तव्याय यज्ञाय वर्णंमनिष्टनिवारकमिंद्रमावक्षन् । आवहंतु । आनयंतु ॥ जगम्यात् । गमेरंतर्भावितण्यर्थात् लिङि बहुलं छंदसीति शपः श्लुः । घस्मन् । घसु अदने । लेटि व्यत्ययेन श्ना । अकारोपजनश्छांदसः । यद्वा घस्नातिः प्रकृत्यंतरं हिंसार्थं द्रष्टव्यं । वक्षन् । वह प्रापणे । लेटि सिब्बहुलं लेटीति सिप् । ढत्वकत्वषत्वानि । सुविताय । सुपूर्वादितेः कर्मणि निष्ठा । तन्वादित्वादुवङ् । सूपमानात् क्त इत्युत्तरपदांतोदात्तत्वं । वर्णं । वृञ् वरणे । अस्मादंतर्भावितण्यर्थात्कृवृजृसिद्रुपण्यनिस्वपिभ्यो नित् । उ० ३. १०. । इति नप्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

तृतीयामृचमाह ॥

अत्र त्मना भरते केतवेदा अत्र त्मना भरते फेनमुदन् ।
क्षीरेण स्नातः कुयवस्य योषे हते ते स्यातां प्रवणे
शिफायाः ॥ ३ ॥

अत्र । त्मना । भरते । केतऽवेदाः । अत्र । त्मना । भरते ।
फेनं । उदन् ।
क्षीरेण । स्नातः । कुयवस्य । योषे इति । हते इति ।
ते इति । स्यातां । प्रवणे । शिफायाः ॥ ३ ॥

केतवेदाः केतं ज्ञातं वेदः परेषां धनं येन स तादृशः कुयवनामासुरस्त्मनात्मना स्वयमेवात्रभरते । ज्ञातं परेषां धनम-

पहरति। अपि च सोऽसुर उदन्नुदकेऽवर्तमानः सफेनं फेनयुक्तमुदकमात्मना स्वयमेवावभरते। अपहरति। चौरेण चरणशीलेन तेनापहृतेनोदकेन कुयवस्यासुरस्य योषे भार्ये स्नातः। स्नानं कुर्वाते। ताहृश्यौ स्त्रियौ शिफायाः। शिफा नाम नदी। तस्याः प्रवणे निम्ने प्रविष्टमशक्योऽगाधप्रदेशे हृते नष्टे स्यातां। भवेतां। हे इंद्र त्वं परेषां धनमपहृत्यान्यैर्दुरवगाहे उदकस्य मध्ये वर्तमानं कुयवं सकुटुंबमवधीरित्यर्थः॥ त्मना। मंत्रेष्वाड्यादेरात्मन इत्याकारलोपः। भरते। हृञ् हरणे। हृग्रहोर्भ इति भत्वं। केतवेदाः। कित ज्ञाने। कर्मणि घञ्। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। उदन्। पद्दन्नित्यादिनोदकशब्दस्योदन्नादेशः। सुपां सुलुगिति सप्तम्या लुक्॥

चतुर्थीमृचमाह॥

युयोप नाभिरुपरस्यायोः प्र पूर्वाभिस्तिरते राष्टि शूरः।
अंजसी कुलिशी वीरपत्नी पयो हिन्वाना उदभिर्भरंते॥४॥

युयोप। नाभिः। उपरस्य। आयोः। प्र। पूर्वाभिः।
तिरते। राष्टि। शूरः।
अंजसी। कुलिशी। वीरऽपत्नी। पयः। हिन्वानाः।
उदऽभिः। भरंते॥ ४॥

उपरस्योदकमध्य उपरस्यावस्थितस्यायोः परेषामुपद्रवार्थमितस्ततो गच्छतः कुयवस्यासुरस्य नाभिः संनद्धमावसनस्थानं युयोप। गूढमासीत्। यथान्यैर्न दृश्यते सोऽसुरस्तथाकरोदि-

त्यर्थः । अपि च । पूर्वाभिः पूरयित्रीभिरात्मनापह्नताभिरद्भिः प्रतिरते । सोऽसुरः प्रवर्धते । स च शूरः शौर्योपेतो राष्टि । राजते च । आत्मीयेन शौर्येण लोके प्रख्यातो भवतीत्यर्थः । तस्मिन्नसुरमंजस्यांजस्यापेता कुलिशी कुलं घातयंती वीरपत्नी वीरस्य पालयित्री । एतत्संज्ञिकास्तस्त्री नद्यः पयः पयसा तत्संबंधिना सारभूतेनोदकेन हिन्वानाः प्रीणयंत्य उदभिरात्मीयैरुदकैर्भरंति । धारयंति ॥ युयोप । युप विमोहने । नाभिः । नह्य भश्चेतीङ्प्रत्ययः । राष्टि । राजृ दीप्तौ । बहुलं छंदसीति शपो लुक् । व्रश्चादिना षत्वे ष्टुत्वं । पयः । सुपां सुलुगिति तृतीयाया लुक् । हिन्वानाः । हिवि प्रीणनार्थः । इदित्वान्नुम् । अस्मात्ताच्छीलिकश्चानश् । आगमानुशासनस्यानित्यत्वान्नुगभावः । चानशो लसार्वधातुकत्वाभावात्तत्स्वराभावे चितस्वर एव शिष्यते ॥

पंचमीमृचमाह ॥

प्रति यत्स्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् ।
अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥ ५ ॥

प्रति । यत् । स्या । नीथा । अदर्शि । दस्योः । ओकः । न । अच्छ । सदनं । जानती । गात् ।
अध । स्म । नः । मघऽवन् । चर्कृतात् । इत् । मा । नः । मघाऽइव । निष्षपी । परा । दाः ॥ ५ ॥

यद्यदा नीथा नयनहेतुभूता स्या सा पदवी प्रत्यदर्शि । अस्माभिर्दृष्टाभूत् । सा च पदवी दस्योरुपक्षपयितुः कुयवस्यासुरस्य सदनं गृहमच्छाभिमुख्येन गात् । गता प्राप्ता । तत्र दृष्टांतः । जानती स्वकीयं वत्समभिजानती गौरीको न । निवासस्थानं स्वकीयं गोष्ठं यथा ऋजु प्राप्नोति । तद्वन्मार्गोऽप्यसुरगृहं प्राप्त इत्यर्थः । अध स्म अथानंतरमेव हे मघवन्धनवन्निंद्र चर्कृतात्पुनःपुनस्तेनासुरेण कृतादुपद्रवान्नोऽस्मान्नचेति शेषः । इदित्यवधारणे । अस्मान्नचैव नोऽस्मान्मा परादाः । मा परित्याक्षीः । अस्माभिर्ज्ञातेन मार्गेण गत्वास्मदुपद्रवकारिणमसुरं जहीति तात्पर्यार्थः । तत्र व्यतिरेके दृष्टांतोऽभिधीयते । मघेव निष्षपी । विनिर्गतसपो विनिर्गतशेपो यथेष्टाचारी दासीपतिर्मघेव यथा धनान्यस्थाने परित्यजति तथास्मान्मा परित्याक्षीरित्यर्थः । अत्र निरुक्तं । निष्षपी स्त्रीकामो भवति विनिर्गतपसाः । पसः सपते स्पृशतिकर्मणः । मा नो मघेव निष्षपी परा दाः । स यथा धनानि विनाशयति मा नस्त्वं तथा परा दाः । नि॰ ५. १६. । इति ॥ नीथा । णीञ् प्रापणे । हनिकुषिनीरमिकाशिभ्यः क्थन्निति करणे क्थन्प्रत्ययः । गात् । एतेर्लुङीणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । चर्कृतात् । करोतेर्यङ्लुगंतान्निष्ठेति क्तप्रत्ययः । मघाऽइव । शेश्छंदसीति शेर्लोपः । निष्षपी । षप समवाये । सपति समवैति योन्या संगच्छत इति सपः शेपः । पचाद्यच् । निर्गतो नित्योद्धृतः सपः शेपो यस्य स स्त्रीव्यसनी निष्षपः । वर्णव्यापत्त्या ईकारः ।

दाः । डुदाञ् दाने । लुङि गातिस्थेति सिचो लुक् । न माङ्योग इत्यडभावः ॥

॥ इति प्रथमस्य सप्तमेऽष्टादशो वर्गः ॥

षष्ठीमृचमाह ॥

स त्वं न॑ इंद्र सूर्ये॒ सो अ॒प्स्व॑नागा॒स्त्व आ भ॑ज जीवशं॒से ।

मांत॑रां भुज॒मा री॑रिषो न॒ अद्धि॑तं ते म॒हत इं॑द्रि॒याय॑ ॥ ६ ॥

सः । त्वं । नः॒ । इंद्र॒ । सूर्ये॑ । सः । अ॒प्ऽसु । अ॒ना॒गाः॒ऽत्वे ।

आ । भ॒ज । जी॒व॒ऽशं॒से ।

मा । अंत॑रां । भुजं॑ । आ । रि॒रि॒षः॒ । नः॒ । अद्धि॑तं । ते॒ ।

म॒ह॒ते । इं॒द्रि॒याय॑ ॥ ६ ॥

हे इंद्र स त्वं नोऽस्मान्सूर्ये सर्वस्य प्रेरक आदित्य आभज । आभजय । आभिमुख्येन भक्तान्संभक्तान्कुरु । तथा स त्वमप्स्वब्देवतास्वस्मानाभाजय । अपि च जीवशंसे जीवैः प्राणिभिः शंसनीये कामयितव्येऽनागास्त्वेऽपापत्वे पापराहित्येऽस्मानाभाजय । अपि च नोऽस्माकमंतरां गर्भरूपेणांतर्वर्तमानां भुजं पालयित्रीं प्रजामा समंतान्मा रीरिषः । मा हिंसीः । ते तव महते प्रभूतायेंद्रियाय बलाय अद्धितं । अस्माभिः श्रद्धानं कृतं । त्वदीयं बलं बहुमानपूर्वकं स्तुम इत्यर्थः । तस्मात्तादृशबलयुक्तस्त्वं मा रीरिष इति पूर्वेण संबंधः ॥ अनागास्त्वे । न विद्यत आगः पापं यस्य स अनागः । तस्य भावस्तत्त्वं । छांदस उपधादीर्घः । जीवशंसे । शंसु स्तुतौ । कर्मणि घञ् । थाथादिनोत्तरपदांतोदात्तत्वं । भुजं ।

भुनक्ति पालयतीति भूक् प्रजा । क्विप् । रीरिषः । रिष हिंसायां । स्वार्थे ण्यंतादस्माल्लु,ङि चङि णिलोप उपधाह्रस्वत्वादीनि । छांदसं पदकालीनमस्याभ्यासह्रस्वत्वं । अधितं । श्रत्शब्दस्य ऊर्यादित्वेन । पा० १. ४. ६१. । गतित्वाद्गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

अधा मन्ये श्रत्ते अस्मा अधायि वृषा चोदस्व महते धनाय ।
मा नो अकृते पुरुहूत योनाविंद्र क्षुध्यद्भ्यो वय आसुतिं दाः ॥७॥

अध । मन्ये । श्रत् । ते । अस्मै । अधायि । वृषा ।
चोदस्व । महते । धनाय ।
मा । नः । अकृते । पुरुऽहूत । योनौ । इंद्र । क्षुध्यत्ऽभ्यः ।
वयः । आऽसुतिं । दाः ॥ ७ ॥

हे इंद्र अधा अथानंतरं मन्ये । त्वां मनसा जानामि । ते तवास्मै बलाय श्रदधायि । अस्माभिः श्रद्धा कृता । त्वदीयबलविषयमादरातिशयेन स्तोत्रं कृतमित्यर्थः । वृषा कामानां वर्षिता स त्वं महते प्रौढाय धनाय चोदयस्व । अस्मान्प्रेरय । हे पुरुहूत । पुरुभिर्बहुभिर्यजमानैराहूतेंद्र । अकृतेऽनिष्पादिते धनशून्ये योनौ । गृहनामैतत् । गृहे माऽस्माआ धाः । निधेहि । धनधान्यपूर्णे गृहेऽस्मान्वासयेत्यर्थः । अपि च हे इंद्र क्षुध्यद्भ्यो बुभुक्षितेभ्योऽन्येभ्योऽपि स्वादृभ्यो वयोऽन्नमासुतिं पेयं क्षीरादिकं च दाः । देहि ॥

अधायि। दधातेः कर्मणि लुङि च्लेश्चिण्। आतो युक् चिण्कृतोरिति युक्। क्षुध्यद्भ्यः। क्षुध बुभुक्षायां। दिवादित्वात् श्यन्। निघ्नादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

मा नो॑ वधीरिंद्र॒ मा परा॑ दा॒ मा नः॑ प्रि॒या भोज॑नानि॒ प्र मो॑षीः।
आं॒डा मा नो॑ मघवञ्छक्र॒ निर्भे॒न्मा नः॒ पात्रा॑ भेत्स॒हजा॑नुषाणि ॥ ८ ॥

मा। नः॒। व॒धीः॒। इं॒द्र॒। मा। परा॑। दाः॒। मा। नः॒। प्रि॒या। भोज॑नानि। प्र। मो॒षीः॒।
आं॒डा। मा। नः॒। म॒घ॒ऽव॒न्। श॒क्र॒। निः॒। भे॒त्। मा नः॒। पात्रा॑। भे॒त्। स॒हऽजा॑नुषाणि॥ ८ ॥

हे इंद्र नोऽस्मान्मा वधीः। मा हिंसीः। सर्वदा रक्षेत्यर्थः। अपि च मा परादाः। मा परित्याक्षीः। परादानं परित्यागः। अस्मत्कृतां पूजां सर्वदा गृहाणेत्यर्थः। अपि च नोऽस्माकं प्रिया प्रियाणीप्सितानि भोजनान्युपभोग्यानि धनानि मा प्रमोषीः। मापहार्षीः। अस्मास्वेव धनानि यथा स्युस्तथा कुर्वित्यर्थः। तथा हे मघवन् धनवन् शक्र सर्वकार्यशक्तेंद्र नोऽस्माकमांडांडसंबंधीनि गर्भरूपेण निषिक्तान्यपत्यानि मा भेत्। मा भिनः। गर्भरूपेणावस्थितानस्मत्पुत्रान् रक्षेत्यर्थः। मा च नः पात्रा। पतंति गच्छंति गमनसमर्थानि

यानि तान्यपत्यानि पात्राणि । तानि च मा भेत् । मा भिनः ॥ सहजानुषाणि । जानुभ्यां यानि भूमिं सनंति गच्छंतीत्यर्थः । तानि जानुषानि । तैः सहितानि मा विनीनशः । यद्वा । नोऽस्माकं सहजानुषाख्याधाने सहोत्पन्नानि पात्रा पात्राणि स्रुवादीनि मा निर्भेत् । मा भिनः ॥ वधीः । हंतेर्मालिङ् लुङि चेति वधादेशः । स चादंतः । सिच् । अतो लोप इत्यकारलोपः । तस्य स्थानिवद्भावादतो हलादेर्लघोरिति वृद्ध्यभावः । इट ईटीति सिचो लोपः । मोषीः । मुष स्तेये । लुङि सिच इट् । नेटीति वृद्धिप्रतिषेधः । भेत् । भिदिर् विदारणे । लङि सिपि बहुलं छंदसीति विकरणस्य लुक् । लघूपधगुणः । हल्ङ्याब्भ्य इति सिचो लोपः ॥

माध्यंदिने सवनेऽर्वाङेहीत्येषा पोतुः प्रस्थितयाज्या । सूत्रितं च । अर्वाङेहि सोमकामं त्वाहुस्तवायं सोमस्त्वमेह्यर्वाङ् । आ॰ ५. ५. । इति ॥

तामेतां सूक्ते नवमीमृचमाह ॥

अर्वाङेहि सोमकामं त्वाहुरयं सुतस्तस्य पिबा मदाय ।
उरुव्यचा जठर आ वृषस्व पितेव नः शृणुहि हूयमानः ॥९॥

अर्वाङ् । आ । इहि । सोमऽकामं । त्वा । आहुः । अयं ।
सुतः । तस्य । पिब । मदाय ।
उरुऽव्यचाः । जठरे । आ । वृषस्व । पिताऽइव । नः ।
शृणुहि । हूयमानः ॥ ९ ॥

हे इंद्र त्वमर्वाङ् अस्मदभिमुखः सन् एहि आगच्छ। किं कारणमिति चेत्। यस्मात्त्वां सोमकामं सोमविषयाभिलाषमाहुः। पुराविदः कथयंति। अयमस्मदीयः सोमः सुतः। ऋत्विग्भिरभिषुतः। अत आगच्छेत्यर्थः। आगत्य च मदाय हर्षार्थं तस्य तमस्मदीयमभिषुतं सोमं पिब। एतदेव स्पष्टीक्रियते। उरुव्यचाः। उरु विस्तीर्णं व्यचो व्यापनं यस्य तादृशो महावयवो भूत्वा जठर आत्मीय उदर आवृषस्व। सोममासिंच। आ समंतात्पूरयेत्यर्थः। एवंभूतस्त्वं हूयमानः स्तुतिभिराहूयमानः सन् पितेव पुत्राणां वाक्यानि शृणोति तथा नोऽस्माकं वाक्यानि शृणुहि। शृणु॥ सोमकामं। सोमविषयः कामोऽभिलाषो यस्य। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। आहुः। ब्रुवः पंचानामादित आहो ब्रुव इति छेरुसादेशो धातोराहादेशश्च। तस्य। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी। मदाय। मदी हर्षे। मदोऽनुपसर्ग इति भावेऽप्। उरुव्यचाः। व्यच व्याजीकरणे। औणादिकोऽसिप्रत्ययः। व्यचेः कुटादित्वमनसीति वचनात् ङित्वाभावेन संप्रसारणाभावः। परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं। यद्वा। उरु विचति व्याप्नोतीत्युरुव्यचाः। कृदुत्तरपदप्रकृतिस्वरत्वं। वृषस्व। वृष सेचने। व्यत्ययेनात्मनेपदशप्रत्ययौ। शृणुहि। श्रुशृणुपृकृवृभ्य इति हेर्धिः॥

॥ इति प्रथमस्य सप्तम एकोनविंशो वर्गः॥

चंद्रमा इत्येकोनविंशत्यृचं द्वादशं सूक्तं। अपां पुत्रस्य त्रितस्य कूपे पतितस्य कुत्सस्य वार्षं। तथा चोभयोः कूपपात

आम्नायते। त्रितः कूपेऽवहितः काटे निबाड्ह ऋषिरह्न-
दूतय इति च। त्रितस्य चाप्त्यं पुत्रत्वं तैत्तिरीया स्पष्टमाम-
नन्ति। तत एकतोऽजायत इति स द्वितीयमभ्यपातयत् ततो
द्वितोऽजायत स तृतीयमभ्यपातयत् ततस्त्रितोऽजायत।
यदद्भ्योऽजायंत तदाप्त्यानामाप्त्यत्वमिति। तमितमाप्त्यं त्रितस्य-
हेदाम्न इति तकारोपजनेन वयमधीमह इति। अंत्या
त्रिष्टुप्। सं मा तपंतीत्येषा यवमध्या महाबृहती। आद्यौ
द्वावष्टाक्षरौ पादौ द्वादशाक्षरस्तृतीयस्ततो द्वावष्टाक्षरौ सा
यवमध्या महाबृहती। चत्वारोऽष्टका जागतश्च महाबृहती-
त्युक्ता मध्ये चेद्यवमध्येत्युक्तलक्षणोपेतत्वात्। अनु० १. ९.।
शिष्टाः पंक्तयः। विश्वे देवा देवता। तथा चानुक्रांतं।
चंद्रमा एकोनाप्त्यस्त्रितो वा वैश्वदेवं हि पांक्तमंत्या त्रिष्टु-
बष्टमी महाबृहती यवमध्येति। इत्यभिधानादिदमादीनि
त्रीणि सूक्तानि वैश्वदेवानि। विनियोगः। अत्र शाट्यायनेन
इतिहासमाचष्टे। एकतो द्वितस्त्रित इति पुरा त्रय ऋषयो
बभूवुः। ते कदाचिन्मरुभूमावरण्ये वर्तमानाः पिपासया
संतप्तगात्राः संत एकं कूपमविंदन्। तत्र त्रिताख्य एको
जलपानाय कूपं प्राविशत्। स्वयं पीत्वेतरयोश्च कूपादुदक-
मुद्धृत्य प्रादात्। तौ तदुदकं पीत्वा त्रितं कूपे पातयित्वा
तदीयं धनं सर्वमपहृत्य कूपं च रथचक्रेण पिधाय प्रास्थिषातां।
ततः कूपे पतितः स त्रितः कूपादुत्तरीतुमशक्नुवन्सर्वे देवा
मामुद्धरंत्विति मनसा सस्मार। ततस्तेषां स्तावकमिदं सूक्तं
ददर्श। तत्र रात्रौ कूपस्थांतश्चंद्रमसो रश्मीन्पश्यन्परि-
देवयते॥

तत्र प्रथमामृचमाह ॥

चंद्रमा अप्स्व१ंतरा सुपर्णो धावते दिवि ।

न वो हिरण्यनेमयः पदं विंदंति विद्युतो वित्तं मे

अस्य रोदसी ॥ १ ॥

चंद्रमाः । अप्ऽसु । अंतः । आ । सुऽपर्णः । धावते । दिवि ।

न । वः । हिरण्यऽनेमयः । पदं । विंदंति । विऽद्युतः ।

वित्तं । मे । अस्य । रोदसी इति ॥ १

अप्स्वंतरिक्षासु । उदकमये मंडलेऽतर्मध्ये वर्तमानः सुपर्णः शोभनपतनः । यद्वा सुपर्ण इति रश्मिनाम । सुषुम्णाख्येन सूर्यरश्मिना युक्तश्चंद्रमा दिवि द्युलोक आ धावते । आङ् मर्यादायां । एकेनैव प्रकारेण धावते । शीघ्रं गच्छति । तादृशस्य चंद्रमसः संबंधिनो हे हिरण्यनेमयः सुवर्णसदृशपर्यंताः । यद्वा हितरमणीयप्रांता विद्युतो विद्योतमाना रश्मयो वा युष्माकं पदं पादस्थानीयमग्रं न विंदंति । मदीयानींद्रियाणि कूपेनावृतत्वान्न लभंते । अत इदमनुचितं । तस्मात्कूपान्मामुत्तारयतेत्यर्थः । अपि च । हे रोदसी द्यावापृथिव्यौ मे मदीयमस्येदं स्तोत्रं वित्तं । जानीतं । यद्वा मदीयं कूपपतनरूपं यदिदं दुःखं तदवगच्छतं । मदीयं स्तोत्रं श्रुत्वा मदीयं दुःखं ज्ञात्वा वास्मात्कूपान्मामुत्तारयतमित्यर्थः ॥ चंद्रमाह्लादनं सर्वस्य जगतो निर्मिमीत इति चंद्रमाः । चंदे माङो डिदित्यसुन् । दासीभारादिषु पाठात्पूर्व-

पदप्रकृतिस्वरत्वं । धावते । सृ गतौ । पाघ्रेत्यादिना वेगितायां धावादेशः । व्यत्ययेनात्मनेपदं । वित्तं । विद ज्ञाने । लाघ्यदादित्वाच्छपो लुक् । पादादित्वात्तिङ्ङतिङ इति निघाताभावः । अस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः सम्प्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । ऊडिदमिति विभक्तेरुदात्तत्वं ॥

द्वितीयामृचमाह ॥

अर्थमिद्वा उ अर्थिन आ जाया युवते पतिं ।

तुंजाते वृष्ण्यं पयः परिदाय रसं दुहे वित्तं मे

अस्य रोदसी ॥ २ ॥

अर्थं । इत् । वै । ऊं इति । अर्थिनः । आ । जाया ।

युवते । पतिं ।

तुंजाते इति । वृष्ण्यं । पयः । परिऽदाय । रसं । दुहे ।

वित्तं । मे । अस्य । रोदसी इति ॥ २ ॥

अर्थिनो धनमपेक्षमाणाः पुरुषा अर्थमिद्वै अपेक्षितं धनं प्राप्नुवंत्येव । नाहं प्राप्नोमि । उ इत्येतत्पादपूरणं । अपि च जायान्यदीया भार्या पतिं स्वपतिमायुवते । आभिमुख्येन प्राप्नोति । मदीया तु मद्विरहाद्गतासीत् । अपि च संयुक्तौ तौ जायापती वृष्ण्यं वीर्यरूपं पय उदकं तुंजाते । प्रजननायान्योन्यसंघट्टनेन प्रेरयतः । तदनंतरं रसं पुरुषस्य सारभूतं वीर्यं परिदाय गर्भाशयेनादाय गर्भरूपेण धृत्वा दुहे । दुग्धे । पुत्ररूपेण जनयति । मम तु पुत्रोऽपि नोत्पद्यते । अत इदं

अदीयं दुःखं हे द्यावापृथिव्यौ जानीतं॥ ऊ। ऊ॒ इति शाकल्यस्य मतेन प्रगृह्यत्वात् प्लुतप्रगृह्या अचीति प्रकृतिभावः। युवते। यु मिश्रणे। व्यत्ययेनात्मनेपदं। शब्विकरणे प्राप्ते व्यत्ययेन शः। तुंजाते। तुजि पिजि हिंसाबलदाननिकेतनेषु। इदित्वान्नुम्। व्यत्ययेन श्नम्। श्नान्नलोपः। दुहे। दुह प्रपूरणे। लोपस्त आत्मनेपदेष्विति तलोपः।

तृतीयामृचमाह॥

मो षु दे॑वा अ॒दः स्व॑१॒रव॑ पादि दि॒वस्परि॑।

मा सो॒म्यस्य॑ श॒म्भुवः॒ शूने॑ भूम॒ कदा॑ च॒न वि॒त्तं मे॑ अ॒स्य

रोदसी॥ ३॥

मो इति॑। सु। दे॒वाः॒। अ॒दः। स्व१॒रिति॑ स्वः॑। अव॑। पा॒दि॒।

दि॒वः। परि॑।

मा। सो॒म्यस्य॑। श॒म्ऽभुवः॑। शूने॑। भू॒म॒। कदा॑। च॒न।

वि॒त्तम्। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑॥ ३॥

हे देवाः स्वः स्वर्गे वर्तमानमदस्तदस्मदीयं पितृपितामहप्रपितामहात्मकं संतानं दिवस्परि दिवस्योपरि वर्तमानं मो षु मेवावपादि। अवपन्नं विपन्नं प्रभ्रष्टं मा भूत् मम पुत्राभावात्। पुत्रेण लोकाञ्जयति नापुत्रस्य लोकोऽस्तीति श्रुतेः। अतो वयं सोम्यस्य सोमपानार्हस्य पितृगणस्य शंभुवः सुखस्य भावयितुः पुत्रस्य शूने अपगमने कदाचन कदाचिदपि मा भूम। युष्मत्प्रसादान्मम पुत्रा जायंतां। अतो मामस्माद्दुःखा-

दुत्तारयतीत्यर्थः। हे द्यावापृथिव्यौ युवां च मदीयं विज्ञापनं जानीतं ॥ मो। मा उ इति निपातद्वयसमुदायो मैवेत्यस्यार्थे। सु इत्येतदवधारणे। सुञ इति षत्वं। पादि। पद गतौ। चिण् ते पदः। पा० ३. १. ६०.। इति कर्तरि लुङि च्लेश्चिणा-देशः। दिवः। ऊडिदमिति विभक्तेरुदात्तत्वं। पंचम्याः परावध्यर्थे इति विसर्जनीयस्य सत्वं। सोम्यस्य। सोममर्हति यः। पा० ४. ४. १३७.। इति यप्रत्ययः। शंभुवः। भवतेरंत-र्भावितण्यर्थात्क्विप्। शूने। टुओश्वि गतिवृद्ध्योः। भावे निष्ठा। श्वीदितो निष्ठायामितीट्प्रतिषेधः। वचिस्वपीत्यादिना संप्रसारणं। ओदितश्चेति निष्ठानत्वं। व्यत्ययेनाद्युदात्तत्वं। वृषादिर्वा द्रष्टव्यः॥

चतुर्थीमृचमाह॥

यज्ञं पृ॑च्छाम्यव॒मं स तद्दू॒तो वि वो॑चति।

क्व॑ ऋ॒तं पू॒र्व्यं ग॒तं कस्तद्बि॑भर्ति॒ नूत॑नो वि॒त्तं मे॑ अ॒स्य

रो॑दसी ॥ ४ ॥

य॒ज्ञं। पृ॒च्छा॒मि। अ॒व॒मं। सः। तत्। दू॒तः। वि। वो॒च॒ति॒।

क्व॑। ऋ॒तं। पू॒र्व्यं। ग॒तं। कः। तत्। बि॒भ॒र्ति॒। नूत॑नः।

वि॒त्तं। मे॒। अ॒स्य। रो॒द॒सी॒ इति॑ ॥ ४ ॥

यज्ञं यजनीयमवमं सर्वेषां देवानामादिभूतं। अग्निर्मुखं प्रथमो देवतानामिति श्रुतेः। अग्निर्वै देवानामवम इति ब्राह्मणाच्च। तमग्निं पृच्छामि। यन्मया पृष्टं तद्देवानां दूतः सोऽग्निर्विवोचति। विविच्य कथयतु। क्व पुनस्तत्पृच्छ्यत

इति तदुच्यते। हे अग्ने त्वदीयं पूर्व्यं पूर्वकालीनमृतं भद्रं स्तोतृभ्यः कृतं श्रेयः क्व गतं। कुत्रेदानीं वर्तते। नूतनो नवतरस्त्वत्तोऽन्यः कः पुरुषस्तद्भद्रं बिभर्ति। धारयति। यदि त्वय्यवर्तिष्यत ममेदृशी दशापि नाभविष्यत्। अतस्तत् क्व गतमिति कथय॥ वोचति। वच परिभाषणे। लेट्यडागमः। वच उमिति व्यत्ययेन धातोरुमागमः। क्व। किमोऽदिति सप्तम्यर्थेऽत्। क्वातीति किमः क्वादेशः। तित्स्वरित इति स्वरितत्वं। परेण सह ऋत्यक इति प्रकृतिभावः॥

पंचमीमृचमाह॥

अमी ये देवा स्थनं त्रिष्वा रोचने दिवः।
कद्वं ऋतं कदनृतं क्वं प्रत्ना व आहुतिर्वित्तं मे
अस्य रोदसी॥ ५॥

अमी इति। ये। देवाः। स्थनं। त्रिषु। आ।
रोचने। दिवः।
कत्। वः। ऋतं। कत्। अनृतं। क्वं। प्रत्ना। वः।
आऽहुतिः। वित्तं। मे। अस्य। रोदसी इति॥ ५॥

हे देवाः। त्रिषु पृथिव्यादिषु स्थानेषु येऽमी यूयं स्थन। वर्तमाना भवथ। यानि स्थानानि दिवो द्योतमानस्य सूर्यस्य आ रोचने दीप्तिविषये वर्तंते। सूर्यप्रकाश्येषु स्थानेष्वित्यर्थः। तेषां वो युष्माकं संबंधि स्तोतृविषयमृतं सत्यं कत्। कस्मिन्देशे वर्तते। अनृतं द्वेष्टृविषयमसत्यं च कत् कुत्र गतं। अपि च

प्रत्ना चिरकालीना वो युष्माकं संबंधिन्याहुतिर्मया पूर्वमनुष्ठितो यागः क्व कुत्रासीत् । ईदृग्भूतदुःखानुभावेन मया पूर्वमनुष्ठितो यागसमूहो युष्मान्न प्राप्नोदित्यनुमिमे । अन्यत्पूर्ववत् ॥ स्थन । तप्तनप्तनथनाश्चेति तशब्दस्य थनादेशः । कत् । कशब्दस्य वर्णव्यापत्त्या कद्भावः ॥

॥ इति प्रथमस्य सप्तमे विंशो वर्गः ॥

षष्ठीमृचमाह ॥

कद्व ऋतस्य धर्णसि कद्वरुणस्य चक्षणं ।
कदर्यम्णो महस्पथाति क्रामेम दूढ्यो वित्तं मे अस्य रोदसी ॥ ६ ॥

कत् । वः । ऋतस्य । धर्णसि । कत् । वरुणस्य । चक्षणं । कत् । अर्यम्णः । महः । पथा । अति । क्रामेम । दुःऽध्यः । वित्तं । मे । अस्य । रोदसी इति ॥ ६ ॥

हे देवा वो युष्माकं संबंधिन ऋतस्य सत्यस्याभिमतफलप्रापणस्य धर्णसि धारणं कत् । कुत्र गतं । वरुणस्यानिष्टनिवारकस्य देवस्य चक्षणमनुग्रहदृष्ट्या दर्शनं कत् । क्व गतं । महो महतो महानुभावस्यार्यम्णोऽरीणां नियंतुरेतत्संज्ञकस्य देवस्य संबंधिना पथा शोभनमार्गेणेष्टदेशप्रापणं कत् । क्व गतं । एतत्सर्वं युष्मास्वेव वर्तते । न कुत्रापि गतं । अतो वयं दूढ्यो दुर्धियः पापबुद्धीनस्मदनिष्टाचरणपरान् शत्रूनतिक्रामेम । अतितरेम । तैः कृतादस्मात्कूपपातलक्षणाद्दुःखाद्वयमुत्तीर्णा

भवेम । हे द्यावापृथिव्यौ मदीयमिदं जानीतं ॥ धर्णसि । धृञ् धारणे । सानसिधर्णसिपर्णसीत्यादिनासिच्प्रत्ययांतो निपात्यते । अर्यमणः । षष्ठ्येकवचनेऽल्लोपोऽन इत्यकारलोपः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं । महः । महतोऽच्छब्दलोपश्छांदसः । यद्वा मह पूजायां । क्विप् । उभयथापि सावेकाच इति विभक्तेरुदात्तत्वं । दूळ्यः । पृषोदरादिः । ध्यै चेति तत्र पाठाद्दुरो रेफस्योत्वं । उत्तरपदादेः ष्टुत्वं च । उदात्तस्वरितयोर्यण इति स्वरितत्वं ॥

सप्तमीमृचमाह ॥

अहं सो अस्मि यः पुरा सुते वदामि कानि चित् ।
तं मा व्यंत्याध्यो३ वृको न तृष्णजं मृगं वित्तं मे अस्य
रोदसी ॥ ७ ॥

अहं । सः । अस्मि । यः । पुरा । सुते । वदामि
कानि । चित् ।
तं । मा । व्यंति । आऽध्यः । वृकः । न । तृष्णऽजं । मृगं ।
वित्तं । मे । अस्य । रोदसी इति ॥ ७ ॥

हे देवाः पुरा पूर्वस्मिन्काले सुते युष्मद्यागार्थं सोमेऽभिषुते कानि चित् कतिपयानि स्तोत्राणि योऽहं वदामि । उक्तवानस्मि । स एवाहमस्मि न त्वन्यः कश्चित् । तस्मात्किमर्थं मां परित्यजथ । तं तादृशं मामाध्योऽभिलषितपुत्राद्यप्राप्त्या जनिता मानस्यो व्यथा व्यंति । भक्षयंति । तत्र दृष्टांतः । तृष्णजं

जाततृष्णं पिपासंतमुदकं प्रति गच्छंतं मृगं वृको न। यथारण्यश्वा मध्यमार्गे गच्छंतं भक्षयति तद्वत्। अन्यत्पूर्ववत्॥ व्यंति। वी गत्यादिषु। अदादित्वाच्छपो लुक्। तन्वादीनां छंदसि बहुलमुपसंख्यानमिति बहुलवचनाद्यण्। आध्यः। आधीयते मनसि स्थाप्यत इत्याधिः। उपसर्गे घोः किः। आतो लोप इटि चेत्याकारलोपः। जसादिषु छंदसि वावचनमिति जसि चेति गुणस्य विकल्पनादभावे यणादेशः। तृष्णजं। तृष विपासायां। स्वपितृषोर्नजिङिति नजिङ्। पदकारस्त्वेवं मन्यते। अन्येष्वपि दृश्यत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्केवलादपि जनेर्डप्रत्ययः। तृष्णा जाता यस्य। ङ्यापोः संज्ञाछंदसोर्बहुलमिति ह्रस्वत्वं॥

अष्टमीमृचमाह॥

सं मा तपंत्यभितः सपत्नीरिव पर्शवः।
मूषो न शिश्ना व्यदंति माध्यः स्तोतारं ते शतक्रतो
वित्तं मे अस्य रोदसी॥ ८॥

सं। मा। तपंति। अभितः। सपत्नीःऽइव। पर्शवः।
मूषः। न। शिश्ना। वि। अदंति। मा। आऽध्यः।
स्तोतारं। ते। शतक्रतो इति शतऽक्रतो।
वित्तं। मे। अस्य। रोदसी इति॥ ८॥

ऐंद्रेयमृषा। हे इंद्र पर्शवः पार्श्वास्थीनि। अत्र सामर्थ्यात्पर्शुस्थानीयाः कूपभित्तयो मा मामभितः सर्वतः संतपंति।

सम्यक् पीडयंति । तत्र दृष्टांतः । सपत्नीरिव । समान एकः पतिर्यासां ताः सपत्न्यो यथैकं पतिमभितः पीडयंति । परस्परं वा पीडंति । हे शतक्रतो बहुविधकर्मन् बहुविधप्रज्ञ वेंद्र ते तव स्तोतारं मामाध्योऽसंपद्यमानैर्योगदानादिभिरुत्पादिता मानस्यः पीडा व्यदंति । विविधं भक्षयंति । तत्र दृष्टांतः । मूषो न । यथा मूषिका शिश्ना शिश्नानि कुविंदेन वापितान्यन्नरसेनालिप्तानि सूत्राणि भक्षयंति । यद्वा शिश्नशब्देन प्रजननमिवोच्यते । तच्चोपचारात्पुच्छे वर्तते । यथा स्वकीयानि पुच्छानि घृततैलादिभांडे प्रक्षिप्योद्धृत्कृष्य व्यदंति । लिहंतीत्यर्थः । एवं मामाधयो भक्षयंति । न चैतत् हे इंद्र तव स्तोतुर्न्याय्यं । तस्मात्कूपाद्मामुत्तारय । अन्यत्समानं । अत्र निरुक्तं । संतपंति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदंति । स्वांगाभिधानं वा स्यात् । शिश्नानि व्यदंतीति । नि० ४. ६. । इति । सपत्नीः । नित्यं सपत्न्यादिषु । पा० ४. १. ३५. । इति पतिशब्दस्य नकारांतादेशः । ङीप् । वा छंदसीति पूर्वसवर्णदीर्घत्वं । मूषः । मुष स्तेये । क्विपि छांदसो दीर्घः । तथा च यास्कः । मूषो मूषिका इत्यर्थो मूषिकाः पुनर्मुष्णातेर्मूषोऽप्येतस्मादेव । नि० ४. ५. । इति । शिश्ना । ष्णा शौचे । घञर्थे कविधानमिति कः । स्थास्नागापाव्यधिहनियुध्यर्थमिति कः । वर्णव्यापत्त्या सकारस्य शकारः । क्रुभादीना के द्वे भवत इति वक्तव्यं । पा० ६. १. १२. २. । इति द्विर्वचनं । बहुलं छंदसीत्यभ्यासस्येत्वं ॥

नवमीमृचमाह ॥

अमी ये सप्त रश्मयस्तत्रा मे नाभिरातता ।

त्रितस्तद्वेदाप्त्यः स जामित्वाय रेभति वित्तं मे

अस्य रोदसी ॥ ९ ॥

अमी इति । ये । सप्त । रश्मयः । तत्र । मे । नाभिः ।

आऽतता ।

त्रितः । तत् । वेद । आप्त्यः । सः । जामिऽत्वाय । रेभति ।

वित्तं । मे । अस्य । रोदसी इति ॥ ९ ॥

येऽमी द्युलोके वर्तमानाः सप्तसंख्याका रश्मयः सूर्यस्य किरणाः संति तत्र तेषु सूर्यरश्मिष्वध्यात्मं सप्तप्राणरूपेण वर्तमानेषु मे मदीया नाभिरातता संबद्धा । ऋषिरात्मानमेव परोक्षतया निर्दिशति । त्रितस्तीर्णतमस्तिरस्कृताज्ञान आप्त्योऽपां पुत्र ऋषिस्तत्पूर्वोक्तं वृत्तांतं वेद जानाति नान्यः । स जानन्नृषिर्जामित्वाय कूपान्निर्गंतृत्वाय रेभति । तान् रश्मीन् स्तौति । अन्यत्समानं ॥ आतता । तनोतेः कर्मणि निष्ठा । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । जामित्वाय । जमतिर्गतिकर्मा । जमति गच्छतीति जामिः । औणादिक इण्प्रत्ययः । तस्य भावस्तत्त्वं । रेभति । रेभृ शब्दे । भौवादिकः ॥

दशमीमृचमाह ॥

अमी ये पंचोक्षणो मध्ये तस्थुर्महो दिवः ।

देवत्रा नु प्रवाच्यं। सध्रीचीना नि वावृतु र्वित्तं मे अस्य रोदसी ॥ १० ॥

अमी इति। ये। पंच। उक्षणः। मध्ये। तस्थुः। महः। दिवः।

देवऽत्रा। नु। प्रऽवाच्यं। सध्रीचीनाः। नि। ववृतुः। वित्तं। मे। अस्य। रोदसी इति ॥ १० ॥

उक्षणः सेक्तारः कामाभिवर्षकाः पंच। तत्र इंद्रस्तद्वरुण-स्तदग्निस्तदर्यमा तत्सविता चनो धादित्यर्धर्चेन प्रतिपादिताः पंचसंख्याका देवाः। यद्वा। अग्निर्वायुः सूर्यश्चंद्रमा विद्यु-दित्येवं पंचसंख्याकाः। तथा च शाट्यायनकं। एतान्येव पंच ज्योतींषि यान्येषु लोकेषु दीप्यंते। अग्निः पृथिव्यां वायुरं-तरिक्षे च आदित्यो दिवि चंद्रमा नक्षत्रे विद्युदप्स्विति। नक्षत्रे नक्षत्रलोके। अप्सु मेघस्थोदकेषु। तैत्तिरीयेऽप्येव-माम्नातं। अग्निः पृथिव्यां वायुरंतरिक्षे च सूर्यो दिवि चंद्रमा दिक्षु नक्षत्राणि स्वर्लोक इति। येऽमी पंचसंख्याका देवा महो दिवो महतो विस्तीर्णस्य द्युलोकस्य मध्ये तस्थुः। तिष्ठंति। आसते। देवत्रा देवेषु नु क्षिप्रं प्रवाच्यं प्रशंसनीयं देवानां योग्यं मदीयं स्तोत्रं प्रति सध्रीचीनाः सहांचंतो युगपदागच्छंतस्ते देवा मदीयं परिचरणं स्वीकुर्वंति। तदनंतरं निवावृतुः। त्वराः संतो निवर्तंते च। अन्यत्समानं ॥ उक्षणः। वा षपूर्वस्य निगम इत्युपधादीर्घाभावः। देवत्रा। देवमनुष्येत्यादिना

सप्तम्यर्थे क्त्वाप्रत्ययः । प्रवाच्यं । वाचयतेरचो यदिति यत् । णेरनिटीति णिलोपः । यतोऽनाव इत्याद्युदात्तत्वे कृदुत्तरपदप्रकृतिस्वरत्वं । सध्रीचीनाः । सहांचंतीति सध्र्यंचः । त एव सध्रीचीनाः । सहपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । सहस्य सध्रिरिति सध्र्यादेशः । विभाषांचेरदिक्स्त्रियामिति स्वार्थे खप्रत्ययः । वावृतुः । वृतु वर्तने । छंदसि लुङ्लङ्लिट इति वर्तमाने लिट् । व्यत्ययेन परस्मैपदं । अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं ॥

॥ इति प्रथमस्य सप्तम एकविंशो वर्गः ॥

एकादशीमृचमाह ॥

सुपर्णा एत आंसते मध्यं आरोधने दिवः ।

ते सेधंति पथो वृकं तरंतं यह्वतीरपो वित्तं मे

अस्य रोदसी ॥ ११ ॥

सुऽपर्णाः । एते । आसते । मध्ये । आऽरोधने । दिवः ।

ते । सेधंति । पथः । वृकं । तरंतं । यह्वतीः । अपः ।

वित्तं । मे । अस्य । रोदसी इति ॥ ११ ॥

सुपर्णाः । रश्मिनामैतत् । शोभनपतना एते सूर्यरश्मय आरोधने सर्वस्यावरके व्याप्ते दिवोऽतरिक्षस्य मध्य आसते । वर्तंते । ते सूर्यरश्मयः पथो मार्गाद्वृकमरण्यश्वानं सेधंति । निषेधंति निवारयंति । कीदृशं । यह्वतीर्महतीरपस्तरंतं । अतिक्रामंतं । कूपपतनात्पूर्वं त्रितं दृष्ट्वैनं भक्षयितुं

कश्चिदरण्यस्था महतीं नदीं तितीर्षुराजगाम। स च सूर्य-रश्मीन्द्रष्टुमयमवसरो न भवतीति निवहते। अतो रश्मयो वृकं निषेधंतीत्युच्यते। यास्कपक्षे त्वाप इत्यंतरिक्षनाम। यह्वतीरपो महदंतरिक्षं। पथः पथा द्वादशरश्म्यात्मना मार्गेण तरंतं वृकं चंद्रमसं सूर्यरश्मयो निषेधंति। अहनि हि सूर्यरश्मिभिर्निरुद्धश्चंद्रमा निःप्रभो दृश्यते। अतो निःप्रभं कुर्वंतीत्यर्थः॥ आरोधने। आरुध्यत आव्रियतेऽनेनेत्यारोधनं। करणे ल्युट्। सेधंति। षिधु गत्यां। अयं केवलोऽपि निपूर्वार्थे द्रष्टव्यः। पथः। पंचम्येकवचने भस्य टेर्लोप इति टिलोपः। उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं। यास्कपक्षे तु तृतीयार्थे व्यत्ययेन पंचमी। यह्वतीः। यह्व इति महन्नाम। अस्मादा-चारार्थे सर्वप्रातिपदिकेभ्य इति क्विप्। ततो लटः शतृ। उगितश्चेति ङीप्। आगमानुशासनस्यानित्यत्वान्नुमभावः। शतुरनुम इति नदीस्वरो व्यत्ययेन न प्रवर्तते॥

द्वादशीमृचमाह।

नव्यं तदुक्थ्यं हितं देवासः सुप्रवाचनं।
ऋतमर्षंति सिंधवः सत्यं तातान सूर्यो वित्तं मे
अस्य रोदसी॥ १२॥

नव्यं। तत्। उक्थ्यं। हितं। देवासः। सुऽप्रवाचनं।
ऋतं। अर्षंति। सिंधवः। सत्यं। ततान। सूर्यः। वित्तं।
मे। अस्य। रोदसी इति॥ १२॥

हे देवासो देवाः। नव्यं नवतरमुक्थ्यं प्रशस्यं स्तुत्यहं सुप्रवाचनं सुष्ठु ऋत्विग्भिर्वाचयितं शक्यं। एवंभूतं तद्भवदीयं बलं हितं। युष्मासु निहितं। अतो युष्मदीयेन बलेन सिंधवः स्यंदनशीला नद्यो ऋतमुदकमर्षंति। आलस्यराहित्येन सर्वदा प्रेरयंति। अशोष्या सत्यः प्रवहंतीत्यर्थः। तथा सूर्यः सत्यं सर्वदा विद्यमानं स्वकीयं तेजस्ततान। आतनोति विस्तारयति। अन्यत्समानं॥ सुप्रवाचनं। वच परिभाषणे। अस्मात्स्वरंतादन्येभ्योऽपि दृश्यत इति खलर्थे युच्। अर्षंति। ऋतेर्लेटि सिब्बहुलं लेटीति सिप्। गुणः। ततान। अन्येषामपि दृश्यत इति संहितायामभ्यासस्य दीर्घत्वं॥

त्रयोदशीमृचमाह॥

अग्ने तव त्यदुक्थ्यं देवेष्वस्त्याप्यं।

स नः सत्तो मनुष्वदा देवान्यक्षि विदुष्टरो वित्तं मे

अस्य रोदसी॥ १३॥

अग्ने। तव। त्यत्। उक्थ्यं। देवेषु। अस्ति। आप्यं।

सः। नः। सत्तः। मनुष्वत्। आ। देवान्। यक्षि।

विदुःऽतरः। वित्तं। मे। अस्य। रोदसी इति॥ १३॥

हे अग्ने तवोक्थ्यं प्रशस्यं त्यत् श्रुतिप्रसिद्धमाप्यं। आपिबंधुः। तस्य भावः। बांधवं देवेषु दानादिगुणयुक्तेष्विंद्रादिष्वस्ति। विद्यते। तस्मात्स तादृशो विदुष्टरो विद्वत्तरस्त्वं

नोऽस्माकं यज्ञे सत्तो निषण्णः सन्देवांस्तानिंद्रादीन् आ शास्त्र-मर्यादया यक्षि। यज। हविर्भिः पूजय। तत्र दृष्टांतः। मनुष्वत्। यथा मनूनां यज्ञे तद्वत्। अन्यत्पूर्ववत्॥ आप्यं। आप्लृ व्याप्तौ। अस्मात्संताश्च इतीप्रत्ययः। ब्राह्मणादि-त्वात् ष्यञ्। सत्तः। नसत्तनिषत्तेति निपातनान्निष्ठानत्वाभावः। छांदसो निशब्दलोपो द्रष्टव्यः। मनुष्वत्। मनोरौणादिक उसिप्रत्ययः। तत्र तस्येवेति षष्ठ्यर्थे वतिः। नभोऽंगिरो-मनुषां वत्युपसंख्यानं। पा० १. ४. १८. २.। इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः। यक्षि। बहुलं छंदसीति शपो लुक्। व्रश्चादिषत्वे कुत्वं। विदुष्टरः। विद्वस्शब्दात्तरप्प्रत्ययस्तयादि-त्वेन भत्वाद्वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं॥

चतुर्दशीमृचमाह॥

सत्तो होता मनुष्वदा देवाँ अच्छा विदुष्टरः।
अग्निर्हव्या सुषदति देवो देवेषु मेधिरो वित्तं मे
अस्य रोदसी॥ १४॥

सत्तः। होता। मनुष्वत्। आ। देवान्। अच्छ।
विदुःऽतरः।
अग्निः। हव्या। सुसूदति। देवः। देवेषु। मेधिरः।
वित्तं। मे। अस्य। रोदसी इति॥ १४॥

मनुष्वत् मनोरिवास्माकं यज्ञे सत्तो निषण्णो होता

देवानामाह्वाता विदुष्टरो विद्वत्तरो देवो दानादिगुणयुक्तो देवेषु सर्वेष्विंद्रादिषु मध्ये मेधिरो मेधावी। एवंभूतोऽग्नि-स्तान्देवानच्छाभिमुख्येन हव्या हव्यान्यस्मदीयानि हवींषि। मर्यादायामाकारः। शास्त्रमर्यादया यथाशास्त्रं सुषूदति। प्रेरयतु। अन्यत्समानं॥ सुषूदति। षूद क्षरणे। लेट्यडागमः। बहुलं छंदसीति शपः श्लुः। मेधिरः। मेधारथाभ्यामिरन्निरचौ वक्तव्याविति मत्वर्थीय इरन्॥

पंचदशीमृचमाह॥

ब्रह्मा कृणोति वरु॑णो गातुविदं तमी॑महे।

व्यू॑र्णोति हृदा मति॑ नव्यो॑ जायतामृतं॑ वित्तं॑ मे॑

अस्य रोदसी॥ १५॥

ब्रह्म॑। कृणोति। वरु॑णः। गातुऽविदं॑। तं॑। ईमहे।

वि। ऊर्णोति। हृदा। मति॑। नव्यः॑। जायतां। ऋतं॑।

वित्तं॑। मे। अस्य। रोदसी इति॑॥ १५॥

यो वरुणोऽनिष्टस्य निवारयिता देवो ब्रह्म परिवृढं तद्रक्षणरूपं कर्म कृणोति करोति। तं तादृशं गातुविदं गातोर्मार्गस्य दुःखनिवारकस्य लंभयितारं वरुणमीमहे। अभिमतफलं याचामहे। ईमह इति याच्ञाकर्मा। तस्मै वरुणायायमस्मदीयः स्तोता हृदा हृदयेन मतिं मननीयां स्तुतिं व्यूर्णोति। विवृणोति प्रकाशयति। उच्चारयतीत्यर्थः। सोऽयं नव्यः स्तुत्यो वरुणोऽस्माकमृतं जायतां। सत्यभूतोऽस्तु॥ ब्रह्मा। अन्येषामपि दृश्यत इति सांहितिको दीर्घः।

गातुविदं । विद्लृ लाभे । अंतर्भावितण्यर्थात्क्विप् । ईमहे । ईङ् गतौ । बहुलं छंदसीति विकरणस्य लुक् । हृदा । पद्दन्नित्यादिना हृदयशब्दस्य हृदादेशः ॥

॥ इति प्रथमस्य सप्तमे द्वाविंशो वर्गः ॥

षोडशीमृचमाह ॥

असौ यः पंथा आदित्यो दिवि प्रवाच्यं कृतः ।
न स देवा अतिक्रमे तं मर्तासो न पश्यथ वित्तं मे
अस्य रोदसी ॥ १६ ॥

असौ । यः । पंथाः । आदित्यः । दिवि । प्रऽवाच्यं । कृतः ।
न । सः । देवाः । अतिऽक्रमे । तं । मर्तासः । न । पश्यथ ।
वित्तं । मे । अस्य । रोदसी इति ॥ १६ ॥

पंथाः सततगामी । यद्वा ब्रह्मलोकं गच्छतामुपासकानां मार्गभूतः । सूर्यद्वारेण ते विरजाः प्रयांतीति श्रुतेः । एवंभूतो योऽसावादित्यो दिवि द्युलोके प्रवाच्यं प्रकर्षेण वचनं यथा भवति तथा कृतो निर्मितः । यथा सर्वैः प्राणिभिर्दृश्यते तथा वर्तमान इत्यर्थः । हे देवाः सोऽयमादित्यो युष्माभिरपि नातिक्रमे । अतिक्रमितुं न शक्यः । युष्मज्जीवनस्य तदायतत्वात् । सति हि सूर्ये वसंतादयः काला निष्पद्यंते । कालेषु च यागाः क्रियंते । यागेषु च सत्सु भवतां जीवनं । अतो युष्माभिरपि नासावतिक्रमितव्यः । एवं च सति हे मर्तासः पापकृतो मनुष्याः । तं महानुभावं सूर्यं न पश्यथ । सूर्यं न जानीथः ।

एतच्च कूपे पातयित्वा निर्गतावेकतद्वितौ प्रति निंदनं । अहमेव मंत्रद्रष्टा तं सूर्यं जानामि । पापकृतौ युषां न जानीथ इति ॥ पंथाः । पतृ गतौ । पतेस्थ चेतीनिप्रत्ययः । पथिमथ्यृभुक्षामात्त्वं । इतोऽत्सर्वनामस्थाने । पा० ७. १. ८६. । इत्यत्वं । इकारस्य लोपः । पथिमथोः सर्वनामस्थान इत्याद्युदात्तत्वं । प्रवाच्यं । वक्तव्यंतादचो यदिति भावे यत् । यतोऽनाव इत्याद्युदात्तत्वं । अतिक्रमे । क्रमु पादविक्षेपे । कृत्यार्थे तवैकेनिति केन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं ॥

सप्तदशीमृचमाह ॥

त्रितः कूपेऽवहितो देवान्हवत ऊतये ।
तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे अस्य रोदसी ॥ १८ ॥

त्रितः । कूपे । अवऽहितः । देवान् । हवते । ऊतये ।
तत् । शुश्राव । बृहस्पतिः । कृण्वन् । अंहूरणात् । उरु ।
वित्तं । मे । अस्य । रोदसी इति ॥ १८ ॥

कूपेऽवहितः पातितस्त्रित एतत्संज्ञ ऋषिरूतये रक्षणाय देवान्हवते । स्तुतिभिराकारयति । यदेतत्त्रितस्याह्वानं बृहस्पतिर्बृहतां महतां देवानां रक्षक एतत्संज्ञो देवस्तदाह्वानं शुश्राव । श्रुतवान् । किं कुर्वन् । अंहूरणादंहसः पापरूपादस्मात्कूपपातादुन्नोयोरु विस्तीर्णं शोभनं कृण्वन् कुर्वन् ॥ हवते । ह्वयतेर्लटि बहुलं छंदसीति संप्रसारणं । शवगुणावादेशाः । ऊतये । ऊतीयतीत्यादिना क्तिन उदात्तत्वं । बृहस्पतिः ।

तद्धृतोः करपत्योरिति पारस्करादिषु पाठात् सुट्तलोपौ । उभे वनस्पत्यादिष्विति पूर्वोत्तरपदयोर्युगपत्प्रकृतिस्वरत्वं । अंहरणात् । अहि गतौ । इदित्त्वान्नुम् । खर्जिपिंज्यादिभ्य ऊरोलचौ । उ० ४. ९१. । इति भाव ऊरप्रत्ययः । दुःखप्राप्तिहेतुभावा गतिरस्यास्तीति पामादिलक्षणो मत्वर्थीयो नः । पा० ५. २. १००. । आङ्पूर्वाद्धंतेर्वा रूपमुन्नेयं ॥

अष्टादशीमृचमाह ॥

अरुणो मा सकृद्वृकः पथा यंतं ददर्श हि ।
उज्जिहीते निचाय्या तष्टेव पृष्ट्यामयी वित्तं मे अस्य
रोदसी ॥ १८ ॥

अरुणः । मा । सकृत् । वृकः । पथा । यंतं । ददर्श । हि ।
उत् । जिहीते । निऽचाय्य । तष्टाऽइव । पृष्टिऽआमयी ।
वित्तं । मे । अस्य । रोदसी इति ॥ १८ ॥

अरुणवर्णो लोहितवर्णो वृकोऽरण्यश्वा सकृदेकवारं पथा यंतं मार्गेण गच्छंतं मा मां ददर्श हि । दृष्टवान् । हि पादपूरणं । निचाय्य दृष्ट्वा च मां जिघृक्षुः सन् उज्जिहीते । उद्गच्छति स्म । तत्र दृष्टांतः । तष्टेव पृष्ट्यामयी । यथा तक्षणजनितपृष्ठरोगग्रस्तस्तष्टा वर्धकिस्तदपनोदनायोर्ध्वाभिमुखो भवति तद्वत् । हे द्यावापृथिव्यौ मदीयमिदं दुःखं वित्तं । जानीतं । यद्वा । वृक इति विवृतज्योतिष्कश्चंद्रमा उच्यते । अरुण आरोचमानः कृत्स्नस्य जगतः प्रकाशकः । मासकृत् मासार्धमासत्वयनसंवत्सरादीन्कालविशेषान्कुर्वन् । तिथिवि-

भागज्ञानस्य चंद्रगत्यधीनत्वात् । स चंद्रमा आकाशमार्गं यंतं गच्छंतं नक्षत्रगणं ददर्श । स्थिरधारणे । नक्षत्रगणमेव ददर्श न कूपपतितं मामित्यनादरो द्योत्यते । यदि मां पश्येत् उद्धरेत्कूपात् । निचाय्य नक्षत्रगणं दृष्ट्वा चोज्जिहीते । येन नक्षत्रेण संयुज्यते तेन सहोद्गच्छति । न मामभिगच्छतीत्यर्थः । अन्यत्पूर्ववत् ॥ अत्र मासकृदिति यास्क एकं पदं मन्यते शाकल्यस्तु पदद्वयं । तस्मिन्पक्षेऽयमर्थः । दक्षप्रजापतेर्दुहितृभूताः स्वभार्या अश्विन्याद्यास्तारकाः पुनःपुनर्ददर्श । मां सकृदेव पश्यतीति सकृद्दृष्ट्वा चोज्जिहीते । ताराभिः सहोर्ध्वमेव गच्छति । न मां कूपादुत्तारयति । अत इदमनुचितं । हे द्यावापृथिव्यौ मदीयमिमं वृत्तांतं जानीतं ॥ अत्र निरुक्तं । वृकश्चंद्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रांतज्योतिष्को वा । अरुण आरोचनो मासकृन्मासानां चार्द्धमासानां च कर्ता भवति चंद्रमा वृकः पथा यंतं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चंद्रमास्तक्ष्णुवन्निव पृष्ठरोगी । नि० ५. २०. । इति ॥ सकृत् । एकस्य सकृच्च । पा० ५. ४. १९. । इति क्रियाभ्यावृत्तिगणने निपातितः । वृकः । वृञ् वरणे । सृवृभूशुषिमुषिभ्यः कगिति कप्रत्ययः । जिहीते । ओहाङ् गतौ । जौहोत्यादिकः । भृञामिदित्यभ्यासस्येत्वं । निचाय्य । चायृ पूजानिशामनयोः । अत्र दर्शनार्थो धातूनामनेकार्थत्वात् । समासेऽनञ्पूर्वे क्त्वो ल्यप् । पृष्ट्यामयी । स्पृश संस्पर्शने । स्पृश्यतेऽनेनेति स्पृष्टिः । छांदसो वर्णलोपः । पृष्टावामयः पृष्ट्यामयः । तद्वान् पृष्ट्यामयी ॥

एकोनविंशोऽरचमाह ॥

एनांगूषेणं वयमिंद्रवंतोऽभि ष्याम वृजने सर्ववीराः ।

तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी

उत द्यौः ॥ १९ ॥

एना । आंगूषेणं । वयं । इंद्रऽवंतः । अभि । स्याम ।

वृजने । सर्वऽवीराः ।

तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः ।

सिंधुः । पृथिवी । उत । द्यौः ॥ १९ ॥

एनानेनांगूषेणाघोषणयोग्येन स्तोत्रेण हेतुभूतेनेंद्रवंतोऽनुग्राहकेणेंद्रेण युक्ताः सर्ववीराः सर्वैर्वीरैः पुत्रैः पौत्रादिभिर्योपेताः संतो वयं वृजने संग्रामेऽभिष्याम । शत्रूनभिभवेम । तदिदमस्मदीयं वचनं मित्रादयो मामहंतां । पूजयंतु । पालयंत्वित्यर्थः । उतशब्दो देवतासमुच्चये । अत्र यास्कः । आंगूषः स्तोम आघोषः । अनेन स्तोमेन वयमिंद्रवंतः । नि० ५. ११. । इति ॥ एना । द्वितीयाटौःस्वेन इति तृतीयायामिदम एनादेशः । सुपां सुलुगिति विभक्तेराजादेशः । चित्स्वरेणांतोदात्तत्वं । आंगूषेण । आङ्पूर्वाद्घुषेः कर्मणि घञ् । आङो ङकारलोपाभावश्छांदसः । घोषशब्दस्य गूषभावश्च पृषोदरादित्वात् । थाथादिनोत्तरपदांतोदात्तत्वं ।

स्याम । अस्तेः प्रार्थनायां लिङि श्नसोरल्लोप इत्याकारलोपः । उपसर्गप्रादुर्भ्यामस्तिर्यच्पर इति षत्वं ॥

॥ इति प्रथमस्य सप्तमे त्रयोविंशो वर्गः ॥

॥ इति प्रथमे मंडले पंचदशोऽनुवाकः ॥

षोडशेऽनुवाके सप्तदश सूक्तानि । तत्रेंद्रमित्तिं सप्तर्चं प्रथमं सूक्तं । अत्रानुक्रम्यते । इंद्रं मित्रं सप्त त्रिष्टुबंतमिति । अनुवर्तमानत्वात्कुत्स ऋषिः । त्रितस्तु वाविशिष्टत्वात्तत्रैव विकल्पितो नानुवर्तते । अंत्या त्रिष्टुप् । शिष्टास्त्रिष्टुबंतपरिभाषया जगत्यः । विश्वे देवा देवतेत्युक्तं । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

इंद्रं॑ मि॒त्रं वरु॑णम॒ग्निमू॒तये॒ मारु॑तं॒ शर्धो॒ अदि॑तिं
हवामहे ।
रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्व॑स्मान्नो॒ अंह॑सो
निष्पि॑पर्तन ॥ १ ॥
इंद्रं॑ । मि॒त्रं । वरु॑णं । अ॒ग्निं । ऊ॒तये॑ । मारु॑तं ।
शर्धः॑ । अदि॑तिं । ह॒वा॒म॒हे॒ ।
रथं॑ । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒न॒वः॒ । विश्व॑स्मात् ।
नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥ १ ॥

ऊतये रक्षणाय वयमिंद्रादीन्मारुतं शर्धो मरुत्समूहरूपं बलं च हवामहे । आह्वयामहे । वसवो निवासयितारः

सुदानवः शोभनदाना इंद्रादयो विश्वस्मात्सर्वस्मादंहसः पापान्नोऽस्मान्निष्पिपर्तन । निर्गमय्य पालयत । तत्र दृष्टांतः । रथं न दुर्गात् । गंतुमशक्यान्निम्नोन्नतात्स्थानात्सारथयो यथा रथं पालयंति । तद्वत् ॥ पिपर्तन । पृ इत्येके । लोटि तप्तनप्त-नथनाश्चेति तस्य तनबादेशः । पित्त्वेन ङित्त्वाभावाद्गुणः । अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं ॥

द्वितीयामृचमाह ॥

त आदित्या आ गंता सर्वतातये भूत देवा वृत्रतूर्येषु

शंभुवः ।

रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो

निष्पिपर्तन ॥ २ ॥

ते । आदित्याः । आ । गत । सर्वऽतातये । भूत । देवाः ।

वृत्रऽतूर्येषु । शंऽभुवः ।

रथं । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् ।

नः । अंहसः । निः । पिपर्तन ॥ २ ॥

हे आदित्या अदितेः पुत्रा देवाः । ते यूयं सर्वतातये सर्वैर्वीरपुरुषैस्तताय विस्तारिताय युद्धाय । युद्धेऽस्माकं साहाय्यं कर्तुमित्यर्थः । आगत । आगच्छत । अपि च वृत्र-तूर्येषु । संग्रामनामैतत् । संग्रामेषु शंभुवः सुखस्य भावयितारो भूत । भवत ॥ गता । गमेर्लोटि बहुलं छंदसीति शपो लुक् ॥

तृतीयामृचमाह ॥

अवंतु नः पितरः सुप्रवाचना उत देवी देवपुत्रे ऋतावृधा ।

रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो

निष्पिपर्तन ॥ ३ ॥

अवंतु । नः । पितरः । सुऽप्रवाचनाः । उत । देवी इति ।

देवपुत्रे इति देवऽपुत्रे । ऋतऽवृधा ।

रथं । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् ।

नः । अंहसः । निः । पिपर्तन ॥ ३ ॥

नोऽस्मान्पितरोऽग्निष्वात्तादयोऽवंतु । रक्षंतु । कीदृशाः । सुप्रवाचनाः । सुखेन प्रवक्तुं स्तोतुं शक्याः । उत अपि च देवपुत्रे देवाः सर्वे पुत्रस्थानीया ययोस्ते ऋतावृधा ऋतस्य सत्यस्य वा यज्ञस्य वा वर्धयित्री देवी देवनादिगुणयुक्ते द्यावापृथिव्यावस्मान्रक्षतां । अन्यत्समानं ॥ देवी । वा छंदसीति पूर्वसवर्णदीर्घत्वं । ऋतावृधा । वृधेरंतर्भावितण्यर्थात् क्विप् । सुपां सुलुगिति विभक्तेराकारः ॥

चतुर्थीमृचमाह ॥

नराशंसं वाजिनं वाजयन्निह क्षयद्वीरं पूषणं सुम्नैरीमहे ।

रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो

निष्पिपर्तन ॥ ४ ॥

नराशंसँ । वाजिनं । वाजयन् । इह । क्षयत्ऽवीरं ।

पूषणं । सुम्नैः । ईमहे ।

रथं । न । दुःऽगात् । वसवः । सुऽदानवः । विश्वस्मात् ।

नः । अंहसः । निः । पिपर्तन ॥ ४ ॥

नराशंसं नरैः शंसनीयं वाजिनमन्नवंतमग्निं वाजयन् उपह्वयन् प्रज्वलयन्निहास्मिन्काले स्तौमीति शेषः । तथा क्षयद्वीरमतिबलिनं । यस्मिन्सर्वे वीराः क्षीयंते । एवंरूपं पूषणं पोषकं देवं सुम्नैः सुखकरैः स्तोत्रैर्हेतुभूतैरीमहे । याचामहे । अभीष्टं प्रार्थयामहे ॥ नराशंसं । उभे वनस्पत्यादिष्विति युगपदुभयपदप्रकृतिस्वरत्वं । नरशब्द ऋदोरबित्यबंत आद्युदात्तः । निपातनाद्दीर्घः । शंसशब्दो घञंत आद्युदात्तः । वाजयन् । वज व्रज गतौ । अस्माण्णिच् । क्षयद्वीरं । क्षि क्षये । लटः शतृ । शपि प्राप्ते व्यत्ययेन शः । तस्य छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावाद्गुणावादेशौ । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे विकरणस्वरः । अतो गुण इति पररूपत्व एकादेश उदात्तेनेत्येकादेश उदात्तः । क्षयंतो वीरा यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

पंचमीमृचमाह ॥

बृहस्पते सदमिन्नः सुगं कृधि शं योर्यत्ते मनुर्हितं तदीमहे ।

रथं न दुर्गाद्वसवः सुदानवो विश्वस्मान्नो अंहसो

निष्पिपर्तन ॥ ५ ॥

बृह॑स्पते । सदं॑ । इत् । नः॒ । सु॒ऽगं । कृ॒धि । शं । योः ।

यत् । ते॒ । मनुः॑ऽहितं । तत् । ई॒महे॒ ।

रथं॑ । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒न॒वः॒ । विश्वं॑स्मात् ।

नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥ ५ ॥

बृहस्पते सदमित् सदैवा नोऽस्माकं सुगं। सुखनामैतत्। सुखं कृधि। कुरु। अपि च ते तव स्वभूतं शं शमनीयानां रोगाणामुपशमनं योः पृथक्कर्तव्यानां भयानां यावनं पृथक्करणं मनुर्हितं मनुना ब्रह्मणा हितं त्वय्यवस्थापितं। यद्वा मनुष्याणामनुकूलं। एवंविधं शमनं यावनं च यदस्ति तदीमहे। याचामहे॥ सुगं। सुष्ठु गम्यतेऽस्मिन्निति सुगं। सुदुरोरधिकरण इति गमेर्डः। शं योरित्येतत्पदद्वयं यास्केनैव व्याख्यातं शमनं च रोगाणां यावनं च भयानामिति। मनुर्हितं मनेरौणादिक उसिन्प्रत्ययः। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं॥

षष्ठीमृचमाह ॥

इंद्रं॒ कुत्सो॑ वृत्र॒हणं॒ शची॒पतिं॑ का॒टे निबा॑ळ्ह॒ ऋषि॑रह्व॒दूतये॑।
रथं॒ न दु॒र्गाद्व॑सवः सुदानवो॒ विश्वं॑स्मान्नो॒ अंह॑सो॒ निष्पि॑पर्तन ॥६॥

इंद्रं॑ । कुत्सः॑ । वृ॒त्र॒ऽहनं॑ । श॒ची॒इऽपतिं॑ । का॒टे ।

निऽबा॑ळ्हः । ऋषिः॑ । अ॒ह्व॒त् । ऊ॒तये॑ ।

रथं॑ । न । दुः॒ऽगात् । व॒स॒वः॒ । सु॒ऽदा॒न॒वः॒ । विश्वं॑स्मात् ।

नः॒ । अंह॑सः । निः । पि॒प॒र्त॒न॒ ॥ ६ ॥

काट इति कूपनाम । तस्मिन्निबाढ़हो निपातितः कुत्सः ऋषिरूतये रक्षणायेंद्रमह्वत् । आह्वयति स्म । कीदृशं । वृत्रहणं । वृत्राणां शत्रूणां हंतारं । शचीपतिं । शचीति कर्मनाम । सर्वेषां कर्मणां पालयितारं । यद्वा शच्या देव्याः भर्तारं ॥ शचीपतिं । वनस्पत्यादिषु पाठादुभयपदप्रकृतिस्वरत्वं । शचीशब्दः शार्ङ्गरवादिङीनंत आद्युदात्तः । निबाढ़हः । बाह्रु प्रयत्ने । नीत्युपसर्गवशात्पतने वर्तते । निष्ठायामनित्यमागम-शासनमितीडभावः । ढत्वधत्वादीनि । यद्वा क्षुब्धस्वांतेत्यादौ । पा॰ ७. २. १८. । भृशार्थे इडभावो निपात्यते । अत्र च बाढशब्दो भृशत्वोपेते पतने सामर्थ्याद्वर्तते । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अह्वत् । लिपिसिचिह्वश्चेति लुङि च्लेरङा-देशः । आतो लोप इटि चेत्याकारलोपः ॥

सप्तमीमृचमाह ॥

देवैर्नो देव्यदितिर्नि पातु देवस्त्राता त्रायतामप्रयुच्छन् ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ७ ॥

देवैः । नः । देवी । अदितिः । नि । पातु । देवः । त्राता । त्रायतां । अप्रऽयुच्छन् ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ७ ॥

देवी दानादिगुणयुक्तादितिरखंडनीयादीना वा देवमाता

देवैर्दानादिगुणयुक्तैः स्वकीयैः पुत्रैः सह नोऽस्मान्निपातु। नितरां रक्षतु। देवो दीप्यमानस्त्राता सर्वेषां रक्षकः सविता-प्रयुच्छन् अप्रमाद्यन् अस्मद्रक्षणे जागरूकः सन् त्रायतां। अस्मान्पालयतु। यदनेन सूक्तेनास्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयः षट् देवता मामहंतां। पूजयंतु॥ त्रायतां। त्रैङ् पालने। भौवादिकः। अप्रयुच्छन्। युच्छ प्रमादे। अस्माल्लटः शतृ। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं॥

॥ इति प्रथमस्य सप्तमे चतुर्विंशो वर्गः॥

यज्ञो देवानामिति त्र्यृचं द्वितीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभं वैश्वदेवं। यज्ञस्तृचमित्यनुक्रांतं। विनियोगो लैंगिकः॥

तत्र प्रथमामृचमाह॥

यज्ञो देवानां प्रत्येति सुम्नमादित्यासो भवता मृळयंतः।
आ वोऽर्वाची सुमतिर्ववृत्यादंहोश्चिद्या वरिवोवित्तरासत्॥१

यज्ञः। देवानां। प्रति। एति। सुम्नं। आदित्यासः।
भवत। मृळयंतः।
आ। वः। अर्वाची। सुऽमतिः। ववृत्यात्। अंहोः। चित्।
या। वरिवोवित्ऽतरा। असत्॥१॥

अस्मदीयो यज्ञो देवानामिंद्रादीनां सुम्नं सुखं प्रत्येति। प्राप्नोतु। अपि च हे आदित्यास आदित्या मृळयंतोऽस्मान्-सुखयंतो भवत। तथा वो युष्माकं सुमतिः शोभना मतिर्भक्ता-नुग्रहपरा बुद्धिरर्वाच्यस्मदभिमुख्यावबृत्यात्। आवर्ततां। या

मतिरंहोश्चित् दारिद्र्यं प्राप्तस्यापि पुरुषस्य वरिवोवित्तरा । वरिव इति धननाम । अतिशयेन धनस्य लंभयित्र्यसत् । भवेत् । सैषा मतिरस्मास्वञ्चितं वर्ततामित्यर्थः ॥ भवता । आमंत्रितं पूर्वमविद्यमानवदित्यादित्यास इति पादादौ वर्तमानस्यामंत्रितस्याविद्यमानवत्त्वेनास्य पादादित्वात् अपादादाविति पर्युदासान्निघाताभावः । मृळयंतः । मृळ सुखने । ण्यंताल्लटः शतृ । छंदस्युभयथेति शतुरार्धधातुकत्वेनाद्युपदेशान्नसार्वधातुकानुदात्तत्वाभावे शतुः स्वरः शिष्यते । वर्वृत्यात् । वृतु वर्तने । लिङि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति शपः श्लुः । अंहोः । अहि गतौ । इदित्वान्नुम् । औणादिक उप्रत्ययः । वरिवोवित्तरा । विद्लृ लाभे । अस्मादंतर्भावितण्यर्थात् क्विप् । तत आतिशायनिकस्तरप् । असत् । अस भुवि लेट्यडागमः ॥

द्वितीयामृचमाह ॥

उपं नो देवा अवसा गमंत्वंगिरसां सामंभि स्तूयमांनाः ।

इंद्रं इंद्रियैर्मरुतों मरुद्भिरादित्यैर्नो अदितिः शर्म यंसत् ।

उपं । नः । देवाः । अवंसा । आ । गमंतु । अंगिरसां ।

सामंऽभिः । स्तूयमांनाः ।

इंद्रः । इंद्रियैः । मरुतः । मरुत्ऽभिः । आदित्यैः । नः ।

अदितिः । शर्म । यंसत् ॥ २ ॥

देवा दानादिगुणयुक्ताः सर्वे देवा अवसा रक्षणेनास्मभ्यं दातव्येनान्नेन वा युक्ता नोऽस्मान् स्तोतॄनुपगमंतु । उपगच्छंतु । प्राप्नुवंतु । कथंभूताः । अंगिरसामेतत्संज्ञकानामृषीणां

संबंधिभिः सामभिः प्रगीतैर्मंत्रैः स्तुयमानाः । अपि च । इंद्र इंद्रियैः । धननामैतत् । स्वसंबंधिभिरस्मभ्यं दातव्यैर्धनैः सहास्मानागच्छतु । तथा मरुतः सप्तगणरूपा एकोनपंचाशत्संख्याका ईदृङ् चान्यादृङ् चेत्येवमादिनामानो देवा मरुद्भिः स्वावयवभूतैः प्राणापानादिरूपेण वर्तमानैर्वायुभिः सहास्मानागच्छंतु । तथादितिरखंडनीयादीना वा देवमातादित्यैः स्वकीयैः पुत्रैः सह नोऽस्मभ्यं शर्म सुखं यंसत् । यच्छतु ॥ गमंतु । लोटि बहुलं छंदसीति शपो लुक् । छंदस्युभयथेति छेरार्धधातुकत्वेन ङित्त्वाभावाद्गमहनेत्यादिनोपधालोपाभावः । यंसत् । यम उपरमे । लेट्यडागमः । सिब्बहुलं लेटीति सिप् ॥

तृतीयामृचमाह ॥

तन्न इंद्रस्तद्वरुणस्तदग्निस्तदर्यमा तत्सविता चनो धात् ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ३ ॥

तत् । नः । इंद्रः । तत् । वरुणः । तत् । अग्निः । तत् । अर्यमा । तत् । सविता । चनः । धात् ।
तत् । नः । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ३ ॥

यदस्माभिः प्रार्थ्यमानमन्नमस्ति । चन इत्यन्ननाम । तत्तादृशं चनोऽन्नं नोऽस्मभ्यमिंद्रो धात् । दधातु । ददातु । एवं तद्वरुण इत्यादावपि योज्यं । तदिदमिंद्रादिभिर्दत्तमस्मदीयमन्नं मित्रादयो मामहंतां । पूजयंतु पालयंत्वित्यर्थः ॥

चनः । चायृ पूजानिशामनयोः । चायतेरन्ने ह्रस्वश्चेत्यसुन् नुडागमश्च धातोर्ह्रस्वत्वं च । बलि लोपः । निस्वादाद्युदात्तत्वं । धात् । छंदसि लुङ्लङ्लिट इति प्रार्थनायां लुङ् । गातिस्थेति सिचो लुक् ॥

॥ इति प्रथमस्य सप्तमे पंचविंशो वर्गः ॥

य इंद्राग्नी इति त्रयोदशर्चं तृतीयं सूक्तं कुत्सस्यार्षं त्रैष्टुभमैंद्राग्नं । तथा चानुक्रांतं । य इंद्राग्नी सप्तोनैंद्राग्नं त्विति । विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

य इंद्राग्नी चित्रतमो रथो वामभि विश्वानि

भुवनानि चष्टे ।

तेना यातं सरथं तस्थिवांसाथा सोमस्य पिबतं सुतस्य ॥१॥

यः । इंद्राग्नी इति । चित्रऽतमः । रथः । वां । अभि ।

विश्वानि । भुवनानि । चष्टे ।

तेन । आ । यातं । सऽरथं । तस्थिऽवांसा । अथ । सोमस्य ।

पिबतं । सुतस्य ॥ १ ॥

हे इंद्राग्नी चित्रतमोऽतिशयेन चायनीयो वां युवयोः संबंधी यो रथो विश्वानि भुवनानि भूतजातान्यभिचष्टे । आभिमुख्येन पश्यति । सुवर्णमयत्वात् रत्नखचितत्वाच्च स्वप्रभाभिः कृत्स्नं जगद्भासयतीत्यर्थः । तेन रथेनायातं । अस्मद्यज्ञमागच्छतं । तत्किं पर्यायेण । नेत्याह । सरथं समानमेकं रथं तस्थिवांसा युगपदेवाधितिष्ठंतौ युवामागच्छतं । न

पर्यायेणेत्यर्थः । अथागमनानंतरं सुतस्य ऋत्विग्भिरभिषुतं सोमस्य सोमं स्वांशलक्षणं तदेकदेशं वा पिबतं ॥ वां । युष्मदस्मदोः षष्ठीचतुर्थीत्यादिना षष्ठीद्विवचनस्य वामादेशः । सर्वानुदात्तत्वं । चष्टे । चक्षिङ् व्यक्तायां वाचि । अत्र प्रकाशनार्थः । अदादित्वाच्छपो लुक् । स्कोः संयोगाद्योरिति कलोपः । तास्यनुदात्तेदिति लसार्वधातुकानुदात्तत्वे धातुस्वरः शिष्यते । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । सरथं । समानश्चासौ रथश्च सरथः । समानस्य छंदसीति सभावः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । तस्थिवांसा । ष्ठा गतिनिवृत्तौ । लिटः क्वसुः । द्विर्वचने शर्पूर्वाः खयः । वस्वेकाजाद्घसामिवीडागमः । आतो लोप इटि चेत्याकारलोपः । सुपां सुलुगित्याकारः । सोमस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी ॥

द्वितीयामृचमाह ॥

यावदिदं भुवनं विश्वमस्त्युरुव्यचा वरिमता गभीरं ।

तावाँ अयं पातवे सोमो अस्त्वरमिंद्राग्नी मनसे

युवभ्यां ॥ २ ॥

यावत् । इदं । भुवनं । विश्वं । अस्ति । उरुऽव्यचा ।

वरिमता । गभीरं ।

तावान् । अयं । पातवे । सोमः । अस्तु । अरं । इंद्राग्नी

इति । मनसे । युवऽभ्यां ॥ २ ॥

विश्वं सर्वमिदं भुवनं जगद्यावदस्ति यावत्प्रमाणं भवति । कीदृशं । उरुव्यचा । विस्तीर्णस्थापनं । सर्वव्यापकमित्यर्थः । तथा वरिमता वरिम्णोरुत्वेनात्मीयेन गौरवेण गभीरं गाम्भीर्योपेतं । हे इंद्राग्नी पातवे युवाभ्यां पातुं सोमस्तावानस्तु । तावत्प्रमाणो भवतु । तथा मनसे युवयोरंतःकरणायारं स सोमः पर्याप्तो भवतु ॥ उरुव्यचा । व्यच व्याजीकरणे । असुन् । व्यचेः कुटादित्वमनसीति वचनात् ङित्त्वाभावेन संप्रसारणाभावः । स्वमोर्नपुंसकात् । पा० ७. १. २३. । इति सोर्लुकि प्राप्ते सुपां सुलुगिति व्यत्ययेन डादेशः । वरिमता । पृथ्वादिभ्य इमनिज्वेत्युरुशब्दात्तस्य भाव इत्यर्थे इमनिच् । प्रियस्थिरेत्यादिनोरुशब्दस्य वरादेशः । पुनरपि भावप्रत्ययोत्पत्तिश्छांदसी । सुपां सुलुगिति तृतीयाया लुक् । यद्वा तृतीयायाश्छांदसस्तुडागमः । तावान् । तत्परिमाणमस्य यत्तदेतेभ्यः परिमाणे वतुप् । पा० ५. २. ३९. । आ सर्वनाम्न इत्यात्वं । पातवे । पा पाने । तुमर्थे सेसेनिति तवेन्प्रत्ययः । नित्त्वादाद्युदात्तत्वं । अरं । बालमूललघ्वलमंगुलीनां वा लो रमापद्यत इति वक्तव्यमिति लत्वविकल्पः । युवभ्यां । व्यत्ययेनात्वाभावे शेषे लोप इति दकारलोपः ॥

तृतीयामृचमाह ॥

चक्राथे हि सध्र्यं१ङ्नाम भद्रं सध्रीचीना वृत्रहणा

उत स्थः ।

ताविंद्राग्नी सध्र्यं१ञ्चा निषद्या वृष्णः सोमस्य वृषणा

वृषेथां ॥ ३ ॥

चक्राथे इति । हि । सध्र्यक् । नाम । भद्रं । सध्रीचीना ।

वृत्रऽहना । उत । स्थः ।

तौ । इंद्राग्नी इति । सध्र्यंचा । निऽसद्य । वृष्णः ।

सोमस्य । वृषणा । आ । वृषेथां ॥ ३ ॥

हे इंद्राग्नी भद्रं कल्याणं नाम स्वकीयं नामधेयं सध्र्यक् सहगतमिंद्राग्नी इत्येवं संयुक्तं चक्राथे । युवां कृतवंतौ । उत अपि च हे वृत्रहणौ वृत्रस्यासुरस्य हंताराविंद्राग्नी सध्रीचीना सहांचंतौ वृत्रवधार्थं संगच्छंतौ स्थः ॥ भवथः । हि यस्मादेवं तस्मात्ते वृषणा कामानां वर्षिताराविंद्राग्नी तौ युवां सध्र्यंचौ सहिताविव संतौ निषद्य वेद्यामुपविश्य वृष्णः सेक्तुः सोमस्यात्मीयं भागमावृषेथां । स्वकीय उदरे आसिंचेथां ॥ सध्र्यक् । सहशब्दोपपदादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । सहस्य सध्रिः । अद्रिसध्र्योरंतोदात्तनिपातनं कृत्स्वरनिवृत्त्यर्थमिति वचनात्सध्र्यादेशोऽंतोदात्तः । यणादेश उदात्तस्वरितयोर्यण इति स्वरितत्वं । सध्रीचीना । विभाषांचेरदिक्स्त्रियामिति स्वार्थे खः । सुपां सुलुगिति विभक्तेराजादेशः । वृत्रहणौ । संहितायामावादेशे लोपः शाकल्यस्येति वलोपः । वृषेथां । वृष सेचने । व्यत्ययेन श आत्मनेपदं च ॥

चतुर्थीमृचमाह ॥

समिद्धेष्वग्निष्वानजाना यतस्रुचा बर्हिरु तिस्तिराणा ।

तीव्रैः सोमैः परिषिक्तेभिरर्वागेंद्राग्नी सौमनसाय यातं ॥४॥

सं॒ऽइ॒द्धेषु । अ॒ग्निषु॑ । आ॒न॒जा॒ना । य॒तऽस्रु॑चा । ब॒र्हिः ।

ऊं॒ इति॑ । ति॒स्ति॒रा॒णा ।

ती॒व्रैः । सोमैः । परि॑ऽसिक्तेभिः । अ॒र्वाक् । आ । इं॒द्रा॒ग्नी॒

इति॑ । सौ॒म॒न॒साय॑ । या॒तं ॥ ४ ॥

अग्निषु गार्हपत्यादिष्वन्वाधानादिना समिद्धेषु सम्यगिद्धेषु दीप्तेषु सत्स्वानजाना हवींष्याज्येनांजंतौ यतस्रुचा तदनंतरं यागार्थं गृहीतस्रुचौ बर्हिरु वेद्यां बर्हिरपि तिस्तिराणा आस्तीर्णं कृतवंतावध्वर्युप्रतिप्रस्थातारावेवंभूतावभूतां । तथा सति हे इंद्राग्नी तीव्रैः क्षिप्रं मदकरैः परिषिक्तेभिः परितः सर्वेषु ग्रहचमसादिष्वासिक्तैः सोमैर्हेतुभूतैरर्वाक् अस्मदभिमुखमायातं । आगच्छतं । किमर्थं । सौमनसाय सौमनस्याय । अस्माकमनुग्रहायेत्यर्थः ॥ आनजाना । अंजू व्यक्तिम्रक्षणकांतिगतिषु । लिटः कानच् । अनिदितामिति नलोपः । द्विर्भावेऽत आदेरित्यभ्यासस्य दीर्घः । तस्मान्नुट् द्विहल इत्यद्विहलोऽपि व्यत्ययेन नुट् । तिस्तिराणा । स्तृञ् आच्छादने । पूर्ववत्कानच् । ऋत इद्धातोरितीत्वं । द्विर्वचने शर्पूर्वाः खयः । सुपां सुलुगिति विभक्तेराकारः । चित्वादंतोदात्तत्वं ॥

पंचमीमृचमाह ॥

यानी॑द्राग्नी च॒क्रथु॑र्वी॒र्या॑णि॒ यानि॑ रू॒पाण्यु॒त वृष्ण्या॑नि ।

या वां॑ प्र॒त्नानि॑ स॒ख्या शि॒वानि॒ तेभिः॒ सोम॑स्य पिबतं

सु॒तस्य॑ ॥ ५ ॥

यानि । इंद्राग्नी इति । चक्रथुः । वीर्याणि । यानि ।

रूपाणि । उत । वृषण्यानि ।

या । वां । प्रत्नानि । सख्या । शिवानि । तेभिः । सोमस्य ।

पिबतं । सुतस्य ॥ ५ ॥

हे इंद्राग्नी यानि वीर्याणि वृत्रवधादिरूपाणि चक्रथुः कृतवंतौ युवां यानि च रूपाणि निरूप्यमाणानि गवाश्वादीनि भूतजातानि कृतवंतौ। इंद्राग्निभ्यां हि सर्वं जगत्सृज्यते। इंद्रः सूर्यात्मना वृष्टिं सृजति धारवृष्ट्युत्पादकः। वृष्टेः सकाशात्सर्वे प्राणिन उत्पद्यंते। उत अपि च यानि वृषण्यानि वृष्णि भवानि वृष्टिप्रदानादिरूपाणि कर्माणि कृतवंतौ युवां। तथा वां युवयोः संबंधीनि प्रत्नानि चिरंतनानि शिवानि शोभनानि या यानि सख्या सखित्वानि संति। तेभिस्तैः सर्वैः सहितौ युवां सुतस्य सोमस्याभिषुतं सोमं पिबतं ॥ सख्या। सख्युर्भावः सख्यं। सख्युर्य इति यप्रत्ययः। शेश्छंदसि बहुलमिति शेर्लोपः। तेभिः। बहुलं छंदसीति भिस ऐसभावः। सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन्साववर्णेति प्रतिषेधः॥

॥ इति प्रथमस्य सप्तमे षड्विंशो वर्गः ॥

षष्ठीमृचमाह ॥

यदब्रवं प्रथमं वां वृणानो३ऽयं सोमो असुरैर्नो विहव्यः ।

तां सत्यां श्रद्धामभ्या हि यातमथा सोमस्य पिबतं सुतस्य ॥ ६ ॥

यत् । अब्र॑वं । प्रथमं । वां । वृणानः । अयं । सोमः ।

असु॑रैः । नः । विऽहव्यः ।

तां । सत्यां । श्रद्धां । अभि । आ । हि । यातं । अथ ।

सोम॑स्य । पिबतं । सुतस्य॑ ॥ ६ ॥

हे इंद्राग्नी प्रथमं कर्मोपक्रम एव वां युवां वृणानः संभजमानो यदब्रवं सोमेन प्रीणयिष्यामीति यदवोचं । सत्यां यथार्थां तां श्रद्धां श्रद्धयादरातिशयेन कृतामुक्तिमभ्यभिलक्ष्य आ हि यातं । आगच्छतमेव नोदासाथां । अथागमनानंतरमभिषुतं सोमं पिबतं । तथा सत्यसुरैर्हविषां प्रक्षेप्तृभिर्ऋत्विग्भिरयं नोऽस्माकं सोमो विहव्यो विशेषेण होतव्यो भवति । इतरथा व्यर्थः स्यात् । तस्मादिंद्राग्नी आगच्छतमित्यर्थः ॥ वृणानः । वृञ् संभक्तौ । लिटः शानच् । श्नाभ्यस्तयोरात इत्याकारलोपः । असुरैः । असु क्षेपणे । असेरुरन्निति उरन्प्रत्ययः । विहव्यः । हु दानादनयोः । अचो यत् । गुणः । धातोस्तन्निमित्तस्यैवेत्यवादेशः । यतोऽनाव इत्याद्युदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

सप्तमीमृचमाह ॥

यदिंद्राग्नी मदथः स्वे दुरोणे यद्ब्रह्मणि राजनि वा यजत्रा ।

अतः परि वृषणावा हि यातमथा सोम॑स्य पिबतं सुतस्य॑ ॥ ७

यत् । इंद्राग्नी इति॑ । मदथः । स्वे । दुरोणे । यत् ।

ब्रह्मणि । राजनि । वा । यजत्रा ।

अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य ।
पिबतं । सुतस्य ॥ ७ ॥

यजत्रा यष्टव्यौ हे इंद्राग्नी स्वे दुरोणे स्वकीये गृहे निवासस्थाने यद्यदि मदथः । हृष्यथः । यद्यदि ब्रह्मणि ब्राह्मणेऽन्यस्मिन्यजमाने हविःस्वीकरणायागत्य हृष्यथः । यदि वा राजनि क्षत्रिये यद्वे साहाय्यं कर्तुमागत्य हृष्यथः । अतः परि परितोऽस्मात्सर्वस्मात्स्थानात् हे वृषणौ कामानां वर्षिताराविंद्राग्नी आयातं हि । आगच्छतमेव । औदासीन्यं मा कार्ष्ट । अन्यत्पूर्ववत् ॥ मदथः । मदी हर्षे । व्यत्ययेन शप् । यजत्रा । अमिनक्षीत्यादिना यजतेः कर्मण्यत्रन् । सुपां सुलुगिति विभक्तेराकारः ॥

अष्टमीमृचमाह ॥

यदिंद्राग्नी यदुषु तुर्वशेषु यद्द्रुह्युष्वनुषु पूरुषु स्थः ।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ८ ॥

यत् । इंद्राग्नी इति । यदुषु । तुर्वशेषु । यत् । द्रुह्युषु ।
अनुषु । पूरुषु । स्थः ।
अतः । परि । वृषणौ । आ । हि । यातं । अथ ।
सोमस्य । पिबतं । सुतस्य ॥ ८ ॥

अत्र यदुरित्यादीनि पंच मनुष्यनामानि । हे इंद्राग्नी यद्यदि यदुषु नियतेषु परेषामहिंसकेषु मनुष्येषु स्थः । भवथः ।

वर्तेथे। यदि वा तुर्वशेषु हिंसकेषु मनुष्येषु वर्तेथे। यद्यपि वा द्रुह्युषु द्रोहं परेषामुपद्रवमिच्छत्सु मनुष्येषु वर्तेथे। यदि वा-नुषु प्राणत्सु सफलैः प्राणैर्युक्तेषु ज्ञातृष्वनुष्ठातृषु मनुष्येषु। अन्येषां हि प्राणा निःफला ज्ञानहीनत्वादनुष्ठानाभावाच्च। तेषु यदि भवथः। तथा पूरुषु कामैः पूरयितव्येष्वन्येषु स्तोतृ-जनेषु यदि भवथः। अतः सर्वस्मात्स्थानात् हे कामाभिवर्ष-काविंद्राग्नी आगच्छतं। अनंतरमभिषुतं सोमं पिबतं॥ यदुषु। यम उपरमे। नियच्छंत इंद्रियाण्येभिरिति यदवः। यमेर्दुक् चेति कुप्रत्ययो दुगागमश्च। अनुदात्तोपदेशेत्यादिना-नुनासिकलोपः। तुर्वशेषु। तुर्वी हिंसार्थः। औणादिकोऽश-प्रत्ययः। द्रुह्युषु। द्रुह जिघांसायां। संपदादिलक्षणो भावे क्विप्। द्रुहं परेषामिच्छंति। छंदसि परेच्छायामपीति क्यच्। क्याच्छंदसीत्युप्रत्ययः। अनुषु। अन प्राणने। अणश्च। उ० १. ८.। इति विधीयमान उप्रत्ययो बहुलवचनादस्मादपि भवति। निदित्यनुवृत्तेराद्युदात्तत्वं। पूरुषु। पूरी आप्यायने। पूर्यंत इति पूरवः। औणादिक उप्रत्ययः॥

नवमीमृचमाह॥

यदिंद्राग्नी अवमस्यां पृथिव्यां मध्यमस्यां परमस्यामुत स्थः।
अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य॥८॥

यत्। इंद्राग्नी इति। अवमस्यां। पृथिव्यां। मध्यमस्यां।
परमस्यां। उत। स्थः।

अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य ।

पिबतं । सुतस्य ॥ ९ ॥

हे इंद्राग्नी अवमस्यां पृथिव्यां सन्निकृष्टायामस्यां भूम्यां यद्यदि स्थः । वर्तमानौ भवथः । यदि वा मध्यमस्यां पृथिव्यामंतरिक्षलोके । अत्र पृथिवीशब्दस्त्रिष्वपि लोकेषु वर्तते । यथा यो द्वितीयस्यां तृतीयस्यां पृथिव्यामस्यायुषा नाप्नोति । उत अपि च परमस्यामुत्कृष्टायां दूरे वर्तमानायां पृथिव्यां द्युलोके यदि वा वर्तेथे । अतः सर्वस्मात्स्थानात् हे वृषणावागच्छतं । आगमानंतरं सुतं सोमं पिबतं ॥ अवमस्यां । अवमशब्दादुत्तरस्य ङेर्व्यत्ययेन स्याडागमः । एवमुत्तरत्रापि ॥

दशमीमृचमाह ॥

यदिंद्राग्नी परमस्यां पृथिव्यां मध्यमस्यामवमस्यामुत स्थः ।

अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ १० ॥

यत् । इंद्राग्नी इति । परमस्यां । पृथिव्यां । मध्यमस्यां ।

अवमस्यां । उत । स्थः ।

अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य ।

पिबतं सुतस्य ॥ १० ॥

पूर्ववद्व्याख्येयं । एतावांस्तु विशेषः । पूर्वं भूम्यादिषु त्रिषु लोकेषु याविंद्राग्नी तावागच्छतमित्युक्तं । इदानीं तु द्युप्रभृतिष्ववरोहक्रमेण वर्तमानेषु त्रिषु लोकेषु याविंद्राग्नी वर्तेते तावागच्छतामिति प्रार्थ्यते ॥

एकादशीमृचमाह ॥

यदिंद्राग्नी दिवि ष्ठो यत्पृथिव्यां यत्पर्वतेष्वोषधीष्वप्सु ।

अतः परि वृषणावा हि यातमथा सोमस्य पिबतं सुतस्य ॥ ११ ॥

यत् । इंद्राग्नी इति । दिवि । स्थः । यत् । पृथिव्यां । यत् ।

पर्वतेषु । ओषधीषु । अप्ऽसु ।

अतः । परि । वृषणौ । आ । हि । यातं । अथ । सोमस्य ।

पिबतं । सुतस्य ॥ ११ ॥

हे इंद्राग्नी दिवि द्युलोके यद्यदि स्थः । भवथः । यदि वा पृथिव्यां भूलोके यदि वा पर्वतेषु मेर्वादिषु मेघेषु वा । तथा ओषधीषु तिलमाषव्रीह्यादिष्वप्सूदकेषु चानुग्राहकतया यदि वा स्थः । हे कामाभिवर्षकौ युवामतः सर्वस्मात्स्थानादागच्छतं । आगत्य चाभिषुतं सोमं पिबतं ॥ पृथिव्यां । उदात्तयण इति विभक्तेरुदात्तत्वं । ओषधीषु । ओषः पाक आसु धीयत इति ओषधयः । कर्मण्यधिकरणे चेति किप्रत्ययः । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । तच्च घञंतमाद्युदात्तं । ओषधेश्च विभक्तावप्रथमायामिति दीर्घः ॥

द्वादशीमृचमाह ॥

यदिंद्राग्नी उदिता सूर्यस्य मध्ये दिवः स्वधया मादयेथे ।

अतः परि वृषणावा हि यातमथा सोमस्य पिबतं

सुतस्य ॥ १२ ॥

यत् । इंद्राग्नी इति॑ । उत्ऽइ॑ता । सूर्य॑स्य । मध्ये॑ । दि॒वः ।
स्व॒धया॑ । मा॒दये॑थे॒ इति॑ ।
अत॑ः । परि॑ । वृ॒ष॒णौ॒ । आ । हि । यात॑ । अथ॑ । सोम॑स्य
पि॒ब॒त॑ । सु॒तस्य॑ ॥ १२ ॥

हे इंद्राग्नी उदिता उदितस्योदयं प्राप्तस्य सूर्यस्यादित्यस्य संबंधिनो दिवो द्योतमानस्यांतरिक्षस्य मध्ये मध्यमभागे स्वधयात्मीयेन तेजसा हविर्लक्षणेनान्नेन वा यद्यस्मात्कारणान्मादयेथे । तृप्तौ भवथः । तस्मात्कारणादतः सर्वस्मादंतरिक्षभागात् हे कामाभिवर्षकाविंद्राग्नी आगच्छतं । आगमनानंतरमभिषुतं सोमं पिबतं ॥ उदिता । सुपां सुलुगिति षष्ठ्या डादेशः । दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । मादयेथे । मद तृप्तियोगे । चुरादिरात्मनेपदी ॥

त्रयोदशीमृचमाह ॥

ए॒वेंद्रा॑ग्नी पपि॒वांसा॑ सु॒तस्य॒ विश्वा॒स्मभ्यं॒ सं जय॑तं॒ धना॑नि ।
तन्नो॑ मि॒त्रो वरु॑णो मामहंता॒मदि॑तिः॒ सिंधु॑ः पृथि॒वी
उ॒त द्यौः ॥ १३ ॥

ए॒व । इंद्रा॑ग्नी इति॑ । प॒पि॒ऽवांसा॑ । सु॒तस्य॑ । विश्वा॑ ।
अ॒स्मभ्य॑ं । सं । ज॒य॒त॑ । धना॑नि ।

तत् । नः । मित्रः । वरु॑णः । ममहंतां । अदि॑तिः । सिंधुः ।

पृथिवी । उत । द्यौः ॥ १२ ॥

हे इंद्राग्नी सुतस्याभिषुतं सोममेव एवं पपिवांसा पीतवंतौ युवामस्मभ्यं विश्वा सर्वाणि धनानि संजयतं । प्रयच्छतं । यदनेन सूक्तेन प्रार्थितं तन्मित्रादयो मामहंतां । पूजयंतु ॥ पपिवांसा । पा पाने । लिटः क्वसुः । वस्वेकाजाद्घसामितीडागमः ॥

॥ इति प्रथमस्य सप्तमे सप्तविंशो वर्गः ॥

वि ह्यख्यमिति चतुर्थं सूक्तं । अनुक्रांतं च वि ह्यष्टाविति । ऋष्याद्याः पूर्ववत् । सूक्तविनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

वि ह्यख्यं मन॑सा वस्य॑ इच्छन्निंद्रा॑ग्नी ज्ञास उत वा॑ सजातान् नान्या युवत्प्रम॑तिरस्ति मह्यं॑ स वां धियं॑ वाजयंती॑मतक्षं ॥ १ ॥

वि । हि । अख्यं॑ । मन॑सा । वस्यः॑ । इच्छन् । इंद्रा॑ग्नी इति॑ ।

ज्ञासः । उत । वा । सऽजातान् ।

न । अन्या । युवत् । प्रऽम॑तिः । अस्ति । मह्यं॑ । सः । वां ।

धियं॑ । वाजऽयंती॑ं । अतक्षं ॥ १ ॥

हे इंद्राग्नी वस्यः प्रशस्तं धनमिच्छन् कामयमानोऽहं ज्ञासो ज्ञातीन् उत वा अपि वा सजातान् । समानजन्मानो ज्ञातिव्यतिरिक्ता बांधवास्तांश्च मनसा बुद्ध्या वि ह्यख्यं ।

युवामेव ज्ञातिरूपेण बंधुरूपेण च व्यज्ञासिषं । तौ हि धनस्य दातारो भवंति । अपि च युवत् युवाभ्यामन्या अन्येन केनचिन्मह्यं दत्ता प्रमतिः प्रकृष्टा बुद्धिर्नास्ति । मदीया येषा प्रकृष्टा बुद्धिः सा युवाभ्यामेव दत्ता । स तादृश्या बुद्ध्या युक्तोऽहं वां युवयोः संबंधिनीं वाजयंतीमन्नमस्मभ्यमिच्छंतीं धियं ध्यानेन निष्पन्नां स्तुतिमतक्षं । अकार्षं ॥ अतक्षं । लुङ्-स्थतिव्यक्तिख्यातिभ्योऽङिति च्लेरङादेशः । वस्यः । वसुशब्दादीयसुन् । टेरिति टिलोपः । छांदस ईकारलोपः । ज्ञासः । सुखदुःखादिकं साम्येन जानंतीति ज्ञासो ज्ञातयः । ज्ञा अवबोधने । औणादिकोऽसुन् । व्यत्ययेन विभक्तेरुदात्तत्वं । युवत् । सुपां सुलुगिति विभक्तेर्लुक् । द्व्यर्थाभिधायकत्वाद्युषावौ द्विवचन इति युष्मदो मपर्यंतस्य युवादेशः ॥

द्वितीयामृचमाह ॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् ।
अथा सोमस्य प्रयंती युवभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं ॥२॥

अश्रवं । हि । भूरिदावत्ऽतरा । वां । विऽजामातुः । उत ।
वा । घ । स्यालात् ।
अथ । सोमस्य । प्रऽयंती । युवऽभ्यां । इंद्राग्नी इति ।
स्तोमं । जनयामि । नव्यं ॥ २ ॥

हे इंद्राग्नी वां युवां भूरिदावत्तरातिशयेन बहुविधधनस्य दातारावित्यश्रवं हि । अश्रौषं खलु । कस्मात्पुरुषात् । विजामातुः । सुताभिरूप्यादिभिर्गुणैर्विहीनो जामाता यथा कन्या-

वते बहुधनं प्रयच्छति कन्यालाभार्थं ततोऽप्यतिशयेन दातारावींद्राग्नी इत्यर्थः। उत वा अपि च स्यालात्। स्यं शूर्पं। तस्माल्लाजानावपति विवाहकाल इति स्यालः कन्याभ्राता। स यथा भगिनीप्रीत्यर्थं बहु धनं प्रयच्छति ततोऽप्यतिशयेन दातारावींद्राग्नी। वेति पादपूरणे। तथा च सत्यथानंतरं हे इंद्राग्नी युवाभ्यां सोमस्य प्रयती अभिषुतस्य सोमस्य प्रदानेन सह नव्यं नवतरं प्रत्यग्रं स्तोमं स्तोत्रं जनयामि। निष्पादयामि। अत्र निरुक्तं। अश्रौषं हि बहुदातरौ वां विजामातुरसुसमाप्ताज्जामातुः। विजामातेति शश्वद्दाक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतो जामाता जा अपत्यं तन्निर्माता। उत वा घा स्यालादपि च स्यालात् स्याल आसन्नः संयोगेनेति नैदानाः। स्याल्लाजानावपतीति वा। लाजा लाजतेः स्यं शूर्पं स्यतेः। शूर्पमशनपवनं शृणातेः शृणातेर्वा। अथा सोमस्य प्रदानेन युवाभ्यामिंद्राग्नी स्तोमं जनयामि नव्यं नवतरं। नि० ६. ९.। इति॥ अश्रवं। श्रु श्रवणे। लङ्युत्तमपुरुषैकवचने बहुलं छंदसीति विकरणस्य लुक्। भूरिदावत्तरा। डुदाञ्। दाने। आतो मनिन्निति वनिप्। अतिशयेन भूरिदावा भूरिदावत्तरः। भूरिदाव्नस्तुट् वक्तव्य इति तरपस्तुट्। पदसंज्ञायां नलोपः। सुपां सुलुगिति विभक्तेराकारः। घा। ऋचि तुनुघेत्यादिना संहितायां दीर्घत्वं। अथा निपातस्य चेति। प्रयती। यम उपरमे। स्निन्यनुदात्तोपदेशेत्यादिनानुनासिकलोपः। तादौ चेति गतेः प्रकृतिस्वरत्वं। युवभ्यां। सर्वे विधयश्छंदसि विकल्प्यंत इति युष्मदस्मदोरनादेशः इत्यात्वाभावः। शेषे लोप इति दकारलोपः॥

तृतीयामृचमाह ॥

मा छेद्म रश्मीँरिति नाधमानाः पितॄणां शक्तीरनुयच्छमानाः ।
इंद्राग्निभ्यां कं वृषणो मदंति ता ह्यद्री धिषणाया उपस्थे ॥ ३ ॥

मा । छेद्म । रश्मीन् । इति ॥ नाधमानाः । पितॄणां । शक्तीः ।
अनुऽयच्छमानाः ।
इंद्राग्निऽभ्यां । कं । वृषणः । मदंति । ता । हि । अद्री इति
धिषणायाः । उपस्थे ॥ ३ ॥

रश्मीन् । रश्मिशब्दो रज्जुवाची । यथा रश्मयो दीर्घा अविच्छिन्ना भवंति एवमविच्छिन्नान्पुत्रपौत्रादीन् मा छेद्म । मा विच्छिन्नान्कुर्मेति बुद्ध्या नाधमाना इंद्राग्न्योः सकाशात्तथाविधान्पुत्रादीन्याचमानाः । तदनंतरं पितॄणां शक्तीः शक्त्युत्पादकान्वीर्योत्पादकांस्तान्पुत्रादीननुयच्छमाना अनुक्रमेण नियतान् कुर्वंतो वृषणः सेक्तारः पुत्रोत्पादनसमर्थाः । सपत्नीका इत्यर्थः । एवंभूता यजमाना इंद्राग्निभ्यां कं सुखं यथा भवति तथा मदंति । स्तुवंति । हि यस्मादद्री शत्रूनदृणंतौ हिंसंतौ विदारयंतौ ताविंद्राग्नी धिषणायाः स्तुत्या उपस्थ उपस्थाने समीपे भवतः । तस्मात्तस्मांनिध्याय स्तुवंतीति भावः । यद्वा निपातानामनेकार्थत्वात् हिशब्दो यदेत्यर्थः । यदा ताविंद्राग्नी उद्दिश्याद्री अभिषवसाधनभूता ग्रावाणो धिषणाया उपस्थे । धिषणाधिषवणचर्म । तस्योपरिष्टादिंद्राग्न्यर्थं सोममभिषुण्वंति । तदा तदा यजमाना स्तुवंतीति योजनीयं ॥ छेद्म । छिदिर् द्वैधीकरणे । लुङि बहुलं छंदसीति विकरणस्य

लुक्। छंदस्युभयथेत्यार्द्धधातुकत्वेन ङित्त्वाभावाल्लघूपधगुणः। न माङ्योगः इत्यडभावः। रश्मीम्। दीर्घादटि समानपाद इति संहितायां नकारस्य रुत्वं। अत्रानुनासिकः पूर्वस्य तु वेतीकारः सानुनासिकः। नाधमानाः। णाधृ याच्ञायां। पितृणां। नामन्यतरस्यामिति नाम उदात्तत्वं। मदंति। मदि स्तुतौ। आगमानुशासनस्यानित्यत्वान्नुमभावः। व्यत्ययेन परस्मैपदं॥

चतुर्थीमृचमाह॥

युवाभ्यां देवी धिषणा मदायेंद्राग्नी सोमंमुशती सुनोति।
तावश्विना भद्रहस्ता सुपाणी आ धावतं मधुना
पृङ्क्तमप्सु॥ ४॥

युवाभ्यां। देवी। धिषणा। मदाय। इंद्राग्नी इति।
सोमं। उशती। सुनोति।
तौ। अश्विना। भद्रऽहस्ता। सुपाणी इति सुऽपाणी।
आ। धावतं। मधुना। पृङ्क्तं। अप्ऽसु॥ ४॥

हे इंद्राग्नी युवाभ्यां मदाय युवयोर्हर्षाय देवी द्योतमानोशती युवां कामयमाना धिषणा मंत्ररूपा वाक् सोममभिषुणोति। यद्वा धिषणाधिषवणचर्म। द्योतमानं तद्युवयोर्मदं कामयमानं सत्सोममभिषुणोति। ग्रावभिः स्वस्मिन्नभिषवात्तस्याभिषवकर्तृत्वं। अश्विनाश्ववंतौ भद्रहस्ता शोभनदोर्दंडौ सुपाणी। मणिबंधादूर्ध्वभागः पाणिः। शोभनपाणी। एवंतौभू

हे इंद्राग्नी तौ युवामाधावत। शीघ्रमागच्छत। आगत्य चास्य दृतिषु वर्तमानेन मधुना माधुर्योपेतेन सारांशेन पृंक्तं। अस्मदीयं सोमं संयोजयतं। यद्वा। अप्सु वसतीवरीषु मधुना माधुर्यं संयोजयतं। विभक्तिव्यत्ययः॥ युवाभ्यां। षष्ठ्यर्थे चतुर्थी। उशती। वश कांतौ। अदादित्वाच्छपो लुक्। ग्रहिज्यादिना संप्रसारणं। उगितश्चेति ङीप्। शतुरनुम इति नद्या उदात्तत्वं। पृङ्क्तं। पृची संपर्के। रौधादिकः। लोटि थसस्तं। श्नसोरल्लोपः। अनुस्वारपरसवर्णौ। न चाचः परस्मिन्नित्यल्लोपस्य स्थानिवत्त्वं न पदांतेत्यादिना निषेधात्॥

पंचमीमृचमाह॥

युवामिंद्राग्नी वसुनो विभागे तवस्तमा शुश्रव वृत्रहत्ये।

तावासद्या बर्हिषि यज्ञे अस्मिन्प्र चर्षणी मादयेथां

सुतस्य॥ ५॥

युवां। इंद्राग्नी इति। वसुनः। विऽभागे। तवःऽतमा।

शुश्रव। वृत्रऽहत्ये।

तौ। आऽसद्य। बर्हिषि। यज्ञे। अस्मिन्। प्र।

चर्षणी इति। मादयेथां। सुतस्य॥ ५॥

हे इंद्राग्नी वसुनो धनस्य विभागे स्तोतृभ्यो दातुं विभजने तात्पर्येण वर्तमानौ युवां वृत्रस्यासुरस्य हनने तवस्तमातिशयेन बलिनौ प्रवृद्धतमौ वा शुश्रव। अश्रौषं। हे चर्षणी सर्वस्य द्रष्टाराविंद्राग्नी तौ युवामस्मदीयेऽस्मिन्यज्ञे

बर्हिषि वेद्यामास्तीर्णे दर्भे आसद्योपविश्य सुतस्याभिषुतस्य सोमस्य पानेन प्रमादयेथां । प्रकर्षेण तृप्तौ भवतं ॥ विभागे । भज सेवायां । भावे घञ् । चजोः कु घिण्ण्यतोरिति कुत्वं । थाथादिनोत्तरपदांतोदात्तत्वं । तवस्तमा । तव इति बलनाम । तुमत्वर्थीयादेतस्मादातिशायनिकस्तमप् । यद्वा तवति-वृद्ध्यर्थः । सौत्रो धातुः । तस्मादौणादिकः कर्तर्यसिप्रत्ययः । सुपां सुलुगिति विभक्तेः पूर्वसवर्णदीर्घत्वं । वृत्रहत्ये । हनस्त चेति हंतेर्भावे क्यप् । तत्संनियोगेन तकारांतादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्य सप्तमेऽष्टाविंशो वर्गः ॥

ऐंद्राग्नस्य पशोर्हविषः प्र चर्षणिभ्य इत्येषा याज्या । प्रदानानामिति खंडे सूत्रितं । प्र चर्षणिभ्यः पृतनाहवेषु देवो यातु सविता सुरत्नः । आ० ३. ७. । इति ॥

तामेतां सूक्ते षष्ठीमृचमाह ॥

प्र च॒र्ष॒णिभ्यः॑ पृतना॒हवे॑षु॒ प्र पृ॑थि॒व्या रि॑रिचाथे दि॒वश्च॑ ।

प्र सिंधु॑भ्यः॒ प्र गि॒रिभ्यो॑ महि॒त्वा प्रेंद्रा॑ग्नी॒ विश्वा॒

भुव॒नात्य॒न्या ॥ ६ ॥

प्र । च॒र्ष॒णिऽभ्यः॑ । पृ॒त॒ना॒ऽह॒वे॑षु । प्र । पृ॒थि॒व्याः ।

रि॒रि॒चा॒थे॒ इति॑ । दि॒वः । च॒ ।

प्र । सिंधु॑ऽभ्यः । प्र । गि॒रिऽभ्यः॑ । म॒हि॒ऽत्वा । प्र ।

इं॒द्रा॒ग्नी॒ इति॑ । विश्वा॑ । भुव॑ना । अति॑ । अ॒न्या ॥ ६ ॥

पृतनाहवेषु पृतनासु संग्रामेषु रक्षणार्थमाह्वानेषु सत्सु हे इंद्राग्नी आगतवंतौ युवां चर्षणिभ्यः सर्वेभ्योऽपि मनुष्येभ्यो महित्वा महत्त्वेन प्ररिरिचाथे। अतिरिच्येथे। सर्वाधिकौ भवथ इत्यर्थः। अत्रोपसर्गवशाद्धातुः स्वाभिधेयविपरीतमर्थमाचष्टे यथा प्रस्मरणं प्रस्थानमिति। तथा पृथिव्याः सर्वस्या भूमेश्च प्ररिरिचाथे। एवं द्युप्रभृतिभ्योऽपि। सिंधवः स्यंदनशीला आपः। गिरयः पर्वताः। अपि च हे इंद्राग्नी विश्वा भुवना सर्वाणि भूतजातान्यन्योन्यव्यतिरिक्तानि यानि संति तान्यतीत्य प्ररिरिचाथे। अधिकौ भवथः॥ पृतनाहवेषु। पृतनासु हवः पृतनाहवः। ह्वो भावेऽनुपसर्गस्येत्यप् संप्रसारणं च। व्यत्ययेन थाथादिस्वराभावे कृदुत्तरपदप्रकृतिस्वरत्वं। रिरिचाथे। रिचिर् विरेचने। छंदसि लुङ्लङ्लिट इति वर्तमाने लिट्। यद्वा लव्येव बहुलं छंदसीति विकरणस्य श्लुः। महित्वा। मह पूजायां। औणादिक इन्प्रत्ययः। तस्य भावो महित्वं। सुपां सुलुगिति तृतीयाया डादेशः॥

पूर्वोक्त एव पशावाभरतमित्येषा पुरोडाशस्यानुवाक्या। सूत्रितं च। आ भरतं शिक्षतं वज्रबाहू उभा वामिंद्राग्नी आहुवध्यै। आ० ३. ७.। इति॥

तामेतां सूक्ते सप्तमीमृचमाह॥

आ भरतं शिक्षतं वज्रबाहू अस्माँ इंद्राग्नी अवतं शचीभिः।

इमे नु ते रश्मयः सूर्यस्य येभिः सपित्वं पितरो न आसन्॥ ७॥

आ । भरतं । शिक्षतं । वज्रबाहू इति वज्रऽबाहू । अस्मान् ।

इंद्राग्नी इति । अवतं । शचीभिः ।

इमे । नु । ते । रश्मयः । सूर्यस्य । येभिः । सऽपित्वं ।

पितरः । नः । आसन् ॥ ७ ॥

हे वज्रबाहू वज्रहस्ताविंद्राग्नी आभरतं । अस्मदर्थं धनमाहरतं । आहृत्य च शिक्षतं । अस्मभ्यं दत्तं । शिक्षतिर्दानकर्मा । अपि च । नोऽस्माननुष्ठातॄन् शचीभिः । कर्मनामैतत् । आत्मीयैः कर्मभिरवतं । रक्षतं । किं च सूर्यात्मन इंद्रस्य येभी रश्मिभिर्यैरर्चिभिर्नोऽस्माकं पितरः पूर्वपुरुषाः सपित्वं सहप्राप्तव्यं स्थानमासन् । ब्रह्मलोकमगच्छन् । अर्चिरादिमार्गेण हि ब्रह्मलोकमुपासका गच्छंति । तथा च श्रूयते । तेऽर्चिषमभिसंभवंत्यर्चिषोऽहरिति । यद्वा येभी रश्मिभिः सपित्वं समवेतत्वमध्यगच्छन् । ते रश्मय इमे नु इदानीमस्माभिर्दृश्यमाना एत एव खलु । सूर्यात्मन इंद्रस्य ये रश्मयस्त एवाग्नेरपि । तथा च श्रूयते । अग्निं वावादित्यः सायं प्रविशति तस्मादग्निर्दूराग्नक्तं ददृश इति । तस्मात्सूर्यस्य रश्मीनां स्तवनेनेंद्राग्न्योरुभयोरपि स्तुतिः सिद्धा ॥ भरतं । हृग्रहोर्भ इति भत्वं । शिक्षतं । शिक्ष विद्योपादाने । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे शपः पित्त्वादनुदात्तत्वं । धातुस्वरः शिष्यते । तिङः परत्वान्निघाताभावः । सपित्वं । आप्लृ व्याप्तौ । अस्मात्सगब्दोपपदात्कृत्यार्थे तवैकेनिति त्वन्प्रत्ययः । पृषोदरादित्वाडातोः पिभावः । यद्वा षप समवाये । इन् सर्वधातुभ्य

इतीम् । सपीभावः सपित्वं । आसम् । अस गतिदीप्त्यादानेषु । लङ्याडागम उदात्तः । यद्वृत्तान्नित्यमिति निघाताभावः ॥

अष्टमीमृचमाह ॥

पुरंदरा शिर्क्षतं वज्रहस्तास्माँ इंद्राग्नी अवतं भरेषु ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ८ ॥

पुरंऽदरा । शिक्षतं । वज्रऽहस्ता । अस्मान् । इंद्राग्नी इति । अवतं । भरेषु ।
तत् । न । मित्रः । वरुणः । ममहंतां । अदितिः । सिंधुः । पृथिवी । उत । द्यौः ॥ ८ ॥

हे वज्रहस्ता हस्तेन गृहीतवज्रौ । पुरंदरा असुरपुराणां दारयिताराविंद्राग्नी शिक्षतं । अस्मदपेक्षितं धनं प्रयच्छतं । अपि च भरेषु संग्रामेष्वस्मानवतं । रक्षतं । यदनेन सूक्तेन प्रार्थितं तदस्मदीयं मित्रादयो मामहंतां । पूजयंतां ॥ पुरंदरा । पूःसर्वयोर्दारिसहोरिति खच् । वाचंयमपुरंदरौ चेति निपातनादम् । सुपां सुलुगिति विभक्तेराकारः ॥

॥ इति प्रथमस्य सप्तम एकोनत्रिंशो वर्गः ॥

ततं म इति नवर्चं पंचमं सूक्तं कुत्सस्यार्षं ऋभुदेवताकं । पंचमीनवम्यौ त्रिष्टुभौ । शिष्टाः सप्त जगत्यः । तथा चानुक्रांतं । ततं नवार्भवं तु पंचम्यंते त्रिष्टुभाविति ॥ अभिप्लवषडहस्य

चतुर्थेऽहनि वैश्वदेवशस्त्र इदमार्भवं निविद्धानं। सूत्रितं च तृतीयस्येति खंडे। ततं मे अप इति वैश्वदेवं। आ० ७. ७.। इति ॥

तत्र प्रथमामृचमाह ॥

ततं मे अपस्तदु तायते पुनः स्वादिष्ठा धीतिरुचथाय शस्यते।
अयं समुद्र इह विश्वदेव्यः स्वाहाकृतस्य समु तृप्णुत ऋभवः ॥ १॥
ततं। मे। अपः। तत्। ऊं इति। तायते। पुनरिति।
स्वादिष्ठा। धीतिः। उचथाय। शस्यते।
अयं। समुद्रः। इह। विश्वऽदेव्यः। स्वाहाऽकृतस्य। सं।
ऊं इति। तृप्णुत। ऋभवः ॥ १ ॥

हे ऋभवो मे मयापोऽग्निष्टोमादिरूपं कर्म ततं विस्तारितं। बहुशः पूर्वमनुष्ठितं। तदु तदेव पुनस्तायते। विस्तार्यते। अनुष्ठियत इत्यर्थः। तत्र स्वादिष्ठास्वादुतमातिशयेन प्रीतिकरी धीतिः स्तुतिरुचथाय स्तुत्याय शस्यते। पठ्यते। अपि च। इहास्मिन्यागे समुद्रः समुंदनशीलोऽयं सोमरसो विश्वदेव्यः सर्वेभ्यो देवेभ्यः पर्याप्तो यथा भवति तथा संपादितः। तस्य स्वाहाकृतस्य स्वाहाकारेणाग्नौ प्रक्षिप्तस्य सोमस्य पानेन समु तृप्णुत। सम्यगेव तृप्ता भवत ॥ ततं। तनु विस्तारे। निष्ठायां यस्य विभाषेतीट्प्रतिषेधः। अनुदात्तोपदेशेत्यादिनानुनासिकलोपः। अपः। आप्लृ व्याप्तौ। आपः कर्माख्यायां ह्रस्वो नुट् चेत्यसुन् धातोर्ह्रस्वश्च। तायते। तनोतेर्यक्ति।

पा° ६. ४. ४४. । इत्यात्वं । स्वादिष्टया । स्वादुशब्दादाति-शायनिक इष्ठन् । टेरिति टिलोपः । उचथाय । वच परिभाषणे । औणादिकोऽथक्प्रत्ययः । वचिस्वपीत्यादिना संप्रसारणं । समुद्रः । उंदी क्लेदने । स्फायितंचीत्यादिना रक् । अनिदितामिति नलोपः । विश्वदेव्यः । देवार्हो भागो देव्यः । छंदसि चेति यप्रत्ययः । विश्वे सर्वे देवा यस्मिन्सोमे । बहुव्रीहौ विश्वं संज्ञायामिति व्यत्ययेनासंज्ञायामपि पूर्वपदांतोदात्तत्वं । स्वाहाकृतस्य । स्वाहाशब्दस्य ऊर्यादित्वेन गतित्वाद्गतिरनंतर इति पूर्वपदप्रकृतिस्वरत्वं । तृप्णुत । तृप प्रीणने । स्वादिभ्यः श्नुः । ऋभव इत्यनेन संहितायामृत्यक इति प्रकृतिभावः ॥

द्वितीयामृचमाह ॥

आभोगयं प्र यदिच्छंत ऐतनापाकाः प्रांचो मम के चिदापयः ।

सौधन्वनासश्चरितस्य भूमनागच्छत सवितुर्दाशुषो गृहं ॥ २ ॥

आऽभोगयं । प्र । यत् । इच्छंतः । ऐतन । अपाकाः । प्रांचः । मम । के । चित् । आपयः ।

सौधन्वनासः । चरितस्य । भूमना । अगच्छत । सवितुः । दाशुषः । गृहं ॥ २ ॥

हे ऋभवः । अपाका अपरिपक्वज्ञानाः प्रांचः पूर्वकालीना ममापयः प्रापयितारो मदीया ज्ञातयः केचित् एवंभूता ये केचन यूयमाभोगयमुपभोग्यं सोममिच्छंतो यद्यदा ऐतन । तपश्चरितुमरण्यं गतवंतः । ऋभवो हि सुधन्वन आंगिरसस्य पुत्राः । तदुक्तं यास्केन । ऋभुर्विभ्वा वाज इति सुधन्वन आंगिरसस्य त्रयः पुत्रा बभूवुः । नि॰ ११. १६. । इति । कुत्सोऽप्यांगिरसः । अतस्तेन मदीया ज्ञातय इत्युक्तं । हे सौधन्वनासः सुधन्वनः पुत्राः । तदानीं चरितस्य समुपार्जितस्य तपसो भूमना भूम्ना बहुत्वेन दाशुषो हवींषि दत्तवतः सवितुः सोमाभिषवं कुर्वतो यजमानस्य संबंधि यज्ञगृह-मगच्छत । तपसा लब्धसोमाः संतः कृतपाना यूयं गतवंतः । यद्वा । दाशुषः प्रातःसवनादिष्वग्न्यादिभिरपसारितेभ्य ऋभुभ्यः सोमपानं दत्तवतः सवितुर्गृहं निवासस्थानं तृतीयसवनाख्य-मगच्छत । प्राप्ताः । एतत्सर्वमार्भवं शंसतीत्यादौ विस्पष्ट-माम्नातं ॥ आभोगयं । आ समंताद्भोग आभोगः । तदर्हं आभोगयः । छंदसि चेति यः । यस्येति चेति लोपाभाव-श्छांदसः । व्यत्ययेन प्रत्ययात्पूर्वस्योदात्तत्वं । यद्वा । आङ्-पूर्वाद्भुजेरौणादिकः कर्मणि इप्रत्ययः कुत्वं च । अमि व्यत्ययेन गुणः । ऐतन । इण् गतौ । लङि मध्यमबहुवचनस्य थस्य तादेशः । तप्तनप्तनथनाश्चेति तस्य तनबादेशः । आडागमो वृद्धिश्च । आपयः । आप्नोतेरौणादिक इप्रत्ययः । भूमना । बहुशब्दात्पृथ्वादिलक्षण इमनिच् । बहोर्लोपो भू च बहोरिती-कारलोपो बहोर्भूंभावश्च । संज्ञापूर्वकस्य विधेरनित्यत्वाद-लोपाभावः ॥

तृतीयामृचमाह ॥

तत्स॑विता वो॑ऽमृत॒त्वमासु॑वद॒गोह्यं॒ यच्छ्र॒वय॑न्त॒ ऐत॑न ।

त्यं चि॑च्चम॒सम॑सु॒रस्य॒ भक्ष॑ण॒मेकं॒ सन्त॑मकृणुता॒ चतु॑र्वयम् ॥ ३ ॥

तत् । स॒वि॒ता । वः॒ । अ॒मृ॒त॒ऽत्वम् । आ । अ॒सु॒व॒त् । अ॒गोह्य॑म् ।

यत् । श्र॒वय॑न्तः । ऐत॑न ।

त्यम् । चि॒त् । च॒म॒सम् । असु॑रस्य । भक्ष॑णम् । एक॑म् । सन्त॑म् ।

अ॒कृ॒णु॒त॒ । चतुः॑ऽवयम् ॥ ६ ॥

हे ऋभवस्तदानीं सविता सर्वस्य प्रेरको देवो वो युष्माकममृतत्वं देवत्वमासुवत् । अभिमुख्येन प्रेरितवान् । दत्तवानित्यर्थः । यद्यदा यूयमगोह्यं गूहितुमशक्यं सर्वैर्दृश्यमानं सवितारं श्रवयंतोऽपिचितं सोमपानं विज्ञापयंतः संत ऐतन । आगच्छत । तदानीमिति पूर्वेणान्वयः । यस्माद्यूयं देवैराज्ञापिता संतोऽसुरस्य त्वष्टुः संबंधि । निर्मितमित्यर्थः । भक्षणं सोमपानसाधनं त्यं तं चमसमेकं चित् असहायमेव संतं चतुर्वयं चतुर्व्यूहमकृणुत । अकुरुत । सृष्ट्यादौ त्वष्टा कृतं चमसं होतृचमसादिमुख्यचमसचतुष्टयरूपेण ऋभवः कृतवंत इत्यर्थः ॥ असुवत् । षू प्रेरणे । तौदादिकः । श्रवयंतः । श्रु श्रवणे । छांदसो वृद्ध्यभावः । ऐतन । लङि मध्यमबहुवचनस्य तादेशे तप्तनप्तनथनाश्चेति तनबादेशः भक्षणं । करणे ल्युट् । अकृणुत । कृवि हिंसाकरणयोश्च । लङि मध्यमबहुवचने धिन्विकृण्व्योरच्चेत्युप्रत्ययः । चतुर्वयं । वयाः अवयवाः । चत्वारोऽवयवा यस्य स तथोक्तः ॥

चतुर्थोऽृचमाह ॥

विष्ट्वी शमी तरणित्वेन वाघतो मर्तासः सन्तो

अमृतत्वमानशुः ।

सौधन्वना ऋभवः सूरचक्षसः संवत्सरे समपृच्यन्त

धीतिभिः ॥ ४ ॥

विष्ट्वी । शमी । तरणिऽत्वेन । वाघतः । मर्तासः । सन्तः ।

अमृतऽत्वं । आनशुः ।

सौधन्वनाः । ऋभवः । सूरऽचक्षसः । संवत्सरे । सं ।

अपृच्यन्त । धीतिऽभिः ॥ ४ ॥

वाघतः । ऋत्विङ्नामैतत् । अत्र च सामर्थ्यात्तद्वन्तो लक्ष्यन्ते । ऋत्विग्भिरुपेता ऋभवः । शमी । कर्मनामैतत् । यागदानादीनि कर्माण्यन्यान्यप्येकं चमसं चतुरः कृणोतनेत्यादिना देवैरुक्तानि कर्माणि तरणित्वेन । तरणिरिति क्षिप्रनाम । क्षिप्रत्वेन शीघ्रेण विष्ट्वी । यद्यप्येतत्कर्मनाम तथाप्यत्र क्रियापरं व्याप्य कृत्वेत्यर्थः । एवं कर्माणि कृत्वा मर्तासो मनुष्या अपि सन्तोऽमृतत्वं देवत्वमानशुः । आनशिरे । कृतैः कर्मभिर्लेभिरे । देवत्वं प्राप्य च सौधन्वनाः । पुत्राः सूरचक्षसः सूर्यसमानप्रकाशाः सूर्यदृष्टशरीराना वा ते ऋभवः संवत्सरे संवत्सरावयवभूते वसन्तादिकालेऽनुष्ठेये धीतिभिरग्निष्टोमादिकर्मभिः समपृच्यन्त । संयुक्ता अभवन् । हविर्भागार्हा बभूवुरित्यर्थः । अत्र निरुक्तं । कृत्वा कर्माणि क्षिप्रत्वेन वोढारो

मेधाविनो वा मर्तासः संतोऽमृतत्वमानशिरे सौधन्वना ऋभवः सूरख्याना वा सूरप्रज्ञा वा संवत्सरे समपृच्यंत धीतिभिः कर्मभिर्ऋभुर्विभ्वा वाज इति सुधन्वन आंगिरसस्य त्रयः पुत्रा बभूवुः। नि॰ ११. १ .। इति॥ विष्ट्वी। विष्लृ व्याप्तौ। स्नात्व्यादयश्चेति क्त्वाप्रत्ययस्य ईकारांतादेशः। शमी। सुपां सुलुगिति शसो लुक्। आनशुः। अश् व्याप्तौ। व्यत्ययेन परस्मैपदं। अश्नोतेश्चेत्यभ्यासादुत्तरस्य नुडागमः। अपृच्यंत। पृची संपर्के। कर्मणि लङ्॥

पंचमीमृचमाह॥

क्षेत्रमिव वि ममुस्तेजनेनँ एकं पात्रमृभवो जेहमानं।

उपस्तुता उपमं नाधमाना अमर्त्येषु श्रव इच्छमानाः॥ ५॥

क्षेत्रंऽइव। वि। ममुः। तेजनेन। एकं। पात्रं। ऋभवः। जेहमानं।

उपऽस्तुताः। उपऽमं। नाधमानाः। अमर्त्येषु। श्रवः। इच्छमानाः॥ ५॥

उपस्तुताः समीपस्थैर्ऋषिभिः स्तुता ऋभवो जेहमानं होमक्रियां प्रति प्रयतमानमेकमसहायं पात्रं पानसाधनं त्वष्ट्रा निर्मितं चमसं मानदंडेन क्षेत्रमिव भूमिमिव तेजनेन तीक्ष्णेन शस्त्रेण चमसचतुष्टयरूपेण कर्तुं विममुः। विशेषेण मानं कृतवंतः। निर्मितवंतः। उपमं सर्वेषामुपमानभूतं प्रशस्तं सोमलक्षणमन्नं नाधमानाः। याचमानाः। एतदेव विवृणोति। अमर्त्येषु मरणरहितेषु देवेषु मध्ये श्रवो हविर्लक्षणमन्नमिच्छ-

माना: । इच्छं॑तः । देवैः सह सोमपानं कामयमानास्तल्लाभाय पतुरश्वमसानकार्षुरित्यर्थः ॥ ममुः । माङ् माने शब्दे च । व्यत्ययेन परस्मैपदं । तेजनेन ! अणोऽप्रगृह्यस्यानुनासिक इत्यनवसाने व्यत्ययेनाकारस्यानुनासिक्यं । ईषा अक्षादित्वात्प्रकृतिभाव: । जेहमानं । वेहृ जेहृ बाहृ प्रयत्ने । भौवादिकः । अनुदात्तेत्त्वादात्मनेपदं । उपस्तुताः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । उपमं । माङ् माने । आतश्चोपसर्गे इति कप्रत्यय: । इच्छमानाः । व्यत्ययेनात्मनेपदं ॥

॥ इति प्रथमस्य सप्तमे त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

आ मं॒नी॒षाम॒न्तरि॑क्षस्य॒ नृभ्यः॑ स्रु॒चेव॑ घृ॒तं जु॑हवाम वि॒द्मना॑ ।
त॒र॒णि॒त्वा ये पि॒तुर॑स्य सश्चि॒र ऋ॒भवो॒ वाज॑मरुहन्दि॒वो

रजः॑ ॥ ६ ॥

आ । म॒नी॒षां । अ॒न्तरि॑क्षस्य । नृऽभ्यः॑ । स्रु॒चाऽइ॑व । घृ॒तं ।
जु॒ह॒वा॒म॒ । वि॒द्मना॑ ।

त॒र॒णि॒ऽत्वा । ये । पि॒तुः । अ॒स्य । स॒श्चि॒रे । ऋ॒भवः॑ । वाजं॑ ।
अ॒रु॒ह॒न् । दि॒वः । रजः॑ ॥ ६ ॥

अंतरिक्षस्यांतरिक्षलोकस्य मध्यमस्थानस्य संबंधिभ्यो नृभ्यो यज्ञस्य नेतृभ्य ऋभुभ्यः । ऋभवो हि यज्ञस्य नेतारः । तेन हि देवत्वं प्राप्ताः । यद्वा । अंतरिक्षस्य लोकस्य नेतृभ्यः ।

मध्यमे स्थाने घ्नंते पश्यंति। तादृशेभ्यः स्रुचेव यथा स्रुचा जुह्वा घृतं चरणशीलाज्यापेतं हविराजुहवाम। मर्यादायामाकारः। यथाशास्त्रं प्रयच्छाम। एवमेव मनीषां स्तुतिं विद्मना वेदनेन कुर्म इति शेषः। अपि च ये ऋभवः पितुः सर्वस्य जगतः पालकस्यास्य सूर्यस्य तरणित्वा तरणित्वानि तरणकौशलानि सश्चिरे। सूर्यरश्मिभूताः संतः प्रापुः। तदुक्तं। आदित्यरश्मयोऽप्यृभव उच्यंत इति। ते ऋभवो दिवो रजः। रजःशब्दो लोकवाची। द्योतमानस्य स्वर्गाख्यस्य लोकस्य संबंधिनं वाजं सोमलक्षणमन्नमरुहन्। यागदानादिभिः कर्मभिरन्यैश्च देवोक्तचमसचतुष्टयकरणादिकैः प्राप्नुवन्॥ स्रुचेव। साविकाच इति विभक्तेरुदात्तत्वं। जुहवाम। हु दानादनयोः। लोट्याडुत्तमस्य पिच्चेत्याडागमः। विद्मना। विद ज्ञाने। औणादिको मनिः। न संयोगाद्वमंतादित्यल्लोपाभावः। तरणित्वा। तॄ प्लवनतरणयोः। अर्तिसृधृधम्यश्यवितॄभ्योऽनिरिति कर्तर्यनिप्रत्ययः। तस्य भावस्तरणित्वं। शेश्छंदसि बहुलमिति शेर्लोपः। सश्चिरे। ग्लुंच षस्ज गतावित्यत्र सश्चिमप्येके पठंति। व्यत्ययेनात्मनेपदं। द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्द्विर्वचनाभावः। इरेचश्चित्त्वादंतोदात्तत्वं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः। अरुहन्। रुह बीजजन्मनि प्रादुर्भावे च। लुङि कृमृदृरुहिभ्यश्छंदसीति च्लेरङादेशः। दिवः। ऊडिदमित्यादिना विभक्तेरुदात्तत्वं। रजः। रंज रागे। रजंत्यस्मिन्निति रजो लोकः। तदुक्तं लोका रजांस्युच्यंत इति। औणादिकोऽधिकरणेऽसुन्। रजकरजनरजःसूपसंख्यानमिति नलोपः। सुपां सुलुगिति षष्ठ्या लुक्॥

सप्तमोऽध्यायः ॥

ऋभुर्न इंद्रः शवसा नवीयानृभुर्वाजेभिर्वसुभिर्वसुर्ददिः ।

युष्माकं देवा अवसाहनि प्रियेऽभि तिष्ठेम

पृत्सुतीरसुन्वताम् ॥ ७ ॥

ऋभुः । नः । इंद्रः । शवसा । नवीयान् । ऋभुः । वाजेभिः ।

वसुऽभिः । वसुः । ददिः ।

युष्माकं । देवाः । अवसा । अहनि । प्रिये । अभि ।

तिष्ठेम । पृत्सुतीः । असुन्वताम् ॥ ७ ॥

ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः । तत्र शवसा बलेन नवीयान् नवतरः प्रशस्ततर ऋभुर्नोऽस्माकमिंद्रः परमेश्वरः । अस्माकं रक्षक इत्यर्थः । यद्वा । इंद्र एव प्रसंगादुरु भातीति नैरुक्तव्युत्पत्त्या ऋभुरिति स्तूयते । अपि च । वाजेभिर्वाजैरस्मभ्यं दातव्यैरन्नैर्वसुभिर्निवासहेतुभिर्धनैश्च ऋभुर्वसुरस्माकं निवासयिता । अत एव ददिस्तेषामन्नानां धनानां च दाता भवतु । परोऽर्धर्चः प्रत्यक्षकृतः । हे देवा दानादिगुणयुक्ता ऋभुप्रभृतयः । युष्माकं संबंधिनावसा रक्षणेन युक्ता प्रियेऽस्माकमनुकूलेऽहनि दिवसे वर्तमाना वयमसुन्वतां सुन्वद्यजमानविरोधिनां शत्रूणां पृत्सुतीः सेना अभितिष्ठेम ॥ नवीयान् । नवशब्दादातिशायनिक ईयसुन् । वाजेभिः । बहुलं छंदसीति भिस ऐसभावः । वसुः । वस निवासे । अस्मादंतर्भावितण्यर्थात शृस्वृस्निहीत्यादिनोप्रत्ययः । निदि-

त्यनुवृत्तेराद्युदात्तत्वं। ददिः। डुदाञ् दाने। आदृगमहन इति किप्रत्ययः। लिड्वद्भावादि। आतो लोप इटि चेत्याकारलोपः॥

अष्टमीमृचमाह॥

निश्चर्मण ऋभवो गामपिंशत सं वत्सेनासृजता मातरं पुनः।
सौधन्वनासः स्वपस्यया नरो जिव्री युवाना
पितराकृणोतन॥ ८॥

निः। चर्मणः। ऋभवः। गां। अपिंशत। सं। वत्सेन।
असृजत। मातरं। पुनरिति।
सौधन्वनासः। सुऽअपस्यया। नरः। जिव्री इति। युवाना।
पितरा। अकृणोतन॥ ८॥

पुरा कस्यचिदृषेर्धेनुर्मृता। स ऋषिस्तस्या धेनोर्वत्सं दृष्ट्वा ऋभूं तुष्टाव। ऋभवस्तत्सदृशीमन्यां धेनुं कृत्वा तदीयेन चर्मणा संवीय तेन वत्सेन समयोजयन्निति। अयमर्थः पूर्वार्द्धे प्रतिपाद्यते। हे ऋभवो यूयं चर्मणश्चर्मणा त्वचा। तृतीयार्थे षष्ठी। गां धेनुं निरपिंशत। निःश्लेषेणाश्लिष्टां संयुक्तामकुरुत। तदनंतरं मातरं तां गां पुनर्वत्सेन समसृजत। संसृष्टामकुरुत। समगमयतेति यावत्। अपि च हे सौधन्वनासः सुधन्वन आंगिरसस्य पुत्राः। नरो यज्ञस्य नेतार ऋभवः स्वपस्यया शोभनकर्मेच्छया। यागदानाद्याचरणेनेति यावत्। जिव्री जीर्णौ वृद्धौ पितरा मातापितरौ युवाना पुनर्यौवनोपेता-

वक्रणोतन । यूयमक्रुढ़ं ॥ अपिंशत । पिश अवयवे । तौदादिकः । शे मुचादीनामिति नुम् । सौधन्वनासः । सुधन्वनः पुत्राः सौधन्वनाः । अन् । पा° ६. ४. १६७. । इति प्रकृतिभावः । आज्जसेरसुक् । आमंत्रितस्येत्याद्युदात्तत्वं । स्वपस्यया । शोभनमपः स्वपः । तदिच्छा स्वपस्या । सुप आत्मनः क्यच् । अ प्रत्ययादिति भावेऽकारप्रत्ययः । जिव्री । जृष् वयोहानौ । जृभृस्तृजागृभ्यः क्विन् । ऋत इद्धातोरितीत्वं । रेफ वकारयोः स्थानविपर्ययः । बहुलवचनाद्धलि चेति दीर्घाभावः । नित्त्वादाद्युदात्तत्वं । युवाना । सुपां सुलुगिति विभक्तेराकारः । पितरा । पिता च माता च पितरौ । पिता मात्रा । पा° १. २. ७०. । इति पिता शिष्यते । पूर्ववद्विभक्तेराकारः । अक्रणोतन । कृवि हिंसाकरणयोश्च । इदित्त्वान्नुम् । धिन्विकृण्व्योरच्चेत्युप्रत्ययः । तस्मिं नियोगेन वकारस्य चाकारः । अतो लोपे सति तस्य स्थानिवद्भावाल्लघूपधगुणाभावः । लङ्मध्यमबहुवचनस्य तशब्दस्य तप्तनप्तनथनाश्चेति तनबादेशः । तस्य पित्त्वेन ङित्त्वाभावाद्गुणः ॥

नवमीमृचमाह ॥

वाजेभिर्नो वाजसातावविड्ढ्यृभुमाँ इंद्र चित्रमा दर्षि राधः ।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः ॥ ९ ॥

वाजेभिः । नः । वाजऽसातौ । अविड्ढि । ऋभुऽमान् । इंद्र । चित्रं । आ । दर्षि । राधः ।

तत् । नः । मित्रः । वरुणः । मामहंतां । अदितिः । सिंधुः ।
पृथिवी । उत । द्यौः ॥ ९ ॥

हे इंद्र ऋभुमान् । ऋभुर्विभ्वा वाज इति त्रयोऽप्यृभुशब्देनोपचारादत्रोच्यंते । तैर्युक्तस्त्वं वाजसातौ वाजस्यान्नस्य संभजने निमित्तभूते सति वाजेभिरन्नैरविड्ढि । अस्मान्व्याप्नुहि । यद्वा वाजसातिरिति संग्रामनाम । वाजसातौ संग्रामे वाजेभिर्वाजेन युक्तैरश्वैरविड्ढि । अस्मान् रक्ष । अपि च । चित्रं चायनीयं राधो धनमादर्षि । अस्मभ्यं दातुमाद्रियस्व । तृतीयसवने ऋभुभिः सहेंद्रस्यावस्थानात् प्रसंगादत्रेंद्रस्तुतिः । यदेतदस्माभिः प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां । पूजयंतां ॥ वाजसातौ । वन षण संभक्तौ । भावे क्तिन् । जनसनखनां संझलोरित्यात्वं । वाजानां सातिर्यस्मिन् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अविड्ढि । विष्लृ व्याप्तौ । लोटो हिः । बहुलं छंदसीति शपो लुक् । हुझल्भ्यो हेर्धिः । ष्टुत्वजश्त्वे । छंदस्यपि दृश्यत इति दृशिग्रहणाल्लोट्यडागमः । यद्वा । अवतेर्लोटि सिब्बहुलं लेटीति बहुलवचनाद्विकरणः सिप् । तस्यार्धधातुकत्वादिट् । आदेशप्रत्यययोरिति षत्वं । धित्वादि पूर्ववत् । ऋभुमान् । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । दर्षि । दृङ् आदरे । लोटि व्यत्ययेन परस्मैपदं । बहुलं छंदसीति विकरणस्य लुक् ॥

॥ इति प्रथमस्य सप्तम एकत्रिंशो वर्गः ॥

तत्त्वेति पंचर्चं षष्टं सूक्तं कुत्सस्यार्षमार्भवं । पंचमी त्रिष्टुप् । शिष्टाश्चतस्रो जगत्यः । तथा चानुक्रांतं । तत्त्वन्

पंचात्या त्रिष्टुप्। अग्निष्टोमे वैश्वदेवशस्त्र इदं सूक्तमार्भवं निविद्धानं। सूत्रितं च। तक्षन्रथमयं वेनश्चोदयत्पृश्निगर्भा। आ० ५. १८.। इति॥

तत्र प्रथमामृचमाह॥

तक्षन्रथं सुवृतं विद्मनापसस्तक्षन्हरी इंद्रवाहा वृषण्वसू।
तक्षन्पितृभ्यामृभवो युवद्वयस्तक्षन्वत्साय मातरं
सचाभुवं॥ १॥

तक्षन्। रथं। सुऽवृतं। विद्मनाऽअपसः। तक्षन्।
हरी इति। इंद्रऽवाहा। वृषण्वसू इति वृषण्ऽवसू।
तक्षन्। पितृऽभ्यां। ऋभवः। युवत्। वयः। तक्षन्।
वत्साय। मातरं। सचाऽभुवं॥ १॥

विद्मनापस उत्कृष्टेन ज्ञानेन निष्पाद्यकर्माणो लाभवत्कर्माणो वा ऋभवो रथमश्विनोरारोहणार्थं सुवृतं शोभनवर्तनं सुचक्रं च तक्षन्। अकुर्वन्। तथेंद्रवाहा इंद्रस्य वाहनभूतौ हरी हरणशीलावेतत्संज्ञकावश्वौ तक्षन्। कृतवंतः। कीदृशौ। वृषण्वसू। सेचनसमर्थेन दृढतरेण धनेन बलेन वा युक्तौ। अपि च। पितृभ्यां स्वकीयाभ्यां मातापितृभ्यां वृद्धाभ्यां युवद्यौवनोपेतं वय आयुरृभवस्तक्षन्। कृतवंतः। तथा वत्साय मातरं गां सचाभुवं सहभुवं सह वर्तमानां तक्षन्। अकुर्वन्॥ तक्षन्। तक्ष त्वक्षू तनकरणे। लङि बहुलं

छंदसमाङ्योगेऽपीत्यडभावः। सुवृतं। शोभनं वर्तत इति सुवृत्। वृतु वर्तने। क्विप् चेति क्विप्। विद्मनापसः। विद ज्ञाने। अन्येभ्योपि दृश्यंत इति दृशिग्रहणाद्भावे मनिन्। संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावः। बहुलवचनादलुक्। यद्वा। विद्लृ लाभे। औणादिको भावे मक्। ततः पामादि-लक्षणो नप्रत्ययः। विद्मनं लाभवदपः कर्म येषां। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। छांदसः पूर्वसवर्णदीर्घः। इंद्रवाहा। इंद्रं वहत इतींद्रवाहौ। वहश्चेति ण्विप्रत्ययः। अत उपधाया इति वृद्धिः। सुपां सुलुगिति विभक्तेराकारः। वृषण्वसू। वृष सेचने। कनिन्युवृषितक्षीत्यादिना कनिन्। नित्त्वादाद्यु-दात्तत्वं। वृषण्वस्वश्वयोरुपसंख्यानं। पा० १. ४. १८. ६.। इति वसुशब्द उत्तरपदे वृषण्भावः। बहुव्रीहौ पूर्वपदप्रकृति-स्वरत्वं। युवत्। अत्र युवत्शब्दः। सामर्थ्यात्पूर्ववत्प्रवृत्ति-निमित्तं युवत्वमात्रमाचष्टे। तदस्मिन्नस्तीति युवत्। छांदसो वर्णलोपः॥

द्वितीयामृचमाह॥

आ नो॑ य॒ज्ञाय॑ तक्षत ऋभु॒मद्वयः॒ क्रत्वे॒ दक्षा॑य सु॒प्रजा॑वती॒मिषं॑।
यथा॒ क्षया॑म॒ सर्व॑वीरया वि॒शा तन्नः॒ शर्धा॑य धासथा॒ स्विं॑द्रि॒यं॥ २॥

आ। नः॒। य॒ज्ञाय॑। त॒क्ष॒त॒। ऋ॒भु॒ऽमत्। वयः॑। क्रत्वे॑। दक्षा॑य। सु॒ऽप्र॒जाव॑तीं। इषं॑।

क्षयो॑ । च॒यामं । सर्वऽवीरया । वि॒शा । तत् । नः ।
श॒र्धाय । धा॒सथ॒ । सु । इ॒न्द्रियं ॥ २ ॥

हे ऋभवः । नोऽस्माकं यज्ञाय यज्ञार्थं ऋभुमदुरुभासनयुक्तं वयो हविर्लक्षणमन्नमातक्षत । आ समंतादुत्पादयत । एतदेव विनियते । क्रत्वे क्रतवेऽस्मदीयाय कर्मणे दक्षाय बलाय च । तादर्थ्ये चतुर्थी । एतदुभयार्थं सुप्रजावतीं शोभनाभिः पुत्रपौत्रादिलक्षणाभिः प्रजाभिर्युक्तामिषमन्नमातक्षतेति शेषः । अपि च । सर्ववीरया सर्ववीरैः पुत्रादिभिरुपेतया विशा प्रजया सह यथा येन प्रकारेण क्षयाम । सुखेन निवसाम । तत्तादृशमिंद्रियं । धननामैतत् । धनं नोऽस्मभ्यं शर्धाय बलार्थं सु धासथ । सुष्ठु धत्त । प्रयच्छतेत्यर्थः ॥ ऋभुमत् । उरु भातीति नैरुक्तव्युत्पत्त्या ऋभुशब्दः प्रकाशमात्रवाची । ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं । क्रत्वे । जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । क्षयाम । क्षि निवासगत्योः । व्यत्ययेन शप् । धासथ । धाञो लेट्यडागमः । सिब्बहुलं लेटेति सिप् । अन्येषामपि दृश्यत इति संहितायां दीर्घत्वं ॥

तृतीयामृचमाह ॥

आ त॑क्षत सा॒तिम॒स्मभ्य॑मृभवः सा॒तिं रथा॑य सा॒तिमर्व॑ते नरः ।
सा॒तिं नो॒ जैत्रीं॒ सं म॑हेत वि॒श्वहा॑ जा॒मिमजा॑मिं॒ पृत॑नासु
स॒क्षणि॑ं ॥ ३ ॥

आ । तक्षत । सातिं । अस्मभ्यं । ऋभवः । सातिं । रथाय ।
सातिं । अर्वते । नरः ।
सातिं । नः । जैत्रीं । सं । महेत । विश्वहा । जामिं ।
अजामिं । पृतनासु । सक्षणिं ॥ ३ ॥

हे नरो यज्ञस्य नेतार ऋभवः । अस्मभ्यमनुष्ठातृभ्यः सातिं संभजनीयमन्नं धनं वातक्षत । आ समंतात्कुरुत । तथास्मदीयाय रथाय रंहणशीलाय पुत्रादये रथायैव वा सातिं संभजनीयं धनमातक्षत । तथार्वतेऽश्वाय सातिं संभजनीयमन्नं धनं वाश्वयोग्यमातक्षतेत्येव । किंच । विश्वहा सर्वेष्वहःसु नोऽस्माकं जैत्रीं जयशीलामपरिमितत्वेन सर्वाधिकां सातिं संभजनीयं धनं संमहेत । सर्वो जनः सम्यक् पूजयतु । वयं च पृतनासु संग्रामेषु जामिं सहजातमजामिं सहानुत्पन्नं शत्रुं वा सक्षणिमस्मानभिभवंतं युष्मत्प्रसादादभिभवेमेति शेषः ॥ सातिं । ऊतियूतिसातीत्यादिना क्तिन उदात्तत्वं । महेत । मह पूजायां । सक्षणिं । षह अभिभवे । औणादिकः सनिप्रत्ययः । ढत्वकत्वषत्वानि ॥

चतुर्थीमृचमाह ॥

ऋभुक्षणमिंद्रमा हुंव ऊतयं ऋभून्वाजांन्मरुतः सोमपीतये ।
उभा मित्रावरुणा नूनमश्विना ते नो हिन्वंतु सातये धिये जिषे ॥ ४ ॥

ऋभुक्षणं । इंद्रं । आ । हुवे । ऊतये । ऋभून् । वाजान् ।
मरुतः । सोमंऽपीतये ।
उभा । मित्रावरुणा । नूनं । अश्विना । ते । नः । हिन्वंतु ।
सातये । धिये । जिषे ॥ ४ ॥

ऋभुक्षणं । महन्नामैतत् । महांतमिंद्रमा हुवे । आह्वयामि । किमर्थं । ऊतये । रक्षणार्थं । तथा ऋभून्वाजान् । ऋभुर्विभ्वा वाज इति त्रयः सुधन्वनः पुत्राः । तत्र प्रथमोत्तमवाचकशब्दाभ्यां मध्यमोऽपि लक्ष्यते । अतः शब्दद्वयेन त्रयोऽप्युच्यंते । तदुक्तं यास्केन । प्रथमोत्तमाभ्यां बहुवन्निगमा भवंति न मध्यमेन । नि॰ ११. १६. । इति । एवंविधानृभून्मरुतश्च सोमपीतये सोमपानायाह्वयामि । तथोभा युगलरूपेण संहत्य वर्तमानौ द्वौ मित्रावरुणावश्विनौ च नूनमवश्यं सोमपानायाह्वयामीति शेषः । अपि च । आहूतास्येंद्रादयो नोऽस्मान् हिन्वंतु । प्रेरयंतु गमयंत्वित्यर्थः । किमर्थं । सातये । संभजनीयाय धनाय । धिये । धनसाध्याय कर्मणे । जिषे । जेतुं शत्रूणां जयार्थं च ॥ ऋभुक्षणं । उरुभासमाने स्थाने क्षियति निवसतीत्यृभुक्षाः । उरुपूर्वाद्भातेर्मृगय्वादयश्चेति कुप्रत्ययः । आतो लोप इटि चेत्याकारलोपः पूर्वपदस्य ऋभावश्च । ऋभुशब्दोपपदात्क्षि निवासगत्योरित्यस्मात्क्षतेश्च चेति विधीयमान इनिप्रत्ययो बहुलवचनाद्भवति । टिलोपः । इतोऽत्सर्वनामस्थान इत्यत्वमिकारस्य । वा षपूर्वस्य निगम इति विकल्पनादुपधादीर्घाभावः । यद्वा अर्तेर्भुक्षिन् का।

कित्त्वाद्गुणाभावः ॥ अत एव नावग्रह्यते । पीतये । पा पाने । स्थागापापचो भाव इति भावे क्तिन् । घुमास्थेतीत्वं । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । हिन्वं तु । हि गतौ वृद्धौ च । अस्मादंतर्भावितण्यर्थाल्लोटि स्वादित्वात् श्नुः । जिषे । जि जये । तुमर्थे सेसेनिति क्सेप्रत्ययः ॥

पंचमीमृचमाह ॥

ऋभुर्भरा॑य सं शि॑शातु सा॒तिं स॑मर्य॒जिद्वाजो॑ अ॒स्माँ अ॑विष्टु ।
तन्नो॑ मि॒त्रो वरु॑णो मामहंता॒मदि॑तिः॒ सिंधुः॑ पृथि॒वी उ॒त द्यौः ॥ ५ ॥

ऋ॒भुः । भरा॑य । सं । शि॒शा॒तु॒ । सा॒तिं । स॒म॒र्य॒ऽजित् । वाजः॑ । अ॒स्मान् । अ॒वि॒ष्टु॒ ।
तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒हं॒ता॒ । अदि॑तिः । सिंधुः॑ । पृ॒थि॒वी । उ॒त । द्यौः ॥ ५ ॥

ऋभुः प्रथमोऽस्माकं सातिं संभजनीयं धनं भराय संग्रामार्थं संशिशातु । सम्यक् तीक्ष्णीकरोतु । संग्रामोचितं धनमस्मभ्यं प्रयच्छत्वित्यर्थः । तथा समर्यजित् । मर्या मनुष्याः । तैः सह वर्तत इति समर्यः संग्रामः । तत्र शत्रूणां जेता वाज एतत्संज्ञस्तृतीयश्चास्मान् स्तोतृनविष्टु । अवतु । संग्रामाद्रक्षत्वित्यर्थः । यदनेन सूक्तेन प्रार्थितमस्मदीयं तन्मित्रादयो मामहंतां । पूजयंतु ॥ शिशातु । शो तनूकरणे । बहुलं छंदसीति विकरणस्य श्लुः । आदेच इत्यात्वं । द्विर्भावः ।

ऋस्वत्वं बहुलं छंदसीत्यभ्यासस्येत्वं । अविष्टु । अवतेर्लोटि सिब्बहुलं लेटीति बहुलग्रहणात्सिप् । इडागमः । षत्वष्टुत्वे ॥

॥ इति प्रथमस्य सप्तमे द्वात्रिंशो वर्गः ॥

ईळे इति पंचविंशत्यृचं सप्तमं सूक्तं । आंगिरसस्य कुत्सस्यार्षं । चतुर्विंशीपंचविंश्यौ त्रिष्टुभौ शिष्टास्त्रयोविंशतिर्जगत्यः । आद्यः पादो द्यावापृथिव्यः । द्वितीय आग्नेयः । शिष्टं सूक्तमाश्विनं । तथा चानुक्रांतं । ईळे पंचाधिकाश्विनमाद्यौ पादौ लिंगोक्तदेवतावंत्ये त्रिष्टुभाविति ॥ प्रवर्ग्येऽभिष्टवेऽप्येतत्सूक्तं । सूत्रितं च । ग्रावाणेवेळे द्यावापृथिवी इति । आ० ४. ६. । इति ॥ प्रातरनुवाके चाश्विने क्रतौ जागते छंदस्येतत्सूक्तं । सूत्रितं च । अगन्म महानाविसेळे द्यावापृथिवी इति जागतं । आ० ४. १५. । इति ॥ आश्विनशस्त्रेऽप्येतत् प्रातरनुवाकन्यायेनातिदेशात् ॥ तथाप्तोर्यामे संति चत्वार्यतिरिक्तोक्थानि । तत्राच्छावाकातिरिक्तोक्थ एतत्सूक्तं यस्य पशव इति खंडे सूत्रितं । ईळे द्यावापृथिवी उभा उ नूनं । आ० ९. ११. । इति ॥

तत्र प्रथमामृचमाह ॥

ईळे द्यावापृथिवी पूर्वचित्तयेऽग्निं घर्मं सुरुचं यामन्निष्टये ।
याभिर्भरे कारमंशाय जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥ १ ॥

ईळे । द्यावापृथिवी इति । पूर्वऽचित्तये । अग्निं । घर्मं । सुऽरुचं । यामन् । इष्टये ।

याभिः । भरे । कारं । अंशाय । जिन्वथः । ताभिः । ऊं इति ।
सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १ ॥

अहं द्यावापृथिवी द्यावापृथिव्यावीड़े । स्तौमि । किमर्थं । पूर्वचित्तये । पूर्वमेवाश्विनोः प्रज्ञापनाय । ते ह्यश्विनौ प्रत्यासन्ने। यद्वा द्यावापृथिवी अश्विनौ स्तौमि पूर्वचित्तये। अन्यदीयात्स्तोत्रात्पूर्वमेवास्मदीयस्य स्तोत्रस्य प्रबोधनाय। तथा चोक्तं । तत्कावश्विनौ द्यावापृथिव्यावित्येक इति। अपि च। यामन् यामन्यश्विनोरागमने सतीष्टये तदीययागार्थमाहवनीयरूपेण स्थापितमग्निं स्तौमीति शेषः। कीदृशमग्निं। घर्मं। प्रवृंजनेन दीप्तं । सुरुचं। अत एव शोभनकांतियुक्तं । हे अश्विनौ भरे। संग्रामनामैतत् संग्रामेऽंशाय युष्मदीयभागाय जयप्राप्त्यर्थं याभिरूतिभिः पालनैः सहागत्य कारं। कारशब्दः शंखवाची। तेन ह्यभियुक्ताः संगिरंते। कारं शब्दकारिणं शंखं जिन्वथः। सुखेनापूरयथः। ताभिस्तादृशीरूतिभिः पालनैः सह। उ इति समुच्चये। अस्मानपि सुष्ठागतं। आगच्छतं॥ ईड़े। ईड स्तुतौ। उत्तमैकवचनमिट्। अदादित्वाच्छपो लुक्। अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः। द्यावापृथिवी। द्यौश्च पृथिवी च। दिवो द्यावेति द्यावादेश आद्युदात्तो निपातितः। पृथिवीशब्दो ङीषंतोऽंतोदात्तः। देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं। अपृथिवीति पर्युदासान्नोत्तरपदेऽनुदात्तादाविति निषेधाभावः। वा छंदसीति पूर्वसवर्णदीर्घत्वं। पूर्वचित्तये। चिती संज्ञाने। अस्मादंतर्भावितण्यर्थाद्भावे क्तिन्। मरुद्वृधादित्वात्पूर्वपदांतो-

दात्तत्वं । सुरुचं । रुच दीप्तावभिप्रीत्यां च । संपदादिलचणो भावे क्विप् । शोभना रुक् यस्य । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । यामन् । या प्रापणे । आतो मनिन्निति कृत्यल्युटो बहुलमिति बहुलवचनाद्भावे मनिन् । कारं । क्रियतेऽनेनेति कारः । करणे घञ् । कर्षात्वत इत्यंतोदात्तत्वं । जिन्वथः । जिवि प्रीणनार्थः । अत्र प्रीणनहेतुभूतमापूरणं लक्ष्यते । धनेनापूरितो हि पुरुषः प्रीतो भवति । इदित्वान्नुम् । भौवादिकः । शपः पित्त्वादनुदात्तत्वं । तिङोऽदुपदेशाल्लसार्वधातुकस्वरेण धातुस्वरः शिष्यते । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । तत्र हि व्यवहितेऽपि कार्यमिष्यत इत्युक्तं । ऊ षु । इकः सुञीति दीर्घत्वं । सुञ इति षत्वं । ईषा अचादित्वात्तत्र उकारस्य प्रकृतिभावः । ऊतिभिः । अवतेर्भावे क्तिन् । ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट् । ऊतियूतीत्यादिना निपातनात् क्तिन उदात्तत्वं । गतं । गमेर्लोटि बहुलं छंदसीति विकरणस्य लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

द्वितीयामृचमाह ॥

युवोर्दानाय सुभरा असश्चतो रथमा तस्थुर्वचसं न मंतवे ।

याभिर्धियोऽवथः कर्मन्निष्टये ताभिरू षु ऊतिभिरश्विना

गतं ॥ २ ॥

युवोः । दानाय । सुऽभराः । असश्चतः । रथं । आ ।

तस्थुः । वचसं । न । मंतवे ।

याभिः। धियः। अवथः। कर्मन्। इष्टये। ताभिः। ऊं

इति। सु। ऊतिऽभिः। अश्विना। आ। गतं॥ २॥

सुभराः शोभनस्तोत्रभरणा अतस्ततोऽन्यत्रानासक्ताः स्तोतारो हे अश्विनौ युवोर्युवयो रथमातस्थुः। आतिष्ठंति। प्राप्नुवंति। किमर्थं। दानाय। युष्मत्कर्तृकदानार्थं। धनलाभायेत्यर्थः। तत्र दृष्टांतः। वचसं न। यथा न्यायोपेतेन वचसा वाक्येन युक्तं विपश्चितं मंतवै बुभुत्सितार्थप्रतिपत्तये स्तोतारः प्राप्नुवंति तद्वत्। अपि च। कर्मन् कर्मणीष्टये यागार्थं प्रवृत्तान्धियो ध्यातॄन्विप्रविशिष्टज्ञानोपेतान्याभिरूतिभिः पालनैरवथः। युवां रक्षथः। ताभिरित्यादि पूर्ववत्॥ वचसं। अर्शआदित्वान्मत्वर्थीयोऽच्। मंतवै। मन ज्ञाने। कमिमनिजनीत्यादिना तुप्रत्ययः। धियः। ध्यायंतीति धियः स्तोतारः। ध्यै चिंतायां। क्विप् चेति क्विप्। चशब्देन दृशिग्रहणानुकर्षणात्संप्रसारणं। कर्मन्। सुपां सुलुगिति सप्तम्या लुक्। न ङिसंबुद्ध्योरिति नलोपप्रतिषेधः॥

तृतीयामृचमाह॥

युवं तासां दिव्यस्य प्रशासने विशां क्षयथो अमृतस्य मज्मना।

याभिर्धेनुमस्वं१ पिन्वथो नरा ताभिरू षु ऊतिभिरश्विना गतं॥ ३॥

युवं । तासां । दिव्यस्यं । प्रऽशासंने । विशां । क्षयथः ।

अमृतंस्य । मज्मनां ।

याभिः । धेनुं । अस्वं । पिन्वंथः । नरा । ताभिः । ऊं इति ।

सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ३ ॥

हे नरा नेतारावश्विनौ दिव्यस्य दिवि भवस्य स्वर्गसमुत्पन्नस्यामृतस्य सोमस्य पानेनोत्पन्नेन मज्मना बलेन युक्तौ युवां तासां यास्त्रिषु लोकेषु वर्तंते तासां सर्वासां विशां प्रजानां प्रशासने प्रकृष्टानुशासने निमित्ते क्षयथः । ऐश्वर्यकर्मायं । ईशाथे । समर्थौ भवथः । यद्वा मज्मनान्येषामसाधारणेन बलेन विशां प्रजानां दिविभवस्यामृतस्य वृष्ट्युदकस्य प्रशासने प्रदानेन क्षयथः । ईश्वरौ भवथः । अपि च । याभिरूतिभी रक्षाभिरस्वं प्रसवासमर्थां धेनुं गां शयुनाम्ने ऋषये पिन्वथः । सिंचथः । पयसा पूरितवंतावित्यर्थः । ताभिरूतिभिरित्यादि पूर्ववत् ॥ अस्वं । षूङ् प्राणिगर्भविमोचने । सवनं सूः । संपदादिलक्षणो भावे क्विप् । नास्ति सूर्यस्यामित्यसूः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अमि ओः सुपीति यणादेशः । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । पिन्वथः । पिवि सेचने । इदित्त्वान्नुम् । भौवादिकः ॥

चतुर्थीमृचमाह ॥

याभिः परिज्मा तनयस्य मज्मना द्विमाता तूर्षु

तरणिर्विभूषति ।

याभिस्त्रिमंतुरभवद्विचक्षणस्ताभिरू षु ऊतिभिरश्विना

गतं ॥ ४ ॥

याभिः। परिऽज्मा। तनयस्य। मज्मना। द्विऽमाता।

तूर्षु। तरणिः। विऽभूषति।

याभिः। त्रिऽमंतुः। अभवत्। विऽचक्षणः। ताभिः। ऊं

इति। सु। ऊतिऽभिः। अश्विना। आ। गतं ॥४॥

परिज्मा परितो गंता वायुस्तनयस्यात्मीयस्य पुत्रस्याग्नेः। अग्निर्हि व्यानवृत्त्यात्मना वर्तमानेन वायुना मथ्यमानः सन् जायते। तथा च श्रूयते। अथ यः प्राणापानयोः संधिः स व्यानः। अतो यान्यन्यानि वीर्यवंति कर्माणि यथाग्नेर्मंथन-माजेः सरणं दृढस्य धनुष आयमनमप्राणन्ननपानंस्तानि करोतीति। यद्वा सृष्ट्यादौ वायुसकाशादुत्पन्नत्वादग्नेः पुत्रत्वं। आम्नायते च। वायोरग्निरिति। एवं स्वपुत्रस्याग्नेर्मज्मना बलेन युक्तः सन् द्विमाता द्वयोर्लोकयोर्निर्माता। अग्निः पृथिवीस्थानो वायुरंतरिक्षस्थानः। उभयोर्मिलितयोरुभय-निर्मातृत्वमुपपन्नं। यद्वा द्विमातेति तनयस्य विशेषणं। सुपां सुलुगिति षष्ठ्याः सुः। द्विमातृकस्य द्वाभ्यामरणिभ्यां जातस्य। एवंभूतो वायुर्हे अश्विनावूतिभिर्हेतुभूतैः पालनैस्तूर्षु तरीतृषु धावत्सु मध्ये तरणिरतिशयेन तरीता शीघ्रगामी विभूषति। व्याप्तो भवति। यद्वा विशेषेण सर्वमलंकरोति। अपि च। त्रिमंतुस्त्रयाणां मंता त्रिविधेषु पाकयज्ञहविर्यज्ञसोमयज्ञेष्वा-सादितज्ञानः कक्षीवान् याभिर्युष्मदीयाभिरूतिभिर्विचक्षणो

विशिष्टज्ञानयुक्तोऽभवत् । ताभिः सर्वाभिरूतिभिरस्मानागच्छतं ॥ परिज्मा । परिपूर्वादज गतिक्षेपणयोरित्यस्मात् श्वन्नुक्षन्नित्यादौ निपात्यते । तूर्षु । तृ प्लवनतरणयोः । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । यद्वा तरतेः क्विप् । ज्वरत्वरेत्यादिना वकारोपधयोरूट् । साविकाच इति विभक्तेरुदात्तत्वं । विभूषति । भवतेर्लेट्यडागमः । सिब्बहुलं लेटीति सिप् । यद्वा भूष अलंकारे । भौवादिकः । विचक्षणः । अनुदात्तेतश्च हलादेरिति युच् ॥

पंचमीमृचमाह ॥

याभी रेभं निवृ॑तं सि॒तम॒द्भ्य उद्वंद॑न॒मैर॑यतं॒ स्व॑र्दृ॒शे ।
याभि॒: कण्वं॒ प्र सिषा॑संत॒माव॑तं॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना ग॑तं ॥ ५ ॥

याभिः॑ । रे॒भं । नि॒ऽवृ॑तं । सि॒तं । अ॒त्ऽभ्यः । उत् । वंद॑नं । ऐर॑यतं । स्वः॑ । दृ॒शे ।
याभिः॑ । कण्वं॑ । प्र । सिसा॑संतं । आव॑तं । ताभिः॑ । ऊं॒ इ॒ति॑ । सु । ऊ॒तिऽभिः॑ । अ॒श्विना । आ । गतं ॥ ५ ॥

हे अश्विनौ याभिरूतिभी रेभमेतत्संज्ञमृषिं निवृतमसुरैः कूपेऽप्सु निवारितं सितं तदीयैः पाशैर्बद्धमेवंभूतमृषिमद्भ्यः सकाशादुदैरयतं । उदागमयतं । तथा वंदनमेतत्संज्ञमृषिं च तथाभूतमुदैरयतं । किमर्थं । स्वरादित्यं दृशे द्रष्टुं । अपि च कण्वमसुरैरंधकारे प्रक्षिप्तं सिषासंतमालोकं संभक्तुमिच्छंतं

याभिरूतिभिः प्रावतं प्रकर्षेण रचतं ताभिरित्यादि समानं ॥ रेभं । रेभृ शब्दे । रेभते स्तौतीति रेभः । पचाद्यच् । निवृतं । वृञ् वरणे । अस्मादंतर्भावितण्यर्थात्कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सितं । षिञ् बंधने । अश्वः । ऊडिदमित्यादिना विभक्तेरुदात्तत्वं । वंदनं । वदि अभिवादनस्तुत्योः । वंदते स्तौतीति वंदनः । नंद्यादिलक्षणो ल्युः । लित्स्वरेण प्रत्ययात्पूर्वस्योदात्तत्वं । स्वरितेतद्दिवसादित्यस्य च साधारणनामधेयं । तदुक्तं यास्केन । स्वरादित्यो भवति सु अरणः सु ईरणः । नि० २. १४. । इति । स्वरादि निपातमव्ययं । पा० १. १. ३७. । इत्यव्ययत्वात्सुपो लुक् । दृशे । दृशे विख्ये चेति दृशेस्तुमर्थे केप्रत्ययांतो निपात्यते । सिषासंतं । वन षण संभक्तौ । सनि सनीवंतर्धेत्यादिना विकल्पनादिङभावः । जनसनखनां सञ्झलोरित्यात्वं । द्विर्भावेऽभ्यासस्य इत्वं । सन्यत इतीत्वं ॥

॥ इति प्रथमस्य सप्तमे त्रयस्त्रिंशो वर्गः ॥

षष्ठीमृचमाह ॥

याभिरंतकं जसमानमारणे भुज्युं याभिरव्यथिभिर्जिजिन्वथुः ।
याभिः कर्कंधुं वय्यं च जिन्वथस्ताभिरू षु ऊतिभिरश्विना गतं ॥ ६ ॥

याभिः । अंतकं । जसमानं । आऽअरणे । भुज्युं । याभिः । अव्यथिऽभिः । जिजिन्वथुः ।

याभिः । कर्कंधुं । वय्यं । च । जिन्वंथः । ताभिः । ऊं इति ।

सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ६ ॥

आरणमगाधं तडागादि कूपादि वा । तत्रासुरैः प्रचिप्तं जसमानं तैर्हिंस्यमानमंतकं अत्र.णामंतकरमेतत्संज्ञं राजर्षिं हे अश्विनौ याभिरूतिभिररवथः । रचथः । तथा भुज्युं सर्वस्य पालकमेतत्संज्ञं समुद्रमध्ये निमग्नं तुग्रस्य पुत्रं राजर्षिं याभिरूतिभी रचणहेतुभूताभिरव्यथिभिर्व्यथारहिताभिर्नौभिर्जिजिन्वथुः । युवामतर्पयतं । एतच्च मंत्रांतरे तुग्रो ह भुज्युमश्विनोदमेघ इत्यादिके विस्पष्टयिष्यते । अपि च । कर्कंधुं वय्यं चैतत्संज्ञकौ चासुरौ पीड्यमानौ याभिरूतिभिर्जिन्वथः । प्रीणयथः । गतमन्यत् ॥ जसमानं । जसु हिंसायां । यकि प्राप्ते व्यत्ययेन शप् । आरणे । आङ्पूर्वादर्तेर्ल्युट् । जिजिन्वथुः । जिवि प्रीणनार्थः । लिट्युषि रूपं ॥

सप्तमीमृचमाह ॥

याभिः शुचंतिं धनसां सुषंसदं तप्तं घर्ममोम्यावंतमत्रये ।

याभिःॱपृश्निगुं पुरुकुत्समावंतं ताभिरू षु ऊतिभिरश्विना गंतं ॥ ७ ॥

याभिः । शुचंतिं । धनऽसां । सुऽसंसदं । तप्तं । घर्मं । ओम्याऽवंतं । अत्रये ।

याभिः । पृश्निऽगुं । पुरुऽकुत्सं । आवंतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ७ ॥

हे अश्विनौ धनसां धनस्य संभक्तारं शुचंतिमेतन्नामानं सुषंसदं। सीदंत्यस्मिन्निति संसत् गृहं। शोभनसंसदं याभिरूतिभिरकुरुतं। तथात्रये याभिरूतिभिस्तप्तं प्रवृंजनेन संतप्तं घर्मं महावीरमोम्यावंतं सुखयुक्तं सुखेन स्प्रष्टुं शक्यमकुरुतं। यद्वा शतद्वारे यंत्रगृहेऽसुरैः पीड्यमानाय घर्मं दीप्तं पीडासाधनमग्निं तप्तं तापकारिणमोम्यावंतं सुखवंतमकुरुतं। यथास्मै सुखं भवति तथा हिमेनोदकेन तमग्निमवारयेथां। यास्कपक्षे त्वत्रये हविषामत्त्रेऽग्नये हविरत्यत्त्यर्थं सूर्यंकिरणसंतप्तं घर्मं नैदाघमहरोम्यावंतं वृष्टिहेतुभूतेनोदकोपेतं कृतवंताविति योज्यं। अपि च याभिरूतिभिः पृश्निगुं पुरुकुत्सं चावतं। अरचतं। ताभिः सर्वाभिरूतिभिरस्मानागच्छतं॥ शुचंतिं। शुच दीप्तौ। औणादिको ऽच्छच्। धनसां। जनसनखनक्रमगमो विट्। विड्वनोरनुनासिकस्यादित्यात्वं। सुषंसदं। शोभना संसद्यस्य। नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं। ओम्यावंतं। अवतेरन्येभ्योऽपि दृश्यंत इति मनिन्। ज्वरत्वरेत्यादिना वकारस्योपधायाश्च ऊट्। गुणः। छंदसि चेत्यर्हार्थे यप्रत्ययः। नस्तद्धित इति टिलोपः। ये चाभावकर्मणोरिति प्रकृतिभावस्तु व्यत्ययेन न प्रवर्तते। पृश्निगुं। पृश्नयो नानावर्णा गावो यस्य स तथोक्तः। गोस्त्रियोरुपसर्जनस्येति गोशब्दस्य ह्रस्वत्वं॥

अष्टमीमृचमाह॥

याभिः शचीभिर्वृषणा परावृजं प्रांधं श्रोणं चक्षस

एतवे कृथः।

याभिर्वर्तिकां ग्रसिताममुंचतं ताभिरू षु ऊतिभिरश्विना

गतं ॥ ८ ॥

याभिः । शचीभिः । वृषणा । पराऽवृजं । प्र । अंधं ।

श्रोणं । चक्षसे । एतवे । कृथः ।

याभिः । वर्तिकां । ग्रसितां । अमुंचतं । ताभिः । ऊं

इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥८॥

हे वृषणा कामानां वर्षितारावश्विनौ याभिः शचीभिः कर्मभिः प्रज्ञाभिर्वा परावृजमेतन्नामकमृषिं पंगुं संतमपंगुमकुरुतं । तथांधं दृष्टिरहितं संतमृज्राश्वमृषिं चक्षसे प्रकाशाय सम्यक् चक्षुषा दर्शनाय याभिरूतिभिः प्रकृथः । प्रकर्षेण कुरुथः । याभिश्च श्रोणं विगुणजानुकमेव संतमृषिमेतवे गंतुं प्रकृथः । प्रकर्षेण कृतवंतौ । अपि च । याभिरूतिभिर्वर्तिकां चटकसदृशस्य पक्षिणः स्त्रियं ग्रसितां वृकेण ग्रस्ताममुंचतं । वृकास्यान्निर्मुक्तामकुरुतं । यास्कपक्षे तु वृकेण विवृतज्योतिष्केण सूर्येणाग्रस्तां वर्तिकां प्रत्यहमावर्तमानामुषसं तस्मादमोचयतमिति योज्यं । ताभिः सर्वाभिरूतिभिरस्मानप्यागच्छतं ॥

वृषणा । वृष सेचने । कनिन्युवृषीत्यादिना कनिन् । परावृजं । वृजी वर्जने । परावृणक्ति तपसा पापं विनाशयतीति परावृक् । क्विप् चेति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । एतवे । तुमर्थे सेसेनित्येतिस्तवेग्प्रत्ययः । कृथः । डुकृञ् करणे । बहुलं छंदसीति विकरणस्य लुक् ॥

नवमीमृचमाह ॥

याभिः सिंधुं मधुमंतमसश्चतं वसिष्ठं याभिरजरावजिन्वतं ।
याभिः कुत्सं श्रुतर्यं नर्यमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ ९ ॥

याभिः । सिंधुं । मधुऽमंतं । असश्चतं । वसिष्ठं । याभिः । अजरौ । अजिन्वतं ।
याभिः । कुत्सं । श्रुतर्यं । नर्यं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ९ ॥

हे अश्विनौ सिंधुं स्यंदनशीलां नदीं मधुमंतं मधुरस्वादेनोदकेन पूर्णां याभिरूतिभिरसश्चतं । अगमयतं । प्रावाहयतमित्यर्थः । हे अजरौ जरारहितावश्विनौ वसिष्ठमृषिं याभिरूतिभिरजिन्वतं । अप्रीणयतं । याभिश्च कुत्सादींस्त्रीनृषीनावतं । अरक्षतं । ताभिः सर्वाभिरूतिभिरस्मानपि सुष्ठ्वागच्छतं ॥ मधुमंतं । मधुशब्दाद्भूम्नि मतुप् । लिंगव्यत्ययः । असश्चतं । सश्चतिर्गतिकर्मा । अस्मादंतर्भावितण्यर्थाल्लुङ् ॥

दशमीमृचमाह ॥

याभिर्विश्पलां धनसामथर्व्यं सहस्रमीळ्ह आजावजिन्वतं ।
याभिर्वशमश्व्यं प्रेणिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १० ॥

याभिः । विश्पलाम् । धनऽसाम् । अथर्व्यम् । सहस्रऽमीळ्हे । आजौ । अजिन्वतम् ।

याभिः । वशम् । अश्व्यम् । प्रेणिम् । आवतम् । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतम् ॥१०॥

हे अश्विनौ धनसां धनं संभजमानामथर्व्यमगच्छंतीं छिन्नजंघात्वेन गंतुमसमर्थां। अर्थतिर्गतिकर्मा। विश्पलामेतत्संज्ञामगस्त्यपुरोहितस्य खेलस्य संबंधिनीं सहस्रमीळ्हे। मीळ्हमिति धननाम। बहुधनोपेत आजौ संग्रामे याभिरूतिभिरजिन्वतं। गंतुं समर्थामकुरुतं। एतच्च चरित्रं हि वेरिवाच्छेदि पर्णमित्यत्र विस्पष्टयिष्यते। याभिस्त्वाश्व्यमश्वाख्यस्य पुत्रं प्रेणिं स्तुतेः प्रेरयितारं वशमेतत्संज्ञमृषिमावतं। अरक्षतं। ताभिः सर्वाभिरूतिभिः सहास्मानप्यागच्छतं॥ प्रेणिं। प्रेषृ गतिप्रेरणश्लेषणेषु। औणादिक इप्रत्ययः॥

॥ इति प्रथमस्य सप्तमे चतुस्त्रिंशो वर्गः ॥

एकादशीमृचमाह ॥

याभिः सुदानू औशिजाय वणिजे दीर्घश्रवसे मधु कोशो अक्षरत् ।

कक्षीवंतं स्तोतारं याभिरावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ ११ ॥

याभिः । सुदानू इति सुऽदानू । औशिजाय । वणिजे ।

दीर्घऽश्रवसे । मधु । कोशः । अक्षरत् । ।

कक्षीवंतं । स्तोतारं । याभिः । आवतं । ताभिः । ऊं

इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ ११ ॥

उशिक्संज्ञा दीर्घतमसः पत्नी । तस्याः पुत्रो दीर्घश्रवा नाम कश्चिदृषिरनावृष्ट्यां जीवनार्थमकरोद्वाणिज्यं । स च वर्षणार्थमश्विनौ तुष्टाव । तौ चाश्विनौ मेघं प्रेरितवंतौ । अयमर्थः पूर्वार्द्धे प्रतिपाद्यते । हे सुदानू शोभनदानावश्विनौ । औशिजायोशिक्पुत्राय वणिजे वाणिज्यं कुर्वते दीर्घश्रवस एतत्संज्ञाय ऋषये याभिर्युष्मदीयाभिरूतिभिर्हेतुभूताभिः कोशो मेघो मधु माधुर्योपेतं वृष्टिजलमक्षरत् । असिंचत् । युष्मत्प्रसादादपेक्षिता वृष्टिर्जातेत्यर्थः । अपि च । उशिजः पुत्रं स्तोतारं कक्षीवंतमेतत्संज्ञमृषिं याभिरूतिभिरावतं । अरक्षतं । ताभिः सर्वाभिरूतिभिः सहास्मानप्यागच्छतं ॥ कक्षीवंतं । कक्ष्या रज्जुरश्वस्य । तया युक्तः कक्षीवान् । आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनान्मतुपो वत्वं । संप्रसारणं ॥

द्वादशीमृचमाह ॥

याभी रसां क्षोदसोद्नः पिपिन्वथुरनश्वं याभी रथमावतं जिषे ।

याभिस्त्रिशोक उस्रिया उदाजत ताभिरू षु ऊतिभिरश्विना गतं ॥ १२ ॥

याभिः। रसां। क्षोदसा। उद्नः। पिपिन्वथुः। अनश्वं।

याभिः। रथं। आवंत। जिषे।

याभिः। त्रिऽशोकः। उस्रियाः। उत्ऽआजंत। ताभिः।

ऊं इति। सु। ऊतिऽभिः। अश्विना। आ। गतं॥१२

रसा नदी भवति रसतेः शब्दकर्मण इति यास्कः। नि० ११. २५.। हे अश्विनौ याभिरूतिभिर्हेतुभूताभी रसां नदी-मनावृष्ट्या जलरहितां क्षोदसा कूलानि संपिषतोद्न उदकेन पिपिन्वथुः। युवां पूरितवंतौ। तथानश्वमश्वैर्वियुक्तमात्मीयं रथं जिषे जेतुं याभिरूतिभिरावतं। अगमयतं। अपि च याभिरूतिभिः कण्वपुत्रस्त्रिशोक ऋषिरुस्रिया अपहृता गा उदाजत। उदगमयत्। असुरसकाशाल्लेभे। ताभिः सर्वाभि-रूतिभिः सहास्मानप्यागच्छतं॥ क्षोदसा। क्षुदिर् संपेषणे। औणादिकोऽसुन्। उद्नः। तृतीयैकवचनस्य सुपां सुपो भवंतीति शसादेशः। पद्दन्नित्यादिनोदकशब्दस्योदन्भावः। भसंज्ञायामल्लोपोऽन इत्यकारलोपः। पिपिन्वथुः। पिवि सेचने। इदित्वान्नुम्। जिषे। जि जये। तुमर्थे सेसेनिति क्सेप्रत्ययः॥ उदाजत। अज गतिक्षेपणयोः॥

त्रयोदशीमृचमाह॥

याभिः सूर्यं परियाथः परावति मंधातारं क्षैत्रपत्येष्वावतं।

याभिर्विप्रं प्र भरद्वाजमावतं ताभिं रू षु ऊतिभिरश्विना

गंतं॥१३॥

याभिः । सूर्यं । परिऽयाथः । पराऽवति । मंधातारं ।

क्षैत्रंऽपत्येषु । आवतं ।

याभिः । विप्रं । प्र । भरत्ऽवाजं । आवतं । ताभिः । ऊं

इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥१२॥

हे अश्विनौ परावति दूरदेशे स्थितं सूर्यं तमोरूपेण स्वर्भानुनावृतमादित्यं तस्मात्तमसो मोचयितुं याभिरूतिभिः परियाथः । युवां परितो गच्छथः । तथा मंधातारमृषिं क्षैत्रपत्येषु । क्षेत्राणां पतिरधिपतिः क्षेत्रपतिः । तस्य संबंधिषु कर्मस्वावतं । अरक्षतं । अपि च याभिरूतिभिर्विप्रं मेधाविनं भरद्वाजमृषिमन्नप्रदानेन प्रावतं । प्रकर्षेणारक्षतं । ताभिः सर्वाभिरूतिभिः सह रक्षणार्थमस्मानप्यागच्छतं ॥ क्षैत्रपत्येषु । ब्राह्मणादेराकृतिगणत्वात्कर्मण्यर्थे ष्यञ् ॥

चतुर्दशीमृचमाह ॥

याभिर्महामतिथिग्वं कशोजुवं दिवोदासं शंबरहत्य आवतं ।

याभिः पूर्भिद्ये त्रसदस्युमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १३ ॥

याभिः । महां । अतिथिऽग्वं । कशःऽजुवं । दिवःऽदासं ।

शंबरऽहत्ये । आवतं ।

याभिः । पूःऽभिद्ये । त्रसदस्युं । आवतं । ताभिः । ऊं

इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १४ ॥

हे अश्विनौ महां महांतमतिथिग्वमतिथिभिर्गंतव्यं कशोजुवमसुरभीत्योदकं प्रवेष्टुं गंतारं । एवंभूतं । दिवोदासमेतत्संज्ञकं राजर्षिं शंबरहत्ये । शंबर आयुधं । तद्युक्तः शंबरोऽसुरः । तस्य हनने विषयभूते सति याभिरूतिभिरावतं । अरक्षतं । अपि च याभिरूतिभिः पूर्भिद्ये । पुराणि नगराणि भिद्यंतेऽस्मिन्निति पूर्भिद्यः संग्रामः । तस्मिन् त्रसदस्युमेतत्संज्ञकमृषिं पुरुकुत्सपुत्रमावतं । अरक्षतं । ताभिरित्यादि पूर्ववत् ॥ महां । महांतमित्यस्य छांदसो वर्णलोपः । कशोजुवं । कश इत्युदकनाम । कश गतिशासनयोः । असुन् । कशांस्युदकानि जवतीति कशोजूः । जु इति सौत्रो धातुर्गत्यर्थः । क्विब्वचीत्यादिना क्विब्दीर्घौ । दिवोदासं । दिवश्च दासे षष्ठ्या अलुक् वक्तव्यः । पा० ६. ३. २१. ६. । इत्यलुक् । दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं । शंबरहत्ये । हनस्त च चेति हंतेर्भावे क्यप् तत्संनियोगेन तकारांतादेशश्च । कृदुत्तरपदप्रकृतिस्वरत्वं ॥

पंचदशीमृचमाह ॥

याभिर्वम्रं विपिपानमुपस्तुतं कलिं याभिर्वित्तजानिं दुवस्यथः । ?

याभिर्व्यश्वमुत पृथिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १५ ॥

याभिः । वम्रं । विऽपिपानं । उपऽस्तुतं । कलिं । याभिः वित्तऽजानिं । दुवस्यथः ।

याभिः । विऽश्रंश्वं । उत । पृथिं । आवंतं । ताभिः । ऊं

इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १५ ॥

हे अश्विनौ वम्रं विखनसः पुत्रमेतत्संज्ञमृषिं विपिपानं विशेषेण पार्थिवं रसं पिबंतं याभिरूतिभिररचतं । कीदृशं । उपस्तुतं । समीपस्थैः सम्यक् स्तुतमिति स्तूयमानं । तथा वित्तजानिं लब्धभार्यं कलिमेतत्संज्ञमृषिं याभिरूतिभिर्दु- वस्यथः । रक्षथः । उत अपि च व्यश्वं विगताश्वं पृथिमेतत्संज्ञं वैनं राजर्षिं याभिरूतिभिरावतं । अरक्षतं । अन्यत्पूर्ववत् ॥ विपिपानं । पा पाने । ताच्छीलिकश्चानश् । बहुलं छंदसीति शपः श्लुः । बहुलं छंदसीत्यभ्यासस्येत्वं । उपस्तुतं । स्तौतेः कर्मणि निष्ठा । प्रवृद्धादित्वादुत्तरपदांतोदात्तत्वं । वित्तजानिं । वित्ता लब्धा जाया येन स तथोक्तः । जायाया निङ् । पा० ५. ४ १३४ । इति समासांतो निङादेशः । लोपो व्योर्वलीति वलि लोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । व्यश्वं । विगतोऽश्वो यस्मात्स तथोक्तः । बहुव्रीहिस्वरेण पूर्वपदस्यो- दात्तत्व उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं ॥

॥ इति प्रथमस्य सप्तमे पंचत्रिंशो वर्गः ॥

षोड़शीमृचमाह ॥

याभिर्नरा शयवे याभिरत्रये याभिः पुरा मनवे

गातुमीषथुः ।

याभिः शारीराजतं स्यूमरश्मये ताभिरू षु ऊतिभिरश्विना

गतं ॥ १६ ॥

याभिः । नरा । शयवे । याभिः । अत्र॑ये । याभिः । पुरा ।

मन॑वे । गातुं । ईषथुः ।

याभिः । शारीः । आज॑तं । स्यूम॑ऽरश्मये । ताभिः । ऊं

इति॑ । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १५ ॥

हे नरा नेतारावश्विनौ पुरा पूर्वस्मिन्काले शयव एतत्संज्ञकाय ऋषये गातुं दुःखान्निर्गमनलक्षणं मार्गं याभिरूतिभिरीषथुः । युवां वांछितवंतौ । कृतवंताविल्यर्थः । किं तत् । सामर्थ्यात् शयवे चिन्नासत्या शचीभिरित्यस्यामृचि प्रतिपादितं । तथात्रये ऋषये शतद्वारे यंत्रगृहेऽसुरैः पीड्यमानाय संतापकारिणोऽग्नेः शीतेनोदकेन शीतकरणलक्षणं गातुं दुःखनिर्गमनहेतुभूतं मार्गं याभिरूतिभिर्युवामिष्टवंतौ । एतच्च हिमेनाग्निं घ्रंसमवारयेथामित्यादौ प्रसिद्धं । तथा मनव एतन्नाम्ने राजर्षये याभिरूतिभिर्यवादिधान्यवापनादिरूपं गातुं दारिद्र्यनिर्गमनहेतुं मार्गं युवां कृतवंतौ । तथा च मंत्रांतरः । यवं वृकेणाश्विना वपंतेति । अपि च । स्यूमरश्मये । स्यूतः संबद्धा रश्मिर्दीप्तिर्यस्य तस्मै । एतत्संज्ञकाय ऋषये याभिरूतिभीः शारीः । शारी नाम वेणुविशेषः । तद्विकारभूता इषूराजतं । शत्रून्प्रति प्रेरयतं । ताभिरूतिभिरित्यादि पूर्ववत् ॥ नरा । नृ नये । ऋदोरप् । सुपां सुलुगिति विभक्तेराकारः । शयवे । शीङ् स्वप्ने । भृमृशीतृचरीत्यादिनोप्रत्ययः । ईषथुः । इषु इच्छायां । लिट्यभ्यासस्येति पर्युदासादत् । पा० ६. ४, ७८. । अभ्यासस्येयङादेशाभावे सवर्णदीर्घः । शारीः ।

विकारार्थे शरशब्दादनुदात्तादेश्चेत्यञ् । टिड्ढाणञिति ङीप् । स्यू मरश्मये । षिवु तंतुसंताने । षिवेरौणादिकौ मन्प्रत्ययः । छ्वोः शूडित्यूठ् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

सप्तदशीमृचमाह ॥

याभिः पठर्वा जठरस्य मज्मनाग्निर्नादीदेच्चित इद्धो अज्मन्ना ।
याभिः शर्यातमवथो महाधने ताभिरू षु ऊतिभिरश्विना गतं ॥ १७ ॥

याभिः । पठर्वा । जठरस्य । मज्मना । अग्निः । न । अदीदेत् । चितः । इद्धः । अज्मन् । आ ।
याभिः । शर्यातं । अवथः । महाऽधने । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १८ ॥

हे अश्विनौ जठरस्य । जठरमुदरं भवति जग्धमस्मिन्धीयत इति यास्कः । नि॰ ४. ७. । जठरोपलक्षितस्य शरीरस्य मज्मना बलेन युक्तः सन् पठर्वैतत्संज्ञो राजर्षिरज्मन् । संग्रामनामैतत् । अज्मनि संग्रामे युष्मदीयाभिर्याभिरूतिभिरा समंतादटीदेत् । अदीप्यत । तत्र दृष्टांतः । चितः काष्ठैरभिचित इद्धो यज्ञगृहे ऋत्विग्भिः प्रज्वालितोऽग्निर्न । यथाग्निः प्रकाशते तद्वदित्यर्थः । अपि च शर्यातं मानवमिंद्रेण सह स्पर्धमानं महाधने । संग्रामनामैतत् । महता धनेनोपेते संग्रामे याभिरूतिभिरवथः । रक्षथः । ताभिरित्यादि गतं ॥

अदीदेत् । दीदेतिश्छांदसो दीप्तिकर्मा । अज्मन् । अज गतिक्षेपणयोः । अजंति क्षिपंत्यस्मिन्बाणानित्यधिकरण औणादिको मनिन् । वलादावार्द्धधातुके विकल्प इष्यत इति वचनाद्वीभावाभावः । सुपां सुलुगिति सप्तम्या लुक् । महाधने । आन्महत इत्यात्वं ॥

अष्टादशीमृचमाह ॥

याभिरंगिरो मनसा निरण्यथोऽग्रं गच्छथो विवरे गोअर्णसः ।

याभिर्मनुं शूरमिषा समावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १८ ॥

याभिः । अंगिरः । मनसा । निऽरण्यथः । अग्रं । गच्छथः । विऽवरे । गोऽअर्णसः ।

याभिः । मनुं । शूरं । इषा । संऽआवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ १८ ॥

अंगिर इत्येतदामंत्रितवाक्याद्बहिर्भूतं तेन चात्मानं संबोध्य स्तुतावृषिं प्रेरयति । हे अंगिरः । अंगिरसां गोत्रज त्वमश्विनौ स्तुहि । हे अश्विनौ मनसा मननीयेन स्तोत्रेण प्रीतौ संतौ युवां याभिरूतिभिर्निरण्यथः । स्तोतॄन् नितरां रमयथः । यद्वा मनसैव करणभूतेन रमयथः । तथा गोअर्णसो गोरूपस्यारणीयस्य धनस्य पणिभिर्गुहायां निहितस्य विवरे विवरणे गुहाद्वारस्योद्घाटनेन प्रकाशने विषयभूते सति याभिरूतिभिः सह युवामग्रं सर्वेभ्यो देवेभ्यः पुरस्ताद्गच्छथः । अपि च । शूरं

वीर्यवंत मनुमिषा पृथिव्या गुणेन यजादित्वान्धस्वरूपेणाद्विनं याभिरूतिभिः समावतं। सम्यगरक्षतं। ताभिः सर्वाभि-रूतिभिः सहास्मानप्यागच्छतं॥ निरण्यथः। निरमयथ इत्यस्य वर्णव्यापत्त्यैतद्रूपं। विवरे। अहद्वहेनिश्विगमस्येति भावेऽप्। थाथादिनोत्तरपदांतोदात्तत्वं॥

एकोनविंशीमृचमाह॥

याभिः पत्नीर्विमदाय न्यूहथुरा घ वा याभिररुणीरशिक्षतं।
याभिः सुदास ऊहथुः सुदेव्यं१ ताभिरू षु ऊतिभिरश्विना गतं॥ १९॥

याभिः। पत्नीः। विऽमदाय। निऽऊहथुः। आ। घ। वा।
याभिः। अरुणीः। अशिक्षतं।
याभिः। सुऽदासे। ऊहथुः। सुऽदेव्यं। ताभिः। ऊं इति।
सु। ऊतिऽभिः। अश्विना। आ। गतं॥ १९॥

हे अश्विनौ विमदायैतन्नाम्ने ऋषये याभिर्युष्मदीयाभि-रूतिभिः पत्नीर्भार्याः पुरुमित्रस्य दुहितरं न्यूहथुः। नितरां युवां प्रापितवंतौ। घेति पादपूरणः। तथा याभिरूतिभिर-रुणीररुणवर्णा आरोचमाना गा आभिमुख्येनाशिक्षतं। अदत्तं। तथा पिजनवपुत्राय सुदासे कल्याणदानाय राज्ञे सुदेव्यं प्रशस्तं धनं याभिरूतिभिरूहथुः। प्रापितवंतौ। ताभिरित्यादि गतं॥ पत्नीः। अमो व्यत्ययेन शसादेशः। न्यूहथुः। वह प्रापणे। अयुसि यजादित्वात्संप्रसारणं। द्विर्वचनादि। सुदासे। शोभनं

ददातीति सुदाः। असुन्। सुदेव्यं। दिगादिभ्यो यत्। पा० ४. ३. ५४.। तित्स्वरित इति स्वरितत्वं॥

विंशीमृचमाह॥

याभि॑: शंताती॒ भव॑थो द॒दा॒शुषे॑ भु॒ज्युं या॒भिरव॑थो॒ याभि॒रध्रि॑गुं।

ओ॒म्याव॑तीं सु॒भरा॑मृत॒स्तुभं॒ ताभि॑रू॒ षु ऊ॒तिभि॑रश्विना॒ गतं॥ २०॥

याभि॑:। शंता॑ती॒ इति॒ शंऽता॑ती। भव॑थः। द॒दा॒शुषे॑। भु॒ज्युं। याभि॑:। अव॑थः। याभि॑:। अध्रि॑ऽगुं।

ओ॒म्याऽव॑तीं। सु॒ऽभरां॑। ऋ॒त॒ऽस्तुभं॑। ताभि॑:। ऊं॒ इति॑। सु। ऊ॒तिऽभि॑:। अ॒श्वि॒ना॒। आ। गतं॥ २०॥

हे अश्विनौ ददाशुषे हवींषि दत्तवते यजमानाय याभिरूतिभिः शंतातौ सुखस्य कर्तारौ भवथः। याभिरूतिभिर्भुज्युं तुग्रस्य पुत्रमवथः। याभिश्चाध्रिगुं। अध्रिगुर्देवानां शमिता। अध्रिगुश्चापश्च उभौ देवानां शमिताराविति श्रुतेः। अपि च। ऋतस्तुभं। ऋतं सत्यं स्तोभत्युच्चारयतीत्यृतस्तुप्। एतत्संज्ञमृषिं। ओम्यावतीं। ओम्येति सुखनाम। तद्युक्तां सुभरां सुखेन भरणीयामिषं याभिरूतिभिः प्रापयथः। ताभिः सर्वाभिरूतिभिः सहास्माकमागच्छतं॥ शंतातौ। शिवशमरिष्टस्य करे। पा० ४. ४. १४३.। इति तातिल्प्रत्ययः। लितीति प्रत्ययात्पूर्वे स्वरात्तत्वं। ददाशुषे। दाश्ट दाने। लिटः क्वसुः।

वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

॥ इति प्रथमस्य सप्तमे षट्त्रिंशो वर्गः ॥

एकविंशीमृचमाह ॥

याभिः कृशानुमसने दुवस्यथो जवे याभिर्यूनो अर्वंतमावतं ।
मधु प्रियं भरथो यत्सरड्भ्यस्ताभिरू षु ऊतिभिरश्विना गतं ॥ २१ ॥

याभिः । कृशानुं । असने । दुवस्यथः । जवे । याभिः । यूनः । अर्वंतं । आवतं ।
मधुं । प्रियं । भरथः । यत् । सरट्ऽभ्यः । ताभिः । ऊं इतिं । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥२१॥

स्वानादिषु सोमपालेषु मध्ये कृशानुरेकः सोमपालः । तथा च तैत्तिरीयकं । हस्तसुहस्तकृशानवः । ते वः सोमक्रयणा इति ॥ तं कृशानुमसने । इषवोऽस्यंतेऽस्मिन्नित्यसनः संग्रामः । तस्मिन्संग्रामे हे अश्विनौ याभिरूतिभिर्दुवस्यथः । रक्षथः । तथा याभिश्च जवे वेगे प्रवृत्तं यूनस्तरुणस्य पुरुकुत्सस्यार्वंतमश्वमावतं । अरक्षतं । अपि च । यन्मधु चौद्रं प्रियं सर्वेषामनुकूलवेद्यं तत्सरड्भ्यो मधुमक्षिकाभ्यो याभिश्चोतिभिर्भरथः । संपादयथः । ताभिः सर्वाभिरूतिभिः सहास्मानभ्यागच्छतं ॥ असने । असु क्षेपणे । करणाधिकरणयोश्चेत्यधिकरणे ल्युट् । सरड्भ्यः । सृ गतौ । सर्तेरटिः ॥

द्वाविंशीमृचमाह ॥

याभिर्नरं गोषुयुधं नृषाह्ये क्षेत्रस्य साता तनयस्य जिन्वथः ।
याभी रथाँ अवथो याभिरर्वतस्ताभिरू षु ऊतिभिरश्विना गतं ॥ २२ ॥

याभिः । नरं । गोषुऽयुधं । नृऽसह्ये । क्षेत्रस्य । साता । तनयस्य । जिन्वथः ।
याभिः । रथान् । अवथः । याभिः । अर्वतः । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥२२॥

हे अश्विनौ गोषुयुधं गोविषयं युद्धं कुर्वंतं नरं यज्ञस्य नेतारं यजमानं याभिरूतिभिर्नृषाह्ये नृभिः सोढव्ये संग्रामे जिन्वथः । प्रीणयथः । रक्षथ इत्यर्थः । तथा क्षेत्रस्य गृहादिरूपस्य । तनयशब्दो धनवाची । तनयस्य धनस्य च साता सातये संभजनार्थं याभिरूतिभिर्यजमानं रक्षथः । याभिश्च यजमानानां रथान्रक्षथः । तदीयानर्वतोऽश्वांश्च याभिरवथः । ताभिः सर्वाभिरूतिभिः सहास्मानप्यागच्छतं ॥ गोषुयुधं । युध संप्रहारे । गोषु युध्यत इति गोषुयुत् । तत्पुरुषे कृति बहुलमित्यलुक् । नृषाह्ये । षह मर्षणे । शकिसहोश्चेति यत् । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । कृदुत्तरपदप्रकृतिस्वरत्वं । साता । वन षण संभक्तौ । भावे क्तिन् । जनसनखनां सन्झलोरित्यात्वं । ऊतियूतीत्यादिना क्तिन उदात्तत्वं निपातितं । सुपां सुलुगिति चतुर्थ्या डादेशः ।

जिन्वथः । जिवि प्रीणनार्थः । भौवादिकः । इदित्त्वान्नुम् । रथात् । दीर्घादटि समानपाद इति नकारस्य रुत्वं । आतोऽटि नित्यमिति सानुनासिक आकारः ॥

त्रयोविंशीमृचमाह ॥

याभिः कुत्समार्जुनेयं शतक्रतू प्र तुर्वीतिं प्र च दभीतिमावतं ।

याभिर्ध्वसंतिं पुरुषंतिमावतं ताभिरू षु ऊतिभिरश्विना गतं ॥ १३ ॥

याभिः । कुत्सं । आर्जुनेयं । शतक्रतू इति शतऽक्रतू । प्र । तुर्वीतिं । प्र । च । दभीतिं । आवतं ।

याभिः । ध्वसंतिं । पुरुऽसंतिं । आवतं । ताभिः । ऊं इति । सु । ऊतिऽभिः । अश्विना । आ । गतं ॥ २३ ॥

हे शतक्रतू बहुविधकर्माणावश्विनौ । आर्जुनेयं । अर्जुन इतींद्रस्य नाम । तथा च वाजसनेयकं । एतद्वा इंद्रस्य गुह्यं नाम यदर्जुन इति । तस्य पुत्रं कुत्सं याभिरूतिभिः प्रावतं । प्रकर्षेणारक्षतं । तथा तुर्वीतिं दभीतिं च याभिरूतिभिः प्रावतं । अपि च । याभिर्ध्वसंतिमितन्नामकं पुरुषंतिमितन्नामानं च ऋषिमावतं । अरक्षतं । ताभिः सर्वाभिरूतिभिः सहास्मानपि सुष्ठ्वागच्छतं ॥ आर्जुनेयं । शुभ्रादिभ्यश्च । पा० ४. १. १२३. । इति चशब्दोऽनुक्तसमुच्चयार्थ इत्युक्तत्वात् ढक् । तुर्वीतिं । तुर्वी हिंसार्थः । शत्रूंस्तुर्वतीति तुर्वीतिः । औणा

दिक ईतिप्रत्ययः । दभीति । दंभु दंभे । औणादिकः कीति-प्रत्ययः । ध्वसंति । ध्वंसु गतौ च । औणादिकौ झिङ्-प्रत्ययः । अनिदितामिति नलोपः । कीऽतः । पुरुषंति । पुरु सनोति ददातीति पुरुषंतिः । क्तिच्क्तौ च संज्ञायामिति क्तिच् । न क्तिचि दीर्घश्चेत्यनुनासिकलोपोपधादीर्घयोर्निषेधः ॥

चतुर्विंशीमृचमाह ॥

अप्न॑स्वतीमश्विना॒ वाच॑म॒स्मे कृ॒तं नो॑ दस्रा॒ वृष॑णा मनी॒षाम् ।

अ॒द्यू॒त्येऽव॑से॒ नि ह्व॑ये वां वृ॒धे च॑ नो भवतं॒ वाज॑सातौ ॥२४॥

अप्न॑स्वतीम् । अ॒श्वि॒ना॒ । वाच॑म् । अ॒स्मे इति॑ । कृ॒तम् । नः॒ ।

दस्रा॑ । वृ॒ष॒णा॒ । म॒नी॒षाम् ।

अ॒द्यू॒त्ये॑ । अव॑से । नि । ह्व॒ये॒ । वा॒म् । वृ॒धे । च॒ । नः॒ ।

भ॒व॒त॒म् । वाज॑ऽसातौ ॥ २४ ॥

हे अश्विनौ । अस्मे अस्माकं वाचमप्नस्वतीं । अप्न इति कर्मनाम । विहितैः कर्मभिः संयुक्तां कृतं । कुरुतं । तथा नोऽस्माकं मनीषां बुद्धिं हे वृषणा कामानां वर्षकौ दस्रौ शत्रूणामुपक्षपयितारावश्विनौ वेदार्थज्ञानसमर्थां कुरुतं । अपि च । यस्माद्युवामेवंगुणविशिष्टौ तस्माद्वां युवामवसे रक्षणाय निह्वये । नितरामाह्वये । कदा । अद्यूत्ये । द्योतनरहिते प्रकाशनरहिते रात्रेः पश्चिमे यामे । तस्मिन्काले हि प्रातरनुवाकाश्विनशस्त्रयोरिदं सूक्तं पठ्यते । आहूतौ च युवां वाज-सातौ वाजस्यान्नस्य संभजने । यद्वा संग्रामनामैतत् । संग्रामे

नोऽस्माकं वृधे वर्धनाय भवतं॥ अप्नस्वतीं। आपः कर्माख्यायां ह्रस्वो नुट् च वेत्यसुन् नुडागमश्च। तदस्यास्तीति मतुप्। मादुपधाया इति मतुपो वत्वं। तसौ मत्वर्थं इति भत्वेन पदत्वाभावाद्रुत्वाद्यभावः। अस्मे। सुपां सुलुगिति षष्ठ्याः शे आदेशः। कृतं। करोतेर्लोटि बहुलं छंदसीति विकरणस्य लुक्। ग्रद्यूत्ये। द्युत दीप्तौ। ऋहलोर्ण्यदिति भावे ण्यत्। वर्णव्यापत्त्या उकारः। द्यूत्यं प्रकाशनमस्मिन्नास्तीति बहुव्रीहौ व्यत्ययेनांतस्वरितत्वं। मिह्वये। निसमुपविभ्यो ह्व इत्यात्मनेपदं। वृधे। वृधु वृद्धौ। संपदादिलक्षणो भावे क्विप्। साविकाच इति विभक्तेरुदात्तत्वं॥

पंचविंशीमृचमाह॥

द्युभिरक्तुभिः परि पातमस्मानरिष्टेभिरश्विना सौभगेभिः।
तन्नो मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ २५॥

द्युऽभिः। अक्तुऽभिः। परि। पातं। अस्मान्। अरिष्टेभिः। अश्विना। सौभगेभिः।
तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः॥ २५॥

हे अश्विनौ द्युभिर्दिवसैरक्तुभी रात्रिभिश्चास्मान् स्तोतॄन्परिपातं। परितो रक्षतं। सर्वदास्मान् रक्षतमित्यर्थः। तथारिष्टेभिरहिंसितैः सौभगेभिः सुभगत्वैः सुभगत्वापादकैर्धनै-

रस्मान्नचत । यदस्माभिः प्रार्थितं नोऽस्मदीयं तन्मित्रादयः षट् देवताः मामहंतां । पूजयंतु । उतशब्दः समुच्चये । द्युभिः । दिव उदित्युत्वं । दिवो झलिति सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य प्रतिषेधः । अरिष्टेभिः । रिष हिंसायां । निष्ठेति क्तः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं । बहुलं छंदसीतिभिस ऐसभावः । अश्विना । सुपां सुलुगिति विभक्ते-राकारः । आमंत्रितस्य चेति सर्वानुदात्तत्वं । सौभगेभिः । शोभनो भगः श्रीर्यस्यासौ सुभगः । तस्य भावः । सौभगं । सुभगान्मंत्र इत्युद्गात्रादिषु पाठादञ्प्रत्ययः । हृद्भगसिंध्वंते पूर्वपदस्य चेत्युभयपदवृद्धिर्न भवति तस्य सर्वे विधयश्छंदसि विकल्प्यंत इति विकल्पितत्वात् । पूर्ववदैसभावः । ञ्नित्यादि-र्नित्यमित्याद्युदात्तत्वं ॥

॥ इति प्रथमस्य सप्तमे सप्तत्रिंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-बुक्कभूपालसाम्राज्यधुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टके सप्तमोऽध्यायः समाप्तः ॥

॥ श्रीगणेशाय नमः ॥

यस्य निःश्वसितं वेदा यो वेदेभ्योऽखिलं जगत् ।
निर्ममे तमहं वंदे विद्यातीर्थमहेश्वरं ॥

इत्थं सप्तममध्यायं व्याख्यायाष्टमोऽध्यायो व्याख्यातुमारभ्यते। प्रथमे मंडले षोडशेऽनुवाके सप्त सूक्तानि गतानि। इदमित्यति विंशत्यृचमष्टमं सूक्तं। अत्रानुक्रम्यते। इदं विंशतिरुषस्यं द्वितीयोऽर्धर्चो रात्रेश्चेति। ऋषिश्चान्यस्मादिति परिभाषयानुवृत्तेरांगिरसः कुत्स ऋषिः। अनादेशपरिभाषया त्रिष्टुप् छंदः। उषा देवता द्वितीयस्यार्धर्चस्य रात्रिरपि॥ प्रातरनुवाक उषस्ये क्रतौ त्रैष्टुभे छंदस्येतत्सूक्तं। सूत्रितं च। इदं श्रेष्ठं पृथूरथ इति सूक्ते। आ० ४. १४.। इति॥ आश्विनशस्त्रे चेदं सूक्तं प्रातरनुवाकातिदेशात्॥

तत्र प्रथमामृचमाह॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा।
यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् ॥१॥

इदं। श्रेष्ठं। ज्योतिषां। ज्योतिः। आ। अगात्। चित्रः।
प्रऽकेतः। अजनिष्ट। विऽभ्वा।
यथा। प्रऽसूता। सवितुः। सवाय। एव। रात्री। उषसे।
योनिं। अरैक्॥ १॥

ज्योतिषां ग्रहनक्षत्रादीनां द्योतमानानां मध्य इदमुषआख्यं ज्योतिः श्रेष्ठं। प्रशस्यतमं। अस्य कोऽतिशय इति चेत्

उच्यते। नक्षत्रादिकं ज्योतिः स्वात्मानमेव प्रकाशयति नान्यत्। चंद्रस्तु यद्यप्यन्यत्प्रकाशयति तथापि न विस्पष्टप्रकाशः। औषसं तु ज्योतिर्युगपदेव सर्वस्य जगतोऽंधकारनिराकरणेन विशेषेण प्रकाशकं। अतः प्रशस्यतममित्यर्थः। तादृशं ज्योतिरागात्। पूर्वस्यां दिश्यागमत्। आगते च तस्मिन् चित्रश्चायनीयः प्रकेतोऽंधकारावृतस्य सर्वस्य पदार्थस्य प्रज्ञापकस्तदीयो रश्मिविभ्वा विभुर्व्याप्तः सन्नजनिष्ट। प्रादुरभूत। किंच। यथा रात्री रात्रिः स्वयं सवितुः सूर्यसकाशात्प्रसूता। उत्पन्ना। सूर्यो ह्यस्तं गच्छन् रात्रिं जनयति। तस्मिन्ननस्तमिते रात्रेरुत्पत्त्यभावात्। एवमेव रात्रिरप्युषसे सवायोषस उत्पत्तये तदर्थं योनिं स्थानं स्वकीयापरभागलक्षणमारैक्। आरेचितवती। कल्पितवतीत्यर्थः। यद्वा प्रसूता रात्रिसकाशादुत्पन्नोषाः सवितुः सूर्यस्य सवाय प्रसवाय जन्मने यथा भवति। एवं रात्रिरप्युषस उषसो यज्जन्म तदर्थं योनिं स्वापरभागलक्षणं स्थानं कृतवती॥ अत्र निरुक्तं। इदं श्रेष्ठं ज्योतिषां ज्योतिरागमत् चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं। नि॰ २. १९.। इति॥ श्रेष्ठं। प्रशस्यशब्दादातिशायनिक इष्ठन्। प्रशस्यस्य श्र इति आदेशः। प्रकृत्यैकाच्। पा॰ ६. ४. १६३.। इति प्रकृतिभावाट्टिलोपाभावः। अगात्। एतेर्लुङीणो गा लुङीति गादेशः। गातिस्थेति सिचो लुक्। प्रकेतः। कित ज्ञाने। अंतर्भावितण्यर्थात्कर्मणि घञ्। थाथादिनोत्तरपदांतोदात्तत्वं। अजनिष्ट। जनी प्रादुर्भावे। लुङि सिच इडागमः। विभ्वा। विप्रसंभ्यो ड्वसंज्ञायामिति भावे

डुप्रत्ययः। सुपां सुलुगित्यादिना सोराकारादेशः। ओः सुपीति यणादेशस्य न भूसुधियोरिति प्रतिषेधे प्राप्ते छंदस्युभयथेति यणादेशः। व्यत्ययेनाद्युदात्तत्वं। यद्वा विपूर्वाद्भवतेरौणादिको डुन्प्रत्ययः। नित्त्वादाद्युदात्तत्वं। प्रसूता। षूङ् प्राणिप्रसवे। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। सवाय। छंदसि जवसवौ वक्तव्याविति निपातनादच्। चित्त्वादंतोदात्तत्वं। अणोऽप्रगृह्यस्यानुनासिक इति संहितायामकारः सानुनासिकः। एवा। निपातस्य चेति संहितायां दीर्घः। रात्री। रात्रेश्चाजसाविति ङीप्। यस्येति चेतीकारलोपः। आरैक्। रिचिर् विरेचने। लङि बहुलं छंदसीति विकरणस्य लुक्। लघूपधगुणे हल्ङ्याब्भ्य इति तिलोपः। छांदस्यापत्त्या व्यत्ययेन एकारस्य ऐकारः॥

द्वितीयामृचमाह॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः।

समानबंधू अमृते अनूची द्यावा वर्णं चरत आमिनाने॥ २॥

रुशत्ऽवत्सा। रुशती। श्वेत्या। आ। अगात्। अरैक्। ऊं इति। कृष्णा। सदनानि। अस्याः।

समानबंधू इति समानऽबंधू। अमृते इति। अनूची इति। द्यावा। वर्णं। चरतः। आमिनाने इत्याऽमिनाने॥ २॥

श्वेत्येत्युषसो नामधेयं। रुशती दीप्ता श्वेत्या श्वेतवर्णोषाः रुशद्वत्सा रुशद्दीप्तः सूर्यो वत्सो यस्याः सा तथोक्ता। यथा

मातु. समीपे वत्सः संचरति। एवमुषसः समीपे सूर्यस्य नित्यमवस्थानात्तद्वत्सत्वं। अथवा यथा वत्सो मातुः स्तन्यं रसं पिबन्हरति। एवमुषसोऽवश्यायाख्यं रसं पिबन्वत्स इत्युच्यते। ताहृगो मत्यागात्। आगतवती। आगतायां अस्या उषसः कृष्णा कृष्णवर्णा रात्रिः सदनानि स्थानानि स्वकीयांत्यार्इयामलक्षणान्यारैक्। आरेचितवती। कल्पितवती दत्तवतीत्यर्थः। उ इत्येतत्पादपूरणं। अपि च। एते रात्र्युषसौ समानबंधू समानेनैकेन सूर्याख्येन बंधुना सख्या युक्ते। यद्वा। सूर्येण सह संबद्धे। यथोषा उदेष्यता सूर्येण संबद्धा एवं रात्रिरप्यस्तंयता सूर्येण संबद्धा। अमृते। मरणरहिते कालात्मकतया नित्यत्वात्। अनूची। अन्वंचंत्यौ। प्रथमं रात्रिः पश्चादुषा इत्यनेन क्रमेण गच्छंत्यौ। यद्वा सूर्यगत्यनुसारेण गच्छंत्यौ। एवंभूते वर्णं सर्वेषां प्राणिनां रूपमामिनाने। जरयंत्यौ। यद्वा स्वकीयं रूपं हिंसंत्यौ। उषसा नैशं चतमो निवर्त्यते प्रकाशात्मकमुषसो रूपं रात्र्या। एवंविधे सत्यौ द्यावा द्योतमाने चरतः। प्रतिदिवसमावर्तेते। यद्वा द्यावा नभसांतरिक्षमार्गेण चरतः। प्रतिदिवसं गच्छतः। अत्र निरुक्तं। रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः। सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा। रुशती श्वेत्यागात्। श्वेत्या श्वेततेरारिक्तकृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णः। अथैने संस्तौति समानबंधू समानबंधने अमृते अमरणधर्माणावनूची अनूच्याविततरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावी द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे। नि०

३.२८.। इति ॥ खेत्या । खिता वर्णे । अस्मात्संज्ञातादचो यदिति भावे यत् । णिलोपः । अर्शआदित्वान्मत्वर्थीयोऽच । अमृते । मृतं मरणमनयोर्नास्तीति बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं । अनूचो । अनुपूर्वादंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । अंचतेश्चोपसंख्यानमिति ङीप् । अच इत्यकारलोपे चाविति दीर्घः । अनुदात्तस्य च यत्रोदात्तलोप इति ङीप उदात्तत्वं । सुपां सुलुगिति विभक्तेर्लुक् । आमिनाने । मीङ् हिंसायां । क्र्यादिकः । शानचि मीनातेर्निगम इति ह्रस्वत्वं ॥

तृतीयामृचमाह ॥

समानो अध्वा स्वस्रोरनंतस्तमन्यान्या चरतो देवशिष्टे ।
न मेथेते न तस्थतुः सुमेके नक्तोषासा समनसा विरूपे ॥३॥

समानः । अध्वा । स्वस्रोः । अनंतः । तं । अन्याऽअन्या ।
चरतः । देवशिष्टे इति देवऽशिष्टे ।
न । मेथेते इति । न । तस्थतुः । सुमेके इति सुऽमेके ।
नक्तोषसा । सऽमनसा । विरूपे इति विऽरूपे ॥३॥

स्वस्रोर्भगिन्यो रात्र्युषसोरध्वा संचरणसाधनभूतो मार्गः समानः । एक एव । येनाकाशमार्गेणोषा निर्गच्छति तेनैव रात्रिरपि । स च मार्गोऽनंतः । अवसानरहितः । तं मार्गं देवशिष्टे देवेन द्योतमानेन सूर्येणानुशिष्टे शिक्षिते सत्यावन्यान्या एकैका चरतः । क्रमेण गच्छतः । अपि च । सुमेके

शोभनमेहने सर्वेषामुत्पादकत्वात् शोभनप्रजनने नक्तोषासा रात्रिरुषाश्च विरूपे तमःप्रकाशलक्षणाभ्यां विरुद्धरूपाभ्यां युक्ते अपि समनसा समानमनस्के ऐकमत्यं प्राप्ते सत्यौ न मेथेते। परस्परं न हिंस्तः। तथा न तस्थतुः। क्वचिदपि न तिष्ठतः। सर्वदा लोकानुग्रहार्थं गच्छत इत्यर्थः॥ अन्यान्या। कर्मव्यतिहारे सर्वनाम्नो द्वे भवत इति वक्तव्यं समासवच्च बहुलमित्यन्यशब्दस्य द्विर्भावः। तस्य परमाम्रेडितमित्याम्रेडितसंज्ञायामनुदात्तं चेत्याम्रेडितानुदात्तत्वं। देवशिष्टे। शासु अनुशिष्टौ। अस्मात्कर्मणि निष्ठा। यस्य विभाषेतीट्प्रतिषेधः। शास इदङ्हलोः। पा० ६. ४. ३४.। इत्युपधाया इत्वं। शासिवसिघसीनां चेति षत्वं। तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं। मेथेते। मिथृ मेधृ मेधाहिंसनयोः। भौवादिकः। अनुदात्तेत्। सुमेके। मिह सेचने। भावे घञ्। शोभनो मेहो ययोस्ते। व्यत्ययेन ककारः। उत्तरपदस्य ञित्स्वरेणाद्युदात्तत्वं। आद्युदात्तं द्व्यच् छंदसीत्युत्तरपदाद्युदात्तत्वं। नक्तोषासा। सुपां सुलुगिति विभक्तेराकारः। अन्येषामपि दृश्यत इति संहितायामुपधादीर्घः॥

चतुर्थीमृचमाह॥

भास्वंती नेत्री सूनृतानामचेति चित्रा वि दुरो न आवः।
प्रार्प्या जगद्व्यु नो रायो अख्यदुषा अजीगर्भुवनानि विश्वा॥४॥

भास्वंती। नेत्री। सूनृतानां। अचेति। चित्रा। वि। दुरः। नः। आवरित्यावः।

प्रऽअर्थ्यं। जगत्। वि। ऊं इति। नः। रायः। अख्यत्।

उषाः। अजीगः। भुवनानि। विश्वा ॥ ४ ॥

भास्वती विशिष्टप्रकाशनयुक्ता। सूनृतेति वाङ्नाम। सूनृतानां वाचां नेत्रुत्पादयित्री। उषसः प्रादुर्भावानंतरं हि पशुपक्षिमृगादयः सर्वे शब्दं कुर्वंति। एवंभूतोषा अचेति। अस्माभिरज्ञायि। चित्रा चायनीया ज्ञाता सा नोऽस्माकं दुरो द्वाराणि तमसातिरोहितान्यावः। व्यावृणोत्। यथास्माभिष्टं स्यात्तथा तमो निवार्य प्रकाशयतीत्यर्थः। अपि च। जगत्सर्वं भुवनं प्रार्थ्यं प्रकाशं गमयित्वा नोऽस्माकं रायो धनानि व्यख्यत्। विशिष्टप्रकाशनयुक्तान्यकरोत्। उ इत्येतत्पादपूरणं। सैवोषा विश्वा भुवनानि सर्वाणि भुवनानि तमसातिरोहितत्वेनाविद्यमानकल्पान्यजीगः। उद्गिरति स्वमुखान्निर्गमयति। स्वकीयेन प्रकाशेन तमो निःसार्य पुनरुत्पन्नानीव करोतीत्यर्थः॥ नेत्री। णीञ् प्रापणे। तृच्। ऋन्नेभ्यो ङीप्। उदात्तयणो हल्पूर्वादिति ङीप उदात्तत्वं। अचेति। चिति संज्ञाने। दुरः। द्वारशब्दस्य दुरेश्वतौ बहुलमिति बहुलवचनात्संप्रसारणं। आवः। वृञ् वरणे। लुङि मंत्रे घसेति च्लेर्लुक्। गुणः। हल्ङ्याब्भ्य इति तिलोपः। छंदस्यपि दृश्यत इत्याडागमः। प्रार्प्य ऋ गतौ। णावर्तिह्रीत्यादिना पुक्। समासेऽनञ्पूर्वे क्त्वो ल्यप्। अख्यत्। ख्या प्रकथने। लुङ्यस्यतिवक्तीत्यादिना च्लेरङादेशः। अजीगः। गृ निगरणे। लङि तिपि बहुलं छंदसीति विकरणस्य श्लुः। द्विर्वचनोरदत्वहलादिशेषाः। अर्तिपिपर्त्योश्च बहुलं छंदसीत्यभ्यास-

स्येत्वं । छांदस ईकारः । यद्वा । अस्मात्स्यंतात् ङि चङि द्विर्भावसन्वद्भावेत्वदीर्घाः । छांदसश्चङो लोपः ॥

पंचमीमृचमाह ॥

जिह्मश्ये३ चरितवे मघोन्याभोगयं इष्टये राय उ त्वं ।

दभ्रं पश्यद्भ्य उर्विया विचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ५ ॥

जिह्मऽश्ये । चरितवे । मघोनी । आऽभोगये । इष्टये ।

राये । ऊं इति । त्वं ।

दभ्रं । पश्यत्ऽभ्यः । उर्विया । विऽचक्षे । उषाः । अजीगः ।

भुवनानि । विश्वा ॥ ५ ॥

मघोनीत्युषसो नामधेयं । मघोनी धनवत्युषा जिह्मश्ये जिह्मं वक्रं शयानाय पुरुषाय चरितवे चरितुं शयनादुत्थाय स्वापेक्षितं प्रति गंतुं व्युच्छंती भवति । त्वं । अयमेकशब्द-पर्यायः सर्वनामशब्दः । यदाह त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तं । नि० १. ७. । इति । त्वमेकं प्रत्याभोगय आभोग्याय शब्दादिविषयार्थं । तथापरं प्रतीष्टये यागार्थं । तथान्यं प्रति राये धनार्थं च व्युच्छंतीति शेषः । उशब्दस्त्वर्थे । अपि च दभ्रमल्पं पश्यद्भ्यऽधकारावृतत्वेनेषद्द्रष्टृभ्यो मनुष्येभ्यो विचक्षे विशिष्टप्रकाशाय व्युच्छंत्युर्विया उर्वी विस्तीर्णोषाः सर्वाणि भूतजातानि तमसातिरोहितान्यजीगः । प्रकाशेनो-द्गीर्णानीव करोति ॥ जिह्मश्ये । शीङ् स्वप्ने । जिह्मं शेत इति जिह्मशीः । क्विप् चेति क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं ।

एरनेकाच इति यण्। उदात्तस्वरितयोर्यण इति विभक्तेः स्वरितत्वं । आभोगये । आभोगशब्दाच्चतुर्थ्येकवचने यकारोपजनः । यद्वा । आङ्पूर्वाद्भुजेर्बहुलवचनादौणादिकः क्विप्रत्ययः कुत्वं च । उर्विया । इयाडियाजीकाराणामुपसंख्यानमित्युर्वीशब्दादुत्तरस्य सोर्डियाजादेशः । विचक्षे । चक्षिङ् व्यक्तायां वाचि । विपूर्वादस्मात्संपदादिलक्षणो भावे क्विप् ॥

॥ इति प्रथमस्याष्टमे प्रथमो वर्गः ॥

षष्ठीमृचमाह ॥

क्षत्राय त्वं श्रवसे त्वं महीया इष्टये त्वमर्थमिव त्वमित्यै । विसदृशा जीविताभिप्रचक्ष उषा अजीगर्भुवनानि विश्वा ॥ ६ ॥

क्षत्राय । त्वं । श्रवसे । त्वं । महीयै । इष्टये । त्वं । अर्थंऽइव । त्वं । इत्यै ।

विऽसदृशा । जीविता । अभिऽप्रचक्षे । उषाः । अजीगः । भुवनानि । विश्वा ॥ ६ ॥

क्षत्राय । धननामैतत् । धनार्थं त्वमेकं प्रत्युषा व्युच्छंतीतिशेषः । तथा श्रवसेऽन्नार्थं त्वमेकं प्रति महीयै महत्यै इष्टयेऽग्निष्टोमादिमहायज्ञार्थं त्वमेकं प्रति व्युच्छंती । तथार्थमिवापेक्षितमर्थं प्रतीत्यै गमनार्थं त्वमेकं प्रति व्युच्छंती । अपि च विसदृशा विलक्षणानि नानारूपाणि जीवितानि जीवनोपायभूतानि कृषिवाणिज्यादीन्यभिप्रचक्ष आभिमुख्येन प्रकाशयितुं व्युच्छंत्युषाः सर्वाणि भूतजातानि तमसा निगीर्णान्यजीगः ।

प्रकाशनेनोक्तोर्णानीवाकरोत् ॥ त्वं । त्वसमसिमनेमित्यानुदात्तानि । फि० ४. १०. । इति सर्वानुदात्तत्वं । मह्यै । मह्ये । महेरिन् सर्वधातुभ्य इतीन्प्रत्ययः । कृदिकारादक्तिन इति ङीष् । उदात्तयण इति विभक्तेरुदात्तत्वं । छांदस ईकारो-पजनः । यद्वा महीशब्दादुत्तरस्य चतुर्थ्येकवचनस्य याडाप इति व्यत्ययेन याडागमः । छांदसमंतोदात्तत्वं । विसदृशा । त्यदादिषु दृशोऽनालोचने कञ्चेत्यत्र समानान्ययोश्चेति वचना-द्दृशेः कञ् । समानस्य छंदसीति सभावः । विगतसादृश्यानि । विसदृशानि । शेश्छंदसि बहुलमिति शेर्लोपः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अभिप्रचक्षे । चक्षेस्तुमर्थे सेसेनिति सेन्-प्रत्ययः । स्कोः संयोगाद्योरिति कलोपः । कत्वषत्वे ॥

सप्तमीमृचमाह ॥

एषा दिवो दुहिता प्रत्यदर्शि व्युच्छंती युवतिः शुक्रवासाः । विश्वस्येशाना पार्थिवस्य वस्व उषो अद्येह सुभगे व्युच्छ ॥ ७ ॥

एषा । दिवः । दुहिता । प्रति । अदर्शि । विऽउच्छंती । युवतिः । शुक्रऽवासाः ।

विश्वस्य । ईशाना । पार्थिवस्य । वस्वः । उषः । अद्य । इह । सुऽभगे । वि । उच्छ ॥ ७ ॥

दिवो दुहिता व्योम्नो दुहितृस्थानीया । तस्य हि पूर्वार्धे उषा उत्पाद्यते । सैषा व्युच्छंती तमो वर्जयंती प्रत्यदर्शि । सर्वैः प्राणिभिर्दृष्टाभूत् । कीदृशी सा । युवतिः । यावयित्री

फलानां पुरुषैः प्रापयित्री । नित्ययौवनोपेता वा । शुक्रवासाः । श्वेतवसना निर्मलदीप्तिर्वा । तथा विश्वस्य सर्वस्य पार्थिवस्य पृथिव्याः संबंधिनो वस्वो धनस्येशाना । ईश्वरी । हे सुभगे शोभनधन उषः । तादृशी त्वमद्यास्मिन्काल इहास्मिन्देवयजनदेशे व्युच्छ । तमांसि विवासय । वर्जयेत्यर्थः ॥ दिवः । ऊडिदमिति विभक्तेरुदात्तत्वं । व्युच्छंती । उच्छी विवासे । विवासो वर्जनं । तौदादिकः । युवतिः । यूनस्तिः । पा० ४. १. ७७. । शुक्रवासाः । वस आच्छादने । वस्ते सर्वमाच्छादयतीति प्रकाशो वासः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । ईशाना । ईश ऐश्वर्ये । अदादित्वाच्छपो लुक् । अनुदात्तेत्त्वाल्लसार्वधातुकानुदात्तत्वे धातुस्वरः । पार्थिवस्य । पृथिव्या ञाञाविति प्राग्दीव्यतीयोऽञ्प्रत्ययः । वस्वः । लिंगव्यत्ययः । घेर्ङितीति गुणस्य जसादिषु छंदसि वावचनमिति विकल्पितत्वादभावे यणादेशः ॥

अष्टमीमृचमाह ॥

परायतीनामन्वेति पाथ आयतीनां प्रथमा शश्वतीनां ।
व्युच्छंती जीवमुदीरयंत्युषा मृतं कं चन बोधयंती ॥ ८ ॥

पराऽयतीनां । अनु । एति । पाथः । आऽयतीनां । प्रथमा । शश्वतीनां ।
विऽउच्छंती । जीवं । उत्ऽईरयंती । उषाः । मृतं । कं । चन । बोधयंती ॥ ८ ॥

परायतीनां परागच्छंतीनामतीतानामुषसां संबंधि पाथो-ऽंतरिक्षैकदेशलक्षणं स्थानं । पाथोऽंतरिक्षं पथा व्याख्यातं । नि० ६. ७. । इति यास्कः । अथ्यतन्युषा अन्वेति । अनुगच्छति । अतीता उषसो यथा व्युष्टा एवमेवैषापि व्युच्छतीत्यर्थः । तथायतीनामागच्छंतीनां शश्वतीनां बह्वीनामुषसां प्रथमाद्या भवति । एषा यथा वर्तत एवमेवागामिन्योऽप्युषस इत्यर्थः । तादृशी व्युच्छंती तमो वर्जयंती जीवं प्राणिनां जीवात्मान-मुदीरयंती शयनादूर्ध्वं प्रेरयंत्युषा मृतं स्वापसमये प्रलीनेंद्रिय-त्वान्मृतमिव संतं कंचन कमपि पुरुषं बोधयंती पुनरिंद्रिय-प्रवेशेन चेतनं कुर्वंती प्रवर्तत इति शेषः ॥ परायतीनां । इण् गतौ । लटः शतृ । इणो यण् । उगितश्चेति ङीप् । छंदसि बहुलमिति नाम उदात्तत्वं ॥

नवमीमृचमाह ॥

उषो यदग्निं समिधे चकर्थ वि यदावश्चक्षसा सूर्यस्य ।
यन्मानुषान्यक्ष्यमाणाँ अजीगस्तद्देवेषु चकृषे भद्रमप्नः ॥९॥

उषः । यत् । अग्निं । सम्ऽइधे । चकर्थ । वि । यत् । आवः । चक्षसा । सूर्यस्य ।
यत् । मानुषान् । यक्ष्यमाणान् । अजीगरिति । तत् ।
देवेषु । चकृषे । भद्रं । अप्नः ॥ ९ ॥

हे उषस्त्वमग्निं गार्हपत्यादिरूपं समिधे समिंधनाय प्रज्वलनार्थं यच्चकर्थ कृतवती । उषःकाले ह्यग्नयो होमार्थमुप-समिध्यंते । अपि च तमसातिरोहितं जगत्सूर्यस्य चक्षसा

प्रकाशेन यद्द्राव:। व्यवृणोः। तमसा विश्लिष्टमकरोः। तथा मानुषान्मनोः पुत्रान्मनुष्यान्यच्छमाणान्यागं करिष्यतस्त्वं यदजोगः। पूर्वं तमसा ग्रस्तान्प्रकाशेनोद्गीर्णानिवाकरोः। हे उषो देवेषु मध्ये त्वमेव भद्रं भजनीयं तदेतच्चिविधिमप्र. कर्म चकर्षि। कृतवती। आवः। वृञ् वरणे। लुङि मंत्रे घसेति च्लेर्लुक्। गुणे हल्ङ्याब्भ्य इति सिलोपः। छंदस्यपि दृश्यत इत्याडागमः। मानुषान्। मनोर्जातावञ्यतौ षुक् चेत्यञ् षुगागमश्च॥

दशमीमृचमाह॥

कियात्या यत्समया भवाति या व्यूषुर्याश्च नूनं व्युच्छान्।

अनु पूर्वाः कृपते वावशाना प्रदीध्याना जोषमन्याभिरेति॥१०॥

कियति। आ। यत्। समया। भवाति। याः। विऽऊषुः।

याः। च। नूनं। विऽउच्छान्।

अनु। पूर्वाः। कृपते। वावशाना। प्रऽदीध्याना। जोषं।

अन्याभिः। एति॥ १०॥

समयेत्यव्ययं समीपवचनं। उषाः समया भवाति समीपस्था भवतीति यदेतत् तत्कियति काले प्रवृत्तं परिसमाप्तं वेत्याकारः प्रश्नार्थः। तदुक्तं भवति। उषा येन कालेन संयुक्ता स कालः कियान्। तस्य कालस्य किं परिमाणमिति। अनेनोषसोऽनंतत्वमुक्तं। तदेव स्पष्टीकरोति। पुरा या उषसो व्यूषुः। व्युष्टाः संजाताः। नूनमवश्यमितः परं याश्चोषसो व्युच्छान्। व्युच्छंति व्युष्टा भविष्यंति। तत्र पूर्वा व्युष्टा अतीता उषसो

वावशाना कामयमानेदानीं वर्तमानोषा अनुकृपते। अनुकल्पते। समर्था भवति। अतीता उषसो यथा प्रकाशमकुर्वन् तद्वदेषापि प्रकाशं करोतीत्यर्थः। तथा प्रदीध्याना प्रकर्षेण दीप्यमानोषा अन्याभिरागामिनीभिरुषोभिर्जोषं सहेति। संगच्छति। आगामिन्योऽप्येतदीयं प्रकाशमनुकुर्वंतीत्यर्थः। कियति। किं परिमाणमस्य। किमिदंभ्यो वो घः। पा० ५. २. ४०.। इति घत्वविधानसामर्थ्यात्किमृशब्दादपि परिमाणार्थे वतुब्वकारस्य घत्वं। इदंकिमोरीश्कीति किमः की आदेशः। घस्येयादेशे यस्येति लोपः। प्रत्ययाद्युदात्तत्वं। छांदसः सांहितिको दीर्घः। भवाति। लेट्याडागमः। व्यूषुः। विपूर्वो वसतिर्व्युच्छने वर्तते। लिट्युसि किति यजादित्वात्संप्रसारणं द्विर्वचनादि। व्युच्छान्। उच्छी विवासे। विवासो वर्जनं। लेट्याडागमः। संयोगांतस्य लोपः। कृपते। कृपू सामर्थ्ये। व्यत्ययेन शः। वावशाना। वश कांतौ। अस्माद्यङलुगंतात्ताच्छीलिकशानश्। प्रदीध्याना। दीधीङ् दीप्तिदेवनयोः। लटः शानच्। अदादित्वाच्छपो लुक्। जक्षित्यादयः षट् इत्यभ्यस्तसंज्ञायामभ्यस्तानामादिरित्याद्युदात्तत्वं। गतिसमासे कृदुत्तरपदप्रकृतिस्वरत्वं॥

॥ इति प्रथमस्याष्टमे द्वितीयो वर्गः॥

एकादशीमृचमाह॥

ई॒युष्टे ये पूर्व॑तरा॒मप॑श्यन्व्यु॒च्छन्ती॑मु॒षसं॒ मर्त्या॑सः।

अ॒स्माभि॑रू॒ नु प्र॑ति॒चक्ष्या॑भू॒दो ते य॑न्ति॒ ये अ॑प॒रीषु॑

पश्या॑न्॥ ११॥

ईयुः। ते। ये। पूर्वऽतरां। अपश्यन्। विऽउच्छंतीं।

उषसं। मर्त्यासः।

अस्माभिः। ऊं इतिं। नु। प्रतिऽचक्ष्यां। अभूत्। ओ

इतिं। ते। यंति। ये। अपरीषुं। पश्यान्॥ ११॥

ये मर्त्यासो मरणधर्माणो मनुष्या व्युच्छंतीं विवासयंतीं पूर्वतरामतिशयेन पूर्वां विप्रकृष्टामपश्यन्। दृष्टवंतः। ते मनुष्या ईयुः। गताः। तथास्माभिरपि नु इदानीं प्रतिचक्ष्या प्रकर्षेण द्रष्टव्याभूत्। जाता। तथापरीषु भाविनीषु रात्रिषु ये मनुष्या एतामुषसं पश्यान् पश्यंति ते। आ उ इति निपातद्वयसमुदायः। तत्र उ इत्येतदवधारणे। एव यंति। आगच्छंत्येव। कालत्रयेऽप्येषा व्याप्य वर्तत इत्यर्थः। ईयुः। इण् गतौ। लिटुसोणो यणिति यणादेशः। द्विर्वचनेऽचीति तस्य स्थानिवद्भावाद्विर्भावे दीर्घं इणः कितीत्यभ्यासदीर्घत्वं। ते। युष्मत्तततक्षुःष्वंतःपादमिति सकारस्य षत्वं ष्टुत्वं च। मर्त्यासः। आज्जसेरसुक्॥

द्वादशीमृचमाह॥

यावयद्द्वेषा ऋतपा ऋतेजाः सुम्नावरी सूनृता ईरयंती।

सुमंगलीर्बिभ्रती देववीतिमिहाद्योषः श्रेष्ठतमा व्युच्छ॥१२॥

यवयत्ऽद्वेषाः। ऋतऽपाः। ऋतेऽजाः। सुम्नऽवरी।

सूनृताः। ईरयंती।

सुऽमंगलीः । बिभ्रंती । देवऽवीतिं । इह । अद्य । उषः ॥

श्रेष्ठऽतमा । वि । उच्छ ॥ १९ ॥

यावयद्द्वेषाः । यावयंति असमत्तः पृथक्कृतानि द्वेषांसि द्वेष्टॄणि राक्षसादीनि यया सा तथोक्ता । न ह्युषसि जातायां राक्षसादयोऽवतिष्ठंते यतस्ते निशाचराः । ऋतपा ऋतस्य सत्यस्य यज्ञस्य वा पालयित्री । ऋतेजा यज्ञार्थं प्रादुर्भूता । सत्यामुषस्यहनि यागादीनि अनुष्ठीयंते । अतो यज्ञार्थं जातेत्युच्यते । सुम्नावरी । सुम्नमिति सुखनाम । तद्वती । सूनृताः । वाङ्नामैतत् । पशुपक्षिमृगादीनां वचांसीरयंती प्रेरयंत्युत्पादयंती सुमंगलीः सौमंगल्योपेता । पत्या कदाचिदपि न वियुक्तेत्यर्थः । देववीतिं देवैः काम्यमानं यज्ञं बिभ्रती धारयंती हे उषः श्रेष्ठतमोक्तेन प्रकारेणातिप्रशस्ता त्वमिहास्मिन्देवयजनदेशेऽद्यास्मिन्यागसमये व्युच्छ । विवासय ॥ यावयद्द्वेषाः । यु मिश्रणामिश्रणयोः । अस्माण्णिजंतात्लटः शतृ । तस्य छंदस्युभयथेत्यार्धधातुकत्वाददुपदेशाल्लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययस्वर एव शिष्यते । पुनर्बहुव्रीहौ स एव स्वरः । छांदसः पदकालीनो ह्रस्वः । ऋतपाः । ऋतं पाति रक्षतीत्यृतपाः । पा रक्षणे । विच् । ऋतेजाः । ऋते निमित्तभूते जायत इत्यृतेजाः । जनी प्रादुर्भावे । जनसनखनक्रमगमो विट् । विड्वनोरनुनासिकस्यादित्यात्वं । तत्पुरुषे कृति बहुलमित्यलुक् । सुम्नावरी । छंदसीवनिपाविति मत्वर्थीयो वनिप् । वनो रचेति ङीप् नकारस्य रेफादेशश्च । अन्येषामपि दृश्यत इति दीर्घः । व्यत्ययेन प्रत्ययाद्युदात्तत्वं । सुमंगलीः । सुमंग-

जात्संज्ञायामिति गौरादिषु पाठात् ङीष् । सर्वं विधयश्छंदसि विकल्प्यंत इति हलड्याब्भ्य इति सुलोपस्य विकल्पितत्वादभावे रुत्वविसर्गौ । देववीतिं । वी गतिप्रजननकांत्यसनखादनेषु । देवैर्वीयते कामयत इति देववीतिर्यज्ञः । कर्मणि क्तिन् । दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं ॥

त्रयोदशीमृचमाह ॥

शश्वत्पुरोषा व्युवास देव्यथो अद्येदं व्यावो मघोनी ।
अथो व्युच्छादुत्तराँ अनु द्यूनजरामृता चरति स्वधाभिः ॥ १३ ॥

शश्वत् । पुरा । उषाः । वि । उवास । देवी । अथो इति ।
अद्य । इदं । वि । आवः । मघोनी ।
अथो इति । वि । उच्छात् । उत्ऽतरान् । अनु । द्यून् ।
अजरा । अमृता । चरति । स्वधाभिः ॥ १३ ॥

देवी देवनशीलोषाः पुरा पूर्वस्मिन्काले शश्वत् नित्यं संततं व्युवास । व्यौच्छत् । अथो अनंतरमद्यास्मिन्काले मघोनी धनवत्युषास्तमसा तिरोहितमिदं सर्वं जगद्व्यावः । विवासितं प्रकाशनेन तमसा वियुक्तमकरोत् । अथो अनंतरमुत्तरानूर्ध्वतरान्भाविनो द्यून् दिवसाननुलक्ष्यागामिष्वपि दिवसेषु व्युच्छात् । व्युच्छति विवासयति । अतः कालत्रयव्यापिनी सोषा अजरा जरारहिता सर्वदैकरूपामृता मरणरहिता च सती स्वधाभिरात्मीयैस्तेजोभिः सह चरति । वर्तते ॥ उवास । वस निवासे । लिट्यभ्यासस्योभयेषामित्यभ्यासस्य संप्रसारणं ।

भावः॥ तस्मादेव धातोर्लङि बहुलं छंदसीति विकरणस्य लुक्। इतश्चानश्य इति तिलोपः। छंदस्यपि दृश्यत इत्याडागमः। उच्छात्। लेट्याडागमः। उत्तरान्। दीर्घादटि समानपाद इति नकारस्य रुत्वं। आतोऽटि नित्यमिति सानुनासिक आकारः। अनु। अनुर्लक्षण इत्यनोः कर्मप्रवचनीयत्वं। अजरा अमृता। तत्र बहुव्रीहौ नञो जरमरमित्रमृता इत्युत्तरपदाद्युदात्तत्वं॥

चतुर्दशीमृचमाह॥

व्यं१जिभिर्दिव आतांस्वद्यौदप कृष्णां निर्णिजं देव्यावः।
प्रबोधयंत्यरुणेभिरश्वैरोषा याति सुयुजा रथेन॥ १४॥

वि। अंजिऽभिः। दिवः। आताँसु। अद्यौत्। अप।
कृष्णां। निःऽनिजं। देवी। आवरित्यावः।
प्रऽबोधयंती। अरुणेभिः। अश्वैः। आ। उषाः। याति।
सुऽयुजा। रथेन॥ १४॥

दिवो नभसः संबंधिनीष्वातासु। दिङ्नामैतत्। आतता विस्तीर्णासु दिक्षूषा अंजिभिर्व्यंजकैः प्रकाशकैस्तेजोभिर्व्यद्यौत् विद्योतते प्रकाशते। सैषा देवी देवनशीला कृष्णां निर्णिजं निर्णिगिति रूपनाम। रात्रिकृतं कृष्णं रूपमपावः। अपावृणोत्। प्रकाशेन तिरस्कृतवती। अपि च। अरुणेभिररुणैर्लोहितवर्णैरश्वैर्व्यापनशीलैः स्वकीयैः किरणैस्तुरगैर्वा सुयुजा सम्यक् युक्तेन रथेनोषा आयाति। आगच्छति। किं कुर्वती।

प्रबोधयंती । सुप्तान्प्राणिनः प्रबुद्धान्कुर्वंती । अद्यौत् । द्युत दीप्तौ । लुङ् । द्युद्भ्यो लुङीति परस्मैपदं । व्यत्ययेन च्लेर्लुक् । गुणे प्राप्ते वृद्धिश्छांदसी । यद्वा द्यु अभिगमने । आदादिकः । उतो वृद्धिर्लुकि हलि । पा० ७. ३. ८९. । इति वृद्धिः ॥

देवानां हविःप्वावहंतीत्येषोषसो याज्या । सूत्रितं च । आ द्यां तनोषि रश्मिभिरावहंती पोष्या वार्याणि न ता अर्वा रेणुक काष्टा अश्नुते । आ ६. १४. । इति ॥

तामेतां पंचदशीमृचमाह ॥

आवहंती पोष्या वार्याणि चित्रं केतुं कृणुते चेकिताना ।

ईयुषीणामुपमा शश्वतीनां विभातीनां प्रथमोषा

व्यश्वैत् ॥ १५ ॥

आऽवहंती । पोष्या । वार्याणि । चित्रं । केतुं । कृणुते । चेकिताना ।

ईयुषीणां । उपऽमा । शश्वतीनां । विऽभातीनां । प्रथमा । उषाः । वि । अश्वैत् ॥ १५ ॥

पोष्या यावज्जीवं पोषणसमर्थानि वार्याणि वरणीयानि धनान्यावहंत्यस्मभ्यमानयंती चेकिताना सर्वं जनं प्रज्ञापयंत्युषाश्चित्रं विचित्रमाश्चर्यभूतं चायनीयं वा केतुं प्रज्ञापकं रश्मिं कृत्स्नजगत्प्रकाशनसमर्थं कृणुते । स्वात्मनः प्रकाशं कुरुते । सैषेयुषीणां गमनवतीनां पूर्वनिष्पन्नानां शश्वतीनां बह्वीनामुषसामुपमा समीपे निर्मितोपमानभूता वा विभातीनां विशेषेण प्रकाशमानानामागामिनीनामुषसां प्रथमाद्या । एवं-

भूतोषा व्यश्वैत् । तेजसा प्रवृद्धासीत् ॥ पोष्या । पुष पुष्टौ । पोषणं पोषः । भावे घञ् । तत्र भवानि । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं । यिग्छंदसि बहुलमिति यिलोपः । वार्याणि । वृङ् संभक्तौ । ऋहलोर्ण्यत् । ईडवंदवृशंसदुहां ण्यत इत्याद्युदात्तत्वं । चेकिताना । कित ज्ञाने । अस्माद्यङं-ताल्लटः । शानच् । छंदस्युभयथेति तस्यार्द्धधातुकत्वादतो-लोपयलोपौ । अभ्यस्तानामादिरित्याद्युदात्तत्वं । ईयुषीणां । इण् गतौ । लिटः क्वसुः । द्विर्भावादि । उगितश्चेति ङीप् । वसोः संप्रसारणं । इणो यणिति यणादेशः । दीर्घं इणः कितीत्यभ्यासस्य दीर्घत्वं । शासिवसिघसीनां चेति षत्वं । ङीप्सुपौ पित्त्वादनुदात्तौ । विभातीनां । भा दीप्तौ । अस्मा-च्छतंतात्पूर्ववत् ङीप् । ङ्याश्छंदसि बहुलमिति नाम उ-दात्तत्वं । अश्वैत् । टुओश्वि गतिवृद्ध्योः । लङि बहुलं छंदसीति विकरणस्य लुक् । गुणे कृते व्यत्ययेनात्वं ॥

॥ इति प्रथमस्याष्टमे तृतीयो वर्गः ॥

षोड़शीमृचमाह ॥

उदीर्ध्वं जीवो असुर्न आगादप प्रागात्तम आ ज्योतिरेति ।
आरैक्पंथां यातवे सूर्यायागंन्म यत्र प्रतिरंत आयुः ॥ १६ ॥

उत् । ईर्ध्वं । जीवः । असुः । नः । आ । अगात् । अप । प्र । अगात् । तमः । आ । ज्योतिः । एति ।
अरैक् । पंथां । यातवे । सूर्याय । अगंन्म । यत्र । प्रऽतिरंते । आयुः ॥ १६ ॥

हे मनुष्या उदीर्ध्वं । प्रयत्नं परित्यज्योद्गच्छत । नोऽस्माकमसुः शरीरस्य प्रेरयिता जीवो जीवात्मागात् । आगतवान् । तमोऽपप्रागात् । अपक्रांतं । उषसः प्रकाशे सति सर्वजनोनव्यापारयोगः । तस्मात्परमात्मरूपतया स च जीवस्तदेव ज्योतिरेति । आगच्छति । सूर्याय सूर्यस्य पंथां मार्गमारैक् । विविक्तीकरोति । यातवे गमनाय । तस्मिन्देशेऽगन्म गच्छामो यत्र यस्मिन्देश आयुः । अन्ननामैतत् । अन्नं प्रतिरंते । प्रपूर्वस्तिरतिर्वर्धनार्थः । उदारा दानेन प्रवर्धयंति ॥ ईर्ध्वं । ईर गतौ । आदादिकोऽनुदात्तेत् । आरैक् । रिचिर् विरेचने । लङि बहुलं छंदसीति विकरणस्य लुक् । गुणे व्यत्ययेनैत्वं । पंथां । द्वितीयायामपि पथिमथ्यृभुक्षामादिति व्यत्ययेनात्वं । अगन्म । गमेर्लङि बहुलं छंदसीति विकरणस्य लुक् । म्वोश्चेति मकारस्य नकारः ॥

सप्तदशीमृचमाह ॥

स्यूमंना वाच उदियर्ति वह्निः स्तवानो रेभ उषसो विभातीः ।
अद्या तदुच्छ गृणते मघोन्यस्मे आयुर्नि दिदीहि प्रजावत् ॥ १७ ॥

स्यूमंना । वाचः । उत् । इयर्ति । वह्निः । स्तवानः । रेभः ।
उषसः । विऽभातीः ।
अद्य । तत् । उच्छ । गृणते । मघोनि । अस्मे इति । आयुः ।
नि । दिदीहि । प्रजाऽवत् ॥ १७ ॥

वह्निः स्तोत्राणां वोढा रेभः। स्तोतृनामैतत्। स्तोतोषसो विभातीस्तमसोऽपनोदनेन प्रकाशमाना उषोदेवताः स्तवानः स्तुवन् वाचो देवतारूपाया: संबंधीनि स्यूमना स्यूमान्यनुस्यूतानि संततान्युक्थान्युदियर्ति। उद्गमयति। उच्चारयति। अतो हे मघोनि मघवत्युषः। अद्यास्मिन्दिवसे गृणते स्तुवते तस्मै पुरुषाय तदुच्छ। दृष्टिनिरोधकतया प्रसिद्धं नैशं तमो विवासय। वर्जय। अस्मे अस्मभ्यं च प्रजावत् प्रजाभिः पुत्रपौत्रादिभिर्युक्तमायुरन्नं निदिदीहि। नितरां प्रकाशय। दीदेतिश्छांदसो दीप्तिकर्मा। प्रयच्छेत्यर्थः॥ स्यूमना। षिवु तंतुसंताने। अन्येभ्योऽपि दृश्यंत इति दृशिग्रहणस्य सर्वोपाधिव्यभिचारार्थत्वात्कर्मणि मनिन्। छ्वोः शूडित्यूठ्। आङयाजयारां चोपसंख्यानमिति विभक्तेराङादेशः। यद्वा। औणादिको भावे मक्। पामादिलक्षणो मत्वर्थीयो नः। बंधनयुक्तानीत्यर्थः। शेश्छंदसि बहुलमिति शेर्लोपः। व्यत्ययेनाद्युदात्तत्वं। वाचः। सावेकाच इति ङस उदात्तत्वं। इयर्ति। ऋ गतौ। जौहोत्यादिकः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। स्तवानः। ष्टुञ् स्तुतौ। शानच्छंदादित्वाच्छपो लुक्। तस्य छंदस्युभयथेत्यार्धधातुकत्वेन ङित्त्वाभावाद्गुणावादेशौ। व्यत्ययेनाद्युदात्तत्वं। विभातीः। शतुरनुमो नद्यजादी इति ङीप उदात्तत्वं। गृणते। गॄ शब्दे। क्र्यादिकः। प्वादीनां ह्रस्वः। पूर्वोक्तेन सूत्रेण विभक्तेरुदात्तत्वं। अस्मे। सुपां सुलुगिति चतुर्थ्याः शे आदेशः॥

अष्टादशीमृचमाह ॥

गोमतीरुषसः सर्ववीरा व्युच्छंति दाशुषे मर्त्याय।

वायोरिव सूनृतानामुदर्के ता अश्वदा अश्नवत्सोमसुत्वा ॥१८॥

ताः। गोऽमंतीः। उषसः। सर्वऽवीराः। विऽउच्छंति।

दाशुषे। मर्त्याय।

वायोःऽइव। सूनृतानां। उत्ऽअर्के। ताः। अश्वऽदाः।

अश्नवत्। सोमऽसुत्वा ॥ १८ ॥

दाशुषे हवींषि दत्तवते मर्त्याय मनुष्याय यजमानाय गोमतीर्गोमत्यो बहुभिर्गोभिर्युक्ताः सर्ववीराः सर्वैः प्रेरणसमर्थैर्वीरैः शूरैर्युक्ता या उषसो व्युच्छंति। तमो वर्जयंति। वायोरिव वायुवच्छीघ्रं प्रवर्तमानानां सूनृतानां स्तुतिरूपाणां वाचामुदर्के समाप्तौ। अश्वदा अश्वानां दात्रीस्ता उषसः सोमसुत्वा सोमानामभिषोता यजमानोऽश्नवत्। व्याप्नोतु॥ दाशुषे। दाशृ दाने। दाश्वान् साह्वान्मीढ्वानिति क्वसुप्रत्ययांतो निपात्यते। चतुर्थ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। शासिवसिघसीनां चेति षत्वं। अश्नवत्। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। लेट्यडागमः। इतश्च लोप इतीकारलोपः। सोमसुत्वा। षुञ् अभिषवे। अन्येभ्योऽपि दृश्यंत इति क्वनिप्। ह्रस्वस्य पितीति तुक् ॥

एकोनविंशीमृचमाह ॥

माता देवानामदितेरनीकं यज्ञस्य केतुर्बृहती वि भाहि ।
प्रशस्तिकृद्ब्रह्मणे नो व्यु१च्छा नो जने जनय विश्ववारे ॥१९॥

माता । देवानां । अदितेः । अनीकं । यज्ञस्य । केतुः ।
बृहती । वि । भाहि ।
प्रशस्तिऽकृत् । ब्रह्मणे । नः । वि । उच्छ । आ । नः । जने ।
जनय । विश्वऽवारे ॥ १९ ॥

हे उषस्त्वं देवानां माता जननी । उषसि सर्वे देवाः स्तुत्या प्रबोध्यंते । अतः सा तज्जननवतीत्युच्यते । अत एवादितिर्देवानां मातुरनीकं प्रत्यनीकं प्रतिस्पर्धिनी त्वमित्यर्थं । यद्वा दीव्यंतीति देवा रश्मयः । तेषां निर्मात्री । अदितेरखंडनीयाया भूमेरनीकं मुखं । यथेंद्रियाश्रयत्वान्मुखं प्रकाशकं । एवमुषा भूमिः प्रकाशयित्रीत्यर्थः । यज्ञस्य केतुः केतयित्री ज्ञापयित्री बृहती महती सती विभाहि । प्रकाशस्व । अपि च । प्रशस्तिकृत् सम्यक् स्तुतमिति प्रशंसनं कुर्वती नोऽस्मदीयाय ब्रह्मणे मंत्ररूपाय स्तोत्राय व्युच्छ । विवासय । तदनंतरं हे विश्ववारे विश्वैर्वरणीय उषो नोऽस्मान् जने जनपद आजनय । आभिमुख्येन प्रादुर्भावय । अवस्थापयेत्यर्थः ॥ बृहती । बृहन्महतोरुपसंख्यानमिति ङीप उदात्तत्वं । प्रशस्तिकृत् । शंसु स्तुतौ । भावे क्तिन् । तितुत्रेतीट्प्रतिषेधः । अनिदितामिति नलोपः । तस्मिन्नुपपदे करोतेः क्विप् चेति क्विप् ॥ जनय । जनी प्रादु

भावे । णिच्युपधावृद्धिः । जनी जृष् क्नसु रंजोऽमंताश्चेति मित्त्वे मितां ह्रस्व इति ह्रस्वत्वं ॥

विंशीमृचमाह ॥

यच्चित्रमप्न॑ उषसो वहंतीजानाय॑ शशमानाय॑ भद्रं ।
तन्नो मित्रो वरु॑णो मामहंतामदि॑तिः सिंधुः पृथिवी
उत द्यौः ॥ २० ॥

यत् । चित्रं । अप्नः॑ । उषसः॑ । वहंति । ईजानाय॑ ।
शशमानाय॑ । भद्रं ।
तत् । नः । मित्रः । वरु॑णः । ममहंतां । अदि॑तिः । सिंधुः ।
पृथिवी । उत । द्यौः ॥ २० ॥

चित्रं चायनीयमप्न आप्तव्यं यज्ञनमुषसो वहंति । आनयंति । ईजानाय हविर्भिरिष्टवते शशमानाय स्तुतिभिः संभजमानाय पुरुषाय भद्रं भजनीयं तद्भवतीति शेषः । यदनेन सूक्तेनास्माभिः प्रार्थितं तन्मित्रादयः षट् देवता मामहंतां । पूजितं कुर्वंतु ॥ अप्नः । आप्लृ व्याप्तौ । आपः कर्माख्यायां ह्रस्वो नुट् च वेति बहुलग्रहणादकर्माख्यायामप्यसुन् । धातोर्ह्रस्वो नुडागमश्च । ईजानाय । यजतेश्छंदसि लिट् । लिटः कानज्वा । वचिस्वपीत्यादिना संप्रसारणं । द्विर्वचनादि । शशमानाय । शश प्लुतगतौ । ताच्छीलिकश्चानश् । तस्य सार्वधातुकत्वाभावाददुपदेशाल्लसार्वधातुकस्वराभावे चित्स्वर एव शिष्यते ॥

॥ इति प्रथमस्याष्टमे चतुर्थो वर्गः ॥

इमा रुद्रायेत्येकादशर्चं नवमं सूक्तं कुत्सस्यार्षं। दशम्येकादश्यौ त्रिष्टुभौ। शिष्टा नव जगत्यः। रुद्रो देवता। तथा चानुक्रांतं। इमा एकादश रौद्रं द्वित्रिष्टुबंतमिति॥ शूलगवादिषु रुद्रदेवत्येषु कर्मस्वनेन सूक्तेन दिशुपस्थेया। तथा च सूत्रितं। कद्रुद्रायेमा रुद्राया ते पितरिमा रुद्राय स्थिरधन्वने गिर इति सर्वरुद्रयज्ञेषु दिशामुपस्थानमिति॥

तत्र प्रथमामृचमाह॥

इमा रुद्राय तवसे कपर्दिने क्षयद्वीराय प्र भरामहे मतीः।
यथा शमसद्द्विपदे चतुष्पदे विश्वं पुष्टं ग्रामे अस्मिन्ननातुरं॥१॥

इमाः। रुद्राय। तवसे। कपर्दिने। क्षयत्ऽवीराय। प्र।
भरामहे। मतीः।
यथा। शं। असत्। द्विऽपदे। चतुःऽपदे। विश्वं। पुष्टं।
ग्रामे। अस्मिन्। अनातुरं॥१॥

रुद्राय। रोदयति सर्वमंतकाल इति रुद्रः। यद्वा रुत्संसाराख्यं दुःखं। तद्द्रावयत्यपगमयति विनाशयतीति रुद्रः। यद्वा रुतः शब्दरूपा उपनिषदः। ताभिर्द्रूयते गम्यते प्रतिपाद्यत इति रुद्रः। यद्वा रुत् शब्दात्मिका वाणी तत्प्रतिपाद्यात्मविद्या वा। तामुपासकेभ्यो राति ददातीति रुद्रः। यद्वा रुणद्ध्यावृणोतीति रुदंधकारादि। तद्दृणाति विदारयतीति रुद्रः। यद्वा कदाचिद्देवासुरसंग्रामेऽग्न्यात्मको रुद्रो देवैर्निचितं धनमपहृत्य निरगात्। असुराञ्जित्वा देवा एनमन्विष्य हृत्वा

चनमपहरन् । तदानीमरुदत् । तस्माद्रुद्र इत्याख्यायते । तथा च तैत्तिरीयकं । सोऽरोदीद्यदरोदीद्रुद्रस्य रुद्रत्वमिति । तस्मै रुद्राय मतीर्मननीया इमा स्तुतीः प्रभरामहे । प्रकर्षेण निष्पादयामः । कीदृशाय । तवसे । प्रवृद्धाय । कपर्दिने । जटिलाय । क्षयद्वीराय । क्षयंतो विनश्यंतो वीरा यस्मिन् तादृशाय । यद्वा क्षयतिरैश्वर्यकर्मा । क्षयंतः प्राप्तैश्वर्या वीरा मरुद्गणाः पुत्रा यस्य तस्मै । यथा येन प्रकारेण शं शमनीयानां रोगाणामुपशमनं द्विपदे अस्मदीयाय मनुष्याय चतुष्पदे गवाश्व-प्रभृतये चासत् भवेत् तेन प्रकारेण स्तुतीः कुर्म इत्यर्थः । अतोऽस्मिन्नस्मदीये ग्रामे वर्तमानं विश्वं सर्वं प्राणिजात-मनातुरं । आतुरा रुग्णाः । तै रहितं सत् पुष्टं प्रवृद्धं भवतु ॥ रुद्राय । रोदेर्णिलुक् । चेति रक् । तवसे । तवतिर्वृद्ध्यर्थः । सौत्रो धातुः । औणादिकोऽसिप्रत्ययः । क्षयद्वीराय । क्षि क्षये । लटः शतृ । छंदस्युभयथेति शतुरार्द्धधातुकत्वेनादुपदे-शाल्लसार्वधातुकानुदात्तत्वाभावात्तस्यैव स्वरः शिष्यते । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । असत् । अस भुवि । लेट्यडागमः । इतश्च लोप इतीकारलोपः । द्विपदे । द्वौ पादावस्य । संख्या-सुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः । चतुर्थ्येकवचने भसंज्ञायां पादः पदिति पद्भावः । एकदेशविकृतस्यानन्यत्वात् द्वित्रिभ्यां पाद्दन्मूर्द्धसु बहुव्रीहावित्युत्तरपदाद्युदात्तत्वं । चतु-ष्पदे । स्वरवर्जं पूर्ववत् । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । पूर्वपदं च त्रः संख्याया इत्याद्युदात्तं ॥

रुद्रदेवत्ये पशौ वपापुरोडाशयोर्मृडा नो रुद्रेत्यादिके द्वे अनुवाक्ये । तथा च सूत्रितं । मृडा नो रुद्रोत नो

मयस्कृधीति हे आ ते पितर्मरुतां सुम्नमेतु । सा० ३.८. । इति ॥

तयोराद्यां सूक्ते द्वितीयामृचमाह ॥

मृळा नो रुद्रोत नो मयस्कृधि क्षयद्वीराय नमसा विधेम ते ।
यच्छं च योश्च मनुरायेजे पिता तदश्याम तव रुद्र प्रणीतिषु ॥ २ ॥

मृळ । नः । रुद्र । उत । नः । मयः । कृधि । क्षयत्ऽवीराय । नमसा । विधेम । ते ।
यत् । शं । च । योः । च । मनुः । आऽयेजे । पिता । तत् । अश्याम । तव । रुद्र । प्रऽनीतिषु ॥ २ ॥

हे रुद्र नोऽस्मभ्यमस्मदर्थं मृळ । त्वं सुखयिता भव । उत अपि च तदनंतरं नोऽस्माकं मयः सुखं कृधि । कुरु । वयं च क्षयद्वीराय क्षयितमर्ववीरं प्राप्तैश्वर्यैर्मरुद्भिर्युक्तं वा ते त्वां नमसा हविर्लक्षणेनान्नेन नमस्कारेण वा विधेम । परिचरेम । विधतिः परिचरणकर्मा । अपि च । पितोत्पादको मनुः स्वकीयाभ्यः प्रजाभ्यः शं रोगाणां शमनं योश्च भयानां यावनं च यदेतद्द्वयमायेजे । देवेभ्यः सकाशात्प्राप्य दत्तवान् । हे रुद्र तव प्रणीतिषु प्रकृष्टनयनेषु सत्सु तद्वयमश्याम । व्याप्नुयाम ॥ मृळ । मृड सुखने । तौदादिकः । द्व्यचोऽतस्तिङ इति संहितायां दीर्घः । कृधि । करोतेर्लोटि बहुलं छंदसीति

धिकरणस्य लुक्। श्रुसृणुपृकृवृभ्यश्छंदसीति हेर्धिः। अतः कृकमीति भयसो विसर्जनीयस्य सत्वं। क्षयद्वीराय। क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी। विधेमः। विध विधाने। तौदादिकः। आयेजे। यज देवपूजासंगतिकरणदानेषु। लिटि संज्ञापूर्वकस्य विधेरनित्यत्वात्संप्रसारणाभाव एत्वाभ्यासलोपौ। अश्याम। अशू व्याप्तौ। व्यत्ययेन परस्मैपदं। बहुलं छंदसीति विकरणस्य लुक्॥

तृतीयामृचमाह॥

अश्याम ते सुमतिं देवयज्यया क्षयद्वीरस्य तव रुद्र मीढः।
सुम्नायन्निद्विशो अस्माकमा चरारिष्टवीरा जुहवाम
ते हविः॥ ३॥

अश्याम। ते। सुऽमतिं। देवऽयज्यया। क्षयत्ऽवीरस्य।
तव। रुद्र। मीढ्वः।
सुम्नऽयन्। इत्। विशः। अस्माकं। आ। चर। अरिष्टऽवीराः। जुहवाम। ते। हविः॥ ३॥

हे मीढ्वः सेक्तः कामाभिवर्षक नित्यतरुण वा रुद्र क्षयद्वीरस्य क्षयितप्रतिपक्षस्य मरुद्भिर्युक्तस्य वा तव सुमतिं शोभनां कल्याणीमनुग्रहात्मिकां बुद्धिं ते त्वत्संबंधिनो वयं देवयज्यया देवयागेन त्वद्देवत्येन यज्ञेनाश्याम। प्राप्नवाम। त्वं चास्माकं विशः प्रजा अभिलक्ष्याचर। आगच्छ। किं कुर्वन्। सुम्ना-

अक्षित् । सुम्नमिति सुखनाम । तासां प्रजानां सुखमिच्छन्नेव । सुखप्रद एव भवेत्यर्थः । ततो वयमरिष्टवीराः । वीर्याज्जायंत इति वीराः प्रजाः । अरिष्टा अहिंसिता वीरा येषां तथाभूताः संतस्ते तुभ्यं हविश्चरुपुरोडाशादिकं जुहवाम । चोदित आधारे प्रक्षिपाम ॥ सुमतिं । मतिर्मननं । शोभनं मननं यस्यां बुद्धौ सा सुमतिः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । देवयज्यया । छंदसि निष्टर्क्यत्यादौ यजेर्यप्रत्ययो निपात्यते स्त्रीलिंगता च । मीढ्वः । मिह सेचने । दाश्वान् साह्वान् मीढ्वानिति क्वसुप्रत्ययांतो निपातितः । संबुद्धौ मतुवसो रुरिति रुत्वं । सुम्नायन् । सुम्नं परेषामिच्छति । छंदसि परेच्छायामपीति क्यच् । न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । देवसुम्नयोर्यजुषि काठके । पा० ७. ४. ३८. । इति विधीयमानमात्वं व्यत्ययेनात्रापि द्रष्टव्यं ॥

चतुर्थीमृचमाह ॥

त्वेषं वयं रुद्रं यज्ञसाधं वंकुं कविमवसे नि ह्वयामहे ।
आरे अस्मद्दैव्यं हेळो अस्यतु सुमतिमिद्वयमस्या
वृणीमहे ॥ ४ ॥

त्वेषं । वयं । रुद्रं । यज्ञऽसाधं । वंकुं । कविं । अवसे ।
नि । ह्वयामहे ।
आरे । अस्मत् । दैव्यं । हेळः । अस्यतु । सुऽमतिं । इत् ।
वयं । अस्य । आ । वृणीमहे ॥ ४ ॥

अवसे रक्षणाय रुद्रं महादेवं निह्वयामहे । नितरामाह्वयामः । कीदृशं । त्वेषं दीप्तं यज्ञसाधं यज्ञस्य साधयितारं । एष हि यज्ञं स्विष्टं करोति । तथा च तैत्तिरीयके देवा वै यज्ञाद्रुद्रमंतरायन्नित्युपक्रम्याम्नातं । स्विष्टं वैणाव इदं भविष्यति यदिमं राधयिष्याम इति स्विष्टकृतः स्विष्टकृत्त्वमिति । वंकुं । कुटिलगंतारं कविं क्रांतदर्शिनं । स च रुद्रो दैव्यं देवस्य द्योतमानस्य संबंधिनं हेड़ः क्रोधमस्मदारेऽस्मत्तो दूरदेशेऽस्यतु । प्रेरयतु । अस्य महादेवस्य सुमतिमित् शोभनामनुग्रहरूपां बुद्धिमेव वयमाह्वणीमहे । आभिमुख्येन संभजामहे ॥ यज्ञसाधं । यज्ञं साधयतीति यज्ञसात् । षिधु संराद्धौ । सिध्यतेरपारलौकिक इत्यात्वं । यद्वा राध साध संसिद्धौ । अस्मात्ण्यंतात् क्विप् । वंकुं । वकि कौटिल्ये । औणादिक उप्रत्ययः । निह्वयामहे । निसमुपविभ्यो ह्व इत्यात्मनेपदं । दैव्यं । देवाद्यञञाविति प्राग्दीव्यतीयो यञ् । अस्यतु । असु क्षेपणे । दैवादिकः । वृणीमहे । वृङ् संभक्तौ । क्रैय्यादिकः ॥

पंचमीमृचमाह ॥

दि॒वो व॑रा॒हम॑रु॒षं क॑प॒र्दिनं॑ त्वे॒षं रू॒पं नम॑सा॒ नि ह्व॑यामहे ।
हस्ते॒ बिभ्र॑द्भेष॒जा वार्या॑णि॒ शर्म॒ वर्म॑ छ॒र्दिर॒स्मभ्यं॑ यंसत् ॥५॥

दि॒वः । व॒रा॒हं । अ॒रु॒षं । क॒प॒र्दिनं॑ । त्वे॒षं । रू॒पं । नम॑सा ।
नि । ह्व॒या॒म॒हे॒ ।
हस्ते॑ । बिभ्र॑त् । भे॒ष॒जा । वार्या॑णि । शर्म॑ । वर्म॑ । छ॒र्दिः ।
अ॒स्मभ्य॑ । यं॒स॒त् ॥ ५ ॥

वराहं वराहाहारमुत्कृष्टभोजनं । यद्वा वराहवद्दृढांगं । अरुषमारोचमानं कपर्दिनं जटाभिर्युक्तं त्वेषं तेजसा दीप्यमानं रूपं निरूपणीयं वेदांतैरधिगम्यं । एवंभूतं रुद्रं नमसा हविलंक्षणेनान्नेन नमस्कारेण वा दिवो द्युलोकसकाशान्निह्वयामहे । नितरामाह्वयामः । स आहूतो रुद्रो हस्ते स्वकीये बाहौ वार्याणि सर्वैर्वरणीयानि भेषजा भैषज्यानि रोगशमनहेतुभूतानि बिभ्रत् धारयन् अस्मभ्यं स्तोतृभ्यः शर्मारोग्यलक्षणं सुखं वर्मायुधानां निवारकं कवचं छर्दिः । गृहनामैतत् । गृहं च यंसत् । प्रयच्छतु ॥ बिभ्रत् । डुभृञ् धारणपोषणयोः । जौहोत्यादिकः । लटः शतृः । भृञामिदित्यभ्यासस्येत्वं । भेषजाः । भिषज् चिकित्सायां । कंड्वादिः । पचाद्यच् । अतोलोपयलोपौ । सुमंगलभेषजाच्चेति निपातनाद्रूपसिद्धिः । शेश्छंदसि बहुलमिति शेर्लोपः । वार्याणि । वृङ् संभक्तौ । ऋहलोर्ण्यत् । ईडवंदेत्याद्युदात्तत्वं । छर्दिः । उछृदिर् दीप्तिदेवनयोः । छृद्यते दीप्यते सुवर्णादिभिर्धनैः प्रकाश्यत इति छर्दिर्गृहं । अर्चिशुचिहुसृपिछादिछर्दिभ्य इसिः । यंसत् । यम उपरमे । लेट्यडागमः । सिब्बहुलं लेटीति सिप् । इतश्च लोप इतीकारलोपः ॥

॥ इति प्रथमस्याष्टमे पंचमो वर्गः ॥

षष्ठीमृचमाह ॥

इदं पित्रे मरुतामुच्यते वचः स्वादोः स्वादीयो रुद्राय वर्धनं ।
रास्वा च नो अमृत मर्तभोजनं त्मने तोकाय तनयाय मृळ ॥६॥

इदं। पित्रे। मरुतां। उच्यते। वचः। स्वादोः। स्वादीयः।

रुद्राय। वर्धनं।

रास्व। च। नः। अमृत। मर्तऽभोजनं। त्मने। तोकाय।

तनयाय। मृळ॥ ६॥

इदं स्तुतिलक्षणं वचो मरुतामेकोनपंचाशत्संख्याकानां देवविशेषाणां पित्रे जनकाय रुद्रायेश्वरायोच्यते। उच्चार्यते। कीदृशं। स्वादोः स्वादीयः। रसवतो मधुघृतादेरपि स्वादुतरं। अतिशयेन हर्षजनकमित्यर्थः। वर्धनं। स्तुत्यस्य प्रवर्धकं। स्तोत्रेण हि देवता हृष्टा सती प्रवर्धते। रुद्रस्य च मरुतां पितृत्वमेवमाख्यायते। पुरा कदाचिदिंद्रोऽसुराञ्जिगाय। तदानीं दितिरसुरमातेंद्रहननसमर्थं पुत्रं कामयमाना तपसा भर्तुः सकाशाद्गर्भं लेभे। इमं वृत्तांतमवगच्छन्निंद्रो वज्रहस्तः सन् सूक्ष्मरूपो भूत्वा तस्या उदरं प्रविश्य तं गर्भं सप्तधा बिभेद। पुनरप्येकैकं सप्तखंडमकरोत्। ते सर्वे गर्भैकदेशा योनेर्निर्गत्यारुदन्। एतस्मिन्नवसरे लीलार्थं गच्छंतौ पार्वतीपरमेश्वरावेनान्ददृशतुः। महेशं प्रति पार्वत्येवमवोचत्। इमे मांसखंडा यथा प्रत्येकं पुत्राः संपद्यंतामेवं त्वया कार्यं मयि चेत्प्रीतिरस्तीति। स च महेश्वरस्तान्समानरूपान् समानवयसः समानालंकारान्पुत्रान्कृत्वा गौर्यै प्रददौ तवेमे पुत्राः संत्विति। अतः सर्वेषु मारुतेषु सूक्तेषु मरुतो रुद्रपुत्रा इति स्तूयंते। रौद्रेषु च मरुतां पिता रुद्र इति। अपि च हे अमृत मरणरहित रुद्र मर्तभोजनं मर्तानां मनुष्याणां भोगपर्याप्तमन्नं नोऽस्मभ्यं रास्व।

प्रयच्छ । तथा त्मने आत्मने । द्वितीयार्थे चतुर्थी । मां । तोकाय तोकं पुत्रं । तनयाय तनयं तत्पुत्रं च मृड । सुखय ॥ पित्वे । उदात्तयण इति विभक्तेरुदात्तत्वं । रास्व । रा दाने । व्यत्ययेनात्मनेपदं । त्मने । मंत्रेष्वाङ्यादेरात्मन इत्यत्राङी-ऽन्यत्रापि छंदसि दृश्यत इति वचनादात्मन आकारलोपः ॥

सप्तमीमृचमाह ॥

मा नो महांतमुत मा नो अर्भकं मा न उक्षंतमुत मा न उक्षितं ।

मा नो वधीः पितरं मोत मातरं मा नः प्रियास्तन्वो रुद्र रीरिषः ॥ ७ ॥

मा । नः । महांतं । उत । मा । नः । अर्भकं । मा । नः । उक्षंतं । उत । मा । नः । उक्षितं ।

मा । नः । वधीः । पितरं । मा । उत । मातरं । मा । नः । प्रियाः । तन्वः । रुद्र । रिरिषः ॥ ७ ॥

हे रुद्र नोऽस्माकं मध्ये महांतं वृद्धं मा वधीः । मा हिंसीः । उत अपि च नोऽस्माकमर्भकं बालं मा हिंसीः । तथा नोऽस्माकं मध्ये उक्षंतं सेक्तारं मध्यवयस्कं युवानं मा वधीः । उत अपि च नोऽस्माकमुक्षितं गर्भरूपेण स्त्रीषु निषिक्तमपत्यं मा वधीः । तथा नोऽस्माकं पितरं जनकं मा वधीः । उत अपि च मातरं जननीं मा वधीः । तथा नोऽस्माकं प्रियाः स्नेहविषयास्तन्वः शरीराणि तनूषु भवाः प्रजा वा हे रुद्र मा

रीरिषः । मा हिंसीः ॥ वधीः । हंतेर्माङि लुङि चेति वधादेशः । स आदंतः । सिच इट् । अतो लोपस्य स्थानिवद्भावाद्वृद्ध्यभावः । रीरिषः । रिष हिंसायां । ण्यंताल्लुङि चङि णिलोपोपधाह्रस्वत्वादीनि । छांदसः पदकालीनोऽभ्यासह्रस्वः ॥

अष्टमीमृचमाह ॥

मा नंस्तोके तनंये मा नं आयौ मा नो गोषु मा नो अश्वेषु रीरिषः ।
वीरान्मा नौ रुद्र भामितो वंधीर्हविष्मंतः सदमित्त्वां हवामहे ॥ ८ ॥

मा । नः । तोके । तनंये । मा । नः । आयौ । मा । नः । गोषुं । मा । नः । अश्वेंषु । रिरिषः ।
वीरान् । मा । नः । रुद्र । भामितः । वधीः । हविष्मंतः । सदं । इत् । त्वा । हवामहे ॥ ८ ॥

हे रुद्र नोऽस्माकं तोकादिविषये मा रीरिषः । मा हिंसीः । तोकशब्दः पुत्रवाची । तनयस्तत्पुत्रः । आयुरित्यंतोदात्तो मनुष्यनाम । पुत्रपौत्रव्यतिरिक्तो नोऽस्मदीयो मनुष्यस्तस्मिन् गोषु पश्वादिष्वश्वेषु च मा रीरिषः । हिंसां मा कृथाः । तथा हे रुद्र वीरान् विक्रांतान् शौर्योपेतानस्मदीयान् भामितः क्रुद्धः सन् मा वधीः । मा हिंसीः । वयं च हविष्मंतो हविर्भिर्युक्ताः संतः सदमित् सर्वदैव त्वां हवामहे । आह्वयामहे ॥ आयौ । इण् गतौ । छंदसीण इत्युण्प्रत्ययः । भामितः ।

भाम क्रोधे क्रोधिकरणे चेति कर्तरि क्तः। ह्वयामहे। ह्वेञो लटि बहुलं छंदसीति संप्रसारणं॥

देवसुवां हविःषु रुद्रस्य पशुपतेर्याग उप ते स्तोमानित्यादिके याज्यानुवाक्ये। सूत्रितं च। उप ते स्तोमान् पशुपा इवाकरमिति द्वे। आ॰ ४. ११.। इति॥

तयोराद्यां सूक्ते नवमीमृचमाह॥

उप॑ ते॒ स्तोमा॑न्पशु॒पा इ॒वाक॑रं॒ रास्वा॑ पितर्मरुतां सु॒म्नम॒स्मे।
भ॒द्रा हि ते॑ सुम॒तिर्मृ॑ळ॒यत्त॒माथा॑ व॒यमव॒ इत्ते॑ वृणीमहे॥९॥

उप॑। ते॒। स्तोमा॑न्। प॒शु॒पाःऽइ॑व। आ। अ॒क॒र॒म्। रास्व॑।
पित॒रिति॑। म॒रु॒ता॒म्। सु॒म्नम्। अ॒स्मे इति॑।
भ॒द्रा। हि। ते॒। सु॒ऽम॒तिः। मृ॒ळ॒य॒त्ऽत॑मा। अथ॑। व॒यम्।
अवः॑। इत्। ते॒। वृ॒णी॒म॒हे॒॥ ९॥

हे रुद्र स्तोमान् स्तुतिरूपान्मंत्रान् ते तुभ्यमुपाकरं। उपाकरोमि। समर्पयामि। तत्र दृष्टांतः। पशुपा इव। यथा पशूनां पालयिता गोपः प्रातःकाले स्वस्मै समर्पितान्पशून् सायंकाले स्वामिभ्यः प्रत्यर्पयति। एवं त्वत्सकाशाल्लब्धान् स्तुतिरूपान्मंत्रान् स्तुतिसाधनतया तुभ्यं प्रत्यर्पयामीत्यर्थः। हे मरुतां पितः। मरुत्संज्ञानां देवानामुत्पादक रुद्र नोऽस्मभ्यं सुम्नं सुखं रास्व। देहि। अपि च ते त्वदीया सुमतिः कल्याणी बुद्धिर्मृड़यत्तमा। अतिशयेन सुखयितृतमा। अत एव भद्रा भजनीया हि। यस्मादेवं तस्मात् अथानंतरं वयं ते त्वदीयमवो

ईप्सितं वृणीमहे । संभजामहे ॥ अकरं । छंदसि लुङ्लङ्लिट इति वर्तमाने लुङ् । कृमृदृरुहिभ्य इति च्लेरङादेशः । ऋदृशोऽङि गुणः । पितर्मरुतां । परमपि छंदसीति परस्याः षष्ठ्याः पूर्वामंत्रितानुप्रवेशे सत्यामंत्रितस्य चेति पदद्वयमप्यनुदात्तं । अस्मे । सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः मृडयत्तमा । मृड सुखने । अस्मात्संप्रतात्मटः शप् । तस्य छंदस्युभयथेत्यार्द्धधातुकत्वात्सार्वधातुकानुदात्तत्वाभावे प्रत्ययस्वरः शिष्यते ॥

दशमीमृचमाह ॥

आरे तें गोघ्नमुत पूरुषघ्नं क्षयद्वीर सुम्नमस्मे ते अस्तु ।
मृळा चं नो अधिं च ब्रूहि देवाधां च नः शर्मं यच्छ
द्विबर्हाः ॥ १० ॥

आरे । ते । गोऽघ्नं । उत । पुरुषऽघ्नं । क्षयंत्ऽवीर ।
सुम्नं । अस्मे इति । ते । अस्तु ।
मृळ । च । नः । अधिं । च । ब्रूहि । देव । अधं । च । नः ।
शर्मं । यच्छ । द्विऽबर्हाः ॥ १० ॥

हे क्षयद्वीर क्षयितसर्वशत्रुजन रुद्र ते त्वदीयं गोघ्नं यद्गोहननं यद्वा गोहननसाधनमायुधं । उत अपि च पुरुषघ्नं पुरुषहननं तत्साधनमायुधं वा तदुभयमारे दूरेऽस्मत्तो विप्रकृष्टदेशे भवतु । अस्मे अस्मासु ते त्वदीयं सुम्नं सुखमस्तु । भवतु । अपि च नोऽस्माकं मृड । सुखसिद्ध्यर्थं प्रसन्नो भव । हे देव

द्योतमान रुद्र नोऽस्मानधि ब्रूहि च। अधिवचनं पक्षपातेन वचनं ब्राह्मणायाधिब्रूयादिति यथा। अध च अथानंतरं च द्विबर्हा द्वयोः स्थानयोः पृथिव्यामंतरिक्षे च परिवृढः। यद्वा द्वयोर्दक्षिणोत्तरमार्गयोर्ज्ञानकर्मणोर्वा परिवृढः स्वामी स त्वं नोऽस्मभ्यं शर्म सुखं यच्छ। देहि॥ गोघ्नं। हन हिंसागत्योः। अस्माद्धन्त्यर्थे कविधानमिति भावे करणे वा कप्रत्ययः। गमहने-त्युपधालोपः। हो हंतेरिति कुत्वं। द्विबर्हाः। बृह बृहि वृद्धौ। द्वयोः स्थानयोर्बृहते प्रवर्धत इति द्विबर्हाः। असुन्। कृदुत्तरपदप्रकृतिस्वरत्वं॥

एकादशीमृचमाह॥

अवौचाम नमौ अस्मा अवस्यवः शृणोतु नो हवं रुद्रो मरुत्वान्।

तन्नौ मित्रो वरुणो मामहंतामदितिः सिंधुः पृथिवी उत द्यौः॥ ११॥

अवौचाम। नमः। अस्मै। अवस्यवः। शृणोतु। नः। हवं। रुद्रः। मरुत्वान्।

तत्। नः। मित्रः। वरुणः। ममहंतां। अदितिः। सिंधुः। पृथिवी। उत। द्यौः॥ ११॥

अवस्यवोऽवोऽन्नं रक्षणं वेच्छंतो वयमवोचाम। एतत्सूक्त-रूपं स्तोत्रमवादिष्म। अस्मै रुद्राय नमो नमस्कारोऽस्तु।

मरुत्वान्मरुद्भिः स्वकीयैः पुत्रैर्युक्तो रुद्रश्च नोऽस्माकं हवमाह्वानं शृणोतु । स्वीकरोतु । यदस्माभिरुक्तं नोऽस्मदीयं तत्सर्वं मित्रादयः षट् देवता मामहंतां । पूजयंतु । उतशब्दोऽप्यर्थः ॥ अवोचाम । ब्रूञ् व्यक्तायां वाचि । लुङि ब्रुवो वचिः । अस्यतिवक्तीत्यादिना च्लेरङादेशः । वच उमित्युमागमः । अवस्यवः । अव रक्षणे । भावेऽसुन् । सुप आत्मनः क्यच् । क्याच्छंदसीत्युप्रत्ययः । हवं । भावेऽनुपसर्गस्येत्यप् संप्रसारणं च । मरुत्वान् । झय इति मतुपो वत्वं । तसौ मत्वर्थे इति भत्वेन पदत्वाभावाज्जश्त्वाभावः ॥

॥ इति प्रथमस्याष्टमे षष्ठो वर्गः ॥

चित्रमिति षडृचं दशमं सूक्तं कुत्सस्यार्षं त्रैष्टुभं सूर्यदेवताकं । तथा चानुक्रांतं । चित्रं षट् सौर्यमिति ॥ आश्विनशस्त्रे सूर्योदयादूर्ध्वं सौर्याणि सूक्तानि शंसनीयानि । तत्रेदं सूक्तं शंसनीयं । सूत्रितं च । चित्रं देवानां नमो मित्रस्येति ॥ आदितस्तिस्र ऋचः सौर्यस्य पशोर्वपापुरोडाशहविषां क्रमेणानुवाक्याः । ततो द्वे वपापुरोडाशयोर्याज्ये । तथा च सूत्रितं । चित्रं देवानामुदगादनीकमिति पंच शं नो भव चक्षसा शं नो अह्ना । आ० ३. ८. । इति ॥ प्रतिमूर्त्तिनाम्नि काण्डे शुनासीरीये पर्वणि च सूर्यस्य हविषश्चित्रं देवानामित्येषा याज्या । सूत्रितं च तरणिर्विश्वदर्शतश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः । आ० ९. ८. । इति ॥

तामेतां प्रथमामृचमाह ॥

चित्रं देवानामुदगादनीकं चक्षुर्मित्रस्य वरुणस्याग्नेः ।
आप्रा द्यावापृथिवी अंतरिक्षं सूर्य आत्मा जगतस्तस्थुषश्च ॥१॥

चित्रं । देवानां । उत् । अगात् । अनीकं । चक्षुः । मित्रस्य ।
वरुणस्य । अग्नेः ।
आ । अप्राः । द्यावापृथिवी इति । अंतरिक्षं । सूर्यः ।
आत्मा । जगतः । तस्थुषः । च ॥ १ ॥

देवानां । दीव्यंतीति देवा रश्मयः । तेषां । देवजनानामेव वानीकं तेजःसमूहरूपं चित्रमाश्चर्यंकरं सूर्यस्य मंडलमुदगात् । उदयाचलं प्राप्तमासीत् । कीदृशं । मित्रस्य वरुणस्याग्नेश्च । उपलक्षणमेतत् । तदुपलक्षितानां जगतां चक्षुः प्रकाशकं । चक्षुरिंद्रियस्थानीयं वा । उदयं प्राप्य च द्यावापृथिवी दिवं पृथिवीमंतरिक्षं चाप्राः । स्वकीयेन तेजसा आ समंतादपूरयत् । ईदृग्भूतमंडलांतर्वर्ती सूर्योऽंतर्यामितया सर्वस्य प्रेरकः परमात्मा जगतो जंगमस्य तस्थुषः स्थावरस्य चात्मा स्वरूपभूतः । स हि सर्वस्य स्थावरजंगमात्मकस्य कार्यवर्गस्य कारणं । कारणाच्च कार्यं नातिरिच्यते । तथा च पारमर्षं सूत्रं । तदनन्यत्वमारंभणशब्दादिभ्य इति । यद्वा । स्थावरजंगमात्मकस्य सर्वस्य प्राणिजातस्य जीवात्मा । उदिते हि सूर्ये मृतप्रायं सर्वं जगत्पुनश्चेतनयुक्तं सदुपलभ्यते । तथा च श्रूयते । योऽसौ तपन्नुदेति स सर्वेषां भूतानां प्राणानादायोदेतीति ॥ आप्राः ।

र्थे पूरणे। लङि पुरुषव्यत्ययः। अदादित्वाच्छपो लुक्। जगतः। गमेर्द्वे चेति क्विप् द्विर्वचनं च। गमः क्वावित्यनुनासिकलोपः। तस्थुषः। तिष्ठतेर्लिटः क्वसुः। द्विर्वचने शर्पूर्वाः खयः। षष्ठ्येकवचने वसोः संप्रसारणमिति संप्रसारणं। आतो लोप इटि चेत्याकारलोपः। शासिवसीति षत्वं॥

द्वितीयामृचमाह॥

सूर्यो॑ दे॒वीमु॒षसं॒ रोच॑मानां॒ मर्यो॒ न योषा॑म॒भ्ये॑ति प॒श्चात्।
यत्रा॒ नरो॑ देव॒यन्तो॑ यु॒गानि॑ वित॒न्वते॒ प्रति॑ भ॒द्राय॑ भ॒द्रं॥२॥

सूर्यः॑। दे॒वीं। उ॒षसं॑। रोच॑मानां। मर्यः॑। न। योषा॑ं।
अ॒भि। ए॒ति॒। प॒श्चात्।
यत्र॑। नरः॑। दे॒व॒ऽयन्तः॑। यु॒गानि॑। वि॒ऽत॒न्वते॑। प्रति॑।
भ॒द्राय॑। भ॒द्रं॥२॥

सूर्यो देवीं दानादिगुणयुक्तां रोचमानां दीप्यमानामुषसं पश्चादभ्येति। उषसः प्रादुर्भावानंतरं तामभिलक्ष्य गच्छति। तत्र दृष्टांतः। मर्यो न योषां। यथा कश्चिन्मनुष्यः शोभनावयवां गच्छंतीं युवतिं स्त्रियं सततमनुगच्छति तद्वत्। यत्र यस्यामुषसि जातायां देवयंतो देवं द्योतमानं सूर्यं यष्टुमिच्छंतो नरो यज्ञस्य नेतारो यजमाना युगानि। युगशब्दः कालवाची। तेन च तत्र कर्तव्यानि कर्माणि लक्ष्यंते यथा दर्शपूर्णमासाविति। अग्निहोत्रादीनि कर्माणि वितन्वते। विस्तारयंति। यद्वा। देवयंतो देवनागार्थं धनमात्मन इच्छंतो यजमानपुरुषाः

युगानि हलावयवभूतानि कर्षणाय वितन्वते। प्रसारयंति। तामुषसमनुगच्छतीत्यर्थः। एवंविधं भद्रं कल्याणं सूर्यं प्रति भद्राय कल्याणरूपाय कर्मफलाय स्तुम इति शेषः। यद्वा। देवयंतो देवकामा यजमाना युगानि युग्मानि भूत्वा पत्नीभिः सहिताः संतो भद्रं कल्याणमग्निहोत्रादिकं कर्म भद्राय तत्फलार्थं प्रति प्रत्येकं यस्यामुषसि प्रवृत्तायां वितन्वते। विस्तारयंति॥ मर्यः। मृङ् प्राणत्यागे। छंदसि निष्टर्क्येत्यादौ यत्प्रत्ययांतो निपात्यते। यतोऽनाव इत्याद्युदात्तत्वं। युगानि। युजेः कर्मणि घञ्। युगशब्दः कालविशेषे रथाद्युपकरणे चेत्यु-ञ्छादिषु पाठाद्गुणाभावोऽंतोदात्तत्वं च। वितन्वते। तनु विस्तारे। तनादिकृञ्भ्य उः। सहेति योगविभागात्तिङोप-सर्गस्य समासे सति समासस्येत्यंतोदात्तत्वं॥

तृतीयामृचमाह॥

भद्रा अश्वा॑ ह॒रितः॒ सूर्य॑स्य चि॒त्रा एत॑ग्वा अनु॒माद्या॑सः।
न॒म॒स्यंतो॑ दि॒व आ पृ॒ष्ठम॑स्थुः॒ परि॒ द्यावा॑पृथि॒वी यं॑ति स॒द्यः॥१॥

भ॒द्राः। अश्वा॑ः। ह॒रितः॑। सूर्य॑स्य। चि॒त्राः। एत॑ऽग्वाः।
अ॒नु॒ऽमा॒द्या॑सः।
न॒म॒स्यंतः॑। दि॒वः। आ। पृ॒ष्ठं। अ॒स्थुः॒। परि॑। द्यावा॑पृथि॒वी
इति॑। यं॒ति॒। स॒द्यः॥ १॥

भद्राः कल्याणाः। अश्वा एतग्वा इत्येतदुभयमश्वनाम। तत्रैकं क्रियापरं योजनीयं। अश्वास्तुरगा व्यापनशीला वा

हरितो हर्तारश्चित्रा विचित्रावयवा अनुमाद्यासोऽनुक्रमेण सर्वैः स्तुत्या मादनीयाः। एवंभूताः सूर्यस्यैतग्वा अश्वाः। यद्वा। एतं गंतव्यं मार्गं गंतारोऽश्वाः। एतं शबलवर्णं नीलवर्णं वा प्राप्नुवंतोऽश्वा नमस्यंतोऽस्माभिर्नमस्यमानाः संतो दिवोऽंतरिक्षस्य पृष्ठमुपरिप्रदेशं पूर्वभागलक्षणमास्थुः। आतिष्ठंति प्राप्नुवंति। यद्वा। हरितो रसहरणशीला रश्मयो भद्रादिलक्षणविशिष्टा दिवः पृष्ठं नभःस्थलमातिष्ठंति। आस्थाय च द्यावापृथिवी द्यावापृथिव्यौ सद्यस्तदानीमेवैकेनाह्ना परियंति। परितो गच्छंति। व्याप्नुवंतीत्यर्थः॥ अश्वाः। अशू व्याप्तौ। अशिप्रुषीत्यादिना क्वन्। एतग्वाः। इण् गतौ। असिहसीत्यादिना कर्मणि तन्प्रत्ययः। गमेरौणादिको भावे डुप्रत्ययः। एतमेतव्यं प्रति ग्वो गमनं येषां ते तथोक्ताः। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। अनुमाद्यासः। मदि स्तुतौ। ऋहलोर्ण्यत्। यतोऽनाव इत्याद्युदात्तत्वं। नमस्यंतः। नमोवरिव इति पूजार्थे क्यच्। व्यत्ययेन कर्मणि शतृप्रत्ययः। अस्थुः। तिष्ठतेश्छांदसो वर्तमाने लुङ्। गातिस्थेति सिचो लुक्। आत इति झेर्जुस्॥

चतुर्थीमृचमाह॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार।
यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै॥४॥

तत्। सूर्यस्य। देवऽत्वं। तत्। महिऽत्वं। मध्या।
कर्तोः। विऽततं। सं। जभार।

यदा। इत्। अयु॑क्त। ह॒रित॑ः। स॒धऽस्था॑त्। आत्। रात्री॑।
वास॑ः। त॒नु॒ते॒। सि॒मस्मै॑ ॥ ४ ॥

सूर्यस्य सर्वप्रेरकस्यादित्यस्य तद्देवत्वमीश्वरत्वं। स्वातंत्र्यमिति यावत्। महित्वं महत्त्वं माहात्म्यं च तदेव। तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यत्कर्तोः। कर्मनामैतत्। प्रारब्धापरिसमाप्तस्य कृष्यादिलक्षणस्य कर्मणो मध्या मध्येऽपरिसमाप्त एव तस्मिन्कर्मणि विततं विस्तीर्णं स्वकीयं रश्मिजालमस्तं गच्छन् सूर्यः संजभार। अस्माल्लोकात्स्वात्मन्युपसंहरति। कर्मकरश्च प्रवृत्तमपरिसमाप्तमेव विसृजत्यस्तं यंतं सूर्यं दृष्ट्वा। ईदृशं स्वातंत्र्यं महिमा च सूर्यव्यतिरिक्तस्य कस्यास्ति। न कस्यापि। सूर्य एवेदृशं स्वातंत्र्यं महिमानं चावगाहते। अपि च। इदित्यवधारणे। यदेत् यस्मिन्नेव काले हरितो रसहरणशीलान्स्वरश्मीन् हरिद्वर्णानश्वान्वा सधस्थात्सहस्थानादस्मात्पार्थिवाल्लोकादादायायुक्त। अन्यत्र संयुक्तान्करोति। यद्वा युजिः केवलोऽपि विपूर्वो द्रष्टव्यः। यदैवासौ स्वरश्मीनश्वान्वा सधस्थात्। सह तिष्ठंत्यस्मिन्निति सधस्थो रथः। तस्मादयुक्त। अमुंचत्। आत् अनंतरमेव रात्री निशा वास आच्छादयितृ तमः सिमस्मै। सिमशब्दः सर्वशब्दपर्यायः। सप्तम्यर्थे चतुर्थी। सर्वस्मिन् लोके तनुते। विस्तारयति। यद्वा वासो वासरमहः। तत्सर्वस्माल्लोकादपनीय रात्री तमस्तनुते॥ अत्र निरुक्तं। तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदासावयुंक्त हरणानादित्यरश्मीन्हरितोऽश्वानिति वाथ रात्री वासस्तनुते सिमस्मै वासरमहरवयुवती सर्वस्मात्।

नि० ४. ११.। इति॥ महित्वं। मह पूजायां। औणादिक इन्प्रत्ययः। तस्य भावस्त्वतलौ। महित्वा। महत्वशब्दात्तृतीयैकवचनस्य सुपां सुलुगिति डादेशः। कर्तोः। करोतेरौणादिकस्तोसुन्प्रत्ययः। विततं। विपूर्वात्तनोतेः कर्मणि निष्ठा। उदित्त्वेन क्त्वाप्रत्यय इटो विकल्पनाद्यस्य विभाषितोऽट्प्रतिषेधः। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जभार। हृग्रहोर्भ इति भत्वं। अयुक्त। युजेर्लुङि झलो झलीति सिचो लोपः। सधस्थात्। घञर्थे कविधानमित्यधिकरणे कप्रत्ययः। सध मादस्थयोश्छंदसीति सधादेशः। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं। रात्री। रात्रेश्चाजसाविति ङीप्॥

पंचमीमृचमाह॥

तन्मित्रस्य वरु॑णस्याभिचक्षे सूर्यो॑ रूपं कृ॑णुते द्योरुपस्थे॑।
अनंतमन्यद्रुश॑दस्य पाजः॑ कृष्णमन्यद्धरितः॑ सं भ॑रंति॥ ५॥

तत्। मित्रस्य॑। वरु॑णस्य। अभिऽचक्षे॑। सूर्यः॑। रूपं।
कृणुते। द्योः। उपऽस्थे॑।
अनंतं। अन्यत्। रुश॑त्। अस्य। पाजः॑। कृष्णं। अन्यत्।
हरितः॑। सं। भरंति॥ ५॥

तत्तदानीमुदयसमये मित्रस्य वरुणस्यैतदुभयोपलक्षितस्य सर्वस्य जगतोऽभिचक्ष आभिमुख्येन दर्शनाय द्योर्नभस उपस्थ उपस्थाने मध्ये सूर्यः सर्वस्य प्रेरकः सविता रूपं सर्वस्य निरूपकं प्रकाशकं तेजः कृणुते। करोति। अपि च। अस्य सूर्यस्य

हरितो रसहरणशीला रश्मयो हरिद्वर्णा अश्वा वानंतमबलमनंतं सर्वात्मना अवस्थितं कृत्स्नस्य जगतो व्यापकं रुशद्दीप्यमानं श्वेतवर्णं पाजः । बलनामैतत् । बलयुक्तमतिबलस्यापि नैशस्य तमसो निवारणे समर्थमन्यत्तमसो विलक्षणं तेजः संभरंति । अहनि स्वकीयागमनेन निष्पादयंति । तथा कृष्णं कृष्णवर्णमन्यत्तमः स्वकीयापगमनेन रात्रौ । अस्य रश्मयोऽप्येवं कुर्वंति किमु वक्तव्यं तस्य माहात्म्यमिति सूर्यस्य स्तुतिः ॥ अभिचक्षे । संपदादिलक्षणो भावे क्विप् । कृदुत्तरपदप्रकृतिस्वरत्वं । द्योः । ङसिङसोश्च । पा० ६. १. ११०. । इति पूर्वरूपता । उपस्थे । घञर्थे कविधानमिति कप्रत्ययः । भरुहथादित्वात्पूर्वपदांतोदात्तत्वं । पाजः पाति रक्षतीति पाजो बलं । पातेर्बले जुट् च । उ० ४. २०४. । इत्यसुन् जुडागमश्च । छांदसो मत्वर्थीयस्य विनो लोपः ॥

षष्ठीमृचमाह ॥

अद्या दे॑वा॒ उदि॑ता॒ सूर्य॑स्य॒ निरंह॑सः पिपृ॒ता निर॑व॒द्यात् ।
तन्नो॑ मि॒त्रो वरु॑णो मामहंता॒मदि॑तिः॒ सिंधुः॑ पृथि॒वी
उ॒त द्यौः ॥ ६ ॥

अ॒द्य । दे॒वाः॒ । उत्ऽइ॑ता । सूर्य॑स्य । निः । अंह॑सः ।
पि॒पृ॒त । निः । अ॒व॒द्यात् ।
तत् । नः॒ । मि॒त्रः । वरु॑णः । म॒म॒ह॒न्ता॒म् । अदि॑तिः । सिंधुः॑ ।
पृ॒थि॒वी । उ॒त । द्यौः ॥ ६ ॥

हे देवा द्योतमानाः सूर्यरश्मयः। अद्यास्मिन्काले सूर्यस्यादित्यस्योदिता. उदितावुदये सतीतस्ततः प्रसरंतो यूयमस्मानंहसः पापान्निष्पिपृत। निष्कृष्य पालयत। यदिदमस्माभिरुक्तं नोऽस्मदीयं तन्मित्रादयः षट् देवता मामहंतां। पूजयंतु। अनुमन्यंतां। रक्षंत्विति यावत्। मित्रः प्रमीतेस्त्रायकोऽहरभिमानी देवः। वरुणोऽनिष्टानां निवारयिता रात्र्यभिमानी। अदितिरखंडनीयादीना वा देवमाता। सिंधुः स्यंदनशीलोदकाभिमानिनी देवता। पृथिवी भूलोकस्याधिष्ठात्री। द्यौर्द्युलोकस्य। उतशब्दः समुच्चये॥ अद्या। निपातस्य चेति संहितायां दीर्घत्वं। उदिता। उत्पूर्वादेतेर्भावे क्तिन्। सुपां सुलुगिति डादेशः। तादौ चेति गतेः प्रकृतिस्वरत्वं। पिपृता। पृ पालनपूरणयोः। पृ इत्येके। लोटि जुहोत्यादित्वाच्छपः श्लुः। द्विर्वचनोरदत्वहलादिशेषाः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। सार्वधातुकमपिदिति तशब्दस्य ङित्त्वे सति ऋचि तुनुघेत्यादिना संहितायां दीर्घः॥

॥ इति प्रथमस्याष्टमे सप्तमो वर्गः॥

॥ इति प्रथमे मंडले षोडशोऽनुवाकः॥

सप्तदशेऽनुवाके पंच सूक्तानि। तत्र नासत्याभ्यामिति पंचविंशत्यृचं प्रथमं सूक्तं। उशिक्संज्ञायामंगराजस्य महिष्या दास्यां दीर्घतमसोत्पादितः कक्षीवानस्य सूक्तस्य ऋषिः। त्रिष्टुप् छंदः। अश्विनौ देवता। तथा चानुक्रांतं। नासत्याभ्यां पंचाधिका कक्षीवान्दैर्घतमस उशिक्प्रसूत आश्विनं वा इति। तुह्यादिपरिभाषयेदमादीनि पंच सूक्तान्यश्विदेवत्यानि॥ प्रात-

रनुवाकस्याश्विने क्रतौ त्रैष्टुभे छंदसीदमादीनि त्रीणि सूक्तानि। अथाश्विन इति खंडे सूत्रितं। ग्राशाणेव नासत्याभ्यामिति त्रीणि। आ० ४. १५.। इति॥ आश्विनशस्त्रे चैतानि शस्त्राणि प्रातरनुवाकन्यायेनेत्यतिदिष्टत्वात्॥ •

तत्र प्रथमामृचमाह॥

नासत्याभ्यां बर्हिरिव प्र वृंजे स्तोमाँ इयर्म्यभ्रियेव वातः।
याववर्भगाय विमदाय जायां सेनाजुवा न्यूहतू रथेन॥१॥

नासत्याभ्यां। बर्हिःऽइव। प्र। वृंजे। स्तोमान्। इयर्मि।
अभ्रियाऽइव। वातः।
यौ। अर्भगाय। विऽमदाय। जायां। सेनाऽजुवा।
निऽऊहतुः। रथेन॥१॥

बर्हिरिव यथा कश्चिद्यजमानो यागार्थं बर्हिः प्रवृंक्ते। प्रकर्षेणान्यूनानतिरिक्तं यागाय पर्याप्तं दर्भं वृंक्ते। छिनत्ति। संपादयतीति यावत्। एवमहं नासत्याभ्यामश्विभ्यां स्तोमान् स्तुतीरियर्मि। संपादयामि। एतदेव विशदीक्रियते। अभ्रियेव। यथाभ्रियाण्यभ्रेषु मेघेष्ववस्थितान्युदकानि वातो वायुर्वर्षणार्थं बहुशः प्रेरयति। एवमहमश्विभ्यां स्तोत्राणीयर्मि। बहुशः प्रेरयामि। कीदृशावश्विनौ। अर्भगाय बालाय स्वयंवरलब्धभार्याय विमदायैतत्संज्ञाय राजर्षये मध्ये मार्गे स्वयंवरार्थमागतैस्तामलभमानैरन्यैर्नृपैः सह योद्धुमशक्नुवतेऽपि तस्मै सेनाजुवा शत्रुसेनायाः प्रेरकेण शत्रुभिर्दुःप्रापेण रथेन यावश्विनौ

आर्यां भार्या परेरनुक्रान्तां न्यूहतुः। शत्रून्निहत्य तदीयं गृहं प्रापयामासतुः। ताभ्यामित्यर्थः॥ नासत्याभ्यां। सत्सु भवौ सत्यौ। न सत्यावसत्यौ। न असत्यौ नासत्यौ। नभ्राण्नपादित्यादिना नञः प्रकृतिभावः। अव्ययपूर्वपदप्रकृतिस्वरत्वं। वृञ्जे। वृजी वर्जने। अदादिकः। इदित्त्वान्नुम्। लोपस्त आत्मनेपदेष्विति तलोपः। इयर्सि। ऋ गतौ। जौहोत्यादिकः। अर्तिपिपर्त्योश्चेत्यभ्यासस्येत्वं। अभ्यासस्यासवर्णे इतीयङ्। अब्धियेव। समुद्राभ्राद्घ इति भावार्थे घः। वस्येयादेशः। शेश्छंदसि बहुलमिति शेर्लोपः। अर्भगाय। अर्तिगृभ्यां भन्नित्यर्तेर्भन्। अर्भ एवार्भकः। संज्ञायां कन्। पा० ५. ३. ८७. छांदसो गकारः। अपर आह। अर्भमल्पं गायति शब्दयतीत्यर्भगः। कै गै शब्दे। गापोष्टक्। पा० ३. २. ८.। आतो लोप इटि चेत्याकारलोपः। तदेतत्पादकृतः शाकल्यस्याभिमतं। सेनाजुवा। जु इति सौत्रो धातुर्गत्यर्थः। अस्मादंतर्भावितण्यर्थात् क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसंप्रसारणं चेत्यादिना क्विब्दीर्घौ। तन्वादित्वादुवङ्। न्यूहतुः। वह प्रापणे। लिट्यतुसि यजादित्वात्संप्रसारणं। यद्वृत्तान्नित्यमिति निघातप्रतिषेधः॥

द्वितीयामृचमाह॥

वीळुपत्मभिराशुहेमभिर्वा देवानां वा जूतिभिः शाशदाना।
तद्रासभो नासत्या सहस्रमाजा यमस्य प्रधने जिगाय॥ २॥

वीळुपत्मऽभिः। आशुहेमऽभिः। वा। देवानां। वा।
जूतिऽभिः। शाशदाना।

तत् । रासभः । नासत्या । सहस्रं । आजा । यमस्य ।

प्रऽधने । जिगाय ॥ २ ॥

वीडुपत्मभिः । वीडु इति बलनाम । बलवदुत्पतनैः ।
आशुहेमभिः । शीघ्रगमनैः । वाशब्दः समुच्चये । हे नासत्याश्विनौ । एवंभूतैरश्वैश्च देवानामिंद्रादीनां जूतिभिः प्रेरणैश्च शाशदाना शाशद्यमानयोरत्यर्थं प्रेर्यमाणयोर्युवयोर्वाहनभूतो यो रासभः प्रजापतिना दत्तः स यमस्य वैवस्वतस्य प्रीतिकरे प्रधने प्रकीर्णधनोपेत आजा आजौ संग्रामे तच्छत्रूणां सहस्रं जिगाय । जितवान् । वैवस्वतो हि बहूनां मरणहेतुना संग्रामेण तुष्टो भवति । यद्वा । जेतव्यत्वेन प्रजापतिनाभिहितमृक्सहस्रं शीघ्रगमनयुक्तो रासभो जिगाय । जयेनालभत । अन्येभ्यो देवेभ्यः पूर्वमेवाजिं प्राप्य युवां जयं प्रापयामास । तथा चास्मिन्नर्थे प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयं ॥ वीडुपत्मभिः । वीडु बलवत्पतंतीति वीडुपत्मानः । आशुहेमभिः । आशु शीघ्रं हिन्वंति गच्छंतीत्याशुहेमानः । तैः । हि गतौ वृद्धौ च । अन्येभ्योऽपि दृश्यंत इति मनिन् । कदुत्तरपदप्रकृतिस्वरत्वं । जूतिभिः । ऊतियूतिजूतीत्यादिना क्तिन उदात्तत्वं । शाशदाना । शद्लृ शातने । अत्र गत्यर्थो धातूनामनेकार्थत्वात् । अस्माद्यङंताल्लटः शानच् । तस्य छंदस्युभयथेत्यार्धधातुकत्वाच्छानभावः । अतो लोपयलोपौ । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सुपां सुलुगिति षष्ठ्याः पूर्वसवर्णदीर्घः । आजा । तेनैव सूत्रेण डादेशः ।

जिगाय। जि जये। सन्लिटोर्जेरित्यभ्यासादुत्तरस्य कुत्वे गकारः॥

तृतीयामृचमाह॥

तुग्रो ह भुज्युमश्विनोदमेघे रयिं न कश्चिन्ममृवाँ अवाहाः।
तमूहथुर्नौभिरात्मन्वतीभिरंतरिक्षप्रुद्भिरपोदकाभिः॥ ३॥

तुग्रः। ह। भुज्युं। अश्विना। उदऽमेघे। रयिं। न।
कः। चित्। ममृऽवान्। अव। अहाः।
तं। ऊहथुः। नौभिः। आत्मन्ऽवतीभिः। अंतरिक्ष-
प्रुत्ऽभिः। अपऽउदकाभिः॥ ३॥

अत्रेयमाख्यायिका। तुग्रो नामाश्विनोः प्रियः कश्चिद्राजर्षिः। स च द्वीपांतरवर्तिभिः शत्रुभिरत्यंतमुपद्रुतः सन् तेषां जयाय स्वपुत्रं भुज्युं सेनया सह नावा प्राहैषीत्। सा च नौर्मध्ये समुद्रमतिदूरं गता वायुवशेन भिन्नासीत्। तदानीं स भुज्युः शीघ्रमश्विनौ तुष्टाव। तौ च स्तुतौ सेनया सहितमात्मीयासु नौष्वारोप्य पितुस्तुग्रस्य समीपं त्रिभिरहोरात्रैः प्रापयामासतुरिति। अयमर्थ इदमादिकेन तृचेन प्रतिपाद्यते। हशब्दः प्रसिद्धौ। तुग्रः खलु पूर्वं शत्रुभिः पीडितः सन् तज्जयार्थमुदमेघे। उदकैर्मिह्यते सिच्यत इत्युदकमेघः समुद्रः। तस्मिन्भुज्युमेतत्संज्ञं प्रियं पुत्रमवाहाः। नावा गंतुं पर्यत्याक्षीत्। तत्र दृष्टांतः। ममृवान् म्रियमाणः स्वधनलोभी कश्चिन्मनुष्यो रयिं न। यथा धनं परित्यजति तद्वत्। हे अश्विनौ तं च भुज्युं मध्ये समुद्रं निमग्नं नौभिः पितृसमीप-

मूहथुः। युवां प्रापितवंतौ। कौहप्योभिः। आत्मन्वतीभिः। आत्मीयाभिः। युवयोः स्वभूताभिरित्यर्थः। यद्वा धृतिरात्मा। धारणवतीभिरित्यर्थः। अंतरिक्षप्रुद्भिः। अतिस्वच्छत्वादंतरिक्षे जलस्योपरिष्टादेव गंत्रीभिः। अपोदकाभिः। सुश्लिष्टत्वादपगतोदकाभिः। अप्रविष्टोदकाभिरित्यर्थः। उदमेघे। सिह सेचने। कर्मणि घञ्। न्यंक्वादीनां चेति कुत्वं। उदकस्योदः संज्ञायां। थाथादिनोत्तरपदांतोदात्तत्वं। ममृवान्। मृङ् प्राणत्यागे। लिटः क्वसुः। क्रादिनियमात्प्राप्तस्येटो वस्वेकाजाद्घसामिति नियमादभावः। अहाः। ओहाक् त्यागे। लुङ्। तिपि च्लेः सिच्। आगमानुशासनस्यानित्यत्वात्सगिटौ न क्रियेते। बहुलं छंदसीतीडभावः। हल्ङ्याब्भ्य इति तिलोपः। रुत्वविसर्गौ। यद्वा मंत्रे घसेति च्लेर्लुक्। च्लेर्लुक्त्वादिण् न क्रियते। नौभिः। सावेकाच इति विभक्तेरुदात्तत्वं। आत्मन्वतीभिः। आत्मनो मतुप्। मादुपधाया इति वत्वं। अनो नुडिति नुट्। नलोपः। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। अंतरिक्षप्रुद्भिः। प्रुङ् गतौ। क्विप् चेति क्विप्॥

चतुर्थीमृचमाह॥

तिस्रः क्षपस्त्रिरहातिव्रजंद्भिर्नासत्या भुज्युमूहथुः पतंगैः।
समुद्रस्य धन्वन्नार्द्रस्य पारे त्रिभी रथैः शतपद्भिः षळश्वैः॥४॥

तिस्रः। क्षपः। त्रिः। अहा। अतिव्रजंत्ऽभिः। नासत्या।
भुज्युं। ऊहथुः। पतंगैः।

समुद्रस्यं । धन्व॑न् । आर्द्रस्यं । पारे । त्रिऽभिः । रथैः ।
शतपंत्ऽभिः । षट्ऽअश्वैः ॥ ४ ॥

हे नासत्यौ सेनया सहोदके निमग्नं भुज्यं तिस्रः चतस्रस्त्रिसंख्याका रात्रीस्त्रिरहा त्रिवारमावृत्तान्यहानि चातिव्रजद्भिरतिक्रम्य गच्छद्भिरेतावंतं कालमतिव्याप्य वर्तमानैः पतंगैः पतद्भिस्त्रिभिस्त्रिसंख्याकै रथैरूहथुः । युवामूढवंतौ । क्वेति चेत् उच्यते । समुद्रस्यांबुराशेर्मध्ये धन्वन् धन्वनि जलवर्जिते प्रदेशे । आर्द्रस्योदकेनार्द्रीभूतस्य समुद्रस्य पारे तीरदेशे च । कथंभूतै रथैः । शतपद्भिः । शतसंख्याकैश्चक्रलक्षणै पादैरुपेतैः । षडश्वैः । षड्भिरश्वैर्युक्तैः ॥ तिस्रः । त्रिचतुरोः स्त्रियामिति त्रिशब्दस्य तिसृ आदेशः । स चांतोदात्तः । अचि र ऋत इति रेफादेश उदात्तयणो हल्पूर्वादिति विभक्तेरुदात्तत्वं । चपः । विभक्त्यंतस्य छांदसं ह्रस्वत्वं । यद्वा । शश्यात इति योगविभागादधातोरप्याकारलोपः । अह्ना । शेश्छंदसि बहुलमिति शेर्लोपः । पतंगै । पतॢ गतौ । पतेरंगच् । उ॰ १. ११८. । धन्वन् । धविर्गत्यर्थः । इदित्त्वान्नुम् । कनिन्युवृषीत्यादिना कनिन् । सुपां सुलुगिति सप्तम्या लुक् । शतपद्भिः । शतं पादा येषां । संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः । अयस्मयादित्वेन भत्वात्पादः पदिति पद्भावः । यद्वा पादसमानार्थः पच्छब्दः प्रकृत्यंतरं द्रष्टव्यं ॥

पंचमीमृचमाह ॥

अनारंभणे तदवीरयेथामनास्थाने अग्रभणे समुद्रे ।

यदश्विना ऊहथुर्भुज्युमस्तं शतारित्रां नावमातस्थिवांसं ॥ ५ ॥

अनारंभणे । तत् । अवीरयेथां । अनास्थाने । अग्रभणे । समुद्रे । यत् । अश्विनौ । ऊहथुः । भुज्युं । अस्तं । शतऽअरित्रां । नावं । आतस्थिऽवांसं ॥ ५ ॥

हे अश्विनौ । अनारंभणे आलंबनरहिते समुद्रे तत्कर्म अवीरयेथां । विक्रांतं कृतवंतौ युवां । अनारंभणत्वमेव स्पष्टीकरोति । अनास्थाने । आस्थीयतेऽस्मिन्नित्यास्थानो भूप्रदेशः । तद्रहिते स्थातुमशक्ये जल इत्यर्थः । अग्रभणेऽग्रहणे । हस्तेन ग्राह्यं शाखादिकमपि यत्र नास्ति तस्मिन्नित्यर्थः । किं पुनस्तत्कर्म । भुज्युं समुद्रे मग्नं शतारित्रां बह्वरित्रां । यैः काष्ठैः पार्श्वतो बद्धैर्जलालोडने सति नौः शीघ्रं गच्छति तान्यरित्राणि । ईदृशीं नावमातस्थिवांसमास्थितवंतमारूढवंतं कृतवंतमारूढवंतं कृतवास्तं । गृहनामैतत् । पितुस्तुग्रस्य गृहं प्रति यदूहथुः । तत्प्रापणमन्यैर्दुःशकं युवां समुद्रमध्ये कृतवंताविर्त्यर्थः ॥ अनारंभणे आरभ्यत इत्यारंभणं । कृत्यल्युटो बहुलमिति कर्मणि ल्युट् । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अवीरयेथां । शूर वीर विक्रांतौ । चुरादिरात्मनेपदी । अनास्थानाग्रभणयोः पूर्ववत्स्वरौ । अयं तु विशेषः । हृग्रहोर्भ इति भत्वं । अस्तं । अस्यतेऽस्मिन् सर्वमित्यस्तं गृहं । असिहसीत्यादिना तन्प्रत्ययः । शतारित्रां । ऋ गतौ । अर्तिलूधूसू इति करण इत्रप्रत्ययः । बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं ॥

॥ इति प्रथमस्याष्टमेऽष्टमो वर्गः ॥

षष्ठीमृचमाह॥

यमश्विना ददथुः श्वेतमश्वमघाश्वाय शश्वदित्स्वस्ति।
तद्वां दात्रं महि कीर्तेन्यं भूत्पैद्वो वाजी सदमिद्धव्यो अर्यः॥६॥

यं। अश्विना। ददथुः। श्वेतं। अश्वं। अघऽअश्वाय।
शश्वत्। इत्। स्वस्ति॥
तत्। वां। दात्रं। महि। कीर्तेन्यं। भूत्। पैद्वः। वाजी।
सदं। इत्। हव्यः। अर्यः॥६॥

अत्रेदमाख्यायते। पेदुर्नाम कश्चित् स चाश्विनौ तुष्टाव। तस्मै प्रीतौ कंचिच्छ्वेतवर्णमश्वं दत्तवंतौ। स चाश्वस्तस्मै प्रौढं जयं चकारेति। एतदत्र प्रतिपाद्यते। हे अश्विनौ युवामघाश्वायाहतव्याश्वाय पेदुनाम्ने राजर्षये यं श्वेतवर्णमश्वं ददथुः। दत्तवंतौ। सोऽश्वस्तस्मै स्वस्ति जयलक्षणं मंगलं शश्वदित् नित्यमेव चकार। वां युवयोस्तद्दात्रं दानं महि महत् अतिगंभीरं। अत एव कीर्तेन्यं सर्वैः कीर्तनीयं प्रशस्यं भूत्। अभूत्। तस्मात्पैद्वः पेदोः संबंधी पतनशीलः शीघ्रगामी अर्यः शत्रूणां प्रेरयिता युद्धेषु प्रेरयितव्यो वा वाजी वेजनवान्सोऽश्वः सदमित् सदैव हव्योऽस्माभिराह्वातव्यः॥ दात्रं। ददातेरौणादिकस्त्रप्रत्ययः। महि। मह पूजायां। इन् सर्वधातुभ्य इतीन्। कीर्तेन्यं। कॄत संशब्दने। कृत्यार्थे तवैकेन्केन्यत्वन इति केन्यप्रत्ययः। ॠत इद्धातोरितीत्वं। भूत्। बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः। पैद्वः। पेदोः

संबंधौ । तस्येदमित्यण् । छांदसो वर्णलोपः । इव्यः । ह्वयतेरचो यदिति यत् । बहुलं छंदसीति संप्रसारणं । गुणो धातोस्तन्निमित्तस्यैवेत्यवादेशः । अर्यः । ऋ गतौ । अघ्न्यादयश्चेत्यौणादिको यत् । व्यत्ययेनांतोदात्तत्वं ॥

सप्तमीमृचमाह ॥

युवं नरा स्तुवते पज्रियाय कक्षीवते अरदतं पुरंधिं ।
कारोतराच्छफादश्वस्य वृष्णः शतं कुंभाँ असिंचतं
सुरायाः ॥ ७ ॥

युवं । नरा । स्तुवते । पज्रियाय । कक्षीवते । अरदतं ।
पुरंऽधिं ।
कारोतरात् । शफात् । अश्वस्य । वृष्णः । शतं । कुंभान् ।
असिंचतं । सुरायाः ॥ ७ ॥

अत्रेयमाख्यायिका । कक्षीवानृषिः पुरा तमसातिरोहितज्ञानः सन् ज्ञानार्थमश्विनौ तुष्टाव । तस्मा अश्विनौ प्रभूतां धियं दत्तवंताविति तदाह । हे नरा नेतारावश्विनौ युवं युवां पज्रियाय । पज्रा इत्यंगिरसामाख्या पज्रा वा अंगिरस इत्याम्नातत्वात् । तेषां कुले जाताय कक्षीवते । कक्ष्या रज्जुरश्वस्य । तद्वते तत्संज्ञाय स्तुवते युवयोः स्तुतिं कुर्वते मह्यं पुरंधिं प्रभूतां धियं बुद्धिमरदतं । व्यलिखतं । यथा सर्वार्थगोचरा भवति तथा कृतवंतावित्यर्थः । अपि च कारोतरात् कारोतरो नाम वेदैलस्यर्मवेष्टितो भांजनविशेषा

यस्मिन्सुरायाः स्रावणं क्रियते । लुप्तोपममेतत् । कारोतराद्यथा सुरायाः संपादकास्तां स्रावयंति एवमेव युवां वृष्णः सेचनसमर्थस्य युष्मदीयस्याश्वस्य शफात् खुरात् सुरायाः शतं कुंभान् असंख्यातान्सुराघटानसिंचतं । अक्षारयतं । यद्वा सिंचतिः पूरणार्थः । कारोतरस्थानीयाद्युष्मदीयाश्वखुरात् या सुरा प्रवहति तयासंख्यातान् घटानसिंचतं । अपूरयतं । ये जनाः सौत्रामण्यादिकर्मणि युष्मद्यागाय सुरां याचंते तेषामित्यर्थः ॥ स्रुवते । स्रौतेर्लटः शतृ । अदादित्वाच्छपो लुक् । शतुरनुम इति विभक्तेरुदात्तत्वं । पज्रियाय । पज्रशब्दाच्छैषिको घच । कक्षीवते । आसंदीवदष्ठीवच्चक्रीवत्कक्षीवदिति निपातनात् कक्ष्याशब्दस्य संप्रसारणं वत्वं च । अरदतं । रद विलेखने । पुरंधिं । पुरंधिर्बहुधीरिति यास्कः । नि० ६. १३. । पृषोदरादित्वात्पुरंधिभावः । यद्वा पुरं पूरयितव्यं सर्वविषयजातमस्यां धीयतेऽवस्थाप्यत इति पुरंधिर्बुद्धिः । कर्मण्यधिकरणे चेति दधातेः किप्रत्ययः । तत्पुरुषे कृति बहुलमिति बहुलवचनादलुक् । इदं तु व्युत्पत्तिमात्रं वस्तुतः पृषोदरादिरेव । असिंचतं । षिचिर् क्षरणे । तौदादिकः । शे मुचादीनामिति नुम् ॥

अष्टमीमृचमाह ॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तं ।
ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं
स्वस्ति ॥८॥

हिमेन । अग्निं । घ्रंसं । अवारयेथां । पितुऽमतीं ।
ऊर्जं । अस्मै । अधत्तं ।
ऋबीसे । अत्रिं । अश्विना । अवऽनीतं । उत् । निन्यथुः ।
सर्वऽगणं । स्वस्ति ॥ ८ ॥

अत्रेदमाख्यानं। अत्रिमृषिमसुराः शतद्वारे पीडायंत्रगृहे प्रवेश्य तुषाग्निनाबाधिषत। तदानीं तेन ऋषिणा स्तुतावश्विनावग्निमुदकेनोपशमय्य तस्मात्पीडागृहादविकलेंद्रियवर्गं संतं निरगमयतामिति। तदेतत्प्रतिपाद्यते। हे अश्विनौ हिमेन हिमवच्छीतेनोदकेन घ्रंसं दीप्यमानमत्रेर्बाधनार्थमसुरैः प्रक्षिप्तं तुषाग्निमवारयेथां। युवां निवारितवंतौ। शीतीकृतवंतावित्यर्थः। अपि च। अस्मा असुरपीडया कार्श्यं प्राप्तायात्रये पितुमतीं। पितुरित्यन्ननाम। अन्नयुक्तामूर्जं बलप्रदं रसात्मकं क्षीरादिकमधत्तं। पुष्ट्यर्थं प्रायच्छतं। ऋबीसेऽपगतप्रकाशे पीडायंत्रगृहेऽवनीतमवाङ्मुखतयासुरैः प्रापितमत्रिं सर्वगणं। गणः समूहः सर्वेषामिंद्रियाणां पुत्रादीनां वा गणेनोपेतं स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः। तस्माद्गृहादुन्नमय्य युवां स्वगृहं प्रापितवंतौ। यद्वा। हिमेन शीतेन वृष्ट्युदकेनाग्निमग्निवत्तीव्रं घ्रंसं। अहर्नामैतत्। सामर्थ्यान्निदाघकालीनमहरवारयेथां। तस्याह्नस्तैक्ष्ण्यं निवारितवंतौ अपि च। अस्मा अग्नये पितुमतींचरुपुरोडाशादिलक्षणान्नोपेतमूर्जं बलकरं रसात्मकमुपस्तरणाभिधारणात्मकं घृतमधत्तं। वृष्ट्युत्पादनेनाग्नेर्यागार्थं हवींषि

निष्पादितवंताविव्यर्थः । ऋबीसेऽपगततेजस्के पृथिवीद्रव्येऽवनीतमोषधीनामुत्पादनाय वस्तूनां। पार्थिवाग्निना परिपक्वा उदकेन क्लिन्ना ह्योषधिवनस्पतयो विरोहंति। अत्रिं हविषामत्तारमोषधिवनस्पत्यादीनां वा। एवंविधमग्निं सर्वगणं व्रीह्याद्योषधिगणोपेतं हे अश्विनौ युवां स्वस्ति अविनाशो यथा भवति तथोन्निन्यथुः। व्रीह्याद्योषधिवनस्पतिरूपेण भूमेरुपरिष्टान्नीतवंतौ। कारणात्मना पार्थिवाग्नौ वर्तमानं सर्वमोषधिवनस्पत्यादिकमश्विनौ प्रकर्षेण व्यक्तीकृतवंताविव्यर्थः। अयं पक्षो यास्केन हिमेनोदकेनेत्यादिनोक्तः। नि° ६. ३६.। पितुमतीं। ह्रस्वनुड्भ्यां मतुबिति मतुप उदात्तत्वं। ऋबीसे। अत्र यास्कः। ऋबीसमपगतभासमपचितभासमपहृतभासं गतभासं वेति। नि° ६. ३५.। पृषोदरादित्वादभिमतरूपस्वरसिद्धिः। अत्रिं। अद भक्षणे। अदेस्त्रिनि चेति चशब्दात्त्रिप्। अवनीतं। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। स्वस्ति। अस भुवि। भावे क्तिन्। छंदस्युभयथेति सार्वधातुकत्वादस्तेर्भूभावाभावः॥

नवमीमृचमाह॥

परावतं नासत्यानुदेथामुच्चाबुध्नं चक्रथुर्जिह्मबारं।
चरन्नापो न पायनाय राये सहस्राय तृष्यते गोतमस्य ।९॥

परा। अवतं। नासत्या। अनुदेथां। उच्चाबुध्नं।
चक्रथुः। जिह्मऽबारं।

चरन् । आपः । न । पायनाय । राये । सहस्राय ।

तृष्यते । गोतमस्य ॥ ९ ॥

अत्रेदमाख्यानं । कदाचिन्मरुभूमौ वर्तमानस्य स्तोतुर्गोतमस्य ऋषेः समीपं देशांतरे वर्तमानं कूपमुत्खायाश्विनौ प्रापयतां । प्रापय्य च तं कूपं स्नानपानादिसौकर्यायोपरिमूलमधोबिलमवस्थापयतामिति तदेतदाह । हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ नासिकाप्रभवौ वा । एतत्संज्ञावश्विनौ युवामवतं । कूपनामैतत् । अवस्तात्तं कूपं परानुदेथां । परानुदेथां । गोतमस्य ऋषेः समीपे प्रेरितवंतौ । तदनंतरं तं कूपमुच्चाबुध्नं । उच्चैरुपरिष्टाद्बुध्नो मूलं यस्य स तथोक्तः । जिह्मबारं । जिह्ममधस्ताद्वर्तमानं तथा वक्रं बारं द्वारं यस्य स तथोक्तः । एवंगुणविशिष्टं चक्रथुः । युवामकृषाथां । तस्मात्कूपात्तृष्यते पिपासते गोतमस्य पायनाय पानार्थमापो न आपश्च । अयं नशब्दश्चार्थे । चरन् । प्रवाहरूपेण निरगमन् । कीदृशस्य । राये । हवींषि दत्तवतः । सहस्राय सहनशीलाय । यद्वा । सहस्रसंख्याकाय राये धनाय । एतत्संख्यधनलाभार्थं चाचरन् ॥ अनुदेथां । णुद प्रेरणे । तौदादिकः । जिह्मबारं । द्वारशब्दस्य पृषोदरादित्वाद्वारादेशः । चरन् । चर संचलने । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शपः पित्त्वादनुदात्तत्वं । तिङो लसार्वधातुकस्वरेण धातुस्वरः । पायनाय । हेतुमति च । शाच्छासाह्वेति युक् । भावे ल्युट् । राये । रा दाने । राति ददातीति राः । रातेर्डैः । उ० २. ६५. । ऊडिदमिति विभक्तेरुदात्तत्वं । तृष्यते । ञितृषा पिपासायां । श्यन् । लटः शतृ । श्यनो नित्त्वादाद्युदात्तत्वं । षष्ठ्यर्थे चतुर्थी वक्तव्येति चतुर्थी ॥

दशमीमृचमाह ॥

जुजुरुषो नासत्योत वव्रिं प्रामुंचतं द्रापिमिव च्यवानात् ।

प्रातिरतं जहितस्यायुर्दस्रादित्पतिमकृणुतं कनीनां ॥ १० ॥

जुजुरुषः । नासत्या । उत । वव्रिं । प्र । अमुंचतं ।

द्रापिंऽइव । च्यवानात् ।

प्र । अतिरतं । जहितस्य । आयुः । दस्रा । आत् । इत् ।

पतिं । अकृणुतं । कनीनां ॥ १० ॥

अत्रेदमाख्यानं । वलीपलितादिभिरुपेतो जीर्णांगः पुत्रादिभिः परित्यक्तश्च्यवनाख्य ऋषिरश्विनौ तुष्टाव । स्तुतावश्विनौ तस्मै ऋषये जरामपगमय्य पुनर्यौवनमकुरुतामिति । तदेतदाह । हे नासत्यावश्विनौ जुजुरुषो जीर्णात् च्यवनात् च्यवनाख्यादृषेः सकाशाद्वव्रिं कृतस्नं शरीरमावृत्यावस्थितां जरां प्रामुंचतं । प्रकर्षेणामोचयतं । तत्र दृष्टांतः । द्रापिमिव । द्रापिरिति कवचस्याख्या । यथा कश्चित्कवचं कृत्स्नशरीरव्यापकं धृत्वा पश्चाच्छरीरात्पृथक्करोति । तद्वत् । उत अपि च हे दस्रा एतत्संज्ञौ दर्शनीयौ वाश्विनौ जहितस्य पुत्रादिभिः परित्यक्तस्य ऋषेरायुर्जीवनं प्रातिरतं । प्रावर्धयतं । प्रपूर्वस्तिरतिर्वर्धनार्थः । आदित् अनंतरमेव युवानं संतं कनीनां कन्यानां पतिं भर्तारमकृणुतं । अकुरुतं ॥ जुजुरुषः । जॄष् वयोहानौ । लिटः क्वसुः । बहुलं छंदसीत्युत्वं । द्विर्भावः । पंचम्येकवचने वसोः संप्रसारणमिति संप्रसारणं । शासिवसि-

घनोनां चेति षत्वं। वव्रिं। वृञ् वरणे। आदृगमहन इति किप्रत्ययः। जहितस्य। ओहाक् त्यागे। कर्मणि निष्ठा। तस्य छंदस्युभयथेति सार्वधातुकत्वाद्यक्। तस्य बहुलं छंदसीति श्लुः। जहातेश्च। पा० ६. ४. ११६.। इतोत्वं। कनीनां। दधेर्मती बहुलमिति बहुलवचनात्कन्याशब्दस्यात्र संप्रसारणं॥

॥ इति प्रथमस्याष्टमे नवमो वर्गः॥

एकादशीमृचमाह॥

तद्वां नरा शंस्यं राध्यं चाभिष्टिमन्नासत्या वरूथं।

यद्विद्वांसा निधिमिवापगूळ्हमुद्दर्शतादूपथुर्वंदनाय॥ ११॥

तत्। वां। नरा। शंस्यं। राध्यं। च। अभिष्टिऽमत्। नासत्या। वरूथं।

यत्। विद्वांसा। निधिंऽइव। अपऽगूळ्हं। उत्। दर्शतात्। ऊपथुः। वंदनाय॥ ११॥

अत्रेदमाख्यानं। वंदनो नाम कश्चिदृषिः। स चासुरैः कूपे निखात उत्तरीतुमशक्नुवन्नश्विनावस्तौत्। तमश्विनौ कूपादुन्निन्यतुरिति तदाह। नरा अरोग्यस्य नेतारौ हे नासत्याश्विनौ वां युवयोः संबंध्यभिष्टिमदभ्येषणयुक्तमाभिमुख्येन प्राप्तव्यं तथा वरूथं वरणीयं कामयितव्यं तत्कर्म शंस्यं। अस्माभिः प्रशंसनीयं। राध्यं। आराधनीयं च। किं पुनस्तत्कर्म। विद्वांसा जानंतौ युवां निधिमिव निहितं धनमिवापगूळ्हमरण्ये निर्जने देशे कूपमध्येऽसुरैर्निगूढं वंदनाय वंदन-

कृषिं दर्शतादध्वगैः पिपासुभिर्द्रष्टव्यात्कूपादुदूपथुः । उदहार्ष्टं । एवं यदेतत्कूपादुद्धरणं तदित्यर्थः ॥ शंस्यं । शंसु स्तुतौ । अस्मात्कांतादचो यदिति यत् । यतोऽनाव इत्याद्युदात्तत्वं । अभिष्टिमत् । अभिपूर्वादिष गतावित्यस्माद्भावे क्तिन् । मंत्रे वृषेषेति क्तिन उदात्तत्वं । कृदुत्तरपदप्रकृतिस्वरत्वेन स एव शिष्यते । शकंध्वादित्वात्पररूपत्वं । तादौ चेति तु गतिस्वरस्य सर्वविधीनां छंदसि विकल्पितत्वादप्रवृत्तिः । ततो मतुप् । अंतोदात्तादुत्तरस्य तस्य ह्रस्वनुड्भ्यामित्युदात्तत्वं । वरूथं । जूवृञ्भ्यामूथन् । विद्वांसा । सुपां सुलुगिति विभक्तेराकारः । अपगूळ्हं । गुहू संवरणे । कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । ढत्वधत्वष्टुत्वढ्लोपदीर्घाः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । दर्शतात् । भृमृदृशीत्यादिनातच् । ऊपथुः । टुवप् बीजतंतुसंताने । लिट्यथसि यजादित्वात्संप्रसारणं । द्विर्वचनादि । वंदनाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

द्वादशीमृचमाह ॥

तद्वां नरा सनये दंस उग्रमाविष्कृणोमि तन्यतुर्न वृष्टिं ।
दध्यङ् ह यन्मध्वाथर्वणो वामश्वस्य शीर्ष्णा प्र
यदीमुवाच ॥ १२ ॥

तत् । वां । नरा । सनये । दंसः । उग्रं । आविः ।
कृणोमि । तन्यतुः । न । वृष्टिं ।

दध्यङ् । ह । यत् । मधु । आथर्वणः । वां । अश्वस्य ।

शीर्ष्णा । प्र । यत् । ईं । उवाच ॥ १२ ॥

अत्रेयमाख्यायिका । इंद्रो दधीचे प्रवर्ग्यविद्यां मधुविद्यां चोपदिश्य यदीमामन्यस्मैवक्ष्यसि शिरस्ते छेत्स्यामीत्युवाच । ततोऽश्विनावश्वस्य शिरश्छित्त्वा दधीचः शिरः प्रच्छिद्यान्यत्र निधाय तत्राश्व्यं शिरः प्रत्यधत्तां । तेन च दध्यङ् ऋचः सामानि यजूंषि च प्रवर्ग्यविषयाणि मधुविद्याप्रतिपादकं ब्राह्मणं चाश्विनावध्यापयामास । तदिंद्रो ज्ञात्वा वज्रेण तच्छिरोऽच्छिनत् । अथाश्विनौ तस्य स्वकीयं मानुषं शिरः प्रत्यधत्तामिति शाट्यायनवाजसनेययोः प्रपंचेनोक्तं । तदेतत्प्रतिपाद्यते । हे नरा नरावश्विनौ वां युवयोः संबंध्युग्रमुग्रं मनुष्यैर्दुःसहं दंसः । कर्मनामैतत् । युवाभ्यां पुरा कृतं तत्कर्म सनये धनलाभार्थमाविष्कृणोमि । प्रकटीकरोमि । तत्र दृष्टांतः । तन्यतुर्न । यथा मेघस्थः शब्दो वृष्टिं मेघांतर्वर्तमानमुदकं प्रवर्षणेन सर्वत्र प्रकटयति तद्वत् । किं तत्कर्म । अथर्वणः पुत्रो दध्यङ् एतत्संज्ञ ऋषिरश्वस्य शीर्ष्णा युष्मत्सामर्थ्येन प्रतिष्ठितेन शिरसा वां युवाभ्यामीमिमां मधुविद्यां यद्ध यदा खलु प्रोवाच । प्रोक्तवान् । तदानीमश्वस्य शिरसः संधानलक्षणं पुनर्मानुषस्य शिरसः प्रतिसंधानलक्षणं च यद्युवदीयं कर्म तदाविष्कृणोमीत्यर्थः ॥ सनये । षणु दाने । खनिकष्यंज्यसिवसिवनिसनिध्वनिग्रंथिचरिभ्यश्चेतीप्रत्ययः । तन्यतुः । तनु विस्तारे । ऋतन्यंजीत्यादिना यतुच् । यद्वा स्तन शब्दे । बाहुलकाद्यतुच् । छांदसः सलोपः । वृष्टिं । वृष्यते सिच्यतेऽनेनेति वृष्टिः ।

अंके वृषेत्यादिना क्तिन उदात्तत्वं। आथर्वणः। अप्रत्यार्थेऽध्वन्निति प्रकृतिभावाट्टिलोपाभावः। शीर्ष्णा। शीर्षन् छंदसि। पा० ६. १. ६०.। इति शिरःशब्दपर्यायः शीर्षन्शब्दोऽन्तोदात्तो निपात्यते। अल्लोपे सत्युदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वं॥

त्रयोदशीमृचमाह॥

अजोहवीन्नासत्या करा वां महे यामन्पुरुभुजा पुरंधिः।
श्रुतं तच्छासुरिव वध्रिमत्या हिरण्यहस्तमश्विनावदत्तं॥१३॥

अजोहवीत्। नासत्या। करा। वां। महे। यामन्।
पुरुऽभुजा। पुरंऽधिः।
श्रुतं। तत्। शासुःऽइव। वध्रिऽमत्याः। हिरण्यऽहस्तं।
अश्विनौ। अदत्तं॥ १३॥

वध्रिमती नाम कस्यचिद्राजर्षेः पुत्री नपुंसकभर्तृका। सा पुत्रलाभार्थमश्विनावाजुहाव। तदाह्वानं श्रुत्वाश्विनावागत्य तस्मै हिरण्यहस्ताख्यं पुत्रं ददतुः। तदेतदाह। पुरुभुजा बहूनां पालकौ प्रभूतहस्तौ वा हे नासत्यावश्विनौ महे महनीये पूजनीये यामन् यामनि। याति गच्छतीति यामम् स्तोत्रं। तस्मिन्सति कराभिमतफलस्य कर्तारौ वां युवां पुरंधिर्बहुधीर्वध्रिमती। वध्रिः पुत्रोत्पादनाशक्तः षंडकः। तद्वती। एतत्संज्ञा राजपुत्र्यजोहवीत्। पुनःपुनः स्तुत्वा पुत्रलाभार्थमाहूतवती। युवां च वध्रिमत्यास्तदाह्वानं श्रुतं।

शृणुत । तत्र दृष्टांतः । आसुरिव । यथा आसुराचार्यस्य वचनं शिष्योऽवहितः सन्नैकाग्र्येण शृणोति तद्वत् । श्रुत्वा च हे अश्विनौ तस्यै हिरण्यहस्तं सुवर्णमयपाणिं हितरमणीयपाणिं वा । एतत्संज्ञं पुत्रमदत्तं । प्रायच्छतं ॥ अजोहवीत् । ह्वयतेर्यङ्लुगंताल्लङ् । यङो वेति तिप ईडागमः । करा । करोतेः पचाद्यच् । सुपां सुलुगिति विभक्तेराकारः । यामन् । आतो मनिन्क्वनिब्वनिपश्चेति मनिन् । सुपां सुलुगिति सप्तम्या लुक् । श्रुतं । लङि बहुलं छंदसीति विकरणस्य लुक् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । शासुः । शास्तुः । शासु अनुशिष्टौ । शंसिशसिशासीत्यादिना संज्ञायां तृन् । इडभावः । छांदसस्तलोपः ॥

चतुर्दशीमृचमाह

आस्नो वृकस्य वर्तिकामभीके युवं नरा नासत्यामुमुक्तं ।

उतो कविं पुरुभुजा युवं ह कृपमाणमकृणुतं विचक्षे ॥ १४ ॥

आस्नः । वृकस्य । वर्तिकां । अभीके । युवं । नरा ।

नासत्या । अमुमुक्तं ।

उतो इति । कविं । पुरुऽभुजा । युवं । ह । कृपमाणं ।

अकृणुतं । विऽचक्षे ॥ १४ ॥

वर्तिका चटकसदृशस्य पक्षिणः स्त्री । तामरण्ये वर्तमानेन शुना ग्रस्तां पुरा किलाश्विनावमोचयतां । तदेतदाह । हे नरा नेतारौ नासत्यावश्विनौ युवं युवामभीकेऽभिगते वृक वर्तिकयोः

संग्रामे वृकस्य विकर्तकस्य शुन आस्न आस्यान्वर्तिकां चटकसदृशीममुमुक्तं । अमोचयत । यास्कस्त्वाह । नि० ५. २१. । पुनः पुनर्वर्तते प्रतिदिवसमावर्तत इति वर्तिकोषाः । तां वृकेनावरकेण सर्वंजगत्प्रकाशेनाच्छादयित्वा सूर्येण ग्रस्तां ॥ आस्नः । पद्दन्नित्यादिनास्यस्यासन्नादेशः । अल्लोपोऽन इत्यकारलोप उदात्तनिवृत्तिस्वरेणोडिदमिति विभक्तेरुदात्तत्वं । अमुमुक्तं । मुचेर्णतर्भावितण्यर्थाल्लुङि बहुलं छंदसीति विकरणस्य श्लुः । अपमाणं । क्रपिः स्तुतिकर्मा तुदादिषु द्रष्टव्यः । विकरणस्वरे प्राप्ते वृषादीनां चेत्याद्युदात्तत्वं । विचक्षे । तुमर्थे सेसेनिति सेन्प्रत्ययः । स्कोः संयोगाद्योरिति सलोपः ॥

पंचदशीमृचमाह ॥

चरित्रं हि वेरिवाच्छेदि पर्णमाजा खेलस्य

परितक्म्यायां।

सद्यो जंघामायसीं विश्पलायै धने हिते सर्तवे

प्रत्यधत्तं ॥ १५ ॥

चरित्रं । हि । वेःऽइव । अच्छेदि । पर्णं । आजा ।

खेलस्य । परिऽतक्म्यायां ।

सद्यः । जंघां । आयसीं । विश्पलायै । धने । हिते ।

सर्तवे । प्रति । अधत्तं ॥ १५ ॥

अगस्त्यपुरोहितः खेलो नाम राजा । तस्य संबंधिनी विश्पला नाम स्त्री संग्रामे शत्रुभिश्छिन्नपादासीत् । पुरोहितेनागस्त्येन स्तुतावश्विनौ रात्रावागत्यायोमयं पादं समधत्तां ।

तदेतदाह । आजा आजौ संग्रामेऽगस्त्यपुरोहितस्य खेलस्य संबंधिन्या विश्पलाख्याया चरित्रं चरणं वेरिव वेः पक्षिणः पर्णं पतत्रमिवाच्छेदि हि। पुरा छिन्नमभूत्खलु । हे अश्विनौ युवामगस्त्येन स्तुतौ संतौ परितक्म्यायां । परितक्म्या रात्रिः परित एनां तकतीति यास्कः । नि० ११. २५. । एनामुभयतः सूर्यो गच्छतीति तस्यार्थः । रात्रावागत्य सद्यस्तदानीमेव हिते धने निहिते धने जेतव्ये विषयभूते सति सर्तवे सर्तुं गंतुं विश्पलाया आयसीमयोमयीं जंघां जंघोपलक्षितं पादं प्रत्यधत्तं । संधानमेकीकरणं कृतवंतावित्यर्थः ॥ चरित्रं । अर्तिलूधूसूखनसहचर इत्र इति करण इत्रः । आजा । सुपां सुलुगिति विभक्तेर्डादेशः । आयसीं । अयःशब्दाद्विकारार्थे प्राणिरजतादिभ्योऽञ् । पा० ४. ३. १५४. । टिड्ढाणञिति ङीप् ॥

॥ इति प्रथमस्याष्टमे दशमो वर्गः ॥

षोडशीमृचमाह ॥

शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितांधं चकार ।
तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ॥ १६ ॥

शतं । मेषान् । वृक्ये । चक्षदानं । ऋज्रऽअश्वं । तं । पिता । अंधं । चकार ।
तस्मै । अक्षी इति । नासत्या । विऽचक्षे । आ । अधत्तं । दस्रा । भिषजौ । अनर्वन् ॥ १६ ॥

वृषागिरः पुत्र ऋज्राश्वो नाम राजर्षिः। तस्य समीपेऽश्विनोर्वाहनभूतो रासभो वृकी भूत्वावतस्थे। स च तस्या आहारार्थमेकोत्तरशतसंख्याकान्पौरजनानां स्वभूतान्मेषान् शकलीकृत्य प्रददौ। ऋज्राश्वः शतमेकं च मेषानिति मंत्रांतरे दर्शनात्। एवं पौराणामहिते प्रवृत्तं पिता शापेन नेत्रहीनमकरोत्। तेन स्तूयमानावश्विनावस्माद्वाहननिमित्तमस्यांधता जातेति जानंतौ तस्मा अक्षिणी प्रायच्छतामिति तदेतदाह। अत्र तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। य ऋज्राश्वः शतं शतसंख्याकान्मेषान्वृक्यै आत्मनोऽपोषितायै वृकस्त्रियै शकलीकृत्य प्रादात् तं चक्षदानं। चक्षतिरत्र कर्मांत शकलीकरणार्थः। शकलीकृत्य दत्तवंतं तमृज्राश्वं पिता शापेनांधं दृष्टिहीनं चकार। कृतवान्। हे नासत्या सत्यस्वभावौ सत्यस्य नेतारौ वा भिषजौ देवानां वैद्यभूतौ। अश्विनौ वै देवानां भिषजाविति श्रुतेः। दस्रा दर्शनीयावेतत्संज्ञौ वा हे अश्विनौ। अनर्वन् अनर्वणी द्रष्टव्यं प्रति पिहशापाङ्गमनरहिते अक्षी चक्षुषी विचक्षे विविधं द्रष्टुं समर्थे तस्मै ऋज्राश्वायाधत्तं। व्यधत्तं। अकुरुतं॥ वृक्ये। वृकोऽरण्यश्वा। तस्य स्त्री वृकी। जातेरस्त्रीविषयादिति ङीष्। जसादिषु छंदसि वा वचनमिति चतुर्थ्येकवचनस्याडभावे यणादेश उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। चक्षदानं। चक्षतेर्लिटः कानच्। चित्स्वरः। अक्षी। ई च द्विवचन इति परत्वादक्षिशब्दस्यैकारांतादेशः। स चोदात्तः। तस्मिन्कृते सकृद्गतौ विप्रतिषेध इति परिभाषया पुनर्नुम् न भवति। विचक्षे। संपदादिलक्षणो भावे क्विप्। अनर्वन्। ऋ गतौ। अस्मादन्येभ्योऽपि दृश्यंत इति

हुभिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वाद्वा वनिप् । अर्वं गमनं विषयं प्रत्यनयोर्नास्तीति बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सुपां सुलुगिति द्विवचनस्य लुक् । छांदसो नलोपाभावः ॥

सप्तदशीमृचमाह ॥

आ वां रथं दुहिता सूर्यस्य कार्ष्मेवातिष्ठदर्वता जयंती । विश्वे देवा अन्वमन्यंत हृद्भिः समु श्रिया नासत्या सचेथे ॥ १७ ॥

आ । वां । रथं । दुहिता । सूर्यस्य । कार्ष्मऽइव । अतिष्ठत् । अर्वता । जयंती । विश्वे । देवाः । अनु । अमन्यंत । हृत्ऽभिः । सं । ऊं इति । श्रिया । नासत्या । सचेथे इति ॥ १७ ॥

सविता स्वदुहितरं सूर्याख्यां सोमाय राज्ञे प्रदातुमैच्छत् । तां सूर्यां सर्वे देवा वरयामासुः । तेऽन्योन्यमूचुः । आदित्यमवधिं कृत्वाजिं धावाम । योऽस्माकं मध्य उज्जेष्यति तस्येयं भविष्यतीति । तत्राश्विनावुदजयतां । सा च सूर्या जितवतोस्तयो रथमारुरोह । अत्र प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छदित्यादिकं ब्राह्मणमनुसंधेयं । इदं चाख्यानं सूर्याविवाहस्य सत्येनोत्तभिता भूमिरिति सूक्तेन विस्पष्टयिष्यते । हे अश्विनौ वां युवयो रथं कार्ष्मेव । कार्ष्मशब्दः काष्ठवाची । यथा काष्ठमाजिधावनस्यावधितया निर्दिष्टं लक्ष्यमाशुगामी कश्चित्सर्वेभ्यो धावद्भ्यः पूर्वं प्राप्नोति । एवमेव

सर्वेभ्यो देवेभ्यः पूर्वमवंता शीघ्रमवधिं प्राप्नुवता युष्मदीयेनाश्वेन कारणभूतेन युवाभ्यां जयंती जीयमाना सूर्यस्य सवितुर्दुहितातिष्ठत्। आरूढवती। विश्वे सर्वे इतरे देवा एतदारोहणस्थानं हृद्भिर्हृदयैरन्वमन्यंत। अन्वजानन्। तदानीं हे नासत्यावश्विनौ श्रिया शक्तहस्तलाभरूपया संपदा कांत्या वा युवां संसचेथे। संगच्छेथे॥ जयंती। व्यत्ययेन कर्मणि शतृप्रत्ययः। हृद्भिः। पद्दन्नित्यादिना हृदयशब्दस्य हृद्भावः। सचेथे। षच समवाये। स्वरितेत्वादात्मनेपदं॥

अष्टादशीमृचमाह॥

यदयातं दिवोदासाय वर्तिर्भरद्वाजायाश्विना हयंता।

रेवदुवाह सचनो रथो वां वृषभश्च शिंशुमारश्च युक्ता॥ १८॥

यत्। अयातं। दिवःऽदासाय। वर्तिः। भरत्ऽवाजाय।

अश्विना। हयंता।

रेवत्। उवाह। सचनः। रथः। वां। वृषभः। च। शिंशुमारः।

च। युक्ता॥ १८॥

हे अश्विनौ हयंता स्तुतिभिराहूयमानौ युवां भरद्वाजाय संभ्रियमाणहविर्लक्षणान्नाय यजमानाय दिवोदासायैतत्संज्ञाय राजर्षयेऽभीष्टं फलं दातुं वर्तिस्तदीयं गृहं यद्यदायातं। अगच्छतं। तदानीं रेवद्धनयुक्तमन्नं वा युवयोः सचनः सेवनो रथ उवाह। तस्मै दिवोदासाय प्रापयामास। अपि च [illegible] वृषभोऽनड्वान् शिंशुमारो ग्राहश्च परस्परविरुद्धावपि समासमर्थ-

प्रकटनाय युक्ता। वाहनतया संयुक्तावास्तां ॥ दिवोदासाय। दिवस्र दासे षष्ठ्या अलुग्वक्तव्य इत्यलुक्। दिवोदासादीनां छंदस्युपसंख्यानमिति पूर्वपदाद्युदात्तत्वं। भरद्वाजाय। भृञ् भरणे। अस्माद्व्यत्ययेन कर्मणि शतृप्रत्ययः। शतुश्छंदस्युभयथेत्यार्धधातुकत्वेन। लसार्वधातुकानुदात्तत्वाभावात्प्रत्ययाद्युदात्तत्वं। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। हयंता। ह्वेञः कर्मणि लटो व्यत्ययेन शतृ। बहुलं छंदसीति संप्रसारणं। शपि गुणे छांदसोऽयादेशः। रेवत्। रयिशब्दान्मतुप्। रयेर्मतौ बहुलमिति संप्रसारणं। छंदसीर इति मतुपो वत्वं। रयिशब्दाच्चेति मतुप उदात्तत्वं। सचनः। षच सेचने। अनुदात्तेतश्च हलादेरिति युच्। युक्ता। सुपां सुलुगिति विभक्तेराकारः ॥

एकोनविंशीमृचमाह ॥

रयिं सुक्षत्रं स्वपत्यमायुः सुवीर्यं नासत्या वहंता।

आ जह्नावीं समनसोप वाजैस्त्रिरह्नो भागं दधतीमयातं ॥१९॥

रयिं। सुऽक्षत्रं। सुऽअपत्यं। आयुः। सुऽवीर्यं।

नासत्या। वहंता।

आ। जह्नावीं। सऽमनसा। उप। वाजैः। त्रिः। अह्नः।

भागं। दधतीं। अयातं ॥ १९ ॥

हे नासत्यावश्विनौ सुक्षत्रं शोभनबलं रयिं धनं स्वपत्यं शोभनैः पुत्रादिभिरुपेतं सुवीर्यं शोभनवीर्योपेतमायुः। अन्नामैतत्। एवंगुणविशिष्टमन्नं च वहंता धारयंतौ युवां समनसा

समानमनस्कौ संतौ जह्नावीं जह्नोर्वंश्यैः संबंधिनीं प्रजा-मायातं । आभिमुख्येनागच्छतं । कीदृशीं । वाजैर्हविर्लक्षणै-रन्नैरुपेतां । अह्नः । अवाह:शब्देन तत्रानुष्ठेयः सोमयागो लक्ष्यते । तस्य प्रात:सवनादिरूपेण त्रिधा विभक्तं भागमंशं दधतीं बिभ्रतीं । अनुसवनं हविर्भिर्यजमानामित्यर्थः ॥ सुचत्रं । बहुव्रीहौ नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । सुवीरं । वीर-वीर्यौ चेति बहुव्रीहावुत्तरपदाद्युदात्तत्वं । जह्नावीं । जह्नु-शब्दात्तस्येदमित्यर्थेऽण् । टिड्ढाणञिति ङीप् । जाह्नवीह्रस्व-दीर्घयोर्विनियमः पृषोदरादित्वात् । उक्तं च । वर्णागमो वर्णविपर्ययश्चेति । अत एव मध्योदात्तत्वं ॥

विंशीमृचमाह ॥

परिविष्टं जाहुषं विश्वतः सीं सुगेभिर्नक्तमूहथू रजोभिः ।
विभिंदुना नासत्या रथेन वि पर्वताँ अजरयू अयातं ॥ २० ॥

परिऽविष्टं । जाहुषं । विश्वतः । सीं । सुऽगेभिः । नक्तं । ऊहथुः । रजःऽभिः ।
विऽभिंदुना । नासत्या । रथेन । वि । पर्वतान् । अजरयू इति । अयातं ॥ २० ॥

जाहुषो नाम कश्चिद्राजा । विश्वतः सर्वतः परिविष्टं शत्रुभिः परिवृतं तं राजानं हे नासत्यावश्विनावजरयू जरा-रहितौ नित्यतरुणौ युवां विभिंदुना विशेषेण सर्वस्य भेदकेना-त्मीयेन रथेन नक्तं रात्रौ सुगेभिः सुष्ठु गंतुं शक्यै रजोभी रंज-

कैर्मार्गैरूहथुः । तस्माज्जलसमूहान्निरगमयतं । गौसित्येत-त्यादपूरणं । निर्गतेन तेन सह पर्वतान् प्रत्यभिरारोढुमशक्यान् शिलोच्चयान्प्रयातं । विशेषेणागच्छतं ॥ परिविष्टं । विश प्रवेशने । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । सृणिभिः । सृदुरोरधिकरण इति गमेर्डः । विभिंदुना । भिदिर् विदारणे । औणादिक उप्रत्ययो नुमागमश्च । अजरयू । न जरा अजरा । तामात्मन इच्छतीति सुप आत्मनः क्यच् । न छंदस्यपुत्रस्येतीत्वदीर्घयोर्निषेधः । क्याच्छंदसीत्युप्रत्ययः ॥

॥ इति प्रथमस्याष्टम एकादशो वर्गः ॥

एकविंशीमृचमाह ॥

एकस्या वस्तोरावतं रणाय वशमश्विना सनये सहस्रा ।
निरहतं दुच्छुना इंद्रवंता पृथुश्रवसो वृषणावरातीः ॥ २१ ॥

एकस्याः । वस्तोः । आवतं । रणाय । वशं । अश्विना ।
सनये । सहस्रा ।
निः । अहतं । दुच्छुनाः । इंद्रऽवंता । पृथुऽश्रवसः ।
वृषणौ । अरातीः ॥ २१ ॥

हे अश्विनौ वशमेतत्संज्ञमृषिमेकस्या वस्तोरेकस्याह्नो रणाय रमणीयाय सहस्रा सहस्रसंख्याकाय सनये धनलाभायावतं । अरक्षतं । स ऋषिः प्रत्यहं यथा सहस्रसंख्यं धनं लभते तथा रक्षितवंतावित्यर्थः । अपि च हे वृषणा कामानां वर्षितारावश्विनौ । इंद्रवंता इंद्रेण संयुक्तौ युवां दुच्छुना दुष्टसुखा-

न्दु खस्य कर्तृन् पृथुश्रवसो विस्तीर्णयशसोऽरातीः शत्रून्निरहतं । निःशेषेणावधिष्टं । यद्वा कानीनस्य पृथुश्रवःसंज्ञस्य राज्ञः शत्रूनिति योज्यं ॥ सहस्रा । सुपां सुलुगिति चतुर्थ्या डादेशः । अहतं । लङि थसस्तं । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः । दुच्छुनाः । शुनमिति सुखनाम । दुष्टं सुखं यासां तास्तथोक्ताः । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं ॥

द्वाविंशीमृचमाह ॥

शरस्य॑ चिदार्च॒त्कस्या॑व॒तादा नी॒चादु॒च्चा च॑क्रथु॒: पात॑वे॒ वाः ।
श॒यवे॑ चिन्नासत्या॒ शची॑भि॒र्जसु॑रये स्त॒र्यं॑ पिप्यथु॒र्गां ॥ २२ ॥

शर॑स्य । चि॒त् । आ॒र्च॒त्ऽकस्य॑ । अ॒व॒तात् । आ । नी॒चात् ।
उ॒च्चा । च॒क्र॒थुः॒ । पात॑वे । वारिति॒ वाः ।
श॒यवे॑ । चि॒त् । ना॒स॒त्या॒ । शची॑भिः । जसु॑रये । स्त॒र्य॑ ।
पि॒प्य॒थुः॒ । गां ॥ २२ ॥

आर्चत्कस्य ऋचत्कपुत्रस्य शरस्यैतत्संज्ञस्यापि स्तोतुः पिपासितस्य पातवे पानार्थं नीचान्नीचीनादवतात्कूपादुच्चा उच्चैरुपरिष्ठाद्वारुदकं हे अश्विनौ युवामाचक्रथुः । आभिमुख्येन कृतवंतौ । तथा हे नासत्यावश्विनौ शचीभिर्युष्मदीयैः कर्मभिः परिचरणैर्जसुरये श्रांताय शयवे चित् शयुनाम्ने ऋषये स्तर्यं निवृत्तप्रसवां गामग्निहोत्रार्थस्य पयसो दोग्ध्रीं पिप्यथुः । पयसा युवामापूरितवंतौ ॥ पातवे । पा पाने । तुमर्थे सेसेनिति तवेन्प्रत्ययः । जसुरये । जसु हिंसायां । जसिसहोरुरिन् । उ०

२. ७२.। स्तर्यं। स्तीर्यत आच्छाद्यते प्रसवप्रसमर्थाभावेनेति स्तरीः। अवितृस्तृतंत्रिभ्य ईरितीकारप्रत्ययः। वा छंदसीत्यमि पूर्वत्वस्य विकल्पितत्वादभावे यणादेशः। उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं। पिप्यथुः। प्यायी वृद्धौ। लिटि व्यत्ययेन परस्मैपदं। लिड्यङोश्च। पा० ६. १. २९.। इति पीभावः॥

त्रयोविंशीमृचमाह॥

अवस्यते स्तु॑वते कृ॑ष्णियाय॑ ऋ॑जूयते ना॑सत्या शची॑भिः।
पशुं॑ न नष्टमि॑व दर्श॑नाय वि॑ष्णाप्वं॑ ददथु॒र्विश्व॑काय॥ २३॥

अवस्यते। स्तुवते। कृष्णियाय॑। ऋजुऽयते। नासत्या। शची॑भिः।
पशुं॑। न। नष्टंऽइव। दर्श॑नाय। विष्णाप्वं॑। ददथुः।
विश्व॑काय॥ २३॥

अवस्यतेऽवनं रक्षणमात्मन इच्छते स्तुवते स्तुतिं कुर्वते कृष्णियाय। कृष्णो नाम कश्चित् तस्य पुत्राय ऋजूयत आर्जवमिच्छते विश्वकायैतत्संज्ञाय ऋषये हे नासत्यौ युवां शचीभिरात्मीयैः कर्मभिर्विष्णाप्वं नाम विनष्टं पुत्रं दर्शनाय दर्शनार्थं ददथुः। दत्तवंतौ। तत्र दृष्टांतः। पशुं न नष्टमिव। एक उपमार्थीयः पूरकः। यथा कश्चिद्विनष्टं पशुं स्वामिनो दृष्टिपथं प्रापयति तद्वत्॥ अवस्यते। अवस्शब्दात्सुप आत्मनः क्यच्। शतुरनुम इति विभक्तेरुदात्तत्वं। कृष्णियाय। कृष्णशब्दादपत्यार्थे छांदसो घच्॥

चतुर्विंशीमृचमाह ॥

दश रात्रीरशिवेना नव द्यूनवनद्धं श्नथितमप्स्वं१ंतः ।
विप्रुतं रेभमुदनि प्रवृक्तमुन्निन्यथुः सोममिव स्रुवेण ॥ २४ ॥

दश । रात्रीः । अशिवेन । नव । द्यून् । अवऽनद्धं । श्नथितं ।
अप्ऽसु । अंतरिति ।
विऽप्रुतं । रेभं । उदनि । प्रऽवृक्तं । उत् । निन्यथुः ।
सोमंऽइव । स्रुवेण ॥ २४ ॥

पुरा खलु रेभमृषिं पाशैर्बद्धासुराः कूपे कस्यचिद्दिवसस्य सायंकाले प्रचिक्षिपुः । स चाश्विनौ स्तुवन् दश रात्रीर्नवाहानि च कूपमध्ये तथैवावतस्थे । दशमेऽहनि प्रातरश्विनौ तं कूपादुदतारयतामिति तदाह । अप्सु कूपांतर्वर्तमानास्वंतर्मध्येऽसुरैः पातितमशिवेन दुःखहेतुना दाम्नावनद्धं बद्धं श्नथितं शत्रुभिर्हिंसितं दश रात्रीर्दशसंख्याका निशा नव द्यून् नवसंख्याकान्यहानि च । अत्यंतसंयोगे द्वितीया । एतावंतं कालं तत्रैव कूपेऽवस्थितं । अत एवोदन्युदके विप्रुतं विप्लुतं व्याप्तसर्वांगं । प्रवृक्तं । लुप्तोपममेतत् । प्रवृंजनेन संतप्तं घर्ममिव व्यथया संतप्यमानं । एवंभूतं रेभं हे अश्विनौ युवामुन्निन्यथुः । तस्मात्कूपादुन्नीतमुत्तीर्णं कृतवंतौ । तत्र दृष्टांतः । सोममिव । यथाग्निहोत्रहोमार्थमभिषुतं सोमरसं कूपसदृशेऽग्निहोत्रस्थालीमध्ये वर्तमानं स्रुवेणाध्वर्युरुन्नयत्यूर्ध्वं नयति तद्वत् ॥ अवनद्धं । णह बंधने । कर्मणि निष्ठा । नहो धः । पा० ८,

२. ३४.। क्रुषस्तथयोर्ध इति निष्ठातकारस्य धत्वं । गतिरनं-तर इति गतेः प्रकृतिस्वरत्वं । श्रथितं । श्रथ हिंसार्थः । निष्ठा । विप्रुतं । प्रुङ् गतौ । अवनद्दवत्प्रत्ययस्वरौ कपिल-कादित्वाल्लत्वविकल्पः । उदनि । पद्दन्नित्यादिनोदकशब्दस्यो-दन्भावः ॥

पंचविंशीमृचमाह ॥

प्र वां दंसांस्यश्विनाववोचमस्य पतिः स्यां सुगवः सुवीरः ।
उत पश्यंन्नश्नुवन्दीर्घमायुरस्तमिवेज्जरिमाणं जगम्यां ॥ २५ ॥

प्र । वां । दंसांसि । अश्विनौ । अवोचं । अस्य । पतिः ।
स्यां । सुऽगवः । सुऽवीरः ।
उत । पश्यंन् । अश्नुवन् । दीर्घं । आयुः । अस्तंऽइव । इत् ।
जरिमाणं । जगम्यां ॥ २५ ॥

एवमनेन सूक्तेनाश्विनोर्महिमानं प्रशस्याधुना मंत्रद्रष्टा स्वाभीष्टं प्रार्थयते । हे अश्विनौ वां युवयोर्दंसांसि पुरा कृतानि कर्माणि प्रावोचं । इत्थमुक्तवानस्मि । सोऽहं सुगवः शोभनगो-युक्तः सुवीरः शोभनवीरश्च भूत्वास्य राष्ट्रस्य पतिरधिपतिः स्यां । भवेयं । उत अपि च पश्यन् अक्षिभ्यां पश्यन् । उतलक्षण-मेतत् । सर्वैरिंद्रियैः स्वस्वविषयसमर्थैर्दीर्घं वर्षशतरूपेणायत-मायुर्जीवितं चाश्नुवन् प्राप्नुवन्नहमस्तमिव यथा गृहं स्वामी निःकंटकं प्रविशति एवं जरिमाणं जरां जगम्यां । कंटकरा-हित्येन प्राप्नुयां । वृद्धः संश्चिरकालं निवसेयमित्यर्थः ॥ स्यां ।

अस्तेः प्रार्थनायां लिङ्। यासुट्। श्नसोरल्लोप इत्यकारलोपः। अश्न्,वन्। अशू व्याप्तौ। व्यत्ययेन श्नः। जरिमाणं। जॄष् वयोहानौ। अस्मादौणादिक इमनिच्। जगम्यां। गमेः प्रार्थनायां लिङि बहुलं छंदसीति विकरणस्य श्लुः॥

॥ इति प्रथमस्याष्टमे द्वादशो वर्गः॥

मध्व इति पंचविंशत्यृचं द्वितीयं सूक्तं। औशिजस्य कक्षीवत आर्षं त्रैष्टुभमाश्विनं। मध्व इत्यनुक्रांतं॥ प्रातरनुवाकाश्विनशस्त्रयोः पूर्वसूक्तेन सहोक्तो विनियोगः॥

तत्र प्रथमामृचमाह॥

मध्वः सोमस्याश्विना मदाय प्रत्नो होता विवासते वां।
बर्हिष्मती रातिर्विश्रिता गीरिषा यातं नासत्योप वाजैः॥१॥

मध्वः। सोमस्य। अश्विना। मदाय। प्रत्नः। होता।
आ। विवासते। वां।
बर्हिष्मती। रातिः। विऽश्रिता। गीः। इषा। यातं।
नासत्या। उप। वाजैः॥ १॥

हे अश्विनौ मध्वो मधुना माधुर्योपेतेन सोमस्य सोमेन मदाय युवयोर्मदार्थं प्रत्नश्चिरंतनो होता होमनिष्पादको यजमानो वां युवामा विवासते। विवासतिः परिचरणकर्मा। आङ् मर्यादायां। यथाशास्त्रं परिचरति। अपि च रातिर्दातव्यं हविर्बर्हिष्मती। आस्तीर्णेन बर्हिषा युक्तं। युष्मदर्थं बर्हिष्यासादितमित्यर्थः। तथा गीः स्तुतिलक्षणा वाक् च विश्रिता

ऋत्विक्षु समवेता । तैः स्तुतिरपि क्रियत इत्यर्थः । अतो हे नासत्यावश्विनौ । इषास्मभ्यं दातव्येनान्नेन वाजैर्बलैश्च सह युवामुपयातं । अस्मत्समीपं प्राप्नुतं ॥ मध्वः । सुपां सुपो भवंतीति तृतीयार्थे षष्ठी । जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणाभावे यणादेशः । सदाय । मदी हर्षे । मदो-ऽनुपसर्गं इत्यप् । रातिः । रा दाने । कर्मणि क्तिन् । मंत्रे वृषेषेत्यादिना तस्योदात्तत्वं । विश्रिता । श्रिञ् सेवायां । कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

यो वामश्विना मनसो जवीयान्रथः स्वश्वो विश आजिगाति ।
येन गच्छथः सुकृतो दुरोणं तेन नरा वर्तिरस्मभ्यं यातं ॥ २ ॥

यः । वां । अश्विना । मनसः । जवीयान् । रथः । सुऽअश्वः ।
विशः । आऽजिगाति ।
येन । गच्छथः । सुऽकृतः । दुरोणं । तेन । नरा । वर्तिः ।
अस्मभ्यं । यातं ॥ २ ॥

हे अश्विनौ वां युवयोः स्वभूतो मनसो जवीयान् मनसो-ऽप्यतिशयेन वेगवान् स्वश्वः शोभनाश्व एवंभूतो यो रथो विशः प्रजा आजिगाति । आभिमुख्येन गच्छति । येन रथेन सुकृतः शोभनं यागं कुर्वतो यजमानस्य दुरोणं देवयजनलक्षणं गृहं गच्छथः । हे नरा नेतारावश्विनौ तेन रथेनास्मभ्यमस्माकं वर्तिर्वर्तनाभिकरणं गृहं यातं । आगच्छतं ॥ जवीयान् ।

जवोऽस्यास्तीति जववान्। तदस्यास्तीति मतुप्। तत आतिशायनिक ईयसुन्। विन्मतोर्लुक्। टेरिति टिलोपः। जिगाति। गा स्तुतौ। जौहोत्यादिकः। गतिकर्मसु पाठादत्र गत्यर्थः। बहुलं छंदसीत्यभ्यासस्येत्वं॥

तृतीयामृचमाह॥

ऋषिं नरावंहसः पांचजन्यमृबीसादत्रिं मुंचथो गणेन।
मिनंता दस्योरशिवस्य माया अनुपूर्वं वृषणा चोदयंता॥३॥

ऋषिं। नरौ। अंहसः। पांचऽजन्यं। ऋबीसात्। अत्रिं।
मुंचथः। गणेन।
मिनंता। दस्योः। अशिवस्य। मायाः। अनुऽपूर्वं।
वृषणा। चोदयंता॥३॥

हविर्नाग्निमित्यनयोक्त एवार्थः पुनः प्रकारांतरेणानया प्रतिपाद्यते। अतस्तत्रोक्तं सर्वमत्रापि द्रष्टव्यं। अक्षरार्थस्तु हे नरौ नेतारौ वृषणा कामानां वर्षितारावश्विनौ पांचजन्यं। निषादपंचमाश्चत्वारो वर्णाः पंच जनाः। तेषु भवं। स्वर्भानुना गृहीतममुं सूर्यं मोचयन्नत्रिः सर्वेषां हिताचरणात्तत्र भव इत्युच्यते। तादृशमृषिमंहसः पापरूपादृबीसात् शतद्वारं यंत्रगृहेऽत्रेः पीडार्थमसुरैः प्रक्षिप्तात्तुषाग्नेः सकाशाद्गणेनेंद्रियवर्गेण पुत्रपौत्रादिगणेन वा सह मुंचथः। अमोचयतं। किं कुर्वंतौ। मिनंता शत्रून् हिंसंतौ दस्योरुपक्षपयितुरशिवस्य दुःखकारिणोऽसुरस्य संबंधिनीस्तस्मिन्नत्रौ प्रयुक्ता मायास्त्वानुपूर्व्यः

आनुपूर्व्येण चोदयंता प्रेरयंतौ निवारयंतौ ॥ पांचजन्यं । बहिर्देवपंचजनेभ्यस्तेति वक्तव्यमिति भवार्थे ञ्यः । मिनंता । मीञ् हिंसायां । क्रैयादिकः । लटः शतृ । मीनातेर्निगमे इति ह्रस्वत्वं ॥

चतुर्थीमृचमाह ॥

अश्वं न गूळ्हमश्विना दुरेवैरृषिं नरा वृषणा रेभमप्सु ।
सं तं रिणीथो विप्रुतं दंसोभिर्न वां जूर्यंति पूर्व्या कृतानि ॥४॥

अश्वं । न । गूळ्हं । अश्विना । दुःऽएवैः । ऋषिं । नरा ।
वृषणा । रेभं । अप्ऽसु ।
सं । तं । रिणीथः । विऽप्रुतं । दंसःऽभिः । न । वां ।
जूर्यंति । पूर्व्या । कृतानि ॥ ४ ॥

नरा नेतारौ वृषणा कामानां वर्षकौ हे अश्विनौ दुरेवैर्दुष्प्रापैरसुरैरप्सु कूपस्थेषूदकेषु गूळ्हं निगूढं निखातं रेभमृषिं कूपादुन्नीय विप्रुतं विश्लिष्टावयवं तमश्वं न व्याधितमश्वमिव दंसोभिरात्मीयैर्भैषज्यरूपैः कर्मभिः संरिणीथः । समधत्तं । सर्वैरवयवैरुपेतमकुरुतमित्यर्थः । वां युवयोः संबंधीनि पूर्व्या चिरंतनानि कृतानि कर्माणि न जूर्यंति । न हि जीर्णानि भवंति ॥ दुरेवैः । दुरुपसृष्टादेतेरौणादिक: सुप्वेति खल् । रिणीथः । री गतिरेषणयोः । क्रैयादिकः । प्वादीनां ह्रस्वः । जूर्यंति । जूष् वयोहानौ । दैवादिकत्वाच्छ्यन् । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः ॥

पंचमीमृचमाह ॥

सुषुप्वांसं न निर्ऋतेरुपस्थे सूर्यं न दस्रा तमसि क्षियंतं ।

शुभे रुक्मं न दर्शतं निखातमुदूपथुरश्विना वंदनाय ॥ ५ ॥

सुसुप्वांसं । न । निःऽऋतेः । उप स्थे । सूर्यं । न । दस्रा ।

तमसि । क्षियंतं ।

शुभे । रुक्मं । न । दर्शतं । निऽखातं । उत् । ऊपथुः ।

अश्विना । वंदनाय ॥ ५ ॥

निर्ऋतिरिति भूनाम । निर्ऋतेः पृथिव्या उपस्थ उत्संगे सुषुप्वांसं सुप्तवंतं पुरुषमिव । कूपमध्ये शयानं सूर्यं न सूर्यमिव तमसि कूपांतर्गतांधकारे क्षियंतं निवसंतं सूर्यमिव । तेजस्विनमित्यर्थः । शुभे शोभनार्थं निर्मितं रुक्मं न रोचमानं सुवर्णमयाभरणमिव दर्शतं दर्शनीयं । एवंगुणविशिष्टं कूपेऽसुरैर्निखातं वंदनाय वंदनमृषिं हे दस्रा दर्शनीयावश्विनौ युवामुदूपथुः । उद्धृतवंतौ ॥ सुषुप्वांसं । ञिष्वप शये । लिटः क्वसुः । वचिस्वपीत्यादिना संप्रसारणं द्विर्वचनादि । उपस्थे । उपपूर्वात्तिष्ठतेर्घञर्थे कविधानमित्यधिकरणे कप्रत्ययः । मरुद्वृधादित्वात्पूर्वपदांतोदात्तत्वं । वंदनाय । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थी ॥

॥ इति प्रथमस्याष्टमे त्रयोदशो वर्गः ॥

अष्टमीमृचमाह ॥

तद्वां नरा शंस्यं पज्रियेण कक्षीवता नासत्या परिज्मन् ।
शफादश्वस्य वाजिनो जनाय शतं कुंभाँ असिंचतं मधूनां ॥६॥

तत् । वां । नरा । शंस्यं । पज्रियेण । कक्षीवता । नासत्या ।
परिऽज्मन् ।
शफात् । अश्वस्य । वाजिनः । जनाय । शतं । कुंभान् ।
असिंचतं । मधूनां ॥ ६ ॥

हे नरा नेतारौ नासत्यावश्विनौ परिज्मन् परिगमने-ऽभीष्टस्य प्रापणे निमित्तभूते सति पज्राणामंगिरसां कुले जातेन कक्षीवता मया वां युवयोः संबंधि तत्कर्म शंस्यं। प्रकर्षेण शंसनीयं। तच्छब्दश्रुतेर्यच्छब्दाध्याहारः। यज्जनाया-पेक्षमाणाय पुरुषाय वाजिनो वेगवतस्त्वदीयस्याश्वस्य शफा-न्निर्गतैर्मधूनां मधुभिः शतसंख्याकान्कुंभानसिंचतं। अपूरयतं। सिंचतिरत्र पूरणार्थः। यदेतन्मधुना पूरणं तच्छंस्यमित्यर्थः॥

सप्तमीमृचमाह ॥

युवं नरा स्तुवते कृष्णियाय विष्णाप्वं ददथुर्विश्वकाय ।
घोषायै चित्पितृषदे दुरोणे पतिं जूर्यंत्या अश्विनावदत्तं ॥७॥

युवं । नरा । स्तुवते । कृष्णियाय । विष्णाप्वं । ददथुः ।
विश्वकाय ।

घोषायै । चित् । पितृऽसदे । दुरोणे । पतिं । जूर्यन्त्यै ।

अश्विनौ । अदत्तं ॥ ७ ॥

हे नरा नेतारावश्विनौ युवं युवां स्तुवते स्तोत्रं कुर्वते कर्षाणाय कृष्णाख्यस्य पुत्राय विश्वकाय विष्णाप्वं ददथुः । विष्णाप्वं नाम विनष्टं पुत्रं दत्तवंतौ । घोषा नाम ब्रह्मवादिनी कक्षीवतो दुहिता । सा कुष्ठिनी सती कस्मै चिदप्यदत्ता पितृगृहे निषण्णा जीर्णासीत् । साश्विनोरनुग्रहान्नष्टकुष्ठा सती पतिं लेभे । तदेतदाह । हे अश्विनौ पित्रा संबद्धे दुरोणे स्वकीयजनकगृहे कुष्ठरोगेण भर्तारमप्राप्य पितृषदे पितृसमीपे निषण्णायै जूर्यन्त्यै जरां प्राप्नुवत्यै घोषायै चित् एतत्संज्ञायै ब्रह्मवादिन्या अपि रोगोपशमनेन पतिं भर्तारमदत्तं । युवां दत्तवंतौ ॥ पितृषदे । षद्लृ विशरणादिषु । क्विप् चेति क्विप् । जूर्यन्त्यै । जूष् वयोहानौ । लटः शतृ । दिवादित्वाच्छ्यन् । बहुलं छंदसीत्युत्वं । हलि चेति दीर्घः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे श्यनो नित्त्वादाद्युदात्तत्वं ॥

अष्टमीमृचमाह ॥

युवं श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय ।
प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय श्रवो अध्यधत्तं ॥ ८ ॥

युवं । श्यावाय । रुशतीं । अदत्तं । महः । क्षोणस्य ।

अश्विना । कण्वाय ।

प्रऽवाच्यं । तत् । वृषणा । कृतं । वां । यत् । नार्षदाय ।

श्रवः । अधिऽअधत्तं ॥ ८ ॥

हे अश्विनौ युवं युवां श्यावाय कुष्ठरोगेण श्यामवर्णाय ऋषये रुशतीं दीप्तत्वचं स्त्रियमदत्तं । प्रायच्छतं । अपि च । चोणस्य चोणाय दृष्टिराहित्येन गंतुमशक्तायैकस्मिन्नेव स्थाने निवसते कण्वाय ऋषये महस्तेजस्तेजसं चक्षुरिंद्रियमदत्तमिति शेषः । तथा हे वृषणा कामानां वर्षितारौ वां युवयोस्तत्कृतं कर्म प्रवाच्यं । प्रकर्षेण वाचनीयं शंसनीयं । नार्षदाय नृषदः पुत्राय बधिराय ऋषये श्रवः श्रवणेंद्रियं यदध्यधत्तं । दत्तवंतौ स्थ इति यत् तदित्यर्थः । अपर आह । ब्राह्मणस्य परीक्षार्थमसुराः कण्वमृषिं गूढे तमसि निदधुः । अत्रैव स्थितः सन् व्युष्टामुषसं विजानीहि यदि त्वं ब्राह्मणोऽसीति । तमश्विनावागत्योचतुः । व्युष्टायां ऊर्ध्वस्योपरि वीणां वादयंतावावामागमिष्यावः । तं शब्दं श्रुत्वा व्युष्टामुषसं ब्रूहि । तदेतत्प्रतिपाद्यते । हे वृषणा कामानां वर्षितारावश्विनौ वां युवयोस्तत्कृतं कर्म प्रवाच्यं प्रशंसनीयं । यन्नार्षदाय नृषदपुत्राय कण्वाय चोणस्य । चोणः शब्दकारो वीणाविशेषः । महा महतः चोणस्य श्रवःशब्दमध्यधत्तं । उषसो विज्ञानार्थमधिकमकुरुतं ॥ महः । मह पूजायां । अस्मादौणादिकोऽसिप्रत्ययः । पक्षांतरे तु महच्छब्दात् षष्ठ्येकवचने छांदसोऽल्लोपः । बृहन्महतोरुपसंख्यानमिति विभक्तेरुदात्तत्वं । यद्वा । क्विबंतात् षष्ठ्येकवचनं । चोणस्य । क्षि निवासगत्योः । कृत्यल्युटो बहुलमिति कर्तरि ल्युट् । पृषोदरादित्वात् चोणभावः । तदुक्तं

यास्केन । चीणस्य चयणस्य । नि० ६.६. । इति पचांतरे तु टुन्तु शब्द इत्यस्मादौणादिको नप्रत्ययः । नार्षदाय । ऋष्यंधकेत्यण् ॥

नवमीमृचमाह ॥

पुरु वर्पांस्यश्विना दधाना नि पेदव ऊहथुराशुमश्वं ।

सहस्रसां वाजिनमप्रतीतमहिहनं श्रवस्यं१ तरुत्रं ॥ ९ ॥

पुरु । वर्पांसि । अश्विना । दधाना । नि । पेदवे ।

ऊहथुः । आशुं । अश्वं ।

सहस्रऽसां । वाजिनं । अप्रतिऽइतं । अहिऽहनं ।

श्रवस्यं । तरुत्रं ॥ ९ ॥

हे अश्विनौ पुरु पुरूणि बहूनि वर्पांसि । रूपनामैतत् । आत्मीयैः कर्मभिः कृतानि रूपाणि दधाना धारयंतौ युवामाशुं शीघ्रगामिनमश्वं पेदवे पेदुनाम्ने स्तुवते न्यूहथुः । नितरां प्रापितवंतौ दत्तवंतावित्यर्थः । कीदृशमश्वं । सहस्रसां । सहस्रसंख्याकस्य धनस्य सनितारं दातारं । वाजिनं । बलवंतं । अत एवाप्रतीतं । शत्रुभिरप्रतिगतं । अहिहनं । अहीनामागत्य हंतॄणां शत्रूणां शत्रूणां हंतारं । श्रवस्यं । श्रवः श्रवणीयं स्तोत्रं । तत्र भवं स्तुतिविषयमित्यर्थः । तरुत्रं । तरितारं ॥ वर्पांसि । वृञ् वरणे । वृञ्शीङ्भ्यां रूपस्वांगयोः पुट् चेत्यसुन् । पुडागमश्च । दधाना । दधातेर्लटः शानच् । अभ्यस्तानामादिरित्याद्युदात्तत्वं । सहस्रसां । षण दाने । जनसनखनेति

यिट्। विड्वनोरनुनासिकस्यादित्यात्वं। अवस्यं। अवस्शब्दा-द्भवे छंदसीति यत्। तित्स्वरितः। तरुत्रं। तृ प्लवनतरणयोः। अशित्रादिभ्य इत्रोत्रौ। उ॰ ४. १७४.। इत्युत्रप्रत्ययः। व्यत्ययेनाद्युदात्तत्वं। यद्वा। अमितक्षमितेत्यादौ निपातना-त्तन्नंतात्तरुत्रशब्दादपि संज्ञापूर्वकस्य विधेरनित्यत्वान्नुणाभावे यण् नित्स्वरेणाद्युदात्तत्वं॥

दशमीमृचमाह॥

एतानि वां अवस्या सुदानू ब्रह्मांगूषं सदनं रोदस्योः।
यद्वां पज्रासो अश्विना हवंते यातमिषा च विदुषे
च वाजं॥ १०॥

एतानि। वां। अवस्यां। सुदानू इति सुऽदानू। ब्रह्म।
आंगूषं। सदनं। रोदस्योः।
यत्। वां। प्रजासः। अश्विना। हवंते। यातं। इषा।
च। विदुषे। च। वाजं॥ १०॥

हे सुदानू शोभनदानावश्विनौ युवां युवयोः संबंधीन्येतानि समनंतरोक्तानि वीर्याणि अवस्या अवणीयानि सर्वैर्ज्ञातव्यानि भवंति। तदर्थं रोदस्योर्द्यावापृथिव्यात्मना वर्तमानयोर्युवयोः। उक्तं च यास्केन। तत्कावश्विनौ द्यावापृथिव्यावित्येक इति। तथा च तैत्तिरीयकं। इमे अश्विना संवत्सरोऽग्निर्वैश्वानर इति। तयोर्युवयोः सदनं स्तोतृसमीपे निवेशनं प्रसादनहेतु-भूतं वांगूषमाघोषणीयं ब्रह्म मंत्ररूपं स्तोत्रं निष्पन्नमिति

शेषः । यद्यदा पज्राःसोऽङ्गिरसां गोत्रोत्पन्ना यजमाना हे अश्विनौ वां युवां हुवंते । स्तुतिभिराकारणार्थमाह्वयंति । तदानीमिषा दातव्येनान्नेन सह यातं । आगच्छतं च विदुषे युष्मद्विषयं स्तोत्रं जानते मह्यं च वाजमन्नं बलं वा प्रयच्छत-मिति शेषः ॥ यातं । चवायोगे प्रथमेति निघातप्रतिषेधः । विदुषे । विद ज्ञाने । विदेः शतुर्वसुः । वसोः संप्रसारणमिति संप्रसारणं । शासिवसिघसीनां चेति षत्वं ॥

॥ इति प्रथमस्याष्टमे चतुर्दशो वर्गः ॥

एकादशीमृचमाह ॥

सूनोर्मानेनाश्विना गृणाना वाजं विप्राय भुरणा रदंता ।
अगस्त्ये ब्रह्मणा वावृधाना सं विश्पलां नासत्यारिणीतं ॥ ११ ॥

सूनोः । मानेन । अश्विना । गृणाना । वाजं । विप्राय । भुरणा । रदंता ।
अगस्त्ये । ब्रह्मणा । ववृधाना । सं । विश्पलां । नासत्या । अरिणीतं ॥ ११ ॥

भुरणा भर्तारौ पोषकौ नासत्या सत्यस्वभावौ हे अश्विनौ सूनोः कुंभात्सूतस्यागस्त्यस्य खेलपुरोहितस्य संबंधिना मानेन स्तुत्यस्य परिच्छेदकेन स्तोत्रेण गृणाना स्तूयमानौ विप्राय मेधाविने भरद्वाजाय ऋषये वाजमन्नं रदंता विलिखंतौ निष्पादयंतौ युवां विश्पलां संग्रामे छिन्नजंघां खेलस्य संबंधिनीं स्त्रियं समरिणीतं । पुनरस्या जंघया समयोजयतं । ततोऽनेन पार्-

प्रथमपादोक्तोऽर्थो विव्रियते । अगस्त्ये ऋषौ ब्रह्मणा मंत्ररूपेण स्तोत्रेण वव्रधाना प्रवर्धितावित्ति । गृणाना । गॄ शब्दे । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । प्वादीनां ह्रस्वः । भुरणा । भुरण धारणपोषणयोः । कंड्वादिः । पचाद्यच् । अतोलोपयलोपौ । सुपां सुलुगिति विभक्तेराकारः । आमंत्रितनिघातः । विप्रायेत्यस्य रदंतेत्यनेनासामर्थ्यान्न परांगवद्भावत्वं । वावृधाना । वृधेर्लिटः कानच् । संहितायां छांदसमभ्यासस्य दीर्घत्वं । तुजादित्वे हि तूतुजान इतिवत् पदकालेऽपि स्यात् । अरीणीतं । री गतिरेषणयोः । क्र्यादिकः । प्वादीनां ह्रस्वः ॥

द्वादशीमृचमाह ॥

कुह यांता सुष्टुतिं काव्यस्य दिवो नपाता वृषणा शयुत्रा ।
हिरंण्यस्येव कलशं निखांतमुदूपथुर्दशमे अश्विनाहंन् ॥ १२ ॥

कुह । यांता । सुऽस्तुतिं । काव्यस्य । दिवः । नपाता ।
वृषणा । शयुऽत्रा ।
हिरंण्यस्यऽइव । कलशं । निऽखांतं । उत् । ऊपथुः । दशमे ।
अश्विना । अहंन् ॥ १२ ॥

पुरा खलूशनसः स्तुतिं गच्छंतावश्विनौ मार्गमध्ये कूपे पतितं रेभं दृष्ट्वा तं कूपादुदतारयतां । तदानीमश्विभ्यां गंतव्यं काव्यस्य निवासस्थानमजानन्नृषिरश्विनौ पृच्छति । हे दिवो नपाता द्योतमानस्य सूर्यस्य पुत्रौ वृषणा कामाभिवर्षकाव-

श्विनौ कुह कुत्र शयुत्रा शयने निवासस्थाने वर्तमानस्य काव्यस्य भार्गवस्य सुष्टुतिं शोभनां स्तुतिं श्रोतुं याता गच्छंतौ ॥ यद्वा । शयुत्रेत्येतदश्विनोर्विशेषणं । शयुनाम्नस्त्रायकौ युवां । हिरण्यस्येव कलशं यथा हिरण्यपूरितं कलशं भूम्यां निचितं सर्वैर्दुर्ज्ञातं कश्चिदभिज्ञ उद्धरति । एवमसुरैः कूपे निखातं दश रात्रीर्नवाहानि च तत्रैव निवसंतं रेभमवगत्य दशमेऽहन् अहन्युदूपथुः । कूपादुन्नीतवंतौ । किं तन्निवासस्थानमिति प्रश्नः । रेभस्यानुक्तावपि दश रात्रीरशिवेनेति मंत्रांतरसामर्थ्या-त्प्रतीतिः । यद्वा । काव्यस्य स्तुतिं प्रति गच्छंतौ युवां कुह कस्मिन्स्थाने रेभं युवामुन्निन्यथुरिति प्रश्नः ॥ कुह । वा ह च छंदसीति सप्तम्यर्थे हप्रत्ययः । दिवो नपाता । सुबामंत्रिते परांगवत्स्वर इति परांगवद्भावेन षष्ठ्यंतस्यामंत्रितानुप्रवेशादा-मंत्रितस्य चेति पदद्वयसमुदायस्य षाष्ठिकमाद्युदात्तत्वं । पादा-दित्वादाष्टमिकनिघाताभावः । नपादित्यपत्यनाम । न पातय-तीति नपात् । नभ्राण्नपादिति नञः प्रकृतिभावः । सुपां सुलुगिति विभक्तेराकारः । शयुत्रा । अशित्रादिभ्य इत्रोत्रा-विति शीङ उत्रः । यद्यंतोदात्तता न स्यात् तर्ह्येवं शयुं त्रायेते इति शयुत्रौ । त्रैङ् पालने । आदेच इत्यात्वं । आतोऽनुपसर्गे कः । अत एव व्युत्पत्त्यनवधारणादनवग्रहः । निखातं । खनु अवदारणे । अस्मात्कर्मणि निष्ठा । यस्य विभाषेतीट्प्रतिषेधः । जनसनखनां सञ्झलोरित्यात्वं । गतिरनंतर इति गतेः प्रकृति-स्वरत्वं । अहन् । सुपां सुलुगिति सप्तम्या लुक् । न ङिसं-बुद्ध्योरिति नलोपप्रतिषेधः ॥

त्रयोदशीमृचमाह ॥

युवं च्यवानमश्विना जरन्तं पुनर्युवानं चक्रथुः शचीभिः ।
युवो रथं दुहिता सूर्यस्य सह श्रिया नासत्यावृणीत ॥ १३ ॥

युवं । च्यवानं । अश्विना । जरन्तं । पुनः । युवानं ।
चक्रथुः । शचीभिः ।
युवोः । रथं । दुहिता । सूर्यस्य । सह । श्रिया ।
नासत्या । अवृणीत ॥ १३ ॥

हे अश्विनौ युवं युवां शचीभिरात्मीयैर्भैषज्यलक्षणैः कर्मभिर्जरन्तं जीर्यन्तं च्यवानं स्तुतीनां च्यावयितारमेतत्संज्ञमृषिं युवानं पुनर्यौवनोपेतं चक्रथुः । कृतवन्तौ । अपि च । हे नासत्यावश्विनौ युवोर्युवयो रथं सूर्यस्य दुहिता सूर्याख्या श्रिया सह ऋकुसहस्ररूपया संपदा कान्त्या वा सहावृणीत । समभजत । आगत्यारूढवतीत्यर्थः । आ वां रथं दुहितेत्यत्र लिखितमाख्यानमत्रापि द्रष्टव्यं ॥ जरन्तं । जॄष वयोहानौ । व्यत्ययेन शप् । युवोः । युष्मच्छब्दात् षष्ठीद्विवचने व्यत्ययेन योऽचीति यत्वाभावे सति शेषे लोप इति दकारलोपः । अतो गुण इति पररूपत्वं । एकादेश उदात्तेनोदात्तः । अवृणीत । वृङ् संभक्तौ । क्र्यादिकः ॥

चतुर्दशीमृचमाह ॥

युवं तुग्राय पूर्व्येभिरेवैः पुनर्मन्यावभवतं युवाना ।
युवं भुज्युमर्णसो निः समुद्राद्विभिरूहथुर्ऋज्रेभिरश्वैः ॥ १४ ॥

युवं । तुग्राय । पूर्व्येभिः । एवैः । पुनःऽमन्यौ । अभवतं ।
युवाना ।
युवं । भुज्युं । अर्णसः । निः । समुद्रात् । विऽभिः । ऊहथुः ।
ऋज्रेभिः । अश्वैः ॥ १४ ॥

हे युवाना दुःखानां यावयितारावश्विनौ युवं युवां पूर्व्येभिः । पुराणनामैतत् । पूर्वकालीनैश्चिरंतनैरेवैः स्तुत्यं प्रति गंतृभिः स्तोत्रैस्तुग्राय भुज्योर्जनकस्य संबंधिभिः पुनर्मन्यौ यथा भुज्योः समुद्रगमनात्पूर्वं युवां स्तोतव्यौ तथा पुनरपीदानीं स्तोतव्याव-भवतं । यदा युवां समुद्रमध्ये सेनया सह निमग्नं भुज्युं तुग्रस्य पुत्रमर्णसोऽर्णस्वतः प्रौढोदकयुक्तात्समुद्रादंबुराशेः सकाशाद्वि-भिर्गंतृभिर्नौभिर्ऋज्रेभिः शीघ्रगतियुक्तैरश्वैश्च निरूहथुः । निर्गं-मय्य पितृसमीपं प्रापितवंतौ । तदानीं पुनरप्यतिशयेन स्तोतव्यौ जातावित्यर्थः । तुग्रो ह भुज्युमित्यत्रोक्तमाख्यानम-त्राप्यनुसंधेयं ॥ एवैः । इण् गतौ । इण्शीङ्भ्यां वन् । पुन-र्मन्यौ । मन ज्ञाने । अत्र स्तुत्यर्थः । मन्यते स्तौतीति मना स्तुतिः । पचाद्यच् । छंदसि चेत्यर्हार्थे यः । युवाना । यु मिश्रणामिश्रणयोः । कनिन्युवृषीत्यादिना कनिन् । सुपां सुलुगिति विभक्तेराकारः । अर्णसः । अर्णस्शब्दादुत्पन्नस्य मत्वर्थीयस्य बहुलं छंदसीति बहुलग्रहणाल्लोपः । सर्वे विधय-श्छंदसि विकल्प्यंत इति विभक्त्युदात्तस्य विकल्पनादभावः । ऋज्रेभिः । ऋज गतिस्थानार्जनोपार्जनेषु । ऋज्रेंद्रेत्यादौ रक्प्र-त्ययांतो निपातितः । बहुलं छंदसीति भिस ऐसभावः ॥

पंचदशोऋचमाह ॥

अजोहवीदश्विना तौग्र्यो वां प्रोऽहः समुद्रमव्यथिर्जगन्वान् ।

निष्टमूहथुः सुयुजा रथेन मनोजवसा वृषणा स्वस्ति ॥ १५ ॥

अजोहवीत् । अश्विना । तौग्र्यः । वां । प्रऽऊंढः ।

समुद्रं । अव्यथिः । जगन्वान् ।

निः । तं । ऊहथुः । सुऽयुजा । रथेन । मनःऽजवसा ।

वृषणा । स्वस्ति ॥ १५ ॥

हे अश्विनौ वां युवां तौग्र्यस्तुग्रपुत्रः प्रोढः पित्रा प्रापितः समुद्रमब्धिं जगन्वान्भुज्युरुदके निमग्नोऽप्यव्यथिर्व्यथां पीडामप्राप्त एव सन्नजोहवीत् । स्तुतिभिराह्वयत् । तमाह्वातारं हे मनोजवसा मनोवद्वेगयुक्तौ वृषणा कामाभिवर्षकावश्विनौ सुयुजा सुष्ठुश्वैर्युक्तेन रथेन स्वस्ति क्षेमं यथा भवति तथा निरूहथुः । जलान्निर्गमय्य युवां पितृगृहं प्रापितवंतौ । जगन्वान् । गमेर्लिटः क्वसुः । विभाषा गमहनविदविशामिति विकल्पनादिडभावः । म्वोश्चेति मकारस्य नकारः । निष्टं । युष्मत्ततत्क्षुःष्वतःपादमिति मूर्द्धन्यः । मनोजवसा । मनसो जव इव जवो ययोस्तौ ययोक्तौ । सुपां सुलुगिति विभक्तेराकारः । पादादित्वादामंत्रितनिघाताभावे षाष्ठिकमाद्युदात्तत्वं ॥

॥ इति प्रथमस्याष्टमे पंचदशो वर्गः ॥

षोडशीमृचमाह ॥

अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य ।
वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण ॥१६॥

अजोहवीत् । अश्विना । वर्तिका । वाम् । आस्नः । यत् । सीम् ।
अमुञ्चतम् । वृकस्य ।
वि । जयुषा । ययथुः । सानु । अद्रेः । जातम् । विष्वाचः ।
अहतम् । विषेण ॥ १६ ॥

आस्नो वृकस्येत्यर्धर्चे यदुक्तं तदत्र पूर्वार्धेन प्रतिपाद्यते। वर्तिका चटकसदृशस्य पक्षिणः स्त्री वृकेणारण्यश्वना ग्रस्ता सती हे अश्विनौ वां युवां तदाजोहवीत्। आहूतवती। यत्सीं यदा खलु वृकस्यास्न आस्यादमुञ्चतं। वर्तिकाममोचयतं। अपि च। युवां जयुषा जयशीलेन रथेनाद्रेः पर्वतस्य सानु समुच्छ्रितप्रदेश वि ययथुः। शत्रुभिरावेष्टितं जाहुषाख्यं स्तोतारं शत्रुसमूहान्निर्गमय्य तेन सहान्यैर्गन्तुमशक्यं पर्वताग्र गतवन्तावित्यर्थः। तदुक्तं परिविष्टं जाहुषमित्यत्र। तथा विष्वाचा विविधगतियुक्तस्यैतत्संज्ञस्यासुरस्य जातमुत्पन्नमपत्यं विषेण ध्वंसेनाहतं। युवां हतवन्तौ। यद्वा। वर्तते प्रतिदिवस-मावर्तत इति वर्तिकोषाः। वृक इति विवृतज्योतिष्कः सूर्य उच्यते। तेन ग्रस्ता सती सा हे अश्विनौ युवामजोहवीत्। आह्वयत्। यदा खलु युवां वृकस्य सूर्यस्यास्न आस्यस्थानीया-न्मंडलादमुंचतं। अमोचयतं। सूर्येणैकीभूतामुषसं पृथक्कृत्यो-दयात्पूर्वं रात्रेरपरभागे स्थापितवन्तावित्यर्थः। तथा च यास्कः।

आदित्योऽपि वृक उच्यते यदावृंक्ते । आग्नयदुषा अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानं । नि० ५. २१. । इति । अपि च । जयुषा जयशीलेन रथेनाद्रेर्मेघस्य सानु समुच्छ्रितप्रदेशं वृष्टिचिकीर्षया विशेषेण ययथुः । युवां गतवंतौ । गत्वा च विष्वाचो विविधगतियुक्तस्य मेघस्य संबंधिना विषेणोदकेन जातमुत्पन्नं सर्वं भूलजातमहतं । अगमयतं । वृष्टिं कृतवंतावित्यर्थः ॥ अजोहवीत् । ह्वयतेर्यङ्लुगंतान्लङि तिपि यङो वेतीडागमः । अभ्यस्तस्य चेति द्विर्वचनात्पूर्वमेव ह्वयतेः संप्रसारणं । आस्नः । पद्दन्नित्यादिनास्यशब्दस्यासन्नादेशः । अल्लोपोऽन इत्यकारलोपः । जयुषा । जि जये । औणादिक उसिप्रत्ययः । विष्वाचः । विषुनाभिमुख्येनांचतीति विग्रहः । ऋत्विगित्यादिना क्विन् । अच इत्यकारलोपः । चाविति दीर्घः । उदात्तनिवृत्तिस्वरेण विभक्तेरुदात्तत्वे प्राप्ते चावित्यंतोदात्तत्वं । अहतं । हन हिंसागत्योः । लङ्यदादिलाच्छपो लुक् । अनुदात्तोपदेशेत्यादिनानुनासिकलोपः ॥

सप्तदशोऽनुवाकः ॥

शतं मेषान्वृक्ये मामहानं तमः प्रणीतमशिवेन पित्रा ।

आक्षी ऋज्राश्वे अश्विनावधत्तं ज्योतिरंधाय चक्रथुर्विचक्षे ॥१७॥

शतं । मेषान् । वृक्ये । ममहानं । तमः । प्रऽनीतं ।

अशिवेन । पित्रा ।

आ । शची इति । ऋज्रऽअश्वे । अश्विनौ । अधत्तं । ज्योतिः ।

अंधाय । चक्रथुः । विऽचक्षे ॥ १७ ॥

शतं मेषान्वृक्ये चक्षदानमित्यत्र यदाख्यानमवादिष्म तदत्राप्यनुसंधेयं । शतं शतसंख्याकान्मेषान्वृक्ये वृकीरूपेणावस्थितायाश्विनोर्वाहनाय रासभाय ममहानं पूजितवंतमाहारार्थं समर्पितवंतं । अशिवेनासुखकारिणा पित्रा स्वकीयेन जनकेन तमो दृष्टिराहित्येन कृतमंधं प्रणीतं प्रापितमृज्राश्वं चक्षुष्मंतमश्विनावकुरुतामिति शेषः । एतदेव विशदयति । हे अश्विनौ शची पित्रापादनष्टे चक्षुषी ऋज्राश्वे एतत्संज्ञके राजर्षावाधत्तं । पुनर्दर्शनसमर्थे अकुरुतं । एतदेवाह । अंधाय दृष्टिहीनाय ज्योतिः प्रकाशकं चक्षुः विचक्षे विविधं जगद्द्रष्टुं चक्रथुः । युवां कृतवंतौ ॥ मामहानं । मह पूजायां । लिटः कानच् । संहितायां छांदसमभ्यासस्य दीर्घत्वं । प्रणीतं । प्रपूर्वान्नयतेः कर्मणि निष्ठा । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । पित्रा । उदात्तयण इति विभक्तेरुदात्तत्वं । शची । अक्षिशब्दात् द्विवचने नुमागमस्य प्राप्नोति । ई च द्विवचन इतीकारांतादेशश्च । परत्वादीकारादेशः । कृते तस्मिन् सकृद्गतपरिभाषया पुनर्न भवति । उदात्तनिवृत्तेरीकारस्योदात्तत्वं ॥

अष्टादशीमृचमाह ॥

शुनमंधाय भरमह्वयत्सा वृकीरश्विना वृषणा नरेति ।

जारः कनीनइव चक्षदान ऋज्राश्वः शतमेकं च मेषान् ॥ १८ ॥

शुनं । अंधाय॑ । भर॑ । अह्वयत् । सा । वृकीः । अश्विना ।
वृषणा । नरा॑ । इति॑ ।

जारः । कनीनः॑ऽइव । चक्षदानः । ऋज्रऽअश्वः । शत॑ ।
एक॑ । च । मेषान् ॥ १८ ॥

शुनमिति सुखनाम । भरं पोषणहेतुभूतं चक्षुरिंद्रियेन निष्पाद्यं सुखमंधाय दृष्टिहीनाय तस्मा ऋज्राश्वायेच्छंती सा वृकीहे अश्विनावश्वयुक्तौ कृत्स्नं जगद्व्याप्नुवंतौ वा वृषणा हे वृषणौ कामानां वर्षितारावित्येवं संबोध्य नरा नेतारावश्विनावह्वयत् । आहूतवती । आह्वयंत्यास्तस्याः कोऽभिप्राय इति चेत् तदुच्यते । कनीन इव । यथा प्राप्तयौवनः कामुको जारः पारदारिकः सन् परस्त्रियै सर्वं धनं प्रयच्छति । एवमृज्राश्वो मह्यं शतमेकं चैकोत्तरशतसंख्याकान्मेषान्पौरजनानां स्वभूतानपहृत्य चक्षदानः शकलीकुर्वन् प्रादात् । तेनेदृशीं दुर्दशां प्राप्त इति ॥ कनीनः । युवशब्दादिष्ठनि युवाल्पयोः कनन्यतरस्यां । पा॰ ५. ३. ६४. । इति युवशब्दस्य कनादेशः । व्यत्ययेनेष्ठनः खादेशः । यद्वा । कन दीप्तिकांतिगतिषु । अस्मादौणादिक ईनप्रत्ययः ॥

एकोनविंशीमृचमाह ॥

मही वा॑मूतिर॑श्विना मयोभूरुत स्रामं धिष्ण्या सं रि॑णीथः ।
अथा॑ युवामिदं॑ह्वयत्पुरं॑धिरागं॑च्छतं सीं वृषणाववो॑भिः ॥ १९ ॥

मही । वां । ऊतिः । अश्विना । मयःऽभूः । उत । स्रामं ।
धिष्ण्या । सं । रिणीथः ।
अथ । युवां । इत् । अह्वयत् । पुरंऽधिः । आ । अगच्छतं ।
सीं । वृषणौ । अवःऽभिः ॥ १९ ॥

हे अश्विनौ वां युवयोर्मही महत्यूतिः पालनं मयोभूर्मयसः सुखस्य भावयित्री । उत अपि च हे धिष्ण्या । धिषणा स्तुतिलक्षणा वाक् । तया स्तोतव्यौ स्रामं व्याधितं पुरुषं विश्लिष्टांगमत्र्यादिकं संरिणीथः । संगतावयवं कुरुथः । उत अपि च युवामित् युवामेव पुरंधिर्बहुधीर्घोषा विश्पला वाह्वयत् । रोगोपशमनार्थमाहूतवती । हे वृषणौ कामानां वर्षितारावश्विनौ अवोभी रक्षणैः सहागच्छतं । आभिमुख्येन सीमिनां प्राप्तवंतौ ॥ मही । महती । छांदसो वर्णलोपः । यद्वा । महेरौणादिक इन् । कृदिकारादक्तिन इति ङीष् । मयोभूः । भवतेरंतर्भावितण्यर्थात् क्विप् । रिणीथः । री गतिरेषणयोः । क्र्यादिकः । प्वादीनां ह्रस्व इति ह्रस्वत्वं ॥

विंशीमृचमाह ॥

अधेनुं दस्रा स्तर्यं१ विषक्तामपिन्वतं शयवे अश्विना गां ।
युवं शचीभिर्विमदाय जायां न्यू हथुः पुरुमित्रस्य योषां ॥२०॥

अधेनुं । दस्रा । स्तर्यं । विऽसक्तां । अपिन्वतं । शयवे ।
अश्विना । गां ।

युवं । शचीभिः । विऽमदाय । जायां । नि । ऊहथुः ।

पुरुऽमित्रस्य । योषां ॥ २० ॥

हे दस्रा दर्शनीयावश्विनौ विषक्तां विश्लेषेण सक्तावयवां । श्लथावयवामित्यर्थः । अत एव स्तर्यं निवृत्तप्रसवां । अत एवाधेनुमदोग्ध्रीं । एवंभूतां गां शयव एतत्संज्ञाय ऋषयेऽपिन्वतं । पयसापूरयतं । अपि च । पुरुमित्रस्य । पुरुमित्रो नाम कश्चिद्राजा । तस्य योषां कुमारीं शचीभिरात्मीयैः कर्मभिर्विमदाय तत्संज्ञाय ऋषये शत्रुभिः सह योद्धुमशक्ताय युवां न्यूहथुः । विमदस्य गृहं प्रापितवंतौ ॥ स्तर्यं । स्तृञ् आच्छादने । अविस्तृतंत्रिभ्य ईरितीकारप्रत्ययः । या छंदसीत्यमि पूर्वस्य विकल्पनादभावे यणादेशः । उदात्तस्वरितयोर्यण इति परस्यानुदात्तस्य स्वरितत्वं । विषक्तां । षंज संगे । कर्मणि निष्ठा । अनिदितामिति नलोपः । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । अपिन्वतं । पिवि सेचने । इदित्वान्नुम् । भौवादिकः । पुरुमित्रस्य । पुरूणि मित्राणि यस्य । संज्ञायां मित्राजिनयोः । पा० ६. २. १६५. । इति बहुव्रीहावुत्तरपदांतोदात्तत्वं ॥

॥ इति प्रथमस्याष्टमे षोडशो वर्गः ॥

एकविंशीमृचमाह ॥

यवं वृकेणाश्विना वपंतेषं दुहंता मनुषाय दस्रा ।

अभि दस्युं बकुरेणा धमंतोरु ज्योतिश्चक्रथुरार्याय ॥ २१ ॥

यवं। वृकेण। अश्विना। वपंता। इषं। दुहंता।
मनुषाय। दस्रा।
अभि। दस्युं। बकुरेण। धमंता। उरु। ज्योतिः।
चक्रथुः। आर्याय॥ २१॥

आर्याय विदुषे। मनुषशब्दो मनुष्यशब्दपर्यायः। मनुषाय मनवे मनोरर्थं हे दस्रा दर्शनीयावश्विनौ वृकेण लांगलेन कर्षकैः कृष्टदेशे यवं यवाद्युपलक्षितं सर्वं धान्यजातं वपंता वापयंतौ। तथेषं। अन्ननामैतत्। तत्कारणभूतं वृष्ट्युदकं च दुहंता मेघात्क्षारयंतौ। तथा दस्युमुपक्षयकारिणमसुरं पिशाचादिकं बकुरेण। बकुरो नाम भासमानो वज्रः। तेनाभिधमंता। धमतिर्वधकर्मा। अभिघ्नंतौ। एवं त्रिविधं कर्म कुर्वंतौ युवामुरु विस्तीर्णं ज्योतिः स्वकीयं तेजो माहात्म्यं चक्रथुः। कृतवंतौ दर्शितवंतावित्यर्थः। यद्वा। त्रिविधकर्माचरणेनार्याय विदुषे मनवे विस्तीर्णं सूर्याख्यं ज्योतिश्चक्रथुः। कृतवंतौ। जीवन् हि सूर्यं पश्यति। तद्धेतुभूतानि त्रीणि कर्माणि युवाभ्यां कृतानीति भावः। अत्र निरुक्तं। बकुरो भास्करो भयंकरो भासमानो द्रवतीति वा। यवमिव वृकेणाश्विनौ निवपंतौ। वृको लांगलं भवति विकर्तनादित्यादिकमनुसंधेयं। नि० ६. २६.॥ मनुषाय। मनेरौणादिक उषन्प्रत्ययः॥

द्वाविंशीमृचमाह ॥

आथर्वणायाश्विना दधीचेऽश्व्यं शिरः प्रत्यैरयतं।

स वां मधु प्र वोचदृतायन्त्वाष्ट्रं यद्दस्रावपिकक्ष्यं वां ॥२२॥

आथर्वणाय । अश्विना । दधीचे । अश्व्यं । शिरः ।

प्रति । ऐरयतं ।

सः । वां । मधु । प्र । वोचत् । ऋतऽयन् । त्वाष्ट्रं । यत् ।

दस्रौ । अपिऽकक्ष्यं । वां ॥ २२ ॥

तद्वां नरा सनय इत्यत्रोक्तमाख्यानमिहाप्यनुसंधेयं । हे अश्विनौ आथर्वणायाथर्वणः पुत्राय दधीचे दध्यङ्नाम्ने महर्षयेऽश्व्यमश्वसंबंधि शिरः प्रत्यैरयतं । प्रत्यधत्तं । तदीयं मानुषं शिरः प्रच्छिद्यान्यत्र विधायाश्वेन शिरसा तमृषिं समयोजयतमित्यर्थः । स च वां युवाभ्यां प्रवर्ग्यविद्यां मधुविद्यां च वक्ष्यामीति पुरा कृतां प्रतिज्ञां ऋतायन् सत्यामात्मन इच्छन् मधु मधुविद्यां त्वाष्ट्रं त्वष्टुरिंद्राल्लब्धं प्रवोचत । प्रोक्तवान् । हे दस्रा दर्शनीयावश्विनौ वां युवयोः संबंधि यदपिकक्ष्यं छिन्नस्य यज्ञशिरसः कक्षप्रदेशेन पुनःसंधानभूतं प्रवर्ग्यविद्याख्यं रहस्यं तदपि वां युवाभ्यां प्रावोचदित्यर्थः ॥ दधीचे । अंचतेर्ऋत्विगित्यादिना क्विन् । अनिदितामिति नलोपः । चतुर्थ्येकवचनेऽच इत्यकारलोपे चाविति दीर्घत्वं । उदात्तनिवृत्तिस्वरेण विभक्त्युदात्तत्वे प्राप्ते तस्यापवादत्वेन चाविति विभक्तेः

पूर्वस्योदात्तत्वं प्राप्तं । तस्याप्ययमपवादः । अंचेश्छंदस्य-सर्वनामस्थानमिति विभक्त्युदात्तत्वं ॥

त्रयोविंशीमृचमाह ॥

सदा कवी सुमतिमा चके वां विश्वा धियो अश्विना प्रावतं मे ।
अस्मे रयिं नासत्या बृहंतमपत्यसाचं श्रुत्यं रराथां ॥ २३ ॥

सदा । कवी इति । सुऽमतिं । आ । चके । वां । विश्वाः । धियः । अश्विना । प्र । अवतं । मे ।
अस्मे इति । रयिं । नासत्या । बृहंतं । अपत्यऽसाचं । श्रुत्यं । रराथां ॥ २३ ॥

हे कवी क्रांतदर्शिनौ मेधाविनावश्विनौ वां युवयोः सुमतिं कल्याणीमनुग्रहात्मिकां बुद्धिं सदा सर्वदाचके । आभिमुख्येन प्रार्थये । मे मदीयानि विश्वा धियः सर्वाणि कर्माणि युवां प्रावतं । प्रकर्षेण रचतं । अपि च । अस्मे अस्मभ्यं हे नासत्या-वश्विनौ बृहंतं महांतमपत्यसाचमपत्यैः पुत्रादिभिः समवेतं श्रुत्यं प्रशंसनीयमुत्कृष्टं रयिं धनं रराथां । प्रयच्छतं ॥ चके । कै गै शब्दे । व्यत्ययेनात्मनेपदं । लिण्युत्तमैकवचने रूपं । अस्मे । सुपां सुलुगिति चतुर्थीबहुवचनस्य शे आदेशः । अपत्यसाचं । अपत्यैः सह सचति संगच्छत इत्यपत्यसाच् । छांदसो णिवः । श्रुत्यं । श्रुतिः स्तुतिः । तत्र भवं श्रुत्यं । भवे छंदसीति यत् । यतोऽनाव इत्याद्युदात्तत्वं । रराथां । रा दाने । लोटि व्यत्यये-नात्मनेपदं । बहुलं छंदसीति शपः श्लुः ॥

चतुर्विंशीमृचमाह ॥

हिरंण्यहस्तमश्विना ररांणा पुत्रं नंरा वध्रिमत्या अंदत्तं ।

त्रिधां ह श्यावंमश्विना विकंस्तमुज्जीवसं ऐरयतं सुदानू ॥१४॥

हिरंण्यऽहस्तं । अश्विना । ररांणा । पुत्रं । नरा ।

वध्रिऽमत्याः । अदत्तं ।

त्रिधां । ह । श्यावं । अश्विना । विऽकंस्तं । उत् । जीवसे ।

ऐरयतं । सुदानू इति सुऽदानू ॥ २४ ॥

ररांणा रममाणौ दातारौ वा नरा नेतारौ हे अश्विनौ हिरण्यहस्तं नाम पुत्रं वध्रिमत्या एतत्संज्ञायै ब्रह्मवादिन्यै अदत्तं । प्रायच्छतं हं । अपि च । हे सुदानू शोभनदानावश्विनौ त्रिधा त्रेधा विकस्तं विच्छिन्नं श्यावाख्यमृषिं जीवसे जीवितुमुदैरयतं । असुरैस्त्रेधा खंडितं शरीरं पुनरेकीकृत्योदगमयतमित्यर्थः ॥ ररांणा । रमतेः शानचि बहुलं छंदसीति शपः श्लुः । व्यत्ययेन मकारस्यात्वं । रातेर्वा व्यत्ययेन शानच् । पूर्ववत् श्लुः । वध्रिमत्याः । चतुर्थ्यर्थे बहुलं छंदसीति षष्ठी । जीवसे । जीव प्राणधारणे । तुमर्थे सेसेनित्यसेप्रत्ययः ॥

पंचविंशीमृचमाह ॥

एतानि वामश्विना वीर्याणि प्र पूर्व्याण्यायवोऽवोचन् ।

ब्रह्मं कृण्वंतो वृषणा युवभ्यां सुवीरांसो विदथमा वंदेम ॥२५॥

एतानि । वां । अश्विना । वीर्याणि । प्र । पूर्व्याणि ।

आयवः । अवोचन् ।

ब्रह्म । कृण्वंतः । वृषणा । युवऽभ्यां । सुऽवीरासः । विदथं ।

आ । वदेम ॥ २५ ॥

अश्विना हे अश्विनौ वां युवयोः संबंधीनि पूर्व्याणि प्रत्नान्येतानीदानीं मयोक्तानि वीर्याणि वीरकर्माण्यायवो मनुष्या मदीयाः पित्रादयः प्रवोचन्। उक्तवंतः। वयं च हे वृषणा कामाभिवर्षकावश्विनौ युवाभ्यां ब्रह्म मंत्रात्मकं स्तोत्रं कृण्वंतः कुर्वंतः सुवीरासः सुवीराः शोभनैर्वीरैः पुत्रादिभिरुपेताः संतो विदथं यज्ञमावदेम। आभिमुख्येन स्तुतीरुच्चारयाम। यद्वा। विदथं वेदयंतमतिथिं तदर्पेक्षितप्रदानेनावदेम। आभिमुख्येन प्रियपूर्विकां वाचमुच्चारयाम॥ कृण्वंतः। कृवि हिंसाकरणयोश्च। इदित्वान्नुम्। लटः शतृ। धिन्विकृण्व्योरच्चेत्युप्रत्ययः। अकारांतादेशश्च। अतो लोपे सति स्थानिवद्भावाल्लघूपधगुणाभावः। सुवीरासः। शोभना वीरा येषां ते तथोक्ताः। आज्जसेरसुक्। वीरवीर्यौ चेत्युत्तरपदाद्युदात्तत्वं। विदथं। विद ज्ञाने। रुदिविदिभ्यां क्रिदित्यथप्रत्ययः॥

॥ इति प्रथमस्याष्टमे सप्तदशो वर्गः ॥

आ वामित्येकादशर्चं तृतीयं सूक्तं कक्षीवत आर्षं त्रैष्टुभमाश्विनं। तथा चानुक्रांतं। आ वामेकादशेति। पूर्वसूक्ताभ्यां सह प्रातरनुवाकाश्विनशस्त्रयोरुक्तो विनियोगः॥

तत्र प्रथमामृचमाह ॥

आ वां रथो अश्विना श्येनपत्वा सुमृळीकः स्ववाँ यात्वर्वाङ् ।
यो मर्त्यस्य मनसो जवीयान्त्रिवंधुरो वृषणा वातरंहाः ॥१॥

आ । वां । रथः । अश्विना । श्येनऽपत्वा । सुऽमृळीकः ।
स्वऽवान् । यातु । अर्वाङ् ।
यः । मर्त्यस्य । मनसः । जवीयान् । त्रिऽवंधुरः । वृषणा ।
वातऽरंहाः ॥ १ ॥

हे अश्विनौ वां युवयोः स्वभूतो रथोऽर्वाङ् अस्मदभिमुखः आयातु । आगच्छतु । कीदृशो रथः । श्येनपत्वा । श्येना इत्यश्वनाम । शंसनीयगमनैरश्वैः पतन् गच्छन् । यद्वा । श्येनः पक्षी । स एव शीघ्रं पतन् । सुमृळीकः । शोभनसुखयुक्तः । स्ववान् । धनवान् । हे वृषणौ कामानां वर्षितारावश्विनौ यो युष्मदीयो रथो मर्त्यस्य मनुष्यस्य मनसो जवीयान् । अतिशयेन वेगवान् । तद्यथा वेगेन कृत्स्नं जगद्व्याप्नोति ततोऽप्यतिशयेन क्षणमात्रादेव सर्वं जगत्पर्यटतीत्यर्थः । त्रिवंधुरः । वंधुरं वेष्टितं सारथेः स्थानं । त्रिप्रकारेण वंधुरेण युक्तः । वातरंहाः । वातस्य वायो रंहा वेग इव वेगो यस्य स तथोक्तः । अनेनाप्रतिहतगतित्वमुच्यते । स रथ इति पूर्वत्रान्वयः ॥ श्येनपत्वा । पत्लृ गतौ । अन्येभ्योऽपि दृश्यंत इति वनिप् । दासीभारादिः । यद्वा । दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वाद्भावे वनिप् । ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । जवीयान् । जवोऽस्यास्तीति

जववान् । अतिशयेन जववान् । आतिशायनिक ईयसुन् । विन्मतोर्लुक् । टेरिति टिलोपः ॥

द्वितीयामृचमाह ॥

त्रिवंधुरेण त्रिवृता रथेन त्रिचक्रेण सुवृता यातमर्वाक् ।
पिन्वतं गा जिन्वतमर्वतो नो वर्धयतमश्विना वीरमस्मे ॥२॥

त्रिऽवंधुरेण । त्रिऽवृता । रथेन । त्रिऽचक्रेण । सुऽवृता ।
आ । यातं । अर्वाक् ।
पिन्वतं । गाः । जिन्वतं । अर्वतः । नः । वर्धयतं ।
अश्विना । वीरं । अस्मे इति ॥ २ ॥

त्रिवंधुरेण । वंधुरं सारथिस्थानं । त्रिप्रकारवंधुरोपेतेन त्रिवृता त्रिधा वर्तमानेन त्रिचक्रेण चक्रत्रयोपेतेन सुवृता शोभनं गच्छता रथेनार्वाक् अस्मदभिमुखमायातं । आगच्छतं । आगत्य चास्मदीया गाः पिन्वतं । पयसा पूरयतं । नोऽस्माकमर्वतोऽश्वान् जिन्वतं । प्रीणयतं । अपि च । हे अश्विनौ अस्मे अस्माकं वीरं पुत्रादिकं वर्धयतं । प्रवृद्धं कुरुतं ॥ त्रिचक्रेण । त्रीणि चक्राणि यस्य स तथोक्तः । त्रिचक्रादीनां छंदस्युपसंख्यानमित्युत्तरपदांतोदात्तत्वं ॥

तृतीयामृचमाह ॥

प्रवद्यामना सुवृता रथेन दस्राविमं शृणुतं श्लोकमद्रेः ।
किमंग वां प्रत्यवर्तिं गमिष्ठाहुर्विप्रासो अश्विना पुराजाः ॥३॥

प्रवत्ऽयामना । सुऽवृता । रथेन । दस्रौ । इमं । शृणुतं ।
श्लोकं । अद्रेः ।
किं । अंग । वां । प्रति । अवर्तिं । गमिष्ठा । आहुः । विप्रासः ।
अश्विना । पुराऽजाः ॥ ३ ॥

हे दस्रौ दर्शनीयावश्विनौ प्रवद्यामना प्रकृष्टगमनेन शीघ्रगामिना सुवृता शोभनवर्तनेन रथेनागत्याद्रेरादरं कुर्वतः स्तोतुरिमं श्लोकं स्तुतिलक्षणामिमां वाचं शृणुतं । अंगाश्विना हे अश्विनौ पुराजाः पूर्वजाताश्चिरंतना विप्रासो मेधाविनो वां युवामवर्तिं स्तोतॄणां दारिद्र्यं प्रति तत्परिहर्तुं गमिष्ठा गंतृतमावाहुः । कथयंति । किंशब्दः प्रदर्शनफलप्रश्ने वर्तते । किं न कथयंति । कथयंत्येव सर्वे । तथा सत्यागंतव्यमिति ॥ प्रवद्यामना । स्वोपसृष्टे धात्वर्थे वर्तमानात्प्रशब्दादुपसर्गाच्छंदसि धात्वर्थ इति वतिः । या प्रापणे । आतो मनिन्निति बहुलवचनाद्भावे मनिन् । ततो बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं । अद्रेः । दृङ् । आदरे । आङ्पूर्वादस्मादौणादिकः क्रिप्रत्ययः आङो ह्रस्वश्च । गमिष्ठा । गंतृशब्दात्तुश्छंदसीतीष्ठन् । तुरिष्ठेमेयःस्विति तृलोपः । सुपां सुलुगिति विभक्तेराकारः । आहुः । प्रत्ययस्वरः । पादादित्वान्निघाताभावः ॥

चतुर्थीमृचमाह ॥

आ वां श्येनासो अश्विना वहंतु रथे युक्तास आशवः पतंगाः ।
ये अप्तुरो दिव्यासो न गृध्रा अभि प्रयो नासत्या वहंति ॥४॥

आ । वां । श्येनासः । अश्विना । वहंतु । रथे । युक्तासः ।
आशवः । पतंगाः ।
ये । अप्ऽतुरः । दिव्यासः । न । गृध्राः । अभि । प्रयः ।
नासत्या । वहंति ॥ ४ ॥

हे अश्विनौ रथे युक्तासः सारथिना वहनप्रदेशे योजिता आशवो व्याप्नुवंतः पतंगाः पतनसमर्थाः श्येनासः शंसनीयगमना अश्वा वां युवामावहंतु । अस्मत्समीपमानयंतु । येऽश्वा अप्तुर आप इव त्वरायिता दिव्यासो न गृध्रा अंतरिक्षे वर्तमाना गृध्राख्याः पक्षिण इव शीघ्रं गच्छंतो हे नासत्यौ युवां प्रयो हविर्लक्षणमन्नमभिलक्ष्य वहंति । प्रापयंति । तादृशा इति पूर्वत्र संबंधः ॥ अप्तुरः । तुर त्वरणे । अप्शब्दोपपदादस्मात् क्विप् चेति क्विप् ॥

पंचमीमृचमाह ॥

आ वां रथं युवतिस्तिष्ठदत्र जुष्टी नरा दुहिता सूर्यस्य ।
परि वामश्वा वपुषः पतंगा वयो वहंत्वरुषा अभीके ॥५॥
आ । वां । रथं । युवतिः । तिष्ठत् । अत्र । जुष्टी । नरा ।
दुहिता । सूर्यस्य ।
परि । वां । अश्वाः । वपुषः । पतंगाः । वयः । वहंतु ।
अरुषाः । अभीके ॥ ५ ॥

हे नरा नेतारावश्विनौ युवतिस्तरुणी सूर्यस्य दुहिता जुष्टी प्रीता सती वां युवयोरिमं रथमातिष्ठत्। आरूढवती। तथा सहितौ वां युवामश्वा अभीके गृहसमीपे तं रथं परिवहंतु। परिप्रापयंतु। कीदृशा अश्वाः। वपुषः। वपुरिति रूपस्य शरीरस्य वा नामधेयं। तद्वंतः। छांदसो मत्वर्थीयस्य लोपः। पतंगाः। उत्पतनसमर्थाः। वयः। गच्छंतः। अरुषाः। आरोचमाना हिंसकरहिता वा ॥ अत्र। इतराभ्योऽपि दृश्यंत इति दृशिग्रहणाद्भवदादियोगेऽपीदंशब्दाद्विभक्त्यर्थे त्रल्प्रत्ययः। जुष्टी। जुषी प्रीतिसेवनयोः। औणादिक क्तुप्रत्ययः। वोतो गुणवचनादिति ङीष् ॥

॥ इति प्रथमस्याष्टमेऽष्टादशो वर्गः ॥

षष्ठीमृचमाह ॥

उद्वंदनमैरतं दंसनाभिरुद्रेभं दस्रा वृषणा शचीभिः।

निष्टौग्र्यं पारयथः समुद्रात्पुनश्च्यवानं चक्रथुर्युवानं ॥ ६ ॥

उत्। वंदनं। ऐरतं। दंसनाभिः। उत्। रेभं। दस्रा।

वृषणा। शचीभिः।

निः। तौग्र्यं। पारयथः। समुद्रात्। पुनरिति। च्यवानं।

चक्रथुः। युवानं ॥ ६ ॥

हे अश्विनौ वंदनमेतत्संज्ञमृषिं दंसनाभिरात्मीयैः कर्मभिः कूपादुदैरतं। उदैरयतं। उदगमयतं। हे दस्रा दर्शनीयौ वृषणा कामानां वर्षितारावश्विनौ शचीभिः कर्मभी रेभमेत-

रेभं स्तुमृषिं दश रात्रीर्नवाहानि च कूपे निवसंतं तस्मादुदैरयतं। उदतारयतं। तथा तौग्र्यं तुग्रस्य पुत्रं भुज्युं समुद्रे निमग्न-मात्मीयाभिर्नौभिरश्वैश्च समुद्रान्निष्पारयथः। तीरदेशं प्रापित-वंतौ। तथा च्यवानं च्यवनमृषिं जीर्णं पुनर्युवानं यौवनोपेतं चक्रथुः। कृतवंतौ॥ ऐरतं। ईर गतौ कंपने च। ण्यंतात्लङि छंदस्युभयथेति शप आर्द्धधातुकत्वाण्णेरनिटीति णिलोपः॥

सप्तमीमृचमाह॥

युवमत्रयेऽवनीताय तप्तमूर्जमोमानमश्विनावधत्तं।

युवं कण्वायापिरिप्ताय चक्षुः प्रत्यधत्तं सुष्टुतिं जुजुषाणा॥७॥

युवं। अत्रये। अवऽनीताय। तप्तं। ऊर्जं। ओमानं।

अश्विना। अधत्तं।

युवं। कण्वाय। अपिऽरिप्ताय। चक्षुः। प्रति। अधत्तं।

सुऽस्तुतिं। जुजुषाणा॥ ७॥

हे अश्विनौ युवं युवामवनीताय असुरैः पीडायंत्रगृहे-ऽवस्तान्नीतायात्रये तप्तं पीडार्थं प्रक्षिप्तं तुषाग्निं शीतेनोदके-नावारयेथां। अपि च। अस्मा अत्रय ओमानं सुखकरमूर्जं रसवदन्नमधत्तं। प्रायच्छतं। तथा सुष्टुतिं शोभनां स्तुतिं जुजुषाणा सेवमानौ युवामपिरिप्तायासुरैर्नाड्यखपरीक्षार्थं-मिहासीनः सन् व्युष्टामुषसं जानीहीत्यंधकारवति गृहे प्रवेशिताय कण्वाय ऋषये चक्षुर्व्युष्टाया उषसः प्रकाशकं वीणा-शब्दं प्रत्यधत्तं। कृतवंतौ। यद्वा। अपिरिप्ताय पटलेन पिहित-

दृष्ट्वा एवं विधाय कखाय चक्षुरिंद्रियं प्रत्यधत्तं । प्रत्यस्थापयतं ॥ आमानं । अवतेरौणादिको मनिः । ज्वरत्वरेत्यादिना वकार-स्योपधायाश्च ऊट् । गुणः । अपिरिप्राय । लिप उपदेहे । अस्मात्कर्मणि निष्ठा । कपिलकादित्वाल्लत्वविकल्पः । गतिर-नंतर इति गतेः प्रकृतिस्वरत्वं । जुजुषाणा । जुषी प्रीति-सेवनयोः । छांदसो लिट् । लिटः कानच्वा । सुपां सुलुगिति विभक्तेराकारः ॥

अष्टमीमृचमाह ॥

युवं धेनुं शयवे नाधितायापिन्वतमश्विना पूर्व्याय ।
अमुंचतं वर्तिकामंहसो निः प्रति जंघां विश्पलाया अधत्तं ॥८॥

युवं । धेनुं । शयवे । नाधिताय । अपिन्वतं । अश्विना ।
पूर्व्याय ।
अमुंचतं । वर्तिकां । अंहसः । निः । प्रति । जंघां ।
विश्पलायाः । अधत्तं ॥ ८ ॥

अश्विना हे अश्विनौ युवं युवां पूर्व्याय पुरातनाय नाधिताय याचमानाय शयव एतत्संज्ञाय ऋषये धेनुं निवृत्त-प्रसवामदोग्ध्रीमपिन्वतं । पयसासिंचतं । सर्वदा पयस्विनीम-कुरुतमित्यर्थः । अपि च । वर्तिकां वृकेण ग्रस्तां चटकसदृशीं शकुनिमंहसो वृकास्यलक्षणात्पापान्निरमुंचतं । निरमोचयतं । यद्वा । पुनः पुनर्वर्तत इति वर्तिकोषाः । तामादित्येनाभि-ग्रस्तां युवाममोचयतं । तथा विश्पलायै संग्रामे छिन्नजंघायाः

अगस्त्यपुरोहितस्य खेलस्य संबंधिन्या एतत्संज्ञायै स्त्रियाः आयसीं जंघां प्रत्यधत्तं । प्रत्यस्थापयतं समयोजयतमित्यर्थः ॥

नवमीमृचमाह ॥

युवं श्वेतं पेदव इंद्रजूतमहिहनमश्विनादत्तमश्वं ।
जोहूत्रमर्यो अभिभूतिमुग्रं सहस्रसां वृषणं वीड्वंगं ॥६॥

युवं । श्वेतं । पेदवे । इंद्रऽजूतं । अहिऽहनं । अश्विना ।
अदत्तं । अश्वं ।
जोहूत्रं । अर्यः । अभिऽभूतिं । उग्रं । सहस्रऽसां ।
वृषणं । वीडुऽअंगं ॥ ६ ॥

अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राज्ञे युवं युवां श्वेतवर्णं कंचिदश्वमदत्तं । प्रायच्छतं । कीदृशं । इंद्रजूतं । इंद्रेण युवाभ्यां गमितं दत्तमित्यर्थः । अहिहनं । शत्रूणां हंतारं । जोहूत्रं । अतिशयेन संग्रामेष्वाह्वातारं । अर्योऽरेः शत्रोरभिभूतिमभिभावुकं । उग्रमुद्गूर्णं वीर्यवंतमित्यर्थः । सहस्रसां । सहस्रसंख्याकस्य धनस्य संभक्तारं दातारं वा । वृषणं । सेक्तारं युवानमित्यर्थः । वीड्वंगं । दृढांगं ॥ इंद्रजूतं । जु इति सौत्रो धातुर्गत्यर्थः । अस्मादंतर्भावितण्यर्थात्कर्मणि निष्ठा । तृतीया कर्मणीति पूर्वपदप्रकृतिस्वरत्वं । जोहूत्रं । ह्वयतेर्यङ्लुगंतादौणादिकस्त्रप्प्रत्ययः । प्रत्ययस्य पित्त्वादनुदात्तत्वे धातुस्वरः शिष्यते । अर्यः । अरिशब्दात् षष्ठ्येकवचने जसादिषु छंदसि वावचनमिति घेर्ङितीति गुणस्य विकल्पितत्वादभावे

यणादेशः । उदात्तयण इति विभक्तेरुदात्तत्वं । अभिभूतिं । अभिभूयतेऽनेनेत्यभिभूतिः । करणे क्तिन् । तादौ चेति गतेः प्रकृतिस्वरत्वं । सहस्रसां । सनोतेः सनतेर्वा जनसनखनेति विट् । विड्वनोरनुनासिकस्यादित्यात्वं ॥

दशमीमृचमाह ॥

ता वां नरा स्ववसे सुजाता हवामहे अश्विना नाधमानाः ।
आ न उप वसुमता रथेन गिरो जुषाणा सुविताय यातं ॥ १० ॥

ता । वां । नरा । सु । अवसे । सुऽजाता । हवामहे ।
अश्विना । नाधमानाः ।
आ । नः । उप । वसुऽमता । रथेन । गिरः । जुषाणा ।
सुविताय । यातं ॥ १० ॥

नरा नेतारौ हे अश्विनौ सुजाता शोभनजन्मानौ ता वां तौ युवां नाधमाना धनं याचमाना वयं स्तोतारोऽवसे रक्षणार्थं सु हवामहे । शोभनमाह्वयामहे । गिरः स्तुतीर्जुषाणा सेवमानौ युवां वसुमता धनयुक्तेन रथेन नोऽस्मानुपायातं । उपागच्छतं । किमर्थं । सुविताय । सुष्ठु प्राप्तव्याय धनाय । सुखाय वा ॥ सुजाता । शोभनं जातं जन्म ययोस्तौ सुजातौ । सुपां सुलुगिति विभक्तेराकारः । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । नाधमानाः । नाधृ याच्ञायां । जुषाणा । जुषी प्रीतिसेवनयोः । ताच्छीलिकश्चानाश् । तुदादित्वाच्छः । पूर्वव-

द्विभक्तोराकारः। सुवितय। सुपूर्वादितेः कर्मणि निष्ठा। तन्वादित्वादुवङ्। सुपमानात् क्त इत्युत्तरपदांतोदात्तत्वं॥

एकादशीमृचमाह॥

आ श्येनस्य जवसा नूतनेनास्मे यातं नासत्या सजोषाः।
हवे हि वामश्विना रातहव्यः शश्वत्तमाया उषसो व्युष्टौ॥११॥

आ। श्येनस्य। जवसा। नूतनेन। अस्मे इति। यातं।
नासत्या। सऽजोषाः।
हवे। हि। वां। अश्विना। रातऽहव्यः। शश्वत्ऽतमायाः।
उषसः। विऽउष्टौ॥११॥

हे नासत्या नासत्यावश्विनौ सजोषाः सजोषसौ समानप्रीतियुक्तौ श्येनस्य शंसनीयं गच्छतोऽश्वस्य नूतनेन नवतरेण प्रत्यग्रेण जवसा वेगेन सहितौ युवामस्मे अस्मानायातं। आगच्छतं। अश्विना हे अश्विनौ रातहव्यो वां युवाभ्यां दातव्येन हविषा युक्तः सन् शश्वत्तमायाः कालात्मकतया नित्याया उषसो व्युष्टौ विवासनसमये वां युवां हवे। आह्वयामि। हिर्हेतौ। हि यस्मादेवं तस्मादायातमित्यर्थः॥ अस्मे। सुपां सुलुगिति शसः शे आदेशः। सजोषाः। तेनैव द्विवचनस्य सु आदेशः। हवे। ह्वेञो लडुत्तमैकवचने बहुलं छंदसीति संप्रसारणं शपगुणावादेशाः। शश्वत्तमायाः। उत्तमशश्वत्तमौ सर्वत्रेत्युञ्छादिषु पाठादंतोदात्तत्वं॥

॥ इति प्रथमस्याष्टम एकोनविंशो वर्गः॥

आ वां रथमिति दशर्चं चतुर्थं सूक्तं दैर्घतमसस्य कक्षीवत आर्षं जागतमाश्विनं। तथा चानुक्रांतं। आ वां रथं दश जागतमिति॥ प्रातरनुवाकाश्विने क्रतौ जागते छंदसीदं सूक्तमाश्विनशस्त्रे च। तथा च सूचितं। आ वां रथमभूदिदं यो वां परिज्मेति त्रीणि। आ० ४. १५.। इति॥

तत्र प्रथमामृचमाह॥

आ वां रथं पुरुमायं मनोजुवं जीराश्वं यज्ञियं जीवसे हुवे।
सहस्रकेतुं वनिनं शतद्वसुं श्रुष्टीवानं वरिवोधामभि प्रयः॥१॥

आ। वां। रथं। पुरुऽमायं। मनःऽजुवं। जीरऽअश्वं।
यज्ञियं। जीवसे। हुवे।
सहस्रऽकेतुं। वनिनं। शतत्ऽवसुं। श्रुष्टीऽवानं। वरिवःऽधां।
अभि। प्रयः॥१॥

हे अश्विनौ वां युवयो रथं जीवसे जीवनार्थं प्रयो हविर्लक्षणमन्नमभिलक्ष्याहुवे। आह्वयामि। कीदृशं। पुरुमायं। बहुविधाश्वर्यं बहुविधकर्माणं वा। मनोजुवं। मन इव शीघ्रं गच्छंतं। जीराश्वं। जववदश्वोपेतं। यज्ञियं। यज्ञेष्वाह्वातुमर्हं। सहस्रकेतुं। अनेकध्वजं सहस्रस्य धनस्य केतयितारं ज्ञापयितारं वा। वनिनं। वनमित्युदकनाम। तद्वंतं। शतद्वसुं। शतसंख्याकैर्धनैर्युक्तं। श्रुष्टीवानं। श्रुष्टीति क्षिप्रनाम। क्षिप्रं संभजमानं। यद्वा सुखवंतं। वरिवोधां। वरिव इति धननाम। वरिवसो धनस्य दातारं॥ पुरुमायं। बहुव्रीहौ

त्रिचक्रादित्वादंतोदात्तत्वं। यद्वा। तत्पूर्वादर्धर्चादित्वादच्। जीराश्वं। जु इति गत्यर्थः सौत्रो धातुः। जोरी चेति रक् ईकारांतादेशश्च। बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वं। यज्ञियं। यज्ञर्त्विग्भ्यां घखञावित्यर्हार्थे घप्रत्ययः। हुवे। ह्वेञो लटि बहुलं छंदसीति संप्रसारणं। लुगित्यनुवृत्तौ बहुलं छंदसीति शपो लुक्। उवङ्। शतहस्तं। शतवसुं। छांदसस्तकारोपजनः॥

द्वितीयामृचमाह॥

ऊर्ध्वा धीतिः प्रत्यस्य प्रयामन्यधायि शस्मन्त्समयंत आ दिशः। स्वदामि घर्मं प्रति यंत्यूतय आ वामूर्जानी रथमश्विनारुहत्॥ २॥

ऊर्ध्वा। धीतिः। प्रति। अस्य। प्रऽयामनि। अधायि। शस्मन्। सं। अयंते। आ। दिशः। स्वदामि। घर्मं। प्रति। यंति। ऊतयः। आ। वां। ऊर्जानी। रथं। अश्विना। अरुहत्॥ २॥

अस्य रथस्य प्रयामनि प्रगमने सति शस्मन् अश्विनोः शंसने स्तवने धीतिरस्मदीया बुद्धिरूर्ध्वोन्मुखा प्रत्यधायि। प्रत्यस्थायि। तदनंतरं दिशो देष्टव्याः स्तुतयोऽपि समयंते। अश्विभ्यां संगच्छंते। आकारः समुच्चये। अहं च स्तोता घर्मं महावीरस्थं यद्वा त्वरणशीलाज्यादिकं हविः स्वदामि। स्वादूकरोमि। ऊतयोऽवितारो रक्षका ऋत्विजश्च प्रति यंति। घर्मं प्रति गच्छंति संस्कारार्थं। अपि च हे अश्विनौ वां युवयो

रथमूर्जानी सूर्यस्य दुहितारुहत्। आरूढवती ॥ प्रयामनि । या प्रापणे। आतो मनिन्क्वनिब्वनिपश्चेति मनिन्। बहुलमिति बहुलवचनाद्भावे मनिन्। दासीभारादित्वात्पूर्वपदप्रकृतिस्वरत्वं । प्रस्मन्। यंसु स्तुतौ। अन्येभ्योऽपि दृश्यंत इति मनिन्। दृशिग्रहणस्य विध्यंतरोपसंग्रहार्थत्वादुपधानकारलोपः। सुपां सुलुगिति सप्तम्या लुक्। अयंते। अय पय गतौ। भौवादिकोऽनुदात्तेत्। ऊतयः। क्तिच्क्तौ च संज्ञायामित्यवतेः कर्तरि क्तिच्। ज्वरत्वरेत्यादिना वकारोपधयोरूठ्। अरुहत्। कृमृदृरुहिभ्य इति च्लेरङादेशः ॥

तृतीयामृचमाह ॥

सं यन्मिथः पस्पृधानासो अग्मत शुभे मखा अमिता
जायवो रणे।
युवोरह प्रवणे चेकिते रथो यदश्विना वहथः सूरिमा वरं ॥३॥

सं। यत्। मिथः। पस्पृधानासः। अग्मत। शुभे। मखाः।
अमिताः। जायवः। रणे।
युवोः। अह। प्रवणे। चेकिते। रथः। यत्। अश्विना।
वहथः। सूरिं। आ। वरं ॥ ३ ॥

मखा मखवंतो यज्ञोपेता अमिता अपरिमिता जायवो जयशीला मनुष्या रणे संग्रामे शुभे शोभनाय धनाय तदर्थं मिथः पस्पृधानासोऽन्योन्यं स्पर्धमाना यद्यदा समग्मत। संगच्छंते। तदानीं हे अश्विना अश्विनौ युवोरह युवोरेव

रथः प्रवणे प्रकर्षेण संभजनीये भूतले चेकिते । ज्ञायते । देवेषु मध्ये युवामेव रक्षणार्थं शीघ्रं रथेनागच्छथ इत्यर्थः । यद्येन रथेन सूरिं स्तोतारं प्रति वरं श्रेष्ठं धनमावहथः । प्रापयथः । स रथ इत्यर्थः ॥ पस्पृधानासः । स्पर्ध संघर्षे । छांदसो लिट् । तस्य लिटः कानजादेशः । छांदसं रेफस्य संप्रसारणमकारलोपश्च । अग्मत । गमेश्छांदसो लङ् । समो गम्यृच्छिभ्यामित्यात्मनेपदं । बहुलं छंदसीति शपो लुक् । झस्यादादेशः । गमहनेत्युपधालोपः । मखाः । मखो यज्ञः । अर्शआदित्वादच् । जायवः । जि जये । कृवापाजीत्यादिनोण् । चेकिते । कित ज्ञाने । अस्माद्यङंताच्छांदसो वर्तमाने लिट् । अतोलोपयलोपौ । यत् । सुपां सुलुगिति तृतीयाया लुक् ॥

चतुर्थीमृचमाह ॥

युवं भुज्युं भुरमाणं विभिर्गतं स्वयुक्तिभिर्निवहंता

पितृभ्य आ ।

यासिष्टं वर्तिर्वृषणा विजेन्यं१ दिवोदासाय महि

चेति वामवः ॥ ४ ॥

युवं । भुज्युं । भुरमाणं । विऽभिः । गतं । स्वयुक्तिऽभिः ।

निऽवहंता । पितृऽभ्यः । आ ।

यासिष्टं । वर्तिः । वृषणा । विऽजेन्यं । दिवःऽदासाय ।

महि । चेति । वां । अवः ॥ ४ ॥

वृषणा कामानां वर्षितारौ हे अश्विनौ युवं युवां भुरमाणं विभिरश्वैर्भ्रियमाणं गतं समुद्रे निमग्नं भुज्युं तुग्रपुत्र स्वयुक्तिभिः स्वयमेव युज्यमानैरश्वैर्नौविशेषैश्च निवहंता नितरां वहंतौ पितृभ्य आ । आङ् मर्यादायां । यत्र पितरस्तुग्रादय आसते तावत्पर्यंतमित्यर्थः । विजेन्यमिति दूरस्थं । दूरे वर्तमानं वर्तिस्तुग्रस्य गृहं प्रति यासिष्टं । आगच्छतं । अपि च । दिवोदासाय राज्ञे कृतं युवयोः संबंध्यवो रक्षणं शंबर-हननरूपं महि महन्नंभोरं चेति । अस्माभिर्ज्ञायते ॥ भुरमाणं । डुभृञ् धारणपोषणयोः । कर्मणि लटः शानच् । व्यत्ययेन शः । बहुलं छंदसीत्युत्वं । पितृभ्य आ । मर्यादायामाङः कर्म-प्रवचनीयसंज्ञा । पा० १. ४. ८९. । पंचम्यपाङ्परिभिः । पा० २. ३. १०. । इति पंचमी । यासिष्टं । या प्रापणे । यमरमन-मातां सक् चेति सगागमः । सिच इडागमः । विजेन्यं । विजनो दूरदेशः । तत्र भवं विजेन्यं । भवे छंदसीति यत् । तित्स्वरित इति स्वरितत्वं ॥

पंचमीमृचमाह ॥

युवोरंश्विना वपुंषे युवायुजं रथं वाणी येमतुरस्य शर्ध्यं ।

आ वां पतित्वं सख्याय जग्मुषी योषांवृणीत जेन्यां

युवां पती ॥ ५ ॥

युवोः । अश्विना । वपुंषे । युवाऽयुजं । रथं । वाणी इति ।

येमतुः । अस्य । शर्ध्यं ।

आ । वां । पतिऽत्वं । सख्याय । जग्मुषी । योषां । अवृणीत ।
जेन्यां । युवां । पती इति ॥ ५ ॥

अश्विना हे अश्विनौ युवोर्युवयोर्वांयौ वननीयौ प्रशस्याश्वौ युवायुजं युवाभ्यां युज्यमानं रथमाजिधावनसमयेऽस्य रथस्य यच्छर्ध्यं प्राप्यमादित्याख्यमवधिभूतं लक्ष्यं वपुषे शोभनार्थं तद्येमतुः । सर्वेभ्यो देवेभ्यः पूर्वं प्रापयामासतुः । तदनंतरं चाजग्मुष्यागतवती जेन्याजिधावनेन जीयमाना योषा सूर्या सख्याय सखित्वाय युवां युवयोः पतित्वमवृणीत । कथमिति । मम युवामेव पती भर्ताराविति ॥ युवोः । षष्ठीद्विवचने योऽचीति यत्वस्य सर्वविधीनां छंदसि विकल्पितत्वादभावे शेषे लोप इति दकारलोपः । अतो गुण इति पररूपत्वं । युवायुजं । युवावौ द्विवचन इति द्व्यर्थाभिधायकस्य युष्मच्छब्दस्याविभक्तावपि व्यत्ययेन युवादेशः । शर्ध्यं । शृधु प्रसहने । अस्माण्ण्यंतादचो यदिति यत् । यतोऽनाव इत्याद्युदात्तत्वं । जग्मुषी । गमेर्लिटः क्वसुः । उगितश्चेति ङीप् । वसोः संप्रसारणमिति संप्रसारणं । गमहनेत्युपधालोपः । जेन्या । जि जये । औणादिक एन्यप्रत्ययष्टिलोपश्च ॥

॥ इति प्रथमस्याष्टमे विंशो वर्गः ॥

षष्ठीमृचमाह ॥

युवं रेभं परिषूतेरुरुष्यथो हिमेन घर्मं परितप्तमत्रये ।
युवं शयोरवसं पिप्यथुर्गवि प्र दीर्घेण वंदनस्तार्यायुषा ॥ ६ ॥

युवं । रेभं । परिऽसूतेः । उरुष्यथः । हिमेनं । घर्मं ।

परिऽतप्तं । अत्रये ।

युवं । शयोः । अवसं । पिप्यथुः । गविं । प्र । दीर्घेणं । वंदनः ।

तारि । आयुंषा ॥ ६ ॥

हे अश्विनौ युवं युवां रेभमृषिं परिषूतेः परितः प्रेरकादुपद्रवादुपपतनाद्वोरुष्यथः । अरक्षतः । उरुष्यती रक्षाकर्मेति यास्कः । तथात्रये ऋषये परितप्तं परितस्तप्तं घर्ममसुरैः पीडार्थं प्रक्षिप्तं दीप्यमानं तुषाग्निं हिमेन शीतेनोदकेनावारयेथां । यद्वा हविषामत्रये भक्षयित्रेऽग्नये परितप्तं सूर्यकिरणैः संतप्तं घर्मं । अहर्नामैतत् । अहर्हिमेन वृष्ट्युदकेन हविःसंपादकव्रीह्याद्युत्पत्त्यर्थमवारयेथां । अपि च । शयोरेतत्संज्ञस्य ऋषेर्गवि निवृत्तप्रसवायां धेनाववसं रक्षकं पयो युवं युवां पिप्यथुः । प्रवर्धितवंतौ । तथा जीर्णांगो वंदन ऋषिर्दीर्घेणायुषा प्रतारि । युवाभ्यां प्रवर्धितः । प्रपूर्वस्तिरतिर्वर्धनार्थः ॥ अवसं । अवतेरौणादिकोऽसच् । पिप्यथुः । प्यायी वृद्धौ । व्यत्ययेन परस्मैपदं । लिड्यङोश्चेति पीभावः ॥

सप्तमीमृचमाह ॥

युवं वंदनं निर्ऋतं जरण्यया रथं न दस्रा करणा समिन्वथः ।

क्षेत्रादा विप्रं जनथो विपन्यया प्र वामत्र विधते दंसना भुवत् ॥ ७ ॥

युवं। वंदनं। निःऽऋतं। जरण्यया। रथं। न। दस्रा।
करणा। सं। इन्वथः।
चेत्रात्। आ। विप्रं। जनथः। विपन्यया। प्र। वां। अत्र।
विधते। दंसना। भुवत् ॥ ७ ॥

हे दस्राबश्विनौ युवं युवां जरण्यया जरया निर्ऋतं निःशेषेण प्राप्तं वंदनमृषिं करणा कर्मणां कर्तारौ शिल्पकुशलौ युवां समिन्वथः। समधत्तं। पुनर्युवानमकुरुतं। तत्र दृष्टांतः। रथं न। यद्वा। यथा कश्चिच्छिल्पी जीर्णं रथं पुनरप्यभिनवं करोति तद्वत्। अपि च। विपन्यया स्तुत्या गर्भस्थेन वामदेवेन स्तुतौ संतौ चेत्रात्। आकारः समुच्चये। मातरुदरलक्षणा-ज्जन्मस्थानाद्विप्रं मेधाविनं तमृषिं जनथः। जनयथश्च। तथा वां युवयोर्दंसना रक्षणात्मकं कर्मात्रास्मै विधते परिचरते यजमानाय प्रभुवत्। प्रभवतु। रक्षितुं समर्थं भवतु ॥ निर्ऋतं। ऋ गतौ। कर्मणि निष्ठा। गतिरनंतर इति गतेः प्रकृतिस्वरत्वं। जरण्यया। जरणक्रियार्हा जरण्या। अंत्याव-स्थाच्छंदसि चेति यः। करणा। करोतेरन्येभ्योऽपि दृश्यत इति युच्। इन्वथः। इवि व्याप्तौ। इदित्त्वान्नुम्। भौवादिकः। जनथः। जनी प्रादुर्भावे। णिच्युपधावृद्धिः। जनी जृष् क्नसु रंजोऽमंताश्चेति मित्त्वान्मितां ह्रस्व इति ह्रस्वत्वं। छंदस्यु-भयथेति शप आर्द्धधातुकत्वात्सेरनिटीति णिलोपः। विपन्यया। पन स्तुतौ। अघ्न्यादयश्चेति भावे यत्। व्यत्ययेनांतोदात्तत्वं। विधते। विध विधाने। तौदादिकः। लटः शतृ। शतुरनुम

इति विभक्तेरुदात्तत्वं । भुवत् । भवतेर्लेट्यडागमः । बहुलं छंदसीति शपो लुक् । भूसुवोस्तिङीति गुणप्रतिषेधः ॥

अष्टमीमृचमाह ॥

अगं॑च्छतं॒ कृप॑माणं परा॒वति॑ पि॒तुः स्वस्य॒ त्यज॑सा॒ निबा॑धितं ।
स्व॒र्वती॑रि॒त ऊ॒तीर्यु॒वोरह॑ चि॒त्रा अ॒भीके॑ अभवन्न॒भिष्ट॑यः ॥८॥

अगं॑च्छतं । कृप॑माणं । परा॒ऽवति॑ । पि॒तुः । स्वस्य॑ ।
त्यज॑सा । निऽबा॑धितं ।
स्वः॒ऽवतीः॑ । इ॒तः । ऊ॒तीः । यु॒वोः । अह॑ । चि॒त्राः । अ॒भीके॑ ।
अ॒भ॒व॒न् । अ॒भिष्ट॑यः ॥ ८ ॥

हे अश्विनौ परावति दूरदेशे समुद्रमध्ये स्वस्य पितुस्तुग्रस्य त्यजसा त्यागेन निबाधितं पीडितं भुज्युं कृपमाणं युवां स्तुवंतमगच्छतं । युवां रक्षणार्थं गतवंतौ । यस्मादेवं तस्मात् हे अश्विनौ स्वर्वतीः स्वर्वत्यः शोभनगमनयुक्ता इत इतो सुखाच्चित्रास्वायनीया युवोरह युवयोरेवोतीरूतयो रक्षा अभीके समीपेऽभिष्टयः सर्वैः प्राणिभिरभ्येषणीया अभवन् । भवंति ॥ कृपमाणं । कृपतिः स्तुतिकर्मा । अयं च तुदादिर्द्रष्टव्यः । स्वर्वतीः । सुपूर्वादर्तेर्भावे विच् । ततो मतुप् । छंदसीर इति मतुपो वत्वं । अभिष्टयः । इषु इच्छायां । भावे क्तिन् । शकंध्वादित्वात्पररूपत्वं ॥

नवमीमृचमाह ॥

उ॒त स्या वां॒ मधु॑म॒न्मक्षि॑कारप॒न्मदे॒ सोम॑स्यौशि॒जो हु॑वन्यति ।

युवं दधीचो मन आ विवासथोऽथा शिरः प्रति वामश्व्यं वदत् ॥ ९ ॥

उत । स्या । वां । मधुंऽमत् । मक्षिका । अरपत् । मदे । सोमस्य । औशिजः । हुवन्यति ।

युवं । दधीचः । मनः । आ । विवासथः । अर्थ । शिरः । प्रति । वां । अश्व्यं । वदत् ॥ ९ ॥

उत अपि च हे अश्विनौ मधुमन्मधुमंतौ वां युवां स्या सा मक्षिका सरघा मधुकामा सत्यरपत् । अस्तौत् । तथौशिज उशिजः पुत्रः कक्षीवान् सोमस्य पानेन युवयोर्मदे हर्षे निमित्तभूते सति हुवन्यति । युवामाह्वयति । युवं युवां च तस्यै मक्षिकायै मधु दातुं मधुविद्यार्थिनौ संतौ दधीच आथर्वणस्य ऋषेर्मनश्चित्तं शुश्रूषया आविवासथः । पर्यचरतं । अथानंतरं तस्मिन्प्रीते सत्यश्व्यं युवाभ्यां प्रतिहितमश्वस्य संबंधि यच्छिरस्तद्वां युवां प्रति मधुविद्यामवदत् । स ऋषिराश्वेन शिरसोपदिष्टवानित्यर्थः ॥ मधुमत् । सुपां सुलुगिति विभक्तेर्लुक् । अरपत् । रप लप व्यक्तायां वाचि । मदे । मदी हर्षे । मदोऽनुपसर्गे इति भावेऽप् । हुवन्यति । ह्वेञ् स्पर्धायां शब्दे च । ल्युट् चेति भावे ल्युट् । बहुलं छंदसीति संप्रसारणं । हवनमात्मन इच्छति । सुप आत्मनः क्यच् । अंत्यलोपश्छांदसः । वर्णव्यापत्त्योत्वं । अश्व्यं । अश्वे भवमश्व्यं । भवे छंदसीति यत् ॥

दशमीमृचमाह ॥

युवं पेदवे पुरुवारमश्विना स्पृधां श्वेतं तरुतारं दुवस्यथः ।
शर्यैरभिद्युं पृतनासु दुष्टरं चर्कृत्यमिंद्रमिव चर्षणीसहं ॥१०॥

युवं । पेदवे । पुरुऽवारं । अश्विना । स्पृधां । श्वेतं ।
तरुतारं । दुवस्यथः ।
शर्यैः । अभिऽद्युं । पृतनासु । दुस्तरं । चर्कृत्यं । इंद्रंऽइव ।
चर्षणिऽसहं ॥ १० ॥

अश्विना हे अश्विनौ पेदवे पेदुनाम्ने राज्ञे पुरुवारं बहुभिर्वरणीयं स्पृधां संग्रामे स्पर्धमानानां शत्रूणां तरुतारं तारकं श्वेतं शुभ्रवर्णमिंद्रात्लब्धमश्वं युवं युवां दुवस्यथः । दत्तवंतौ । पुनरपि कीदृशं । शर्यैः । शीर्यंत इति शर्या योद्धारः । तैः पृतनासु संग्रामेषु दुस्तरं । तरीतुमशक्यं । अभिद्युं । अभिगतदीप्तिं । चर्कृत्यं । सर्वेषु कार्येषु पुनः पुनः प्रयोज्यं । इंद्रमिव चर्षणीसहं । इंद्रो यथा शत्रूनभिभवति एवं शत्रुजनानामभिभवितारमित्यर्थः ॥ स्पृधां । स्पर्ध संघर्षे । क्विप् चेति क्विप् । चशब्देन दृशिग्रहणानुकर्षणात्तस्य च विध्यंतरोपसंग्रहार्थत्वादकारस्य लोपो रेफस्य च संप्रसारणं । सावेकाच इति विभक्तेरुदात्तत्वं । तरुतारं । तॄ प्लवनतरणयोः । अस्मात्तृचि ग्रसितस्कभितस्तभितेत्यादौ निपातनाद्रूपसिद्धिः । चर्कृत्यं । करोतेर्यङ्लुगंताद्विभाषा कृवृषोरिति क्यप् । ततस्तुक् ॥

॥ इति प्रथमस्याष्टम एकविंशो वर्गः ॥

आ राधदिति द्वादशर्चं पंचमं सूक्तं । अत्रानुक्रम्यते । का राधद्द्वादशांत्या दुःस्वप्ननाशिन्याद्या गायत्री द्वितीया ककुप् तृतीयाचतुर्थ्यौ काविराण्नष्टरूप्यौ पंचमी तनुशिराः षष्ठ्यक्षरैरुष्णिग्विष्टारबृहती कृतिर्विराट् तिस्रो गायत्र्य इति । अस्यायमर्थः । अनुवृत्तेरौशिजो दैर्घतमसः कक्षीवानृषिः । आद्या गायत्री । विद्वांसावित्येषा ककुप् मध्यमपादस्य द्वादशाक्षरत्वात् । मध्यमश्चेत्ककुबिति हि तल्लक्षणं । तृतीया ता विद्वांसेत्येषा काविराट् । नवकयोर्मध्ये जागतः काविराडित्युक्तलक्षणोपेतत्वात् । चतुर्थी विपृच्छामीत्येषा नष्टरूपी । नववैराजत्रयोदशैर्नष्टरूपीत्युक्तलक्षणोपेतत्वात् । प्र या घोष इत्येषा पंचमी तनुशिरा । एकादशिनोः परः षट्कस्तनुशिरेत्युक्तलक्षणोपेतत्वात् । श्रुतं गायत्रमित्येषा षष्ठी यद्यपि पादसंख्ययोष्णिङ् भवति तथाप्यक्षरसंख्ययोष्णिक् । युवं ह्यौति सप्तमी विष्टारबृहती । अष्टिनोर्मध्ये दशकौ विष्टारबृहतीति तल्लक्षणोपेतत्वात् । मा कस्मा इत्यष्टमी कृतिः । जागतावष्टकश्च कृतिरित्युक्तलक्षणसद्भावात् । दुह्रीयन्निति नवमी विराट् । दशम्याद्यास्तिस्रो गायत्र्यः । आश्विनं वै इति वैशब्दप्रयोगात्तुह्यादिपरिभाषयेदमपि सूक्तमाश्विनं । अथ स्वप्नस्येत्यंत्यया दुःस्वप्ननाशनं प्रतिपाद्यते । अतो या तेनोच्यते सा देवतेति न्यायेन तदेव देवता ॥ सूक्तविनियोगो लैंगिकः । घर्माभिष्टव आदितो नवर्चो विनियुक्ताः । सूत्रितं हि । का राधद्धोत्राश्विना वामिति नवाभात्यग्निः । आ० ४. ६. । इति ॥ का राधद्धोत्राश्विना वामिति नवत्रिकंदम इत्यादिकं ब्राह्मणमनुसंधेयं ॥

तत्र प्रथमामृचमाह ॥

का राधद्धोत्राश्विना वां को वां जोषं उभयोः । कथा विधात्यप्रचेताः ॥ १ ॥

का । राधत् । होत्रा । अश्विना । वां । कः । वां । जोषं । उभयोः । कथा । विधाति । अप्रऽचेताः ॥ १ ॥

अश्विना हे अश्विनौ वां युवां का होत्रा । वाङ्नामैतत् । कीदृशी स्तुतिलक्षणा वाक् राधत् । आराधयति । प्रीतौ करोति । युवयोर्माहात्म्यानुरूपा स्तुतिर्नास्तीत्यर्थः । किंच वां युवयोरुभयोर्जोषे जोषणे सेचने प्रीणने वा समर्थः कः स्तोता विद्यते । युष्मद्गुणाभिज्ञः कश्चिदपि नास्तीत्यर्थः । अप्रचेता युवयोर्माहात्म्यमजानंश्च कथा केन प्रकारेण विधाति । युवां परिचरति । युष्मद्विषयं परिचरणमपि कर्तुं न शक्यत इत्यर्थः ॥ राधत् । राध साध संसिद्धौ । लेट्यडागमः । जोषे । जुषी प्रीतिसेवनयोः । भावे घञ् । ञित्त्वादाद्युदात्तत्वं । कथा । था हेतौ च छंदसीति किंशब्दात्प्रकारवचने थाप्रत्ययः । किमः क इति कादेशः । विधाति । विध विधाने । तौदादिकः । लेट्याडागमः । अप्रचेताः । प्रकृष्टं चेतो यस्यासौ प्रचेताः । नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं ॥

द्वितीयामृचमाह ॥

विद्वांसाविद्दुरः पृच्छेदविद्वानित्थापरो अचेताः । नू चिन्नु मर्ते अक्रौ ॥ २ ॥

विद्वांसौ । इत् । दुरः । पृच्छेत् । अविद्वान् । इत्था ।

अपरः । अचेताः । नु । चित् । नु । मर्ते । अक्रौ ॥ २॥

इत्थेत्थमनेन पूर्वोक्तप्रकारेणाविद्वान् अज्ञः स्तोता विद्वांसावित् सर्वज्ञावश्विनावेव दुरो द्वाराणि स्तुतिपरिचरणयोरुपायभूतान्मार्गान्पृच्छेत्। प्रष्टुमर्हति। अपरोऽश्विभ्यामन्यः सर्वोऽप्यचेताः। यस्माच्चेतसा ज्ञानेन रहितस्तस्मादश्विनावेव पृच्छेदित्यर्थः। तौ चाक्रौ शत्रुभिरनाक्रांतावश्विनौ नू चित् क्षिप्रमेव मर्ते मनुष्ये स्तोतरि भक्तानुग्रहकृतया सन्निधत्त इति वाक्यशेषः॥ इत्था। था हेतौ च छंदसीति थाप्रत्ययः। इदम इश्। एतेतौ रथोः। पा० ५. ३. ४.। इतीद्भावः। यदि था हेतौ चेत्येवेदम्शब्दस्य नानुवृत्तिस्तदानीमिदमस्थमुः। एतदंतात्परस्या विभक्तेर्व्यत्ययेन सुपां सुलुगिति विभक्तेर्डादेशः। अक्रौ। क्रमु पादविक्षेपे। अस्मात् नञ्युपपदे कृत्यल्युटो बहुलमिति बहुलवचनात्कर्मण्यपि जनसनखनक्रमगमो विडिति विट्। विड्वनोरनुनासिकस्यादित्यात्वं। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं॥

तृतीयामृचमाह॥

ता विद्वांसा हवामहे वां ता नो विद्वांसा मन्म वोचेतमद्य।

प्रार्चद्दयमानो युवाकुः॥ ३॥

ता। विद्वांसा। हवामहे। वां। ता। नः। विद्वांसा।

मन्म। वोचेत। अद्य।

प्र। आर्चत्। दयमानः। युवाकुः॥ ३॥

हे अश्विनौ विद्वांसा सर्वज्ञौ ता वां तौ युवां हवामहे। आह्वयामहे। तावाहृतौ विद्वांसाभिज्ञौ युवां नोऽस्मभ्यं मन्म मननीयं ज्ञातव्यं स्तोत्रमद्यास्मिन्काले वोचेतं। ब्रुवाणौ भूयास्तं। स चाहं युवाकुर्युवां कामयमानः स्तुत्या संयोजयन्वा दयमानौ युवाभ्यां हविः प्रयच्छन् प्रार्चत्। प्रकर्षेण स्तौमि॥ ता। सुपां सुलुगिति विभक्तेराकारः। वोचेतं। ब्रूञ् व्यक्तायां वाचि। ब्रुवो वचिः। लिङ्याशिष्यङ्। वच उमित्युमागमः। आर्चत्। अर्च पूजायां। भौवादिकः। तिङां तिङो भवंतीति मिपस्तिबादेशः। दयमानः। दय दानगतिरक्षणहिंसादानेषु। शपः पित्त्वादनुदात्तत्वं। शानचो लसार्वधातुकस्वरेण धातुस्वरः शिष्यते। युवाकुः। युवां कामयत इति युवाकुः। मित-द्र्वादिभ्य उपसंख्यानमिति डुप्रत्ययः। अविभक्तावपि व्यत्ययेन युवावौ द्विवचन इति युवादेश आत्वं च। यद्वा यु मिश्रणे। औणादिकः काकुप्रत्ययः॥

चतुर्थीमृचमाह॥

वि पृ॑च्छामि पा॒क्या॒३॑ न दे॒वान्वष॑ट्कृतस्याद्भु॒तस्य॑ दस्रा।
पा॒तं॑ च॒ सह्य॑सो यु॒वं च॒ रभ्य॑सो नः॥ ४॥

वि। पृ॒च्छा॒मि॒। पा॒क्या॑। न। दे॒वान्। वष॑ट्ऽकृतस्य।
अ॒द्भु॒तस्य॑। द॒स्रा॒।
पा॒तं। च॒। सह्य॑सः। यु॒वं। च॒। रभ्य॑सः। नः॒॥ ४॥

हे अश्विनौ युवां विपृच्छामि । विशेषेण प्रष्टुमिच्छामि । पाक्या न । पक्वव्यप्रज्ञानान् परिपक्वमतीनन्यान्देवान् न पृच्छामि । किंतु युवामेव सर्वज्ञौ पृच्छामीत्यर्थः । हे दस्रा दर्शनीयौ तौ युवां वषट्कृतस्य वषट्कारेणाग्नौ हुतस्याङ्गुतस्याश्चर्यभूतस्य महतः सह्यसोऽतिशयेन बलवतो बलोत्पादकस्य सोमस्य स्वांशलक्षणमेकदेशं पा॑ च । नोऽस्मांश्च रभ्यसोऽतिशयेन रभस्विनः प्रौढोद्यमान्कुरुतं ॥ पाक्या । पचेर्क्ट हलोर्ण्यत् । चजोः कु घिण्यतोरिति कुत्वं । तित्स्वरः । सुपां सुलुगिति विभक्तेर्डादेशः । वषट्कृतस्य । वषट्शब्दस्योर्यादित्वेन गतित्वाद्गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । पातं । पा पाने । बहुलं छंदसीति शपो लुक् । सह्यसः । सहतेऽभिभवत्यनेनेति सहो बलं । असुन् । तदस्यास्तीति सहस्वी । मत्वर्थीयो विनिः । तत आतिशायनिक ईयसुन् । विन्मतोर्लुक् । छांदस ईकारलोपः । रभ्यसः । रभ राभस्ये । राभस्यं कार्योपक्रमः । पूर्ववत्प्रक्रियोन्नेया ॥

पंचमीमृचमाह ॥

प्र या घोषे॒ भृग॑वाणे॒ न शोभे॒ यया॑ वा॒चा यज॑ति

पज्रियो॒ वा॑म् ।

प्रैष॒युर्न विद्वान् ॥ ५ ॥

प्र । या । घोषे॑ । भृग॑वाणे । न । शोभे॑ । यया॑ । वा॒चा ।

यज॑ति । प॒ज्रियः॑ । वा॑म् ।

प्र । इ॒षऽयुः । न । विद्वान् ॥ ५ ॥

हे अश्विनौ प्र भवति समर्था भवति सा वाक् या वाक् युष्मत्स्तुतिरूपा घोषे घोषाख्यायाः पुत्रे सुहस्त्याख्ये ऋषौ भृगवाणे न भृगौ च शोभे । शोभते । यया च स्तुतिलक्षणया वाचा पज्रियः । पज्रा अंगिरसः । तेषां कुलोत्पन्नः कक्षीवान्वां युवां यजति । स्तौति । सापि शोभत इत्यर्थः । इषयुर्न । इषमन्नमात्मनः कामयमानस्य विद्वान् स्तुत्यभिज्ञः कक्षीवानृषिः प्र भवतु । युष्मदनुग्रहात्संपूर्णकामो भवत्वित्यर्थः ॥ घोषे । घोषा नाम काचिद्ब्रह्मवादिनी कक्षीवतः पुत्री । अत्रोपचारात्तद्वाचकं प्रातिपदिकं पुत्रे वर्तते । भृगवाणे । चिरंतनो भृगुरिवाचरति । सर्वप्रातिपदिकेभ्य इति क्विप् । धातुसंज्ञायां व्यत्ययेन लटः शानच् । शबादि । आगमानुशासनस्यानित्यत्वान्मुगभावः । वृषादिः । शोभे । शुभ दीप्तौ । लोपस्त आत्मनेपदेष्विति तलोपः । इषयुः । इष गतौ । इष्यति गच्छतीतीषमन्नं । इगुपधलक्षणः कः । यद्वा । इषु इच्छायां । इष्यते सर्वैः प्राणिभिरितीषमन्नं । व्यत्ययेन कर्मणि कर्तृप्रत्ययः । प्रशब्देन संहितायां प्रादूहोढोढ्येषैष्येषु वृद्धिर्वक्तव्या । पा० ६. १. ८९. ३. । इति वृद्धिः ॥

॥ इति प्रथमस्याष्टमे द्वाविंशो वर्गः ॥

षष्ठीमृचमाह ॥

श्रुतं गायत्रं तकवानस्याहं चिद्धि रिरेभाश्विना वां ।
आ॒क्षी शुभस्पती दन् ॥ ६ ॥

श्रुतं । गायत्रं । तकवानस्य । अहं । चित् । हि । रिरेभ ।
अश्विना । वां ।
आ । अक्षी इति । शुभः । पती इति । दन् ॥ ६ ॥

हे अश्विना अश्विनौ गायत्रं गातव्यं गायत्रीयुक्तं गायत्रसाम्ना निष्पन्नं निष्पाद्यं वा स्तोत्रं तकवानस्य स्खलद्गतेरंधस्य ऋज्राश्वस्य संबंधि श्रुतं । शृणुतं । अहं चित् अहमिव वां युवां स हि रिरेभ । स्तुतवान् । किं कुर्वन् । हे शुभस्पती शोभनस्य कर्मणः पालयितारौ जलस्य वा स्वामिनौ अक्षी युवाभ्यामादन् । चक्षुषी आददानः । तस्मा इव मह्यमप्यभिमतफलं प्रयच्छतमिति भावः ॥ श्रुतं । श्रु श्रवणे । लङि बहुलं छंदसीति विकरणस्य लुक् । तकवानस्य । तक गतौ । अत्र गतिसामान्यवाचिना तद्विशेषो मंदगतिर्लक्ष्यते । औणादिक उप्रत्ययः । भृगवाण इतिवत् प्रक्रियोन्नेया । रिरेभ । रेभृ शब्दे । अक्षी । ई च द्विवचन इत्यक्षिशब्दस्य ईकारांतादेशः । स चोदात्तः । शुभस्पती । सुबामंत्रिते । परांगवत्स्वर इति षष्ठ्यंतस्य परांगवद्भावात्पदद्वयसमुदायस्याष्टमिकामंत्रितानुदात्तत्वं । दन् । आङ्पूर्वाद्ददातेराङो दोऽनास्यविहरणे । पा० १. ३. २० । इत्यात्मनेपदं । व्यत्ययेन शतृ । जुहोत्यादित्वात् श्लुः । द्विर्वचनप्रकरणे छंदसि वेति वक्तव्यमिति वचनाद्विर्वचनाभावः । छंदस्युभयथेत्युभयथाश्रयणात् शतुः सार्वधातुकत्वेन ङित्त्वं । आर्द्धधातुकत्वादातो लोप इटि चेत्याकारलोपः ॥

सप्तमीमृचमाह ॥

युवं ह्यास्तं महो रन्युवं वा यन्निरततंसतं ।

ता नो वसू सुगोपा स्यातं पातं नो वृकादघायोः ॥ ७ ॥

युवं । हि । आस्तं । महः । रन् । युवं । वा । यत् ।

निःऽअततंसतं ।

ता । नः । वसू इति । सुऽगोपा । स्यातं । पातं । नः ।

वृकात् । अघऽयोः ॥ ७ ॥

हे अश्विनौ महो महतो धनस्य रन् रातारौ दातारौ युवं युवां कंचनास्तं । वा यत् निरततंसतं । धनानि निरगमयतं । रक्षकौ विनाशकावपि युवामेवेत्यर्थः । हे वसू वासयितारावश्विनौ तादृशौ युवां नोऽस्माकं सुगोपा सुष्ठु गोपायितारौ रक्षितारौ स्यातं । भवतं । अपि च । नोऽस्मानघायोरघं पापफलमस्माकमिच्छतो वृकात्स्तेनात्पातं । रक्षतं ॥ महः । महतः । छांदसोऽच्छब्दलोपः । रन् । ददातिवत्प्रक्रियोन्नेया । व्यत्ययेनैकवचनं । निरततंसतं । तसि अलंकारे । अस्मात्स्यंतात्लुङि णिश्रिद्रुस्रुभ्य इति चङ्सङ् द्विर्वचनादि च । गुरुसंज्ञाया लघुसंज्ञया बाधितत्वात्सन्वद्भावाभावः । सुगोपा । सुपां सुलुगिति विभक्तेर्लुक् । अघायोः । अघं परेषामिच्छति छंदसि परेच्छायामिति क्यच् । अश्वाघस्यादित्यात्वं । क्याच्छंदसीत्युप्रत्ययः ॥

अष्टमीमृचमाह ॥

मा कस्मै धातमभ्यमित्रिणे नो माकुत्रा नो गृहेभ्यो

धेनवो गुः ।

स्तनाभुजो अशिश्वीः ॥ ८ ॥

मा । कस्मै । धातं । अभि । अमित्रिणे । नः । मा ।

अकुत्र । नः । गृहेभ्यः । धेनवः । गुः ।

स्तनऽभुजः । अशिश्वीः ॥ ८ ॥

हे अश्विनौ अमित्रिणे । अमित्रं मित्ररहित्यं । तद्वते कस्मै चिदपि शत्रवे नोऽस्मान्माभिधातं । आभिमुख्येन मावस्थापयतं । अपि च नोऽस्माकं गृहेभ्यः सकाशात्स्तनाभुजः स्तनैर्वत्सान्मनुष्यांश्च पालयंत्यो धेनवो गावोऽशिश्वीः शिशुना वत्सेन विरहिता अस्मदीये गृहेऽशयाना वा सत्योऽकुत्र चिदस्माभिरगम्ये प्रदेशे मा गुः । मा गच्छंतु ॥ धातं । धाञो माङि लुङि गातिस्थेति सिचो लुक् । न माङ्योग इत्यडभावः । अकुत्र । परादिश्छंदसि बहुलमित्युत्तरपदाद्युदात्तत्वं । गुः । इण् गतौ । इणो गा लुङीति गादेशः । गातिस्थेति सिचो लुक् । आत इति झेर्जुस् । स्तनाभुजः । भुज पालनाभ्यवहारयोः । स्तनैर्भुंजंति पालयंतीति स्तनाभुजः । क्विप् । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । अशिश्वीः । सख्यशिश्वीति भाषायां । पा० ४. १. ६२. । इति छंदस्यपि व्यत्ययेन निपातनं द्रष्टव्यं । यद्वा । शिशुरस्यास्तीति शिश्वो । छंदसीव-

निपाविति मत्वर्थीय ईकारः। नञ्समासेऽव्ययपूर्वपदप्रकृतिस्वरत्वं। वा छंदसीति पूर्वसवर्णदीर्घः। अथवा। ञिष्वप् स्वप्ने। उत्सर्गश्छंदसीति क्विप्रत्ययः। द्विर्वचनकृस्वत्वे। एरनेकाच इति यण्। छांदसो वकारः। पूर्ववत्समासस्वरौ॥

नवमीमृचमाह॥

दुहीयन्मित्रधितये युवाकु राये च नो मिमीतं वाजवत्यै।
इषे च नो मिमीतं धेनुमत्यै॥ ९॥

दुहीयन्। मित्रऽधितये। युवाकु। राये। च। नः।
मिमीतं। वाजऽवत्यै।
इषे। च। नः। मिमीतं। धेनुऽमत्यै॥ ९॥

हे अश्विनौ युवाकु युवां कामयमानाः स्तुतिभिर्यावयितारः संयोजयितारो वा स्तोतारो मित्रधितये मित्राणां बंधुजनानां धारणार्थं दुहीयन्। युष्मत्सकाशाद्धनानि दुहंति प्राप्नुवंति। अतो नोऽस्मानपि वाजवत्यै वाजयुक्ताय च राये धनाय मिमीतं। कुरुतं। तथा धेनुमत्यै धेनुभिर्युक्तायेषेऽन्नाय च नोऽस्मान्मिमीतं। कुरुतं। अस्मभ्यं स्तोतृभ्यो बलयुक्तं धनं गोयुक्तमन्नं च प्रयच्छतमित्यर्थः॥ दुहीयन्। दुह प्रपूरणे। दुहिर्दोहः। इगुपधात्किदिति भाव इप्रत्ययः। दुहिमात्मन इच्छति दुहीयति। सुप आत्मनः क्यच्। दुहीयतेर्लङ्यडागमः। इतश्च लोप इतीकारलोपः। यद्वा। देहेर्लिङि छंदस्य रन्। पा० ३.४.१०५.। इति व्यत्ययेन रनादेशाभावे रूपमेतत्। छांदसोऽत्यलोपः। यद्वा रनादेशे कृते छांदसो रेफस्य यकारः।

अत एव व्युत्पत्त्यनवधारणान्नावग्रह्णंति । युवाकु । सुपां सुलुगिति जसो लुक् । मिमीत । माङ् माने शब्दे च । जौहोत्यादिकः । व्यत्ययेन परस्मैपदं । भृञामिदित्यभ्यासस्येत्वं । चवायोगे प्रथमेति निघातप्रतिषेधः ॥

दशमीमृचमाह ॥

अश्विनोरसनं रथमनश्वं वाजिनीवतोः । तेनाहं

भूरि चाकन ॥ १० ॥

अश्विनोः । असनं । रथं । अनश्वं । वाजिनीऽवतोः ।

तेन । अहं । भूरि । चाकन ॥ १० ॥

वाजिनीवतोः । वाजोऽन्नं बलं वा । तद्वत्क्रियावतोरश्विनोरनश्वमश्वरहितमश्वराहित्येऽपि सामर्थ्यातिशयेन गच्छंतं रथमसनं । अहं स्तोता समभजं । तेन च रथेन भूरिं प्रभूतं श्रेयश्चाकन । कामये ॥ असनं । वन षण संभक्तौ । लङ् । चाकन । कन दीप्तिकांतिगतिषु । छांदसो लिट् । णलुत्तमो वेति णित्त्वस्य विकल्पनाद्वृद्ध्यभावः । तुजादित्वादभ्यासस्य दीर्घत्वं ॥

एकादशीमृचमाह ॥

अयं समह मा तनूह्याते जनाँ अनु । सोमपेयं

सुखो रथः ॥ ११ ॥

अयं । समह । मा । तनु । ऊह्याते । जनान् । अनु ।

सोमऽपेयं । सुऽखः । रथः ॥ ११ ॥

हे समह धनेन सहित हे रथ अयं पुरोवर्ती त्वं मा मां तनु । विस्तारय । पुत्रपौत्रधनादिभिः समृद्धं कुरु । यद्वा । अयमानं त्वां प्राप्नुवंतं मामिति योज्यं । स च सुखः शोभनावकाशः सुखहेतुर्वा रथो जनाननु स्तोतृजनेषु सोमपेयं सोमपानं प्रत्यूह्याते । उह्यते । अश्विभ्यां नीयते । अतोऽश्विभ्यां यद्दीयते तत्सर्वं रथ एव ददातीति रथं संबोध्य प्रार्थना ॥ अयं । इदोऽय् पुंसि । पा० ७. २. १११. । यद्वा अय पय गतौ । पचाद्यच् । समह । मघमिति धननाम । मघेन सह वर्तत इति समघः । छांदसो वर्णविकारः । यद्वा । मह पूजायां महयति पूजयतीति महो धनं । पचाद्यच् । ऊह्याते । वह प्रापणे । कर्मणि लेट्याडागमः । यजादित्वात्संप्रसारणं । तस्य छांदसो दीर्घः । अदुपदेशाल्लसार्वधातुकानुदात्तत्वे यक एव स्वरः शिष्यते । सोमपेयं । पा पाने । अचो यदिति भावे यत् । ईद्यतीति ईकारादेशः । यतोऽनाव इत्याद्युदात्तत्वं । कृदुत्तर-पदप्रकृतिस्वरत्वं ॥

द्वादशीमृचमाह ॥

अध स्वप्नस्य निर्विदेऽभुंजतश्च रेवतः । उभा ता
बस्रि नश्यतः ॥ १२ ॥

अध । स्वप्नस्य । निः । विदे । अभुंजतः । च । रेवतः ।
उभा । ता । बस्रि । नश्यतः ॥ १२ ॥

अथेदानीं प्रभातसमये स्वप्नस्य स्वप्नं प्रति निर्विदे । निर्विण्णोऽस्मि । तथाभुंजतः परानरक्षतो रेवतो धनवतश्च

पुरुषस्य एवंभूतं पुरुषं प्रत्यपि निर्विण्णोऽस्मि । यतस्तावुभौ वसिं क्षिप्रं नश्यतः । नाशं प्राप्नुतः । स्वप्नदृष्टः पदार्थः प्रातर्नोपलभ्यते कदर्यस्येव धनमभुक्तमदत्तं सत् क्षिप्रमेव नश्यति । तदुभयविषयो निर्वेदो मां बाधत इत्यर्थः । अत्र स्वप्नमात्रस्यासत्त्वप्रतिपादनेन दुःस्वप्नस्याप्यसद्भावः प्रतिपादितः । अत एषा दुःस्वप्ननाशिनीति युज्यते ॥ स्वप्नस्य । क्रियाग्रहणं कर्तव्यमिति कर्मणः संप्रदानत्वाच्चतुर्थ्यर्थे षष्ठी । विन्दे । विद्लृ लाभे । आगमानुशासनस्यानित्यत्वान्नुमभावः । रेवतः । रयिशब्दान्मतुप् । रयेर्मतौ बहुलमिति संप्रसारणं । छंदसीर इति मतुपो वत्वं । रेशब्दाच्च मतुप उदात्तत्वमिति तस्योदात्तत्वं । उभा ता । उभयत्र सुपां सुलुगित्याकारः ॥

॥ इति प्रथमस्याष्टमे त्रयोविंशो वर्गः ॥

॥ इति प्रथमे मंडले सप्तदशोऽनुवाकः ॥

अष्टादशेऽनुवाके षट् सूक्तानि । तत्र कदित्थेति पंचदशर्चं प्रथमं सूक्तं । अत्रानुक्रम्यते । कदित्था पंचोना वैश्वदेवं वेति । अनुवर्तमानः कक्षीवानृषिः । अनादेशपरिभाषया त्रिष्टुप् । विश्वे देवा इंद्रो वा देवता ॥ विनियोगो लैंगिकः ॥

तत्र प्रथमामृचमाह ॥

कदित्था नॄँः पात्रं देवयतां श्रवद्गिरो अंगिरसां तुरण्यन् ।

प्र यदानड्विश आ हर्म्यस्योरु क्रंसते अध्वरे यजत्रः ॥ १ ॥

कत् । इत्था । नॄन् । पात्रं । देवऽयतां । श्रवत् । गिरः । अंगिरसां । तुरण्यन् ।

प्र । यत् । आनट् । विशः । आ । हर्यस्य । उरु । क्रंसते ।

अध्वरे । यजत्रः ॥ १ ॥

नॄँः पात्रं नृपाता नृणां स्तुतेनॄणां पुरुषाणां रक्षणशील इंद्रस्तुरण्यन् गोरूपं धनं प्रेरयन् देवयतां देवं द्योतमानं दानादिगुणयुक्तं वेंद्रमात्मन इच्छतामंगिरसामृषीणामस्माक-मित्येवं प्रयुज्यमाना गिरः स्तुतीः कत् कदा कस्मिंकाले अवत् । शृणुयात् । यद्यदा स इंद्रो हर्यस्य हर्योपलक्षित-रथेण युक्तस्य यजमानस्य संबंधिनो विश ऋत्विग्लक्षणा-न्मनुष्यानाभिमुख्येन प्रानट् । प्राप्नोति । तदानीमध्वरेऽस्मदीये यज्ञे यजत्रो यष्टव्यः सन् उरु बहुलं क्रंसते । क्रमते । स्वयमे-वोत्सहत इत्यर्थः ॥ कत् । कदा । अंत्यलोपश्छांदसः । नॄँः पात्रं । नॄन् पे । पा० ८. ३. १०. । इति संहितायां नकारस्य रुत्वं । अत्रानुनासिकः पूर्वस्य तु वेत्यृकारः सानुनासिकः । पात्रं । पा रक्षणे । ताच्छीलिकस्तृन् । व्यत्ययेन सीरमादेशः । संज्ञापूर्वकस्य विधेरनित्यत्वाद्गुणाभावे यण् । देवयतां । सुप आत्मनः क्यच् । ततो लटः शत्र । शतुरनुम इति विभक्तेरु-दात्तत्वं । अवत् । श्रु श्रवणे । लेट्यडागमः । बहुलं छंदसीति विकरणस्य लुक् । तुरण्यन् । तुरण त्वरायां । कंड्वादिः । आनट् । अश्नोतेर्लङि व्यत्ययेन परस्मैपदं । अशो प्रामे व्यत्ययेन श्नम्विकरणः । व्रश्चादिषत्वे जशत्वं । आडागमः । हर्यस्य । हर्यशब्दादर्शआदित्वादच् । क्रंसते । क्रमु पादविक्षेपे । वृत्ति-सर्गतायनेषु क्रमः । पा० १. ३. ३८. । इत्यात्मनेपदं । लेट्य-

डागमः । सिब्बहुलं लेटीति सिप् । यजतः । अमिनक्षी-
त्यादिना यजेरतन्प्रत्ययः ॥

द्वितीयामृचमाह ॥

स्तंभीद्ध द्यां स धरुणं प्रुषायदृभुर्वाजाय द्रविणं नरो गोः ।
अनु स्वजां महिषश्चक्षत व्रां मेनामश्वस्य परि मातरं गोः ॥२॥

स्तंभीत् । ह । द्यां । सः । धरुणं । प्रुषायत् । ऋभुः । वाजाय ।
द्रविणं । नरः । गोः ।
अनु । स्वऽजां । महिषः । चक्षत । व्रां । मेनां । अश्वस्य ।
परि । मातरं । गोः ॥ २ ॥

स इंद्रो द्यां द्युलोकं स्तंभीद्ध । स्तभ्नाति खलु । तथा गोः
पणिभिरपहृतस्य गोसमूहस्य वज्रस्योदकस्य किरणसमूहस्य
वा नरो नेता । स इंद्र ऋभुः सूर्यात्मनोरु विस्तीर्णं भासमानः
सन् द्रविणं सर्वैः प्राणिभिरभिद्रवणीयं धरुणं । उदकनामैतत् ।
सर्वस्य धारकं वृष्ट्युदकं वाजायान्नार्थं बलार्थं वा प्रुषायत् ।
प्रुष्णाति सिंचति प्रवर्षतीत्यर्थः । अपि च । महिषः । महन्ना-
मैतत् । महान्सूर्यरूपींद्रः स्वजां स्वसकाशादुत्पन्नां व्रां ।
वृणोति तमसा सर्वमाच्छादयतीति व्रा रात्रिः । यद्वा ।
प्रकाशेन वृणोतीति व्रा उषाः । तामनु चक्षत । चष्टिः पश्यति-
कर्मा । अनु पश्चात्पश्यति प्रकाशते । स्वयं प्रौढप्रकाशोऽपि
स्वगत्या निष्पादिताया रात्रेरुषसश्च पश्चादुदेतीत्यर्थः । अपि
चेदमपरमाश्चर्यं यदयमश्वस्य मेनां । स्त्रीनामैतत् । स्त्रियं वडवां

गोर्मातरं जननीं । परिवैंपरीत्ये । विपरीतामकरोत् । कदाचिदिंद्रो लीलयाश्वायां गामुत्पादयामास । तदत्र प्रतिपाद्यते मंत्रांतरे चेंद्रवाक्यरूपेणैतद्विस्पष्टमवगम्यते ॥ धरुणं । धारेर्पिलुक् चेत्युनप्रत्ययः । प्रुषायत् । प्रुष प्लुष स्नेहनसेचनपूरणेषु । क्र्यादिकः । लेट्यडागमः । छंदसि शायजपीत्यत्रावपि श्ना-प्राप्तौ शायजादेशः । नरः । नॄ नये । बहुलवचनाद्दृदीरबिति कर्तर्यप् । चचत । चक्षिङ् व्यक्तायां वाचि । छांदसो लङ् । बहुलं छंदसीति शपो लुगभावः ॥

तृतीयामृचमाह ॥

नक्षद्धवंमरुणीः पूर्व्यं राट् तुरो विशामंगिरसामनु द्यून् ।
तक्षद्वज्रं नियुतं तस्तंभद्द्यां चतुष्पदे नर्याय द्विपादे ॥ ३ ॥

नक्षत् । हवं । अरुणीः । पूर्व्यं । राट् । तुरः । विशां ।
अंगिरसां । अनु । द्यून् ।
तक्षत् । वज्रं । निऽयुतं । तस्तंभत् । द्यां । चतुःऽपदे ।
नर्याय । द्विऽपादे ॥ ३ ॥

अरुणीररुणवर्णा आरोचमाना वोषसो राट् राजयन्प्रकाशयन्सूर्यात्मेंद्रः पूर्व्यं पूर्वैर्ऋषिभिः प्रयुक्तं हवमिदानीमस्माभि क्रियमाणमाह्वानं नक्षत् । नक्षतु । शृणोतु । कीदृशः । अनु द्यून् अनुदिवसं विशां मनुष्याणामंगिरसामृषीणां स्तोतॄणां तुरः । धनस्य प्रेरयिता । अपि च स इंद्रो वज्रं स्वकीयमायुधं नियुतं हंतव्येन सह नितरां युक्तं तक्षत् । अकरोत् । तथा

द्यां द्युलोकं तस्तंभत् । अस्तंभयत् । यथाधो न पतति तथाकरोदित्यर्थः । किमर्थं । नर्याय नृभ्यो हिताय चतुष्पदे गवाश्वादये द्विपादे मनुष्याय च । एतदुभयार्थमित्यर्थः ॥ नक्षत् । नक्ष गतौ । लेट्यडागमः । पूर्व्यं । पूर्वैः कृतमिनियौ चेति यप्रत्ययः । राट् । राजृ दीप्तौ । अस्मादंतर्भावितण्यर्थात् क्विप् । तुरः । तुर त्वरणे । इगुपधलक्षणः कः । ततक्षत् । तक्षु त्वक्षू तनूकरणे । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । तस्तंभत् । ष्टभि स्कभि गतिप्रतिबंधे । अस्माण्णौ तात्रु ङि चङि रूपं । चङ्यन्यतरस्यामित्युपोत्तमस्योदात्तत्वं । पूर्वपदस्यासमानवाक्यस्थत्वान्निघाताभावः । चतुष्पदे । चत्वारः पादा अस्य । संख्यासुपूर्वस्येति पादशब्दस्यांत्यलोपः समासांतः । चतुर्थ्येकवचने भसंज्ञायां पादः पदिति पद्भावः । द्विपादे । पूर्ववत्प्रक्रिया । अयं तु विशेषः । अयस्मयादित्वेन पदत्वाद्भसंज्ञाया अभावे पद्भावाभावः । द्वित्रिभ्यां पाद्दन्मूर्धसु बहुव्रीहावित्युत्तरपदांतोदात्तत्वं ॥

चतुर्थीमृचमाह ॥

अस्य मदे स्वर्यं दा ऋतायापीवृतमुस्रियाणामनीकं ।

यद्ध प्रसर्गे त्रिककुम्निवर्तदप द्रुहो मानुषस्य दुरो वः ॥ ४ ॥

अस्य । मदे । स्वर्यं । दाः । ऋताय । अपिऽवृतं । उस्रियाणां ।

अनीकं ।

यत् । ह । प्रऽसर्गे । त्रिऽककुप् । निऽवर्तत् । अप । द्रुहः ।

मानुषस्य । दुरः । वरिति । वः ॥ ४ ॥

हे इंद्र अस्य सोमस्य पानेन मदे हर्षे सत्यताय यज्ञार्थं स्वयं स्तुत्यमपीवृतं पणिभिर्गुहायां निगूढमुस्रियाणां गवामनीकं संघं दाः । अंगिरोभ्यो दत्तवानसि । उत्तरार्धः परोक्षकृतः । यद्व यदा खलु प्रसर्गे युद्धे त्रिककुप् त्रिषु लोकेषूच्छ्रित इंद्रो निवर्तत् । नितरां वर्तत । तदानीं स इंद्रो द्रुहो द्रुग्धुर्मानुषस्य मनोः संबंधिनोऽसुरस्य पणेः संबंधीनि दुरो द्वाराणि गवामनिर्गमनाय पिहितान्यपवः । अपवृणोति । उद्घाटयति ॥ स्वर्यं । स्वृ शब्दोपतापयोः । ऋहलोर्ण्यत् । संज्ञापूर्वकस्य विधेरनित्यत्वाद्वृद्ध्यभावः । अपीवृतं । अपिपूर्वाद्वृणोतेः कर्मणि निष्ठा । निपातस्य चेति पूर्वपदस्य दीर्घत्वं । गतिरनंतर इति गतेः प्रकृतिस्वरत्वं । प्रसर्गे । प्रकर्षेण सृज्यंते विमुच्यंतेऽस्मिन्निषव इति प्रसर्गः । अधिकरणे घञ् । कृदुत्तरपदप्रकृतिस्वरत्वं । छांदसस्याथादिस्वराभावः । निवर्तत् । वृतु वर्तने । लेट्यडागमः । व्यत्ययेन परस्मैपदं वः । वृञ् करणे । छांदसो लुङि मंत्रे घसेति च्लेर्लुक् । गुणे हल्ङ्यादिलोपः ॥

पंचमीमृचमाह ॥

तुभ्यं पयो यत्पितरावनीतां राधः सुरेतस्तुरणे भुरण्यू ।
शुचि यत्ते रेक्ण आयजंत सबर्दुघायाः पय उस्रियायाः ॥५॥

तुभ्यं । पयः । यत् । पितरौ । अनीतां । राधः । सुऽरेतः ।
तुरणे । भुरण्यू इति ।
शुचि । यत् । ते । रेक्णः । आ । अयजंत । सबःऽदुघायाः ।
पयः । उस्रियायाः ॥ ५ ॥

हे इंद्र तुरणे चिप्रकारिणे तुभ्यं भुरण्यू कृत्स्नं जगत्पोषयंत्यौ पितरावुत्पादयंत्यौ द्यावापृथिव्यौ यद्यदा पयः सांनाय्यलक्षणं हविरनीतां। गोष्वनयतां। न्यधिषातामित्यर्थः। कीदृशं पयः। राधः। राधकं समृद्धिकरं। सुरेतः। शोभनरेतस्कं। कृत्स्नजगदुत्पादनशक्तमित्यर्थः। हविषः सकाशाद्धि जगदुत्पद्यते। अग्नौ प्रास्ताहुतिः सम्यगादित्यमुपतिष्ठते। आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा इति। यद्यदा च द्यावापृथिवीभ्यां गोष्वानीतं शुचि शुद्धं सबर्दुघायाः चीरस्य दोग्ध्र्या उस्रियाया गोः पयो रेक्णः। धननामैतत्। धनवदतिप्रियं। यद्वा। अतिरिक्तं प्रवृद्धं। एवंविधं हविस्तुभ्यमायजंत। आभिमुख्येन यजमानाः प्रायच्छन्। तदानीं दुरो मानुषस्य द्वाराख्यपवृणोतीति पूर्वया संबंधः॥ अनीतां। णीञ् प्रापणे। लङि बहुलं छंदसीति शपो लुक्। सुरेतः। सोमंनसी अलोमोषसी इत्युत्तरपदाद्युदात्तत्वं। तुरणे। तुरण त्वरायां। कंड्वादिः। क्विप् चेति क्विप्। अतोलोपयलोपौ। भुरण्यू। भुरण धारणपोषणयोः। अयमपि कंड्वादिः। औणादिक उप्रत्ययः॥

॥ इति प्रथमस्याष्टमे चतुर्विंशो वर्गः॥

षष्ठीमृचमाह॥

अध प्र जज्ञे तरणिर्ममत्तु प्र रोच्यस्या उषसो न सूरः।

इंदुर्येभिराष्ट स्वेदुंहव्यैः स्रुवेण सिंचन् जरणाभि धाम॥६॥

अध॑ । प्र । जज्ञे । तरणिः । ममत्तु । प्र । रोचि । अस्याः ।
उषसः । न । सूरः ।
इन्दुः । येभिः । आष्ट । स्वेदुऽहव्यैः । स्रुवेण । सिंचन् ।
जरणा । अभि । धाम ॥ ६ ॥

अथेदानीमयमिंद्रः स्तुतिभिः प्रीयमाणः सन् प्रजज्ञे । प्रकर्षेण प्रादुर्बभूव । स तरणिः शत्रूणां तारकोऽस्मान्ममत्तु । मादयतु । स च प्ररोचि । प्रकृष्टं रोचते । तत्र दृष्टांतः । अस्या अस्माभिरिष्यमाणाया उषसः समीपे वर्तमानः सूरो न । सूर्य इव । जरणा जरणीयः स्तोतव्य इंदुः सोमो धामाहवनीयलक्षणं स्थानमभिलक्ष्य स्रुवेण सिंचन् सिच्यमानः सन् स्वेदुहव्यैः स्वभूतसमृद्धहविष्कैर्येभिर्यैरस्माभिराष्ट । आप्त आसीत् । तानस्मान्मादयत्वित्यर्थः ॥ जज्ञे जनी प्रादुर्भावे । लिटि गमहनेत्युपधालोपः । ममत्तु । मदी हर्षे । बहुलं छंदसीति विकरणस्य श्लुः । रोचि । रुच दीप्तौ । छांदसो वर्तमाने लुङ् । व्यत्ययेन च्लेश्चिणादेशः । आष्ट । अश भोजने । कर्मणि लङि बहुलं छंदसीति विकरणस्य लुक् । व्रश्चादिषत्वे ष्टुत्वं । आडागमः । यद्वृत्तान्नित्यमिति निघातप्रतिषेधः । स्वेदुहव्यैः । इदि परमैश्वर्ये । औणादिकः उप्रत्ययः । अनित्यमागमशासनमिति नुमभावः । इंदूनि प्रभूतानि च तानि हव्यानि स्वभूतानि च हव्यानि येषां । यद्वा । ञिइंधी दीप्तौ । स्वायत्तानींदूनीद्धानि हव्यानि येषां । अथवा । स्वभूतमिदं पुरोवर्ति हव्यं हविर्येषां ते तथोक्ताः । पृषोदरादि-

त्वादभिमतरूपसिद्धिः। सिंचन्। षिच् चरणे। व्यत्ययेन कर्मणि कर्तृप्रत्ययः। शे मुचादीनामिति नुम्। जरणा। जरतिः स्तुतिकर्मा। तस्मात्कर्मणि ल्युट्। सुपां सुलुगिति विभक्तेराकारः। व्यत्ययेन लित्स्वराभावः॥

सप्तमीमृचमाह॥

स्विध्मा यद्वनधितिरपस्यात्सूरो अध्वरे परि रोधना गोः।
यद्ध प्रभासि कृत्व्याँ अनु द्यूननर्विशे पश्विषे तुराय॥७॥

सुऽइध्मा। यत्। वनऽधितिः। अपस्यात्। सूरः। अध्वरे।
परि। रोधना। गोः।
यत्। ह। प्रऽभासि। कृत्व्यान्। अनु। द्यून्। अनर्विशे।
पश्वऽइषे। तुराय॥७॥

यदि स्विध्मा सुदीप्तास्या वनधितिर्वने छेत्तव्ये वृक्षसमूहे निधातव्या शस्त्ररपस्यात्। अपो विशसनात्मकं स्वकीयं कर्म कर्तुमिच्छेत् तदानीं सूर प्रेरकोऽध्वर्युरध्वरे यज्ञे गोः पशो रोधना रोधनाय यूपे नियोजनाय परि भवति। समर्थो भवति। यद्वा। स्विध्मा सूर्यकिरणैः सुदीप्ता वनधितिः। वनमुदकमस्यां धीयत इति वनधितिर्मेघमाला। सा यद्यदापस्यात् अपः प्रवर्षणलक्षणं कर्म करोति। तदानीं सूरः प्रेरक इंद्रोऽध्वरे यज्ञस्य निमित्तभूतेऽध्वर्तव्येऽहिंसितव्येऽन्तरिक्षे वर्तमानः सन् गोर्वृष्ट्युदकस्य रोधना रोधनान्यावरणानि परि परितो निवारयतीति शेषः। उत्तरार्द्धः प्रत्यक्षकृतः। हे इंद्र सूर्यात्मना वर्तमानस्त्वं कृत्व्यान्। कृत्वीति कर्मनाम।

कर्मसु साधून् द्यून् दिवसाननुलक्ष्य यद्व यदा खलु प्रभासि । प्रकर्षेण दीप्यसे । तदानीमनर्विशेऽनसा शकटेनेंधनाद्याहरणायारण्यं प्रविशते । यद्वा । गंतव्यं स्थलं प्रति गंतुमशक्ताय पुरुषाय पश्चिषे पशून्प्रेरयते तुराय त्वरमाणाय गोपालाय च सिध्येदभिमतमिति वाक्यशेषः ॥ सिध्मा । शोभनमिध्मं दीप्तमास्यं दीप्तिर्वा यस्या सा तथोक्ता । नञ्सुभ्यामित्युत्तरपदांतोदात्तत्वं । अपस्यात् । अपस्शब्दात्सुप आत्मनः क्यच् । लेप्याडागमः । रोधना । रुधिर् आवरणे । ल्युट् चेति भावे ल्युट् । शेश्छंदसि बहुलमिति शेर्लोपः । अनर्विशे । अनसा विशति प्राप्नोतीत्यनर्विट् । विशतेः क्विप् । अहरादीनां पत्यादिषूपसंख्यानमिति सकारस्य रेफादेशः । यद्वा । अर्तेः कर्मणि विच् । अरं गंतव्यं प्रति विशति प्राप्नोतीत्यर्विट् । न अर्विट् अनर्विट् । अव्ययपूर्वपदप्रकृतिस्वरत्वं । अत एव व्युत्पत्त्यनवधारणादनवग्रहः । पश्चिषे । इष गतौ । अस्मादंतर्भावितण्यर्थात् क्विप् ॥

अष्टमीमृचमाह ॥

अष्टा महो दिव आदो हरी इह द्युम्नासाहमभि
योधान उत्सं ।
हरिं यत्ते मंदिनं दुक्षन्वृधे गोरभसमद्रिभिर्वाताप्यं ॥ ८ ॥

अष्टा । महः । दिवः । आदः । हरी इति । इह ।
द्युम्नऽसहं । अभि । योधानः । उत्सं ।

हरिं । यत् । ते । मंदिनं । धुक्षन् । वृधे । गोऽरंभसं ।

अद्रिंभिः । वाताप्यं ॥ ८ ॥

हे इंद्र महो महतो दिवो मदकरस्य सोमस्याष्टा भोक्तारौ हरी स्वकीयावश्वाविहास्मिन्कर्मण्यादः पौतशेषं सोमं पायय। तथा द्युम्नासाहं द्युम्नस्यास्मदीयस्य धनस्याभिभवितारमुत्कृ-सुतस्तावयितारं शत्रुं योधानो योधनशीलस्त्वमभिभव। यद्यदा ते तव वृधे वर्धनाय हरिं मनोहरं मंदिनं मदकरं गोरभसं। अत्र गोशब्दः पयसि वर्तते। पयो बलं। तद्वेगवंतं वीर्य-वंतमित्यर्थः। वाताप्यं। वातेन प्राप्तव्यं वाततुल्येन शीघ्र-कारिणा त्वया पातव्यमित्यर्थः। एवंविधं सोममद्रिभिर्ग्राव-भिर्धुक्षन्। दुहंति। ऋत्विजोऽभिषुण्वंति तदानीमष्टेति पूर्वत्र संबंधः॥ अष्टा। अश भोजने। तृच्। आगमानुशासन-स्यानित्यत्वादिडभावः। धुक्षन्। पदकालीनो भष्भाव-श्छांदसः॥

नवमोमृचमाह॥

त्वमायसं प्रति वर्तयो गोर्दिवो अश्मानमुपनीतमृभ्वा।

कुत्साय यत्र पुरुहूत वन्वञ्छुष्णमनंतैः परियासि वधैः॥९॥

त्वं। आयसं। प्रति। वर्तयः। गोः। दिवः। अश्मानं।

उपऽनीतं। ऋभ्वा।

कुत्साय। यत्र। पुरुऽहूत। वन्वन्। शुष्णं। अनंतैः।

परिऽयासि। वधैः॥ ९॥

हे इंद्र त्वं गोर्गतुः शुष्णस्यासुरस्य वधार्थमायसमयोमयं वज्रं प्रति वर्तयः । आभिमुख्येन व्यसृजः । कीदृशं वज्रं । दिवो द्युलोकादृत्वा शोभेन त्वष्ट्रोपनीतं । आनीतं । अश्मानं । शीघ्रं शत्रोर्व्यापकं । यत्र यदा हे पुरुहूत पुरुभिर्बहुभिः स्तोतृभिराहूतेंद्र कुत्सायैतन्नाम्न ऋषये शुष्णं शोषकमसुरमनंतैर्निरवधिकैर्वधैर्हननसाधनैरायुधैर्वन्वन् हिंसन् परियासि । परितो गच्छसि । तदानीं तद्वधार्थं वज्रं प्रत्यवर्तय इत्यर्थः ॥ अश्मानं । अशू व्याप्तौ । अन्येभ्योऽपि दृश्यंत इति मनिन् । ऋत्वा । जसादिषु छंदसि वावचनमिति नाभावस्य विकल्पितत्वादभावे यणादेशः । वन्वन् । वनु याचने । अत्र हिंसार्थः । तथा च यास्कः । वनुष्यतिर्हंतिकर्मानवगतसंस्कारो भवतीति । वधैः । हनस्य वध इति हंतेः करणेऽप् तत्संनियोगेन वधादेशश्च । सचादंतोऽंतोदात्तः । तस्यातो लोपे सत्युदात्तनिवृत्तिस्वरेण प्रत्ययस्योदात्तत्वं ॥

दशमीमृचमाह ॥

पुरा यत्सूरस्तमसो अपीतेस्तमद्रिवः फलिगं हेतिमस्य ।
शुष्णस्य चित्परिहितं यदोजो दिवस्परि सुग्रथितं तदादः ॥ १० ॥

पुरा । यत् । सूरः । तमसः । अपिऽइतेः । तं । अद्रिऽवः । फलिऽगं । हेतिं । अस्य ।
शुष्णस्य । चित् । परिऽहितं । यत् । ओजः । दिवः । परि । सुऽग्रथितं । तत् । आ । अदः ॥ १० ॥

पुरा यद्यदा सूरः सूर्यस्तमसस्तमोरूपस्य शुष्णस्यासुरस्यापीतेः संग्रामान्मुक्तोऽभवदीति शेषः । तदानीं हे अद्रिवः । आदृणात्यनेनेत्यद्रिर्वज्रः । तद्वन्निंद्र तं फलिगं । मेघनामैतत् । मेघरूपेणावृण्वंतं हेतिं हंतारं शुष्णमसुरमस्य । निरस्तितवानसि । यद्वा । अस्य शुष्णस्यासुरस्य हेतिं हननसाधनमायुधं फलिगं मेघलक्षणं प्राभांक्षीरिति शेषः । तथा शुष्णस्य चित् शोषयितुरसुरस्य च यदोज आच्छादकं बलं दिवस्परि द्योतमानस्य सूर्यस्योपरि परिह्वितमाच्छादितं सुग्रथितं सुष्ठु सूर्यं सक्तं तदोजस्तस्मात्सूर्यादादः । आदृणाः । विश्लिष्टं कृतवानसीत्यर्थः ॥ अद्रिवः । छंदसीर इति मतुपो वत्वं । मतुवसो रुरिति नकारस्य रुत्वं । हेतिं । कृत्यल्युटो बहुलमिति बहुलवचनाद्धंतेः कर्तरि क्तिन् । ऊतियूतीत्यादौ निपातनाद्रूपसिद्धिरंतोदात्तत्वं च । अस्य । असु क्षेपणे । लटः सिप् । तस्य व्यत्ययेन ह्यादेशः । अतो हेरिति हेर्लुक् । दिवस्परि । पंचम्याः परावध्यर्थे इति विसर्जनीयस्य सत्वं । अदः । दॄ विदारणे । लङि सिप् । बहुलं छंदसीति विकरणस्य लुक् । गुणे हल्ङ्याब्भ्य इति सिलोपः ॥

॥ इति प्रथमस्याष्टमे पंचविंशो वर्गः ॥

एकादशीमृचमाह ॥

अनु त्वा मही पाजसी अचक्रे द्यावाक्षामा मदतामिंद्र कर्मन् ।

त्वं वृत्रमाशयानं सिरासु महो वज्रेण सिष्वपो वराहुं ॥११॥

अनु । त्वा । मही इति । पाजसी इति । अचक्रे इति ।
द्यावाक्षामा । मदतां । इंद्र । कर्मन् ।

त्वं । वृत्रं । आऽशयानं । सिरासु । महः । वज्रेण । सिस्वपः ।
वराहुं ॥ ११ ॥

हे इंद्र मही मह्यौ महत्यौ पाजसी बलवत्यावचक्रे अचक्रमाणे सर्वत्र व्याप्य वर्तमाने द्यावाक्षामा द्यावापृथिव्यौ कर्मन् वृत्रवधादिलक्षणे कर्मणि प्रवृत्तं त्वामनु मदतां । हृष्टमकुरुतां । अन्वमन्येतां वा । तथा च तैत्तिरीयकं । स आभ्यामेव प्रसूत इंद्रो वृत्रमहन्निति । तदनंतरं त्वमाशयानं आ समंताद्व्याप्य वर्तमानं वराहुं वराहारं वृत्रमसुरं सिरासु सरणशीलास्वप्सु महो महता वज्रेण हत्वा सिष्वपः । अस्वापयः । पातितवानित्यर्थः ॥ मही । सुपां सुलुगिति विभक्तेः पूर्वसवर्णदीर्घः । पाजसी । पाजस्शब्दो बलवाचको लक्षणयात्र तद्वति वर्तते । इयाडियाजीकाराणामुपसंख्यानमिति विभक्तेरीकारादेशः । द्यावाक्षामा । द्यौश्च क्षामा च । दिवो द्यावेति द्यावादेशः । देवताद्वंद्वे चेत्युभयपदप्रकृतिस्वरत्वं । सुपां सुलुगिति विभक्तेर्लुक् । मदतां । मदी हर्षे । व्यत्ययेन शप् । बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । महः । महतः । करणे शेषत्वेन विवक्षिते षष्ठी । अच्छब्दलोपश्छांदसः । सिष्वपः । ञिष्वप् शये । अस्मात्ण्यंतात् लुङि चङि संज्ञापूर्वकस्य विधेरनित्यत्वात् स्वापेश्चङि । पा० ६. १. १८. । इति संप्रसारणं न क्रियते ॥

द्वादशीमृचमाह ॥

त्वमिंद्र नर्यो याँ अवो नृन्तिष्ठा वातस्य सुयुजो वहिष्ठान् ।

यं ते काव्य उशना मंदिनं दाद् वृत्रहणं पार्यं ततक्ष वज्रं ॥१२॥

त्वं । इंद्र । नर्यः । यान् । अवः । नृन् । तिष्ठं । वातस्य ।

सुऽयुजः । वहिष्ठान् ।

यं । ते । काव्यः । उशना । मंदिनं । दात् । वृत्रऽहनं ।

पार्यं । ततक्ष । वज्रं ॥ १२ ॥

हे इंद्र नर्यो नृभ्यो हितस्त्वं यान्नृन्नेतॄनश्वानवः । अवसि रक्षसि । तान्वातस्य तुल्यान् तद्वच्छीघ्रं गच्छतः सुयुजः शोभनं रथेन युज्यमानान्वहिष्ठान् अतिशयेन वोढ़नश्वान्तिष्ठ । आरोहेत्यर्थः । काव्यः कवेः पुत्र उशना मंदिनं मदकरं यं वज्रं ते तुभ्यं दात् । दत्तवान् । तं वज्रं वृत्रहणं वृत्रस्यासुरस्य घातकं पार्यं शत्रूणां पारणेऽतिक्रमणे समर्थं च ततक्ष । तनूकृतवानसि ॥ अवः । अवतेर्लंय्यडागमः । इतश्च लोप इतीकारलोपः । वहिष्ठान् । वोढृशब्दात्तुश्छंदसीतीष्ठन् । तुरिष्ठेमेयःस्विति तृलोपः । पार्यं । पार तीर कर्मसमाप्तौ । अस्माण्ण्यंतादचो यदिति यत् । ततक्ष । तक्षू त्वक्षू तनूकरणे । पुरुषव्यत्ययः ॥

त्रयोदशीमृचमाह ॥

त्वं सूरो हरितो रामयो नॄन्भरच्चक्रमेतशो नायमिंद्र ।

प्रास्य पारं नवतिं नाव्यानामपि कर्तमवर्तयोऽयज्यून् ॥१३॥

त्वं । सूरः । हरितः । रमयः । नृन् । भरत् । चक्रं ।

एतशः । न । अयं । इंद्र ।

प्रऽअस्य । पारं । नवतिं । नाव्यानां । अपि । कर्तं ।

अवर्तयः । अयज्यून् ॥ १३ ॥

हे इंद्र सूरः सूर्यात्मना वर्तमानस्त्वं हरितो हरिद्वर्णा-न्नेतृनश्वान् । यद्वा रसहरणशीलान् रश्मीन् रामयः । उपारमयः । एतशो न । एतश इति सूर्याश्वस्याख्या । तथा च श्रूयते । एतशेन त्वा सूर्यो देवता गमयत्विति । नशब्द-श्चार्थे । एतशश्च रथस्य चक्रं भरत् । प्रावहत् । अपि च । त्वं नाव्यानां नावा तार्याणां नदीनां नवतिं नवतिसंख्या-मतीत्य वर्तमानं पारं तीरदेशं । सप्तम्यर्थे द्वितीया । तीरदेशे-ऽयज्यून् अयजमानान् यज्ञविहीनानसुरादीन् प्रास्य प्रक्षिप्य तत्र कर्तमवर्तयः । कर्तव्यमपि कृत्वा तानयजमानानवर्तयः । प्रापयः ॥ रामयः । लङि बहुलं छंदस्यमाङ्योगेऽपीत्यडभावः । अन्येषामपि दृश्यत इति सांहितिको दीर्घः । प्रास्य । असु क्षेपणे । अस्मात् ल्यपि रूपं । नाव्यानां । नौवयोधर्मेत्यादिना यत् । तित्स्वरित इति स्वरितत्वं ॥

चतुर्दशीमृचमाह ॥

त्वं नो अस्या इंद्र दुर्हणायाः पाहि वज्रिवो दुरितादभीके ।

प्र नो वाजान्रथ्यो३ अश्वबुध्यानिषे यंधि श्रवसे सूनृतायै ॥ १४ ॥

त्वं। नः। अस्याः। इंद्र। दुःऽहनायाः। पाहि। वज्रिऽवः।
दुःऽइतात्। अभीके।
प्र। नः। वाजान्। रथ्यः। अश्वंऽबुध्यान्। इषे। यंधि।
श्रवसे। सूनृतायै॥ १४॥

हे वज्रिवो वज्रवन्निंद्र त्वं दुर्हणाया दुःखेन हंतव्याया अस्या अप्रवृत्तेर्दारिद्र्यान्नोऽस्मान्पाहि। रक्ष। तथा। दुरितात्पापादभीकेऽभिप्राप्ते समीपवर्तिनि संग्रामेऽस्मान्रक्ष। अपि च। नोऽस्मभ्यं रथ्या रथयुक्तान् अश्वबुध्यान् अश्वानां बोधकान्। अश्वा यावन्निर्लभ्यंते तावदित्यर्थः। यद्वा। अश्वबुध्यान्। छांदसो वर्णविकारः। अश्वमूलान् अश्वप्रमुखानित्यर्थः। सर्वं हि धनमश्वमूलं दासापवर्गं। यथोक्तं दासप्रवर्गं रयिमश्वबुध्यमिति। एवंविधान्वाजान् धनानि प्रयंधि। प्रयच्छ। किमर्थं। इषे। अन्नार्थं। श्रवसे। कीर्त्यर्थं। सूनृतायै। सूनृता प्रियसत्यात्मिका वाक्। तदर्थं च। दुर्हणायाः। ईषद्दुःसुष्विति हंतेः कर्मणि खल्। पाहि। पादादित्वान्निघाताभावः। वज्रिवः। वज्रोऽस्यास्तीति वज्री हस्तः। तद्वान् वज्रिवान्। छंदसीर इति मतुपो वत्वं। संबुद्धौ मतुवसो रुरिति नकारस्य रुत्वं। रथ्यः। छांदसोवनिपातित्वात् इति रथशब्दान्मत्वर्थीय ईकारः। यंधि। यम उपरमे। बहुलं छंदसीति विकरणस्य लुक्। वा छंदसीति हेः पित्त्वेन ङित्त्वाभावादङितश्चेति हेर्धिः॥

पंचदशीमृचमाह ॥

मा सा ते अस्मत्सुमतिर्वि दसद्वाजप्रमहः समिषो वरंत ।
आ नो भज मघवन्गोष्वर्यो मंहिष्ठास्ते सधमादः स्याम ॥ १५ ॥

मा । सा । ते । अस्मत् । सुऽमतिः । वि । दसत् । वाजऽप्रमहः ।
सं । इषः । वरंत ।
आ । नः । भज । मघऽवन् । गोऽषु । अर्यः । मंहिष्ठाः ।
ते । सधऽमादः । स्याम ॥ १५ ॥

हे वाजप्रमहः । वाजैर्धनैः प्रमहनीयेंद्र ते त्वदीया सा सुमतिः शोभनानुग्रहरूपा बुद्धिरस्मत् अस्मासु मा विदसत् । मा विशुष्यतु । तथेषोऽन्नान्यस्मान् संवरंत । संवृताःकुर्वंतु । हे मघवन् धनवन्निंद्र अर्यो धनपतिस्त्वं नोऽस्मान् गोष्वाभज । प्रापय । ते तव मंहिष्ठा अतिशयेन स्तुतिभिः प्रवर्धयितारो वयं सधमादः । स्याम । पुत्रपौत्रादिभिः सह माद्यंतो भवेम ॥ अस्मत् । सुपां सुलुगिति सप्तम्या लुक् । दसत् । दसु उपक्षये । माङि लुङि पुषादित्वादङ् । वाजप्रमहः । वाजैर्धनैः प्रकृष्टं महस्तेजो यस्य च तथोक्तः । पादादित्वादाष्टमिकनिघाताभावः । षाष्ठिकमामंत्रिताद्युदात्तत्वं । वरंत । वृञ् वरणे । व्यत्ययेन शप् । गोषु । सावेकाच इति प्राप्तस्य विभक्त्युदात्तत्वस्य न गोश्वन् साववर्णेति प्रतिषेधः । अर्यः स्वामिवैश्ययोरिति निपात्यते । अर्यस्य स्वाम्याख्या चेदित्यंतोदात्तत्वं । मंहिष्ठाः । महि वृद्धौ । इदित्वान्नुम् । अस्मादंतर्भावितण्यर्थात्तृच् । तुश्छंदसीतीष्ठन् ।

तुरिष्ठेमेयःस्विति वलोपः । सधमादः । मद तृप्तियोगे । चौरादिकः । सह मादयंते तृप्ता भवंतीति सधमादः । क्विप् चेति क्विप् । जस् । सध मादस्थयोश्छंदसीति सहस्य सधादेशः ॥

॥ इति प्रथमस्याष्टमे षड्विंशो वर्गः ॥

वेदार्थस्य प्रकाशेन तमो हार्दं निवारयन् ।
पुमर्थांश्चतुरो देयाद्विद्यातीर्थमहेश्वरः ॥

इति श्रीमद्राजाधिराजपरमेश्वरवैदिकमार्गप्रवर्तकश्रीवीर-बुक्कभूपालसाम्राज्य धुरंधरेण सायणाचार्येण विरचिते माधवीये वेदार्थप्रकाशे ऋक्संहिताभाष्ये प्रथमाष्टकेऽष्टमोऽध्यायः समाप्तः ॥

॥ प्रथमाष्टकः समाप्तः ॥

पुस्तक-वितरण की तिथि नीचे अंकित है इस तिथि सहित १५ वें दिन तक यह पुस्तक पुस्तकालय में वापिस आ जानी चाहिए। अन्यथा ५ नये पैसे प्रतिदिन के हिसाब से विलम्ब दण्ड लगेगा।